# Taittiriya Brahmanam

# તૈત્તિરીય-બ્રાહ્મણમ્

## Document Information

Text title : Taittiriya Brahmanam

File name : taittirIyabrAhmaNam.itx

Category : veda, svara

Location : doc_veda

Transliterated by : Muralidhara B A muraliba at gmail.com

Description-comments : See Samhita and Aranyakam as separate files

Acknowledge-Permission: Professor Anathakrishna

Latest update : March 21, 2018, May 30, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 7, 2023

*sanskritdocuments.org*

Taittiriya Brahmanam

# તૈત્તિરીય-બ્રાહ્મણમ્

# તૈત્તિરીય-બ્રાહ્મણમ્

## ॥ પ્રથમં અષ્ટકમ્ ॥

॥ શ્રી ગુરુભ્યો નમઃ ॥ હરિઃ ઓ(૪)મ્ ॥

### પ્રથમાષ્ટકે પ્રથમઃ પ્રપાઠકઃ ૧

૧ બ્રહ્મ સંધત્તં તન્મે જિન્વતમ્ । ક્ષત્રꣳ સંધત્તં તન્મે જિન્વતમ્
। ઇષꣳ સંધત્તં તાં મે જિન્વતમ્ । ઊર્જꣳ સંધત્તં તાં મે
જિન્વતમ્ । રયિꣳ સંધત્તં તાં મે જિન્વતમ્ । પુષ્ટિꣳ સંધત્તં
તાં મે જિન્વતમ્ । પ્રજાꣳ સંધત્તં તાં મે જિન્વતમ્ । પશૂન્થ્સંધત્તં
તાન્મે જિન્વતમ્ । સ્તુતોસિ જનધાઃ । દેવાસ્ત્વા શુક્રપાઃ પ્રણયન્તુ ॥ ૧। ૧। ૧। ૧॥

૨ સુવીરાઃ પ્રજાઃ પ્રજનયન્પરીહિ । શુક્રઃ શુક્રશોચિષા ।
સ્તુતોસિ જનધાઃ । દેવાસ્ત્વા મન્થિપાઃ પ્રણયન્તુ । સુપ્રજાઃ પ્રજાઃ
પ્રજનયન્પરીહિ । મન્થી મન્થિશોચિષા । સંજગ્માનૌ દિવ આ
પૃથિવ્યાઽઽયુઃ । સંધત્તં તન્મે જિન્વતમ્ । પ્રાણꣳ સંધત્તં
તં મે જિન્વતમ્ । અપાનꣳ સંધત્તં તં મે જિન્વતમ્ ॥ ૧। ૧। ૧। ૨॥

૩ વ્યાનꣳ સંધત્તં તં મે જિન્વતમ્ । ચક્ષુઃ સંધત્તં તન્મે જિન્વતમ્ ।
શ્રોત્રꣳ સંધત્તં તન્મે જિન્વતમ્ । મનઃ સંધત્તં તન્મે જિન્વતમ્
। વાચꣳ સંધત્તં તાં મે જિન્વતમ્ । આયુઃ સ્થ આયુર્મે ધત્તમ્ ।
આયુર્યજ્ઞાય ધત્તમ્ । આયુર્યજ્ઞપતયે ધત્તમ્ । પ્રાણઃ સ્થઃ પ્રાણં મે
ધત્તમ્ । પ્રાણં યજ્ઞાય ધત્તમ્ ॥ ૧। ૧। ૧। ૩॥

૪ પ્રાણં યજ્ઞપતયે ધત્તમ્ । ચક્ષુઃ સ્થશ્ચક્ષુર્મે ધત્તમ્ ।
ચક્ષુર્યજ્ઞાય ધત્તમ્ । ચક્ષુર્યજ્ઞપતયે ધત્તમ્ । શ્રોત્રગ્ગ્ સ્થઃ

શ્રોત્રં મે ધત્તમ્ । શ્રોત્રં યજ્ઞાય ધત્તમ્ । શ્રોત્રં યજ્ઞપતયે ધત્તમ્ ।
તૌ દેવૌ શુક્રામન્થિનૌ । કલ્પયતં દૈવીર્વિશઃ । કલ્પયતં માનુષીઃ
॥ ૧। ૧। ૧। ૪॥

૫ ઇષમૂર્જમસ્માસુ ધત્તમ્ । પ્રાણાન્પશુષુ । પ્રજાં મયિ ચ
યજમાને ચ । નિરસ્તઃ શણ્ડઃ । નિરસ્તો મર્કઃ । અપનુત્તૌ
શણ્ડામર્કૌ સહામુના । શુક્રસ્ય સમિદસિ । મન્થિનઃ સમિદસિ ।
સ પ્રથમઃ સંકૃતિર્વિશ્વકર્મા । સ પ્રથમો મિત્રો વરુણો અગ્નિઃ ।
સ પ્રથમો બૃહસ્પતિશ્ચિકિત્વાન્ । તસ્મા ઇન્દ્રાય સુતમાજુહોમિ ॥ ૧। ૧। ૧। ૫॥ નયન્ત્વપાનꣳ સંધત્તં તં મે જિન્વતં પ્રાણં યજ્ઞાય
ધત્તં માનુષીરગ્નિર્દ્વે ચ ॥ ૧॥ બ્રહ્મ ક્ષત્રં તદિષમૂર્જꣳ રયિં
પુષ્ટિં પ્રજાં તાં પશૂન્તાન્ ॥ સંધત્તં તત્પ્રાણમપાનં વ્યાનં તં
ચક્ષુઃ શ્રોત્રં મનસ્તદ્વાચં તામ્ । ઇષાદિ પઞ્ચકે વાચં તાં મે ।
પશૂન્થ્સન્ધત્તં તાન્મે પ્રાણાદિ ત્રિતયે તં મે । અન્યત્ર તન્મે ॥

૬ કૃત્તિકાસ્વગ્નિમાદધીત । એતદ્વા અગ્નેર્નક્ષત્રમ્ । યત્કૃત્તિકાઃ ।
સ્વાયામેવૈનં દેવતાયામાધાય । બ્રહ્મવર્ચસી ભવતિ । મુખં
વા એતન્નક્ષત્રાણામ્ । યત્કૃત્તિકાઃ । યઃ કૃત્તિકાસ્વગ્નિમાધત્તે । મુખ્ય
એવ ભવતિ । અથો ખલુ ॥ ૧। ૧। ૨। ૧॥

૭ અગ્નિનક્ષત્રમિત્યપચાયન્તિ । ગૃહાન્ હ દાહુકો ભવતિ । પ્રજાપતી
રોહિણ્યામગ્નિમસૃજત । તં દેવા રોહિણ્યામાદધત । તતો વૈ તે
સર્વાન્રોહાનરોહન્ । તદ્રોહિણ્યૈ રોહિણિત્વમ્ । યો રોહિણ્યામગ્નિમાધત્તે ।
ઋધ્નોત્યેવ । સર્વાન્રોહાન્રોહતિ । દેવા વૈ ભદ્રાઃ સન્તોઽગ્નિમાધિથ્સન્ત ॥
૧। ૧। ૨। ૨॥

૮ તેષામનાહિતોઽગ્નિરાસીત્ । અથૈભ્યો વામં વસ્વપાક્રામત્ । તે
પુનર્વસ્વોરાદધત । તતો વૈ તાન્, વામં વસૂપાવર્તત । યઃ પુરા ભદ્રઃ
સન્પાપીયાન્થ્સ્યાત્ । સ પુનર્વસ્વોરગ્નિમાદધીત । પુનરેવૈનં વામં
વસૂપાવર્તતે । ભદ્રો ભવતિ । યઃ કામયેત દાનકામા મે પ્રજાઃ સ્યુરિતિ
। સ પૂર્વયોઃ ફલ્ગુન્યોરગ્નિમાદધીત ॥ ૧। ૧। ૨। ૩॥

૯ અર્યમ્ણો વા એતન્નક્ષત્રમ્ । યત્પૂર્વે ફલ્ગુની । અર્યમેતિ તમાહુર્યો
દદાતિ । દાનકામા અસ્મૈ પ્રજા ભવન્તિ । યઃ કામયેત ભગી સ્યામિતિ । સ
ઉત્તરયોઃ ફલ્ગુન્યોરગ્નિમાદધીત । ભગસ્ય વા એતન્નક્ષત્રમ્ । યદુત્તરે
ફલ્ગુની । ભગ્યેવ ભવતિ । કાલકઞ્જા વૈ નામાસુરા આસન્ ॥ ૧। ૧। ૨। ૪॥

૧૦ તે સુવર્ગાય લોકાયાગ્નિમચિન્વત । પુરુષ ઇષ્ટકામુપાદધાત્પુરુષ
ઇષ્ટકામ્ । સ ઇન્દ્રો બ્રાહ્મણો બ્રુવાણ ઇષ્ટકામુપાધત્ત । એષા મે
ચિત્રા નામેતિ । તે સુવર્ગં લોકમાપ્રારોહન્ । સ ઇન્દ્ર ઇષ્ટકામાવૃહત્ ।
તેઽવાકીર્યન્ત । યેઽવાકીર્યન્ત । ત ઊર્ણાવભયોઽભવન્ । દ્વાવુદપતતામ્ ॥ ૧। ૧। ૨। ૫॥

૧૧ તૌ દિવ્યૌ શ્વાનાવભવતામ્ । યો ભ્રાતૃવ્યવાન્થ્સ્યાત્ । સ
ચિત્રાયામગ્નિમાદધીત । અવકીર્યૈવ ભ્રાતૃવ્યાન્ । ઓજો બલમિન્દ્રિયં
વીર્યમાત્મન્ધત્તે । વસન્તા બ્રાહ્મણોઽગ્નિમાદધીત । વસન્તો વૈ
બ્રાહ્મણસ્યર્તુઃ । સ્વ એવૈનમૃતાવાધાય । બ્રહ્મવર્ચસી ભવતિ ।
મુખં વા એતદૃતૂનામ્ ॥ ૧। ૧। ૨। ૬॥

૧૨ યદ્વસન્તઃ । યો વસન્તાઽગ્નિમાધત્તે । મુખ્ય એવ ભવતિ । અથો
યોનિમન્તમેવૈનં પ્રજાતમાધત્તે । ગ્રીષ્મે રાજન્ય આદધીત । ગ્રીષ્મો
વૈ રાજન્યસ્યર્તુઃ । સ્વ એવૈનમૃતાવાધાય । ઇન્દ્રિયાવી ભવતિ ।
શરદિ વૈશ્ય આદધીત । શરદ્વૈ વૈશ્યસ્યર્તુઃ ॥ ૧। ૧। ૨। ૭॥

૧૩ સ્વ એવેનમૃતાવાધાય । પશુમાન્ભવતિ । ન પૂર્વયોઃ
ફલ્ગુન્યોરગ્નિમાદધીત । એષા વૈ જઘન્યા રાત્રિઃ સંવથ્સરસ્ય । યત્પૂર્વે
ફલ્ગુની । પૃષ્ટિત એવ સંવથ્સરસ્યાગ્નિમાધાય । પાપીયાન્ભવતિ ।
ઉત્તરયોરાદધીત । એષા વૈ પ્રથમા રાત્રિઃ સંવથ્સરસ્ય । યદુત્તરે
ફલ્ગુની । મુખત એવ સંવથ્સરસ્યાગ્નિમાધાય । વસીયાન્ભવતિ ।
અથો ખલુ । યદૈવૈનં યજ્ઞ ઉપનમેત્ । અથાદધીત । સૈવાસ્યર્દ્ધિઃ
॥ ૧। ૧। ૨। ૮॥ ખલ્વાધિથ્સન્ત ફલ્ગુન્યોરગ્નિમાદધીતાસન્નપતતામૃતૂનાં
વૈશ્યસ્યર્તુરુત્તરે ફલ્ગુની ષટ્ચ ॥ ૨॥

૧૪ ઉદ્ધન્તિ । યદેવાસ્યા અમેધ્યમ્ । તદપ હન્તિ । અપોઽવોક્ષતિ શાન્ત્યૈ
। સિકતા નિવપતિ । એતદ્વા અગ્નેર્વૈશ્વાનરસ્ય રૂપમ્ । રૂપેણૈવ

વૈશ્વાનરમવરુન્ધે । ઊષાન્નિવપતિ । પુષ્ટિર્વા એષા પ્રજનનમ્ । યદૂષાઃ
॥ ૧। ૧। ૩। ૧॥

૧૫ પુષ્ટ્યામેવ પ્રજનનેઽગ્નિમાધત્તે । અથો સંજ્ઞાન એવ ।
સંજ્ઞાનગ્ગ્ હ્યેતત્પશૂનામ્ । યદૂષાઃ । દ્યાવાપૃથિવી સહાસ્તામ્ ।
તે વિયતી અબ્રૂતામ્ । અસ્ત્વેવ નૌ સહ યજ્ઞિયમિતિ । યદમુષ્યા
યજ્ઞિયમાસીત્ । તદસ્યામદધાત્ । ત ઊષા અભવન્ ॥ ૧। ૧। ૩। ૨॥

૧૬ યદસ્યા યજ્ઞિયમાસીત્ । તદમુષ્યામદધાત્ । તદદશ્ચન્દ્રમસિ કૃષ્ણમ્
। ઊષાન્નિવપન્નદો ધ્યાયેત્ । દ્યાવાપૃથિવ્યોરેવ યજ્ઞિયેઽગ્નિમાધત્તે ।
અગ્નિર્દેવેભ્યો નિલાયત । આખૂ રૂપં કૃત્વા । સ પૃથિવીં પ્રાવિશત્ ।
સ ઊતીઃ કુર્વાણઃ પૃથિવીમનુ સમચરત્ । તદાખુકરીષમભવત્ ॥ ૧। ૧। ૩। ૩॥

૧૭ યદાખુકરીષઁ સંભારો ભવતિ । યદેવાસ્ય તત્ર ન્યક્તમ્ ।
તદેવાવરુન્ધે । ઊર્જં વા એતઁ રસં પૃથિવ્યા ઉપદીકા ઉદ્દિહન્તિ ।
યદ્વલ્મીકમ્ । યદ્વલ્મીકવપા સંભારો ભવતિ । ઊર્જમેવ રસં પૃથિવ્યા
અવરુન્ધે । અથો શ્રોત્રમેવ । શ્રોત્રગ્ગ્ હ્યેતત્પૃથિવ્યાઃ । યદ્વલ્મીકઃ
॥ ૧। ૧। ૩। ૪॥

૧૮ અબધિરો ભવતિ । ય એવં વેદ । પ્રજાપતિઃ પ્રજા અસૃજત ।
તાસામન્નમુપાક્ષીયત । તાભ્યઃ સૂદમુપ પ્રાભિનત્ । તતો વૈ તાસામન્નં
નાક્ષીયત । યસ્ય સૂદઃ સંભારો ભવતિ । નાસ્ય ગૃહેઽન્નં ક્ષીયતે ।
આપો વા ઇદમગ્રે સલિલમાસીત્ । તેન પ્રજાપતિરશ્રામ્યત્ ॥ ૧। ૧। ૩। ૫॥

૧૯ કથમિદરઁ સ્યાદિતિ । સોઽપશ્યત્પુષ્કરપર્ણં તિષ્ઠત્ । સોઽમન્યત ।
અસ્તિ વૈ તત્ । યસ્મિન્નિદમધિતિષ્ઠતીતિ । સ વરાહો રૂપં કૃત્વોપ
ન્યમજ્જત્ । સ પૃથિવીમધ આર્ચ્છત્ । તસ્યા ઉપહત્યોદમજ્જત્ ।
તત્પુષ્કરપર્ણેઽપ્રથયત્ । યદપ્રથયત્ ॥ ૧। ૧। ૩। ૬॥

૨૦ તત્પૃથિવ્યૈ પૃથિવિત્વમ્ । અભૂદ્વા ઇદમિતિ । તદ્ભૂમ્યૈ ભૂમિત્વમ્ । તાં
દિશોઽનુ વાતઃ સમવહત્ । તાઁ શર્કરાભિરદૃઁહત્ । શં વૈ નોઽભૂદિતિ
। તચ્છર્કરાણાઁ શર્કરત્વમ્ । યદ્વરાહવિહતઁ સંભારો ભવતિ ।
અસ્યામેવાછમ્બટ્કારમગ્નિમાધત્તે । શર્કરા ભવન્તિ ધૃત્યૈ ॥ ૧। ૧। ૩। ૭॥

૨૧ અથો શંત્વાય । સરેતા અગ્નિરાધેય ઇત્યાહુઃ । આપો વરુણસ્ય પત્નય
આસન્ । તા અગ્નિરભ્યધ્યાયત્ । તાઃ સમભવત્ । તસ્ય રેતઃ પરાઽપતત્ ।
તદ્ધિરણ્યમભવત્ । યદ્ધિરણ્યમુપાસ્યતિ । સરેતસમેવાગ્નિમાધત્તે । પુરુષ
ઇત્વૈ સ્વાદ્રેતસો બીભત્સત ઇત્યાહુઃ ॥ ૧। ૧। ૩। ૮॥

૨૨ ઉત્તરત ઉપાસ્યત્યબીભત્સાયૈ । અતિ પ્રયચ્છતિ ।
આર્તિમેવાતિપ્રયચ્છતિ । અગ્નિર્દેવેભ્યો નિલાયત । અશ્વો રૂપં કૃત્વા
। સોઽશ્વત્થે સંવત્સરમતિષ્ઠત્ । તદશ્વત્થસ્યાશ્વત્થત્વમ્ ।
યદાશ્વત્થઃ સંભારો ભવતિ । યદેવાસ્ય તત્ર ન્યક્તમ્ । તદેવાવરુન્ધે ॥
૧। ૧। ૩। ૯॥

૨૩ દેવા વા ઊર્જં વ્યભજન્ત । તત ઉદુમ્બર ઉદતિષ્ઠત્ । ઊર્ગ્વા ઉદુમ્બરઃ
। યદૌદુમ્બરઃ સંભારો ભવતિ । ઊર્જમેવાવરુન્ધે । તૃતીયસ્યામિતો દિવિ
સોમ આસીત્ । તં ગાયત્ર્યાહરત્ । તસ્ય પર્ણમચ્છિદ્યત । તત્પર્ણોઽભવત્ ।
તત્પર્ણસ્ય પર્ણત્વમ્ ॥ ૧। ૧। ૩। ૧૦॥

૨૪ યસ્ય પર્ણમયઃ સંભારો ભવતિ । સોમપીથમેવાવરુન્ધે । દેવા વૈ
બ્રહ્મન્નવદન્ત । તત્પર્ણ ઉપાશ◌ૃણોત્ । સુશ્રવા વૈ નામ । યત્પર્ણમયઃ
સંભારો ભવતિ । બ્રહ્મવર્ચસમેવાવરુન્ધે । પ્રજાપતિરગ્નિમસૃજત
। સોઽબિભેત્પ્ર મા ધક્ષ્યતીતિ । તँ શમ્યાઽશમયત્ ॥ ૧। ૧। ૩। ૧૧॥

૨૫ તચ્છમ્યૈ શમિત્વમ્ । યચ્છમીમયઃ સંભારો ભવતિ ।
શાન્ત્યા અપ્રદાહાય । અગ્નેઃ સૃષ્ટસ્ય યતઃ । વિકઙ્કતં
ભા આર્ચ્છત્ । યદ્વૈકઙ્કતઃ સંભારો ભવતિ । ભા એવાવરુન્ધે ।
સહૃદયોઽગ્નિરાધેય ઇત્યાહુઃ । મરુતોઽદ્ભિરગ્નિમતમયન્ । તસ્ય
તાન્તસ્ય હૃદયમાચ્છિન્દન્ । સાઽશનિરભવત્ । યદશનિહતસ્ય
વૃક્ષસ્ય સંભારો ભવતિ । સહૃદયમેવાગ્નિમાધત્તે ॥ ૧। ૧। ૩। ૧૨॥ ઊષા
અભવન્નભવદ્વલ્મીકોઽશ્રામ્યદપ્રથયદ્ધૃત્યૈ બીભત્સથ ઇત્યાહૂ રુન્ધે
પર્ણત્વમશમયદચ્છિન્દગ્ગ્સ્ત્રીણિ ચ ॥ ૩॥

૨૬ દ્વાદશસુ વિક્રામેષ્વગ્નિમાદધીત । દ્વાદશ માસાઃ સંવત્સરઃ ।
સંવત્સરાદેવૈનમવરુધ્યાધત્તે । યદ્દ્વાદશસુ વિક્રામેષ્વાદધીત

। પરિમિતમવરુન્ધીત । ચક્ષુર્નિમિત આદધીત । ઇયદ્દ્વાદશવિક્રામાઉ
ઇતિ । પરિમિતં ચૈવાપરિમિતં ચાવરુન્ધે । અનૃતં વૈ વાચા વદતિ ।
અનૃતં મનસા ધ્યાયતિ ॥ ૧। ૧। ૪। ૧॥

૨૭ ચક્ષુર્વૈ સત્યમ્ । અદ્રાઉગિત્યાહ । અદર્શમિતિ । તથ્સત્યમ્
। યશ્ચક્ષુર્નિમિતેઽગ્નિમાધત્તે । સત્ય એવૈનમાધત્તે ।
તસ્માદાહિતાગ્નિર્નાનૃતં વદેત્ । નાસ્ય બ્રાહ્મણોઽનાશ્વાન્ગૃહે વસેત્ ।
સત્યે હ્યસ્યાગ્નિરાહિતઃ । આગ્નેયી વૈ રાત્રિઃ ॥ ૧। ૧। ૪। ૨॥

૨૮ આગ્નેયાઃ પશવઃ । ઐન્દ્રમહઃ । નક્તં ગાર્હપત્યમાદધાતિ ।
પશૂનેવાવરુન્ધે । દિવાઽઽહવનીયમ્ । ઇન્દ્રિયમેવાવરુન્ધે । અર્ધોદિતે
સૂર્યે આહવનીયમાદધાતિ । એતસ્મિન્વૈ લોકે પ્રજાપતિઃ પ્રજા અસૃજત ।
પ્રજા એવ તદ્યજમાનઃ સૃજતે । અથો ભૂતં ચૈવ ભવિષ્યચ્ચાવરુન્ધે ॥
૧। ૧। ૪। ૩॥

૨૯ ઇડા વૈ માનવી યજ્ઞાનૂકાશિન્યાસીત્ । સાઽશૃણોત્ । અસુરા અગ્નિમાદધત
ઇતિ । તદગચ્છત્ । ત આહવનીયમગ્ર આદધત । અથ ગાર્હપત્યમ્ ।
અથાન્વાહાર્યપચનમ્ । સાઽબ્રવીત્ । પ્રતીચ્યેષાગ્ શ્રીરગાત્ । ભદ્રા
ભૂત્વા પરાભવિષ્યન્તીતિ ॥ ૧। ૧। ૪। ૪॥

૩૦ યસ્યૈવમગ્નિરાધીયતે । પ્રતીચ્યસ્ય શ્રીરેતિ । ભદ્રો ભૂત્વા
પરાભવતિ । સાઽશૃણોત્ । દેવા અગ્નિમાદધત ઇતિ । તદગચ્છત્ ।
તેઽન્વાહાર્યપચનમગ્ર આદધત । અથ ગાર્હપત્યમ્ । અથાહવનીયમ્ ।
સાઽબ્રવીત્ ॥ ૧। ૧। ૪। ૫॥

૩૧ પ્રાચ્યેષાગ્ શ્રીરગાત્ । ભદ્રા ભૂત્વા સુવર્ગં લોકમેષ્યન્તિ ।
પ્રજાં તુ ન વેથ્સ્યન્ત ઇતિ । યસ્યૈવમગ્નિરાધીયતે । પ્રાચ્યસ્ય
શ્રીરેતિ । ભદ્રો ભૂત્વા સુવર્ગં લોકમેતિ । પ્રજાં તુ ન વિન્દતે ।
સાઽબ્રવીદિડા મનુમ્ । તથા વા અહં તવાગ્નિમાધાસ્યામિ । યથા પ્ર પ્રજયા
પશુભિર્મિથુનૈર્જનિષ્યસે ॥ ૧। ૧। ૪। ૬॥

૩૨ પ્રત્યસ્મિન્લોકે સ્થાસ્યસિ । અભિ સુવર્ગં લોકં જેષ્યસીતિ ।

ગાર્હપત્યમગ્ર આદધાત્ । ગાર્હપત્યં વા અનુ પ્રજાઃ પશવઃ પ્રજાયન્તે
। ગાર્હપત્યેનૈવાસ્મૈ પ્રજાં પશૂન્પ્રાજનયત્ । અથાન્વાહાર્યપચનમ્ ।
તિર્યઙ્ઙિવ વા અયં લોકઃ । અસ્મિન્નેવ તેન લોકે પ્રત્યતિષ્ઠત્ ।
અથાહવનીયમ્ । તેનૈવ સુવર્ગં લોકમભ્યજયત્ ॥ ૧। ૧। ૪। ૭॥

૩૩ યસ્યૈવમગ્નિરાધીયતે । પ્ર પ્રજયા પશુભિર્મિથુનૈર્જાયતે
। પ્રત્યસ્મિન્લોકે તિષ્ઠતિ । અભિ સુવર્ગં લોકં જયતિ । યસ્ય વા
અયથાદેવતમગ્નિરાધીયતે । આ દેવતાભ્યો વૃશ્ચ્યતે । પાપીયાન્ભવતિ ।
યસ્ય યથાદેવતમ્ । ન દેવતાભ્ય આ વૃશ્ચ્યતે । વસીયાન્ભવતિ ॥ ૧। ૧। ૪। ૮॥

૩૪ ભૃગૂણાં ત્વાઙ્ગિરસાં વ્રતપતે વ્રતેનાદધામીતિ
ભૃગ્વંગિરસામાદધ્યાત્ । આદિત્યાનાં ત્વા દેવાનાં વ્રતપતે
વ્રતેનાદધામીત્યન્યાસાં બ્રાહ્મણીનાં પ્રજાનામ્ । વરુણસ્ય ત્વા
રાજ્ઞો વ્રતપતે વ્રતેનાદધામીતિ રાજ્ઞઃ । ઇન્દ્રસ્ય ત્વેન્દ્રિયેણ
વ્રતપતે વ્રતેનાદધામીતિ રાજન્યસ્ય । મનોસ્ત્વા ગ્રામણ્યો વ્રતપતે
વ્રતેનાદધામીતિ વૈશ્યસ્ય । ઋભૂણાં ત્વા દેવાનાં વ્રતપતે
વ્રતેનાદધામીતિ રથકારસ્ય । યથાદેવતમગ્નિરાધીયતે । ન
દેવતાભ્ય આ વૃશ્ચ્યતે । વસીયાન્ભવતિ ॥ ૧। ૧। ૪। ૯॥ ધ્યાયતિ વૈ
રાત્રિશ્ચાવરુન્ધે ભવિષ્યન્તીત્યબ્રવીજ્જનિષ્યસેઽજયદ્ વસીયાન્ ભવતિ
નવ ચ ॥ ૪॥

૩૫ પ્રજાપતિર્વાચઃ સત્યમપશ્યત્ । તેનાગ્નિમાધત્ત । તેન વૈ સ આર્ધ્નોત્ ।
ભૂર્ભુવઃ સુવરિત્યાહ । એતદ્વૈ વાચઃ સત્યમ્ । ય એતેનાગ્નિમાધત્તે
। ઋધ્નોત્યેવ । અથો સત્યપ્રાશૂરેવ ભવતિ । અથો ય એવં
વિદ્વાનભિચરતિ । સ્તૃણુત એવૈનમ્ ॥ ૧। ૧। ૫। ૧॥

૩૬ ભૂરિત્યાહ । પ્રજા એવ તદ્યજમાનઃ સૃજતે । ભુવ ઇત્યાહ । અસ્મિન્નેવ
લોકે પ્રતિતિષ્ઠતિ । સુવરિત્યાહ । સુવર્ગ એવ લોકે પ્રતિતિષ્ઠતિ ।
ત્રિભિરક્ષરૈર્ગાર્હપત્યમાદધાતિ । ત્રય ઇમે લોકાઃ । એષ્વેવૈનં
લોકેષુ પ્રતિષ્ઠિતમાધત્તે । સર્વૈઃ પઞ્ચભિરાહવનીયમ્ ॥ ૧। ૧। ૫। ૨॥

૩૭ સુવર્ગાય વા એષ લોકાયાધીયતે । યદાહવનીયઃ । સુવર્ગ

એવાસ્મૈ લોકે વાચઃ સત્યꣳ સર્વમાપ્નોતિ । ત્રિભિર્ગાર્હપત્યમાદધાતિ
। પઞ્ચભિરાહવનીયમ્ । અષ્ટૌ સંપદ્યન્તે । અષ્ટાક્ષરા ગાયત્રી ।
ગાયત્રોઽગ્નિઃ । યાવાનેવાગ્નિઃ । તમાધત્તે ॥ ૧। ૧। ૫। ૩॥

૩૮ પ્રજાપતિઃ પ્રજા અસૃજત । તા અસ્માથ્સૃષ્ટાઃ પરાચીરાયન્ । તાભ્યો
જ્યોતિરુદગૃહ્ણાત્ । તં જ્યોતિઃ પશ્યન્તીઃ પ્રજા અભિસમાવર્તન્ત ।
ઉપરીવાગ્નિમુદ્ગૃહ્ણીયાદુદ્ધરન્ । જ્યોતિરેવ પશ્યન્તીઃ પ્રજા
યજમાનમભિસમાવર્તન્તે । પ્રજાપતેરક્ષ્યશ્વયત્ । તત્પરાઽપતત્ ।
તદશ્વોઽભવત્ । તદશ્વસ્યાશ્વત્વમ્ ॥ ૧। ૧। ૫। ૪॥

૩૯ એષ વૈ પ્રજાપતિઃ । યદગ્નિઃ । પ્રાજાપત્યોઽશ્વઃ । યદશ્વં
પુરસ્તાન્નયતિ । સ્વમેવ ચક્ષુઃ પશ્યન્પ્રજાપતિરનૂદેતિ ।
વજ્રી વા એષઃ । યદશ્વઃ । યદશ્વં પુરસ્તાન્નયતિ । જાતાનેવ
ભ્રાતૃવ્યાન્પ્રણુદતે । પુનરાવર્તયતિ ॥ ૧। ૧। ૫। ૫॥

૪૦ જનિષ્યમાણાનેવ પ્રતિનુદતે । ન્યાહવનીયો ગાર્હપત્યમકામયત । નિ
ગાર્હપત્ય આહવનીયમ્ । તૌ વિભાજં નાશક્નોત્ । સોઽશ્વઃ પૂર્વવાડ્ભૂત્વા
। પ્રાઞ્ચં પૂર્વમુદવહત્ । તત્પૂર્વવાહઃ પૂર્વવાટ્ત્વમ્ । યદશ્વં
પુરસ્તાન્નયતિ । વિભક્તિરેવૈનયોઃ સા । અથો નાનાવીર્યાવેવૈનૌ કુરુતે ॥
૧। ૧। ૫। ૬॥

૪૧ યદુપર્યુપરિ શિરો હરેત્ । પ્રાણાન્, વિચ્છિન્દ્યાત્ । અધોઽધઃ
શિરો હરતિ । પ્રાણાનાં ગોપીથાય । ઇયત્યગ્રે હરતિ । અથેયત્યથેયતિ
। ત્રય ઇમે લોકાઃ । એષ્વેવૈનં લોકેષુ પ્રતિષ્ઠિતમાધત્તે ।
પ્રજાપતિરગ્નિમસૃજત । સોઽબિભેત્પ્ર મા ધક્ષ્યતીતિ ॥ ૧। ૧। ૫। ૭॥

૪૨ તસ્ય ત્રેધા મહિમાનં વ્યૌહત્ । શાન્ત્યા અપ્રદાહાય
। યત્ત્રેધાઽગ્નિરાધીયતે । મહિમાનમેવાસ્ય તદ્વ્યૂહતિ । શાન્ત્યા
અપ્રદાહાય । પુનરાવર્તયતિ । મહિમાનમેવાસ્ય સંદધાતિ । પશુર્વા
એષઃ । યદશ્વઃ । એષ રુદ્રઃ ॥ ૧। ૧। ૫। ૮॥

૪૩ યદગ્નિઃ । યદશ્વસ્ય પદેઽગ્નિમાદધ્યાત્ । રુદ્રાય પશૂનપિદધ્યાત્ ।

અપશુર્યજમાનઃ સ્યાત્ । યન્નાક્રમયેત્ । અનવરુદ્ધા અસ્ય પશવઃ સ્યુઃ ।
પારશ્વત આક્રમયેત્ । યથાઽઽહિતસ્યાગ્નેરઙ્ગારા અભ્યવવર્તેરન્ ।
અવરુદ્ધા અસ્ય પશવો ભવન્તિ । ન રુદ્રાયાપિદધાતિ ॥ ૧। ૧। ૫। ૯॥

૪૪ ત્રીણિ હવીँષિ નિર્વપતિ । વિરાજ એવ વિક્રાન્તં
યજમાનોઽનુ વિક્રમતે । અગ્નયે પવમાનાય । અગ્નયે પાવકાય ।
અગ્નયે શુચયે । યદગ્નયે પવમાનાય નિર્વપતિ । પુનાત્યેવૈનમ્
। યદગ્નયે પાવકાય । પૂત એવાસ્મિન્નન્નાદ્યં દધાતિ । યદગ્નયે
શુચયે । બ્રહ્મવર્ચસમેવાસ્મિન્નુપરિષ્ટાદ્ધાતિ ॥ ૧। ૧। ૫। ૧૦॥
એનમાહવનીયં ધત્તેઽશ્વત્વં વર્તયતિ કુરુત ઇતિ રુદ્રો દધાતિ
યદગ્નયે શુચય એકં ચ ॥ ૫॥

૪૫ દેવાસુરાઃ સંયત્તા આસન્ । તે દેવા વિજયમુપયન્તઃ । અગ્નૌ
વામં વસુ સંન્યદધત । ઇદમુ નો ભવિષ્યતિ । યદિ નો જેષ્યન્તીતિ ।
તદગ્નિર્નોથ્સહમશક્નોત્ । તત્ત્રેધા વિન્યદધાત્ । પશુષુ તૃતીયમ્ । અપ્સુ
તૃતીયમ્ । આદિત્યે તૃતીયમ્ ॥ ૧। ૧। ૬। ૧॥

૪૬ તદ્દેવા વિજિત્ય । પુનરવારુરુથ્સન્ત । તેઽગ્નયે પવમાનાય
પુરોડાશમષ્ટાકપાલં નિરવપન્ । પશવો વા અગ્નિઃ પવમાનઃ । યદેવ
પશુષ્વાસીત્ । તત્તેનાવારુન્ધત । તેઽગ્નયે પાવકાય । આપો વા અગ્નિઃ
પાવકઃ । યદેવાપ્સ્વાસીત્ । તત્તેનાવારુન્ધત ॥ ૧। ૧। ૬। ૨॥

૪૭ તેઽગ્નયે શુચયે । અસૌ વા આદિત્યોઽગ્નિઃ શુચિઃ । યદેવાદિત્ય આસીત્ ।
તત્તેનાવારુન્ધત । બ્રહ્મવાદિનો વદન્તિ । તનુવો વાવૈતા અગ્ન્યાધેયસ્ય
। આગ્નેયો વા અષ્ટાકપાલોઽગ્ન્યાધેયમિતિ । યત્તં નિર્વપેત્ । નૈતાનિ ।
યથાઽઽત્મા સ્યાત્ ॥ ૧। ૧। ૬। ૩॥

૪૮ નાઙ્ગાનિ । તાદૃગેવ તત્ । યદેતાનિ નિર્વપેત્ । ન તમ્ । યથાઽઙ્ગાનિ સ્યુઃ
। નાત્મા । તાદૃગેવ તત્ । ઉભયાનિ સહ નિરુપ્યાણિ । યજ્ઞસ્ય સાત્મત્વાય
। ઉભયં વા એતસ્યેન્દ્રિયં વીર્યમાપ્યતે ॥ ૧। ૧। ૬। ૪॥

૪૯ યોઽગ્નિમાધત્તે । ઐન્દ્રાગ્નમેકાદશકપાલમનુનિર્વપેત્ । આદિત્યં
ચરુમ્ । ઇન્દ્રાગ્ની વૈ દેવાનામયાતયામાનૌ । યે એવ દેવતે અયાતયામ્ની ।

તાભ્યામેવાસ્મા ઇન્દ્રિયં વીર્યમવરુન્ધે । આદિત્યો ભવતિ । ઇયં વા અદિતિઃ । અસ્યામેવ પ્રતિતિષ્ઠતિ । ધેન્વૈ વા એતદ્રેતઃ ॥ ૧। ૧। ૬। ૫॥

૫૦ યદાજ્યમ્ । અનડુહસ્તણ્ડુલાઃ । મિથુનમેવાવરુન્ધે । ઘૃતે ભવતિ । યજ્ઞસ્યાલૂક્ષાન્તત્વાય । ચત્વાર આર્ષેયાઃ પ્રાશ્નન્તિ । દિશામેવ જ્યોતિષિ જુહોતિ । પશવો વા એતાનિ હવીઁષિ । એષ રુદ્રઃ । યદગ્નિઃ ॥ ૧। ૧। ૬। ૬॥

૫૧ યત્સદ્ય એતાનિ હવીઁષિ નિર્વપેત્ । રુદ્રાય પશૂનપિ દધ્યાત્ । અપશુર્યજમાનઃ સ્યાત્ । યન્નાનુનિર્વપેત્ । અનવરુદ્ધા અસ્ય પશવઃ સ્યુઃ । દ્વાદશસુ રાત્રીષ્વનુ નિર્વપેત્ । સંવત્સરપ્રતિમા વૈ દ્વાદશ રાત્રયઃ । સંવત્સરેણૈવાસ્મૈ રુદ્રઁ શમયિત્વા । પશૂનવરુન્ધે । યદેકમેકમેતાનિ હવીઁષિ નિર્વપેત્ ॥ ૧। ૧। ૬। ૭॥

૫૨ યથા ત્રીણ્યાવપનાનિ પૂરયેત્ । તાદૃક્તત્ । ન પ્રજનનમુચ્છિઁષેત્ । એકં નિરુપ્ય । ઉત્તરે સમસ્યેત્ । તૃતીયમેવાસ્મૈ લોકમુચ્છિઁષતિ પ્રજનનાય । તં પ્રજયા પશુભિરનુ પ્રજાયતે । અથો યજ્ઞસ્યૈવૈષાઽભિક્રાન્તિઃ । રથચક્રં પ્રવર્તયતિ । મનુષ્યરથેનૈવ દેવરથં પ્રત્યવરોહતિ ॥ ૧। ૧। ૬। ૮॥

૫૩ બ્રહ્મવાદિનો વદન્તિ । હોતવ્યમગ્નિહોત્રાં ૩ ન હોતવ્યા ૩ મિતિ । યદ્યજુષા જુહુયાત્ । અયથાપૂર્વમાહુતી જુહુયાત્ । યન્ન જુહુયાત્ । અગ્નિઃ પરાભવેત્ । તૂષ્ણીમેવ હોતવ્યમ્ । યથાપૂર્વમાહુતી જુહોતિ । નાગ્નિઃ પરાભવતિ । અગ્નીધે દદાતિ ॥ ૧। ૧। ૬। ૯॥

૫૪ અગ્નિમુખાનેવર્તૂન્પ્રીણાતિ । ઉપબર્હણં દદાતિ । રૂપાણામવરુદ્ધ્યૈ । અશ્વં બ્રહ્મણે । ઇન્દ્રિયમેવાવરુન્ધે । ધેનુઁ હોત્રે । આશિષ એવાવરુન્ધે । અનડ્વાહમધ્વર્યવે । વહ્નિર્વા અનડ્વાન્ । વહ્નિરધ્વર્યુઃ ॥ ૧। ૧। ૬। ૧૦॥

૫૫ વહ્નિનૈવ વહ્નિ યજ્ઞસ્યાવરુન્ધે । મિથુનૌ ગાવૌ દદાતિ । મિથુનસ્યાવરુદ્ધ્યૈ । વાસો દદાતિ । સર્વ દેવત્યં વૈ વાસઃ । સર્વા એવ દેવતાઃ પ્રીણાતિ । આ દ્વાદશભ્યો દદાતિ । દ્વાદશ માસાઃ સંવત્સરઃ । સંવત્સર એવ પ્રતિતિષ્ઠતિ । કામમૂર્ધ્વં દેયમ્ । અપરિમિતસ્યાવરુદ્ધ્યૈ

॥ ૧। ૧। ૬। ૧૧॥ આદિત્યે તૃતીયમપ્સ્વાસીત્તત્તેનાવારુન્ધત સ્યાદાપ્યતે
રેતોઽગ્નિરેકમેકમેતાનિ હવીꣳષિ નિર્વપેત્પ્રત્યવરોહતિ
દદાત્યધ્વર્યુર્દેયમેકં ચ ॥ ૬॥

૫૬ ઘર્મઃ શિરસ્તદયમગ્નિઃ । સંપ્રિયઃ પશુભિર્ભુવત્ । છર્દિસ્તોકાય
તનયાય યચ્છ । વાતઃ પ્રાણસ્તદયમગ્નિઃ । સંપ્રિયઃ પશુભિર્ભુવત્ ।
સ્વદિતં તોકાય તનયાય પિતું પચ । પ્રાચીમનુ પ્રદિશં પ્રેહિ
વિદ્વાન્ । અગ્નેરગ્ને પુરો અગ્નિર્ભવેહ । વિશ્વા આશા દીદ્યાનો વિભાહિ ।
ઊર્જં નો ધેહિ દ્વિપદે ચતુષ્પદે ॥ ૧। ૧। ૭। ૧॥

૫૭ અર્કશ્ચક્ષુસ્તદસૌ સૂર્યસ્તદયમગ્નિઃ । સંપ્રિયઃ પશુભિર્ભુવત્ ।
યત્તે શુક્ર શુક્રં વર્ચઃ શુક્રા તનૂઃ । શુક્રં જ્યોતિરજસ્રમ્ । તેન
મે દીદિહિ તેન ત્વાઽઽદધે । અગ્નિનાઽગ્ને બ્રહ્મણા । આનશે વ્યાનશે
સર્વમાયુર્વ્યાનશે । યે તે અગ્ને શિવે તનુવૌ । વિરાટ્ચ સ્વરાટ્ચ ।
તે મા વિશતાં તે મા જિન્વતામ્ ॥ ૧। ૧। ૭। ૨॥

૫૮ યે તે અગ્ને શિવે તનુવૌ । સમ્રાટ્ચાભિભૂશ્ચ । તે મા વિશતાં
તે મા જિન્વતામ્ । યે તે અગ્ને શિવે તનુવૌ । વિભૂશ્ચ પરિભૂશ્ચ ।
તે મા વિશતાં તે મા જિન્વતામ્ । યે તે અગ્ને શિવે તનુવૌ । પ્રભ્વી ચ
પ્રભૂતિશ્ચ । તે મા વિશતાં તે મા જિન્વતામ્ । યાસ્તે અગ્ને શિવાસ્તનુવઃ ।
તાભિસ્ત્વાઽઽદધે । યાસ્તે અગ્ને ઘોરાસ્તનુવઃ । તાભિરમું ગચ્છ ॥ ૧। ૧। ૭। ૩॥ ચતુષ્પદે જિન્વતાં
તનુવસ્ત્રીણિ ચ ॥ ૭॥

૫૯ ઇમે વા એતે લોકા અગ્નયઃ । તે યદવ્યાવૃત્તા આધીયેરન્ ।
શોચયેયુર્યજમાનમ્ । ઘર્મઃ શિર ઇતિ ગાર્હપત્યમાદધાતિ । વાતઃ પ્રાણ
ઇત્યન્વાહાર્યપચનમ્ । અર્કશ્ચક્ષુરિત્યાહવનીયમ્ । તેનૈવૈનાન્વ્યાવર્તયતિ
। તથા ન શોચયન્તિ યજમાનમ્ । રથન્તરમભિગાયતે ગાર્હપત્ય
આધીયમાને । રાથન્તરો વા અયં લોકઃ ॥ ૧। ૧। ૮। ૧॥

૬૦ અસ્મિન્નેવૈનં લોકે પ્રતિષ્ઠિતમાધત્તે । વામદેવ્યમભિગાયત
ઉદ્ધ્રિયમાણે । અન્તરિક્ષં વૈ વામદેવ્યમ્ । અન્તરિક્ષ એવૈનં
પ્રતિષ્ઠિતમાધત્તે । અથો શાન્તિર્વૈ વામદેવ્યમ્ । શાન્તમેવૈનં

પશવ્યમુદ્ધરતે । બૃહદભિગાયત આહવનીય આધીયમાને ।
બાર્હતો વા અસૌ લોકઃ । અમુષ્મિન્નેવૈનં લોકે પ્રતિષ્ઠિતમાધત્તે ।
પ્રજાપતિરગ્નિમસૃજત ॥ ૧। ૧। ૮। ૨॥

૬૧ સોઽશ્વો વારો ભૂત્વા પરાઙૈત્ । તં વારવન્તીયેનાવારયત
। તદ્વારવન્તીયસ્ય વારવન્તીયત્વમ્ । શ્યૈતેન શ્યેતી અકુરુત ।
તચ્છ્યૈતસ્ય શ્યૈતત્વમ્ । યદ્વારવન્તીયમભિગાયતે । વારયિત્વૈવૈનં
પ્રતિષ્ઠિતમાધત્તે । શ્યૈતેન શ્યેતી કુરુતે । ઘર્મઃ શિર ઇતિ
ગાર્હપત્યમાદધાતિ । સશીર્ષાણમેવૈનમાધત્તે ॥ ૧। ૧। ૮। ૩॥

૬૨ ઉપૈનમુત્તરો યજ્ઞો નમતિ । રુદ્રો વા એષઃ । યદગ્નિઃ । સ આધીયમાન
ઈશ્વરો યજમાનસ્ય પશૂન્ હિꣳ સિતોઃ । સંપ્રિયઃ પશુભિર્ભુવદિત્યાહ
। પશુભિરેવૈનꣳ સંપ્રિયં કરોતિ । પશૂનામહિꣳસાયૈ ।
છર્દિસ્તોકાય તનયાય યચ્છેત્યાહ । આશિષમેવૈતામાશાસ્તે । વાતઃ
પ્રાણ ઇત્યન્વાહાર્યપચનમ્ ॥ ૧। ૧। ૮। ૪॥

૬૩ સપ્રાણમેવૈનમાધત્તે । સ્વદિતં તોકાય તનયાય પિતું
પચેત્યાહ । અન્નમેવાસ્મૈ સ્વદયતિ । પ્રાચીમનુ પ્રદિશં પ્રેહિ
વિદ્વાનિત્યાહ । વિભક્તિરેવૈનયોઃ સા । અથો નાનાવીર્યાવેવૈનૌ કુરુતે ।
ઊર્જં નો ધેહિ દ્વિપદે ચતુષ્પદ ઇત્યાહ । આશિષમેવૈતામાશાસ્તે ।
અર્કશ્ચક્ષુરિત્યાહવનીયમ્ । અર્કો વૈ દેવાનામન્નમ્ ॥ ૧। ૧। ૮। ૫॥

૬૪ અન્નમેવાવરુન્ધે । તેન મે દીદિહીત્યાહ । સમિન્ધ એવૈનમ્ । આનશે
વ્યાનશ ઇતિ ત્રિરુદિઙ્ગયતિ । ત્રય ઇમે લોકાઃ । એષ્વેવૈનં લોકેષુ
પ્રતિષ્ઠિતમાધત્તે । તત્તથા ન કાર્યમ્ । વીંગિતમપ્રતિષ્ઠિતમાદધીત ।
ઉદ્ધૃત્યૈવાધાયાભિમન્ત્રિયઃ । અવીઙ્ગિતમેવૈનં પ્રતિષ્ઠિતમાધત્તે ।
વિરાટ્ચ સ્વરાટ્ચ યાસ્તે અગ્ને શિવાસ્તનુવસ્તાભિસ્ત્વાઽઽદધ ઇત્યાહ ।
એતા વા અગ્નેઃ શિવાસ્તનુવઃ । તાભિરેવૈનꣳ સમર્ધયતિ । યાસ્તે અગ્ને
ઘોરાસ્તનુવસ્તાભિરમું ગચ્છેતિ બ્રૂયાદ્યં દ્વિષ્યાત્ । તાભિરેવૈનં
પરાભાવયતિ ॥ ૧। ૧। ૮। ૬॥ લોકોઽસૃજતૈનમાધત્તેઽન્વાહાર્યપચનં
દેવાનામન્નમેનં પ્રતિષ્ઠિતમાધત્તે પઞ્ચ ચ ॥ ૮॥

૬૫ શમીગર્ભાદગ્નિં મન્થતિ । એષા વા અગ્નેર્યજ્ઞિયા તનૂઃ । તામેવાસ્મૈ
જનયતિ । અદિતિઃ પુત્રકામા । સાધ્યેભ્યો દેવેભ્યો બ્રહ્મૌદનમપચત્ । તસ્યા
ઉચ્છેષણમદદુઃ । તત્પ્રાશ્ઞાત્ । સા રેતોઽધત્ત । તસ્યૈ ધાતા ચાર્યમા
ચાજાયેતામ્ । સા દ્વિતીયમપચત્ ॥ ૧। ૧। ૯। ૧॥

૬૬ તસ્યા ઉચ્છેષણમદદુઃ । તત્પ્રાશ્ઞાત્ । સા રેતોઽધત્ત । તસ્યૈ મિત્રશ્ચ
વરુણશ્ચાજાયેતામ્ । સા તૃતીયમપચત્ । તસ્યા ઉચ્છેષણમદદુઃ । તત્પ્રાશ્ઞાત્ ।
સા રેતોઽધત્ત । તસ્યા અꣳશશ્ચ ભગશ્ચાજાયેતામ્ । સા ચતુર્થમપચત્
॥ ૧। ૧। ૯। ૨॥

૬૭ તસ્યા ઉચ્છેષણમદદુઃ । તત્પ્રાશ્ઞાત્ । સા રેતોઽધત્ત । તસ્યા ઇન્દ્રશ્ચ
વિવસ્વાગ્શ્ચાજાયેતામ્ । બ્રહ્મૌદનં પચતિ । રેત એવ તદ્ધાતિ । પ્રાશ્ઞન્તિ
બ્રાહ્મણા ઓદનમ્ । યદાજ્યમુચ્છિષ્યતે । તેન સમિધોઽભ્યજ્યાદધાતિ ।
ઉચ્છેષણાદ્ધા અદિતી રેતોઽધત્ત ॥ ૧। ૧। ૯। ૩॥

૬૮ ઉચ્છેષણાદેવ તદ્રેતો ધત્તે । અસ્થિ વા એતત્ । યત્સમિધઃ । એતદ્રેતઃ
। યદાજ્યમ્ । યદાજ્યેન સમિધોઽભ્યજ્યાદધાતિ । અસ્થ્યેવ તદ્રેતસિ દધાતિ ।
તિસ્ર આદધાતિ મિથુનત્વાય । ઇયતીર્ભવન્તિ । પ્રજાપતિના યજ્ઞમુખેન
સંમિતાઃ ॥ ૧। ૧। ૯। ૪॥

૬૯ ઇયતીર્ભવન્તિ । યજ્ઞપરુષા સંમિતાઃ । ઇયતીર્ભવન્તિ । એતાવદ્વૈ
પુરુષે વીર્યમ્ । વીર્યસંમિતાઃ । આર્દ્રા ભવન્તિ । આર્દ્રમિવ હિ
રેતઃ સિચ્યતે । ચિત્રિયસ્યાશ્વત્થસ્યાદધાતિ । ચિત્રમેવ ભવતિ ।
ઘૃતવતીભિરાદધાતિ ॥ ૧। ૧। ૯। ૫॥

૭૦ એતદ્વા અગ્નેઃ પ્રિયં ધામ । યદ્ઘૃતમ્ । પ્રિયેણૈવૈનં ધામ્ના
સમર્ધયતિ । અથો તેજસા । ગાયત્રીભિર્બ્રાહ્મણસ્યાદધ્યાત્ । ગાયત્રછન્દા
વૈ બ્રાહ્મણઃ । સ્વસ્ય છન્દસઃ પ્રત્યયનસ્ત્વાય । ત્રિષ્ટુગ્ભી રાજન્યસ્ય ।
ત્રિષ્ટુપ્છન્દા વૈ રાજન્યઃ । સ્વસ્ય છન્દસઃ પ્રત્યયનસ્ત્વાય ॥ ૧। ૧। ૯। ૬॥

૭૧ જગતીભિર્વૈશ્યસ્ય । જગતીછન્દા વૈ વૈશ્યઃ । સ્વસ્ય છન્દસઃ
પ્રત્યયનસ્ત્વાય । તꣳ સંવત્સરં ગોપાયેત્ । સંવત્સરꣳ હિ રેતો
હિતં વર્ધતે । યદ્યેનꣳ સંવત્સરે નોપનમેત્ । સમિધઃ પુનરાદધ્યાત્

। રેત એવ તદ્ધિતં વર્ધમાનમેતિ । ન મા ꣳ સમશ્નીયાત્ । ન સ્ત્રિયમુપેયાત્
॥ ૧। ૧। ૯। ૭॥

૭૨ યન્મા ꣳ સમશ્નીયાત્ । યથ્સ્ત્રિયમુપેયાત્ । નિર્વીર્યઃ સ્યાત્ ।
નૈનમગ્નિરુપનમેત્ । શ્વ આધાસ્યમાનો બ્રહ્મૌદનં પચતિ । આદિત્યા વા
ઇત ઉત્તમાઃ સુવર્ગં લોકમાયન્ન્ । તે વા ઇતો યન્તં પ્રતિનુદન્તે । એતે
ખલુ વાવાદિત્યાઃ । યદ્બ્રાહ્મણાઃ । તૈરેવ સન્ત્વં ગચ્છતિ ॥ ૧। ૧। ૯। ૮॥

૭૩ નૈનં પ્રતિનુદન્તે । બ્રહ્મવાદિનો વદન્તિ । ક્વા સઃ । અગ્નિઃ કાર્યઃ ।
યોઽસ્મૈ પ્રજાં પશૂન્પ્રજનયતીતિ । શલ્કૈસ્તા ꣳ રાત્રિમગ્નિમિન્ધીત ।
તસ્મિન્નુપવ્યુષમરણી નિષ્ટપેત્ । યથર્ષભાય વાશિતા ન્યાવિચ્છાયતિ
। તાદૃગેવ તત્ । અપોદૂહ્ય ભસ્માગ્નિં મન્થતિ ॥ ૧। ૧। ૯। ૯॥

૭૪ સૈવ સાઽગ્નેઃ સન્તતિઃ । તં મથિત્વા પ્રાઞ્ચમુદ્ધરતિ ।
સંવથ્સરમેવ તદ્રેતો હિતં પ્રજનયતિ । અનાહિતસ્તસ્યાગ્નિરિત્યાહુઃ ।
યઃ સમિધોઽનાધાયાગ્નિમાધત્ત ઇતિ । તાઃ સંવથ્સરે પુરસ્તાદાદધ્યાત્
। સંવથ્સરાદેવૈનમવરુધ્યાધત્તે । યદિ સંવથ્સરે નાદધ્યાત્ ।
દ્વાદશ્યાં પુરસ્તાદાદધ્યાત્ । સંવથ્સરપ્રતિમા વૈ દ્વાદશ
રાત્રયઃ । સંવથ્સરમેવાસ્યાહિતા ભવન્તિ । યદિ દ્વાદશ્યાં
નાદધ્યાત્ । ત્ર્યહે પુરસ્તાદાદધ્યાત્ । આહિતા એવાસ્ય ભવન્તિ ॥ ૧। ૧। ૯। ૧૦॥
દ્વિતીયમપચચ્ચતુર્થમપચદદિતી રેતોઽધત્ત સંમિતા
ઘૃતવતીભિરાદધાતિ રાજન્યઃ સ્વસ્ય છન્દસઃ પ્રત્યયનસ્ત્વાયેયાદ્ગચ્છતિ
મન્થતિ રાત્રયશ્ચત્વારિ ચ ॥ ૯॥

૭૫ પ્રજાપતિઃ પ્રજા અસૃજત । સ રિરિચાનોઽમન્યત । સ તપોઽતપ્યત ।
સ આત્મન્વીર્યમપશ્યત્ । તદવર્ધત । તદસ્માથ્સહસોર્ધ્વમસૃજ્યત ।
સા વિરાડભવત્ । તાં દેવાસુરા વ્યગૃહ્ણત । સોઽબ્રવીત્પ્રજાપતિઃ । મમ
વા એષા ॥ ૧। ૧। ૧૦। ૧॥

૭૬ દોહા એવ યુષ્માકમિતિ । સા તતઃ પ્રાચ્યુદક્રામત્ । તત્પ્રજાપતિઃ
પર્યગૃહ્ણાત્ । અથર્વં પિતું મે ગોપાયેતિ । સા દ્વિતીયમુદક્રામત્
। તત્પ્રજાપતિઃ પર્યગૃહ્ણાત્ । નર્યં પ્રજાં મે ગોપાયેતિ । સા

તૃતીયમુદક્રામત્ । તત્પ્રજાપતિઃ પર્યગૃહ્ણાત્ । શરꣳસ્ય પશૂન્મે
ગોપાયેતિ ॥ ૧। ૧। ૧૦। ૨॥

૭૭ સા ચતુર્થમુદક્રામત્ । તત્પ્રજાપતિઃ પર્યગૃહ્ણાત્ । સપ્રથ સભાં
મે ગોપાયેતિ । સા પઞ્ચમમુદક્રામત્ । તત્પ્રજાપતિઃ પર્યગૃહ્ણાત્ । અહે
બુધ્નિય મન્ત્રં મે ગોપાયેતિ । અગ્નીન્, વાવ સા તાન્વ્યક્રમત । તાન્પ્રજાપતિઃ
પર્યગૃહ્ણાત્ । અથો પઙ્ક્તિમેવ । પઙ્ક્તિર્વા એષા બ્રાહ્મણે પ્રવિષ્ટા ॥ ૧। ૧। ૧૦। ૩॥

૭૮ તામાત્મનોઽધિ નિર્મિમીતે । યદગ્નિરાધીયતે । તસ્માદેતાવન્તોઽગ્નય
આધીયન્તે । પાઙ્ક્તં વા ઇદꣳ સર્વમ્ । પાઙ્ક્તેનૈવ પાઙ્ક્તગ્ગ્ સ્પૃણોતિ ।
અથર્વ પિતું મે ગોપાયેત્યાહ । અન્નમેવૈતેન સ્પૃણોતિ । નર્ય પ્રજાં મે
ગોપાયેત્યાહ । પ્રજામેવૈતેન સ્પૃણોતિ । શરꣳસ્ય પશૂન્મે ગોપાયેત્યાહ
॥ ૧। ૧। ૧૦। ૪॥

૭૯ પશૂનેવૈતેન સ્પૃણોતિ । સપ્રથ સભાં મે ગોપાયેત્યાહ ।
સભામેવૈતેનેન્દ્રિયꣳ સ્પૃણોતિ । અહે બુધ્નિય મન્ત્રં મે ગોપાયેત્યાહ
। મન્ત્રમેવૈતેન શ્રિયગ્ગ્ સ્પૃણોતિ । યદન્વાહાર્યપચનેઽન્વાહાર્યં
પચન્તિ । તેન સોઽસ્યાભીષ્ટઃ પ્રીતઃ । યદ્ગાર્હપત્ય આજ્યમધિશ્રયન્તિ
સંપત્નીર્યાજયન્તિ । તેન સોઽસ્યાભીષ્ટઃ પ્રીતઃ । યદાહવનીયે જુહ્વતિ
॥ ૧। ૧। ૧૦। ૫॥

૮૦ તેન સોઽસ્યાભીષ્ટઃ પ્રીતઃ । યત્સભાયાં વિજયન્તે । તેન
સોઽસ્યાભીષ્ટઃ પ્રીતઃ । યદાવસથેઽન્નꣳ હરન્તિ । તેન
સોઽસ્યાભીષ્ટઃ પ્રીતઃ । તથાઽસ્ય સર્વે પ્રીતા અભીષ્ટા આધીયન્તે
। પ્રવસથમેષ્યન્નેવમુપતિષ્ઠેતૈકમેકમ્ । યથા બ્રાહ્મણાય
ગૃહેવાસિને પરિદાય ગૃહાનેતિ । તાદૃગેવ તત્ । પુનરાગત્યોપતિષ્ઠતે
। સાઽભાગેયમેવૈષાં તત્ । સા તત ઊર્ધ્વારોહત્ । સા રોહિણ્યભવત્ ।
તદ્રોહિણ્યૈ રોહિણિત્વમ્ । રોહિણ્યામગ્નિમાદધીત । સ્વ એવૈનં યોનૌ
પ્રતિષ્ઠિતમાધત્તે । ઋધ્નોત્યેનેન ॥ ૧। ૧। ૧૦। ૬॥

એષા પશૂન્મે ગોપાયેતિ પ્રવિષ્ટા પશૂન્મે ગોપાયેત્યાહ જુહ્વતિ તિષ્ઠતે
સપ્ત ચ ॥ ૧૦॥

બ્રહ્મ સંધત્તં કૃત્તિકાસૂદ્ધન્તિ દ્વાદશસુ પ્રજાપતિર્વાચો
દેવાસુરાસ્તદગ્નિર્નોદ્ધર્મઃ શિર ઇમે વૈ શમીગર્ભાત્પ્રજાપતિઃ સ
રિરિચાનઃ સતપઃ સ આત્મન્વીર્યં દશ ॥ ૧૦॥
બ્રહ્મ સંધત્તં તૌ દિવ્યાવથો શંત્વાય પ્રાચ્યેષાં યદુપર્યુપરિ
યથ્સધઃ સોઽશ્વોઽવારો ભૂત્વા જગતીભિરશીતિઃ ॥ ૮૦॥
બ્રહ્મ સંધત્તમૃદ્ધોત્યેનેન ॥

## પ્રથમાષ્ટકે દ્વિતીયઃ પ્રપાઠકઃ ૨

૧ ઉદ્ધન્યમાનમસ્યા અમેધ્યમ્ । અપ પાપ્માનં યજમાનસ્ય હન્તુ । શિવા
નઃ સન્તુ પ્રદિશશ્ચતસ્રઃ । શં નો માતા પૃથિવી તોકસાતા । શં
નો દેવીરભિષ્ટયે । આપો ભવન્તુ પીતયે । શં યોરભિ સ્રવન્તુ નઃ ।
વૈશ્વાનરસ્ય રૂપમ્ । પૃથિવ્યાં પરિસ્રસા । સ્યોનમાવિશન્તુ નઃ ॥
૧। ૨। ૧। ૧॥

૨ યદિદં દિવો યદદઃ પૃથિવ્યાઃ । સંજજ્ઞાને રોદસી સંબભૂવતુઃ
। ઊષાન્કૃષ્ણમવતુ કૃષ્ણમૂષાઃ । ઇહોભયોર્યજ્ઞિયમાગમિષ્ઠાઃ ।
ઊતીઃ કુર્વાણો યત્પૃથિવીમચરઃ । ગુહાકારમાખુરૂપં પ્રતીત્ય ।
તત્તે ન્યક્તમિહ સંભરન્તઃ । શતં જીવેમ શરદઃ સવીરાઃ । ઊર્જં
પૃથિવ્યા રસમાભરન્તઃ । શતં જીવેમ શરદઃ પુરૂચીઃ ॥ ૧। ૨। ૧। ૨॥

૩ વમ્રીભિરનુવિત્તં ગુહાસુ । શ્રોત્રં ત ઉર્વ્યબધિરા ભવામઃ ।
પ્રજાપતિસૃષ્ટાનાં પ્રજાનામ્ । ક્ષુધોપહત્યૈ સુવિતં નો અસ્તુ ।
ઉપપ્રભિન્નમિષમૂર્જં પ્રજાભ્યઃ । સૂદં ગૃહેભ્યો રસમાભરામિ
। યસ્ય રૂપં બિભ્રદિમામવિન્દત્ । ગુહા પ્રવિષ્ટાꣳ સરિરસ્ય મધ્યે
। તસ્યેદં વિહતમાભરન્તઃ । અછમ્બટ્કારમસ્યાં વિધેમ ॥ ૧। ૨। ૧। ૩॥

૪ યત્પર્યપશ્યથ્સરિરસ્ય મધ્યે । ઉર્વીમપશ્યજ્જગતઃ પ્રતિષ્ઠામ્ ।
તત્પુષ્કરસ્યાયતનાદ્ધિ જાતમ્ । પર્ણં પૃથિવ્યાઃ પ્રથનꣳ હરામિ ।
યાભિરદૃꣳહજ્જગતઃ પ્રતિષ્ઠામ્ । ઉર્વીમિમાં વિશ્વજનસ્ય ભર્ત્રીમ્

। તા નઃ શિવાઃ શર્કરાઃ સન્તુ સર્વાઃ । અગ્ને રેતશ્ચન્દ્રꣳ હિરણ્યમ્ ।
અદ્ભ્યઃ સંભૂતમમૃતં પ્રજાસુ । તથ્સંભરન્નુત્તરતો નિધાય ॥
૧। ૨। ૧। ૪॥

૫ અતિ પ્રયચ્છં દુરિતિં તરેયમ્ । અશ્વો રૂપં કૃત્વા
યદશ્વત્થેઽતિષ્ઠઃ । સંવથ્સરં દેવેભ્યો નિલાય । તત્તે
ન્યક્તમિહ સંભરન્તઃ । શતં જીવેમ શરદઃ સવીરાઃ । ઊર્જઃ
પૃથિવ્યા અધ્યુત્થિતોઽસિ । વનસ્પતે શતવલ્શો વિરોહ । ત્વયા
વયમિષમૂર્જં મદન્તઃ । રાયસ્પોષેણ સમિષા મદેમ । ગાયત્રિયા
હ્રિયમાણસ્ય યત્તે ॥ ૧। ૨। ૧। ૫॥

૬ પર્ણમપતત્તૃતીયસ્યૈ દિવોઽધિ । સોઽયં પર્ણઃ સોમપર્ણાદ્ધિ જાતઃ
। તતો હરામિ સોમપીથસ્યાવરુદ્ધ્યૈ । દેવાનાં બ્રહ્મવાદં વદતાં યત્ ।
ઉપાશૃણોઃ સુશ્રવા વૈ શ્રુતોઽસિ । તતો મામાવિશતુ બ્રહ્મવર્ચસમ્
। તથ્સંભરગ્ગ્સ્તદવરુન્ધીય સાક્ષાત્ । યયા તે સૃષ્ટસ્યાગ્નેઃ ।
હેતિમશમયત્પ્રજાપતિઃ । તામિમામપ્રદાહાય ॥ ૧। ૨। ૧। ૬॥

૭ શમીꣳ શાન્ત્યૈ હરામ્યહમ્ । યત્તે સૃષ્ટસ્ય યતઃ । વિકઙ્કતં
ભા આર્ચ્છજ્જાતવેદઃ । તયા ભાસા સંમિતઃ । ઉરું નો લોકમનુ પ્રભાહિ ।
યત્તે તાન્તસ્ય હૃદયમાચ્છિન્દજ્જાતવેદઃ । મરુતોઽદ્ભિસ્તમયિત્વા
। એતત્તે તદશનેઃ સંભરામિ । સાત્મા અગ્ને સહૃદયો ભવેહ ।
ચિત્રિયાદશ્વત્થાથ્સંભૃતા બૃહત્યઃ ॥ ૧। ૨। ૧। ૭॥

૮ શરીરમભિ સરꣳસ્કૃતાઃ સ્થ । પ્રજાપતિના યજ્ઞમુખેન સંમિતાઃ ।
તિસ્રસ્ત્રિવૃદ્ભિર્મિથુનાઃ પ્રજાત્યૈ । અશ્વત્થાદ્ધવ્યવાહાદ્ધિ જાતામ્
। અગ્નેસ્તનૂં યજ્ઞિયાꣳ સંભરામિ । શાન્તયોનિꣳ શમીગર્ભમ્ ।
અગ્નયે પ્રજનયિતવે । યો અશ્વત્થઃ શમીગર્ભઃ । આરુરોહ ત્વે
સચા । તં તે હરામિ બ્રહ્મણા ॥ ૧। ૨। ૧। ૮॥

૯ યજ્ઞિયૈઃ કેતુભિઃ સહ । યં ત્વા સમભરજ્જાતવેદઃ । યથા
શરીરં ભૂતેષુ ન્યક્તમ્ । સ સંભૃતઃ સીદ શિવઃ પ્રજાભ્યઃ ।
ઉરું નો લોકમનુનેષિ વિદ્વાન્ । પ્રવેધસે કવયે મેધ્યાય । વચો

વન્દારુ વૃષભાય વૃષ્ણે । યતો ભયમભયં તન્નો અસ્તુ । અવ
દેવાન્, યજે હેડ્યાન્ । સમિધાઽગ્નિં દુવસ્યત ॥ ૧। ૨। ૧। ૯॥

૧૦ ઘૃતૈર્બોધયતાતિથિમ્ । આઽસ્મિન્ હવ્યા જુહોતન । ઉપ ત્વાઽગ્ને
હવિષ્મતીઃ । ઘૃતાચીર્યન્તુ હર્યત । જુષસ્વ સમિધો મમ । તં
ત્વા સમિદ્ભિરઙ્ગિરઃ । ઘૃતેન વર્ધયામસિ । બૃહચ્છોચા યવિષ્ઠ્ય ।
સમિધ્યમાનઃ પ્રથમો નુ ધર્મઃ । સમક્તુભિરજ્યતે વિશ્વવારઃ ॥ ૧। ૨। ૧। ૧૦॥

૧૧ શોચિષ્કેશો ઘૃતનિર્ણિક્પાવકઃ । સુયજ્ઞો અગ્નિર્યજથાય દેવાન્ ।
ઘૃતપ્રતીકો ઘૃતયોનિરગ્નિઃ । ઘૃતૈઃ સમિદ્ધો ઘૃતમસ્યાન્નમ્ ।
ઘૃતપ્રુષસ્ત્વા સરિતો વહન્તિ । ઘૃતં પિબન્થ્સુયજા યક્ષિ દેવાન્ ।
આયુર્દા અગ્ને હવિષો જુષાણઃ । ઘૃતપ્રતીકો ઘૃતયોનિરેધિ । ઘૃતં
પીત્વા મધુ ચારુ ગવ્યમ્ । પિતેવ પુત્રમભિ રક્ષતાદિમમ્ ॥ ૧। ૨। ૧। ૧૧॥

૧૨ ત્વામગ્ને સમિધાનં યવિષ્ઠ । દેવા દૂતં ચક્રિરે હવ્યવાહમ્ ।
ઉરુજ્રયસં ઘૃતયોનિમાહુતમ્ । ત્વેષં ચક્ષુર્દધિરે ચોદયન્વતિ ।
ત્વામગ્ને પ્રદિવ આહુતં ઘૃતેન । સુમ્નાયવઃ સુષમિધા સમીધિરે ।
સ વાવૃધાન ઓષધીભિરુક્ષિતઃ । ઉરુજ્રયાꣳસિ પાર્થિવા વિતિષ્ઠસે
। ઘૃતપ્રતીકં વ ઋતસ્ય ધૂર્ષદમ્ । અગ્નિં મિત્રં ન સમિધાન
ઋઞ્જતે ॥ ૧। ૨। ૧। ૧૨॥

૧૩ ઇન્ધાનો અક્રો વિદથેષુ દીદ્યત્ । શુક્રવર્ણામુદુ નો યꣳસતે ધિયમ્
। પ્રજા અગ્ને સંવાસય । આશાશ્ચ પશુભિઃ સહ । રાષ્ટ્રાણ્યસ્મા
આધેહિ । યાન્યાસન્થ્સવિતુઃ સવે । મહી વિશ્પત્ની સદને ઋતસ્ય
। અર્વાચી એતં ધરુણે રયીણામ્ । અન્તર્વત્ની જન્યં જાતવેદસમ્ ।
અધ્વરાણાં જનયથઃ પુરોગામ્ ॥ ૧। ૨। ૧। ૧૩॥

૧૪ આરોહતં દશતꣳ શક્વરીર્મમ । ઋતેનાગ્ન આયુષા વર્ચસા
સહ । જ્યોગ્જીવન્ત ઉત્તરામુત્તરાꣳ સમામ્ । દર્શમહં પૂર્ણમાસં
યજ્ઞં યથા યજૈ । ઋત્વિયવતી સ્થો અગ્નિરેતસૌ । ગર્ભં દધાથાં તે
વામહં દદે । તથ્સત્યં યદ્વીરં બિભૃથઃ । વીરં જનયિષ્યથઃ
। તે મત્પ્રાતઃ પ્રજનિષ્યેથે । તે મા પ્રજાતે પ્રજનયિષ્યથઃ ॥ ૧। ૨। ૧। ૧૪॥

૧૫ પ્રજયા પશુભિર્બ્રહ્મવર્ચસેન સુવર્ગે લોકે । અનૃતાથ્સત્યમુપૈમિ ।
માનુષાદ્દૈવ્યમુપૈમિ । દૈવીં વાચં યચ્છામિ । શલ્કૈરગ્નિમિન્ધાનઃ
। ઉભૌ લોકૌ સનેમહમ્ । ઉભયોર્લોકયોર્ઋદ્ધ્વા । અતિ મૃત્યું
તરામ્યહમ્ । જાતવેદો ભુવનસ્ય રેતઃ । ઇહ સિઞ્ચ તપસો
યજ્જનિષ્યતે ॥ ૧। ૨। ૧। ૧૫॥

૧૬ અગ્નિમશ્વત્થાદધિ હવ્યવાહમ્ । શમીગર્ભાજ્જનયન્, યો મયોભૂઃ
। અયં તે યોનિરૃત્વિયઃ । યતો જાતો અરોચથાઃ । તં જાનન્નગ્ન
આરોહ । અથા નો વર્ધયા રયિમ્ । અપેત વીત વિ ચ સર્પતાતઃ । યેઽત્ર
સ્થ પુરાણા યે ચ નૂતનાઃ । અદાદિદં યમોઽવસાનં પૃથિવ્યાઃ ।
અક્રન્નિમં પિતરો લોકમસ્મૈ ॥ ૧। ૨। ૧। ૧૬॥

૧૭ અગ્નેર્ભસ્માસ્યગ્નેઃ પુરીષમસિ । સંજ્ઞાનમસિ કામધરણમ્ । મયિ તે
કામધરણં ભૂયાત્ । સં વઃ સૃજામિ હૃદયાનિ । સꣳ સૃષ્ટં મનો
અસ્તુ વઃ । સꣳ સૃષ્ટઃ પ્રાણો અસ્તુ વઃ । સં યા વઃ પ્રિયાસ્તનુવઃ ।
સંપ્રિયા હૃદયાનિ વઃ । આત્મા વો અસ્તુ સંપ્રિયઃ । સંપ્રિયાસ્તનુવો મમ
॥ ૧। ૨। ૧। ૧૭॥

૧૮ કલ્પેતાં દ્યાવાપૃથિવી । કલ્પન્તામાપ ઓષધીઃ । કલ્પન્તામગ્નયઃ
પૃથક્ । મમ જ્યૈષ્ઠ્યાય સવ્રતાઃ । યેઽગ્નયઃ સમનસઃ । અન્તરા
દ્યાવાપૃથિવી । વાસન્તિકાવૃતૂ અભિ કલ્પમાનાઃ । ઇન્દ્રમિવ દેવા અભિ
સંવિશન્તુ । દિવસ્ત્વા વીર્યેણ । પૃથિવ્યૈ મહિમ્ના ॥ ૧। ૨। ૧। ૧૮॥

૧૯ અન્તરિક્ષસ્ય પોષેણ । સર્વપશુમાદધે । અજીજનન્નમૃતં મર્ત્યાસઃ
। અસ્રેમાણં તરણિં વીડુજમ્ભમ્ । દશ સ્વસારો અગ્રુવઃ સમીચીઃ ।
પુમાꣳસં જાતમભિ સꣳ રભન્તામ્ । પ્રજાપતેસ્ત્વા પ્રાણેનાભિ પ્રાણિમિ
। પૂષ્ણઃ પોષેણ મહ્યમ્ । દીર્ઘાયુત્વાય શતશારદાય । શતꣳ
શરદ્ભ્ય આયુષે વર્ચસે ॥ ૧। ૨। ૧। ૧૯॥

૨૦ જીવાત્વૈ પુણ્યાય । અહં ત્વદસ્મિ મદસિ ત્વમેતત્ । મમાસિ યોનિસ્તવ
યોનિરસ્મિ । મમૈવ સન્વહ હવ્યાન્યગ્ને । પુત્રઃ પિત્રે લોકકૃજ્જાતવેદઃ

। પ્રાણે ત્વાઽમૃતમાદધામિ । અન્નાદમન્નાદ્યાય । ગોપ્તારં ગુપ્ત્યૈ ।
સુગાર્હપત્યો વિદહન્નરાતીઃ । ઉષસઃ શ્રેયસીઃ શ્રેયસીર્દધત્ ॥
૧। ૨। ૧। ૨૦॥

૨૧ અગ્ને સપત્નાઁ અપ બાધમાનઃ । રાયસ્પોષમિષમૂર્જમસ્માસુ ધેહિ ।
ઇમા ઉ મામુપ તિષ્ઠન્તુ રાયઃ । આભિઃ પ્રજાભિરિહ સંવસેય । ઇહો ઇડા
તિષ્ઠતુ વિશ્વરૂપી । મધ્યે વસોર્દીદિહિ જાતવેદઃ । ઓજસે બલાય ત્વોદ્યચ્છે ।
વૃષણે શુષ્માયાયુષે વર્ચસે । સપત્નતૂરસિ વૃત્રતૂઃ । યસ્તે
દેવેષુ મહિમા સુવર્ગઃ ॥ ૧। ૨। ૧। ૨૧॥

૨૨ યસ્ત આત્મા પશુષુ પ્રવિષ્ટઃ । પુષ્ટિર્યા તે મનુષ્યેષુ પપ્રથે
। તયા નો અગ્ને જુષમાણ એહિ । દિવઃ પૃથિવ્યાઃ પર્યન્તરિક્ષાત્ ।
વાતાત્પશુભ્યો અધ્યોષધીભ્યઃ । યત્ર યત્ર જાતવેદઃ સંબભૂથ । તતો
નો અગ્ને જુષમાણ એહિ । પ્રાચીમનુ પ્રદિશં પ્રેહિ વિદ્વાન્ । અગ્નેરગ્ને
પુરો અગ્નિર્ભવેહ । વિશ્વા આશા દીદ્યાનો વિભાહિ ॥ ૧। ૨। ૧। ૨૨॥

૨૩ ઊર્જં નો ધેહિ દ્વિપદે ચતુષ્પદે । અન્વગ્નિરુષસામગ્રમખ્યત્ ।
અન્વહાનિ પ્રથમો જાતવેદાઃ । અનુ સૂર્યસ્ય પુરુત્રા ચ રશ્મીન્ । અનુ
દ્યાવાપૃથિવી આતતાન । વિક્રમસ્વ મહાઁ અસિ । વેદિષન્માનુષેભ્યઃ ।
ત્રિષુ લોકેષુ જાગૃહિ । યદિદં દિવો યદદઃ પૃથિવ્યાઃ । સંવિદાને
રોદસી સંબભૂવતુઃ ॥ ૧। ૨। ૧। ૨૩॥

૨૪ તયોઃ પૃષ્ઠે સીદતુ જાતવેદાઃ । શંભૂઃ પ્રજાભ્યસ્તનુવે સ્યોનઃ ।
પ્રાણં ત્વાઽમૃત આદધામિ । અન્નાદમન્નાદ્યાય । ગોપ્તારં ગુપ્ત્યૈ ।
યત્તે શુક્ર શુક્રં વર્ચઃ શુક્રા તનૂઃ । શુક્રં જ્યોતિરજસ્રમ્ । તેન
મે દીદિહિ તેન ત્વાઽઽદધે । અગ્નિનાઽગ્ને બ્રહ્મણા । આનશે વ્યાનશે
સર્વમાયુર્વ્યાનશે ॥ ૧। ૨। ૧। ૨૪॥

૨૫ નર્ય પ્રજાં મે ગોપાય । અમૃતત્વાય જીવસે । જાતાં જનિષ્યમાણાં
ચ । અમૃતે સત્યે પ્રતિષ્ઠિતામ્ । અથર્વ પિતું મે ગોપાય ।
રસમન્નમિહાયુષે । અદબ્ધાયોઽશીતતનો । અવિષં નઃ પિતું કૃણુ ।
શસ્ય પશૂન્મે ગોપાય । દ્વિપાદો યે ચતુષ્પદઃ ॥ ૧। ૨। ૧। ૨૫॥

૨૬ અષ્ટાશફાશ્ચ ય ઇહાગ્ને । યે ચૈકશફા આશુગાઃ । સપ્રથ
સભાં મે ગોપાય । યે ચ સભ્યાઃ સભાસદઃ । તાનિન્દ્રિયાવતઃ કુરુ ।
સર્વમાયુરુપાસતામ્ । અહે બુધ્નિય મન્ત્રં મે ગોપાય । યમૃષયસ્ત્રૈવિદા
વિદુઃ । ઋચઃ સામાનિ યજૂꣳષિ । સા હિ શ્રીરમૃતા સતામ્ ॥ ૧। ૨। ૧। ૨૬॥
૨૭ ચતુઃશિખણ્ડા યુવતિઃ સુપેશાઃ । ઘૃતપ્રતીકા ભુવનસ્ય મધ્યે
। મર્મૃજ્યમાના મહતે સૌભગાય । મહ્યં ધુક્ષ્વ યજમાનાય કામાન્
। ઇહૈવ સન્તત્ર સતો વો અગ્નયઃ । પ્રાણેન વાચા મનસા બિભર્મિ ।
તિરો મા સન્તમાયુર્મા પ્રહાસીત્ । જ્યોતિષા વો વૈશ્વાનરેણોપતિષ્ઠે ।
પઞ્ચધાઽગ્નીન્વ્યક્રામત્ । વિરાટ્થ્સૃષ્ટા પ્રજાપતેઃ । ઊર્ધ્વાઽઽરોહદ્રોહિણી
। યોનિરગ્નેઃ પ્રતિષ્ઠિતિઃ ॥ ૧। ૨। ૧। ૨૭॥ વિશન્તુ નઃ પુરૂચીર્વિધેમ
નિધાય યત્તેઽપ્રદાહાય બૃહત્યો બ્રહ્મણા દુવસ્યત વિશ્વવાર
ઇમમૃઞ્જતે પુરોગાં પ્રજનયિષ્યથો જનિષ્યતેઽસ્મૈ મમ મહિમ્ના
વર્ચસે દધથ્સુવર્ગો ભાહિ સંબભૂવતુરાયુર્વ્યાનશે ચતુષ્પદઃ
સતાં પ્રજાપતેર્દ્વે ચ ॥ ૧॥
૨૮ નવૈતાન્યહાનિ ભવન્તિ । નવ વૈ સુવર્ગા લોકાઃ । યદેતાન્યહાન્યુપયન્તિ
। નવસ્વેવ તથ્સુવર્ગેષુ લોકેષુ સત્રિણઃ પ્રતિતિષ્ઠન્તો યન્તિ ।
અગ્નિષ્ટોમાઃ પરઃ સામાનઃ કાર્યા ઇત્યાહુઃ । અગ્નિષ્ટોમસંમિતઃ સુવર્ગો
લોક ઇતિ । દ્વાદશાગ્નિષ્ટોમસ્ય સ્તોત્રાણિ । દ્વાદશ માસાઃ સંવથ્સરઃ ।
તત્તન્ન સૂર્ક્ષ્યમ્ । ઉક્થ્યા એવ સપ્તદશાઃ પરઃ સામાનઃ કાર્યાઃ ॥ ૧। ૨। ૨। ૧॥
૨૯ પશવો વા ઉક્થાનિ । પશૂનામવરુધ્યૈ ।
વિશ્વજિદભિજિતાવગ્નિષ્ટોમૌ । ઉક્થ્યાઃ સપ્તદશાઃ પરઃ સામાનઃ ।
તે સરꣳસ્તુતા વિરાજમભિ સંપદ્યન્તે । દ્વે ચર્ચાવતિ રિચ્યેતે । એકયા
ગૌરતિરિક્તઃ । એકયાઽઽયુરૂનઃ । સુવર્ગો વૈ લોકો જ્યોતિઃ । ઊર્ગ્વિરાટ્ ॥ ૧। ૨। ૨। ૨॥
૩૦ સુવર્ગમેવ તેન લોકમભિ જયન્તિ । યત્પરꣳ રાથન્તરમ્ ।
તત્પ્રથમેઽહન્કાર્યમ્ । બૃહદ્દ્વિતીયે । વૈરૂપં તૃતીયે ।
વૈરાજં ચતુર્થે । શાક્વરં પઞ્ચમે । રૈવતꣳ ષષ્ઠે । તદ્

પૃષ્ઠેભ્યો નયન્તિ । સંતનય એતે ગ્રહા ગૃહ્યન્તે ॥ ૧। ૨। ૨। ૩॥

૩૧ અતિગ્રાહ્યાઃ પરઃ સામસુ । ઇમાનેવૈતૈર્લોકાન્થ્સં તન્વન્તિ । મિથુના એતે ગ્રહા ગૃહ્યન્તે । અતિગ્રાહ્યાઃ પરઃ સામસુ । મિથુનમેવ તૈર્યજમાના અવરુન્ધતે । બૃહત્પૃષ્ઠં ભવતિ । બૃહદ્વૈ સુવર્ગો લોકઃ । બૃહતૈવ સુવર્ગં લોકં યન્તિ । ત્રયસ્ત્રિ ँ શિ નામ સામ । માધ્યન્દિને પવમાને ભવતિ ॥ ૧। ૨। ૨। ૪॥

૩૨ ત્રયસ્ત્રિ ँ શદ્વૈ દેવતાઃ । દેવતા એવાવરુન્ધતે । યે વા ઇતઃ પરાઞ્ચ ँ સંવથ્સરમુપ યન્તિ । ન હૈનં તે સ્વસ્તિ સમશ્નુવતે । અથ યેઽમુતોઽર્વાઞ્ચમુપ યન્તિ । તે હૈનર ँ સ્વસ્તિ સમશ્ઞુવતે । એતદ્વા અમુતોઽર્વાઞ્ચમુપ યન્તિ । યદેવમ્ । યો હ ખલુ વાવ પ્રજાપતિઃ । સ ઉ વેવેન્દ્રઃ । તદુ દેવેભ્યો નયન્તિ ॥ ૧। ૨। ૨। ૫॥ કાર્યા વિરાડ્ગૃહ્યન્તે પવમાને ભવતીન્દ્ર એકં ચ ॥ ૨॥

૩૩ સંતતિર્વા એતે ગ્રહાઃ । યત્પરઃ સામાનઃ । વિષૂવાન્દિવાકીર્ત્યમ્ । યથા શાલાયૈ પક્ષસી । એવ ँ સંવથ્સરસ્ય પક્ષસી । યદેતેન ગૃહ્યેરન્ । વિષૂચી સંવથ્સરસ્ય પક્ષસી વ્યવસ્ર ँ સેયાતામ્ । આર્તિમાર્છેયુઃ । યદેતે ગૃહ્યન્તે । યથા શાલાયૈ પક્ષસી મધ્યમં વ ँ શમભિ સમાયચ્છતિ ॥ ૧। ૨। ૩। ૧॥

૩૪ એવ ँ સંવથ્સરસ્ય પક્ષસી દિવાકીર્ત્યમભિ સંતન્વન્તિ । નાઽઽર્તિમાર્છન્તિ । એકવિ ँ શમહર્ભવતિ । શુક્રાગ્રા ગ્રહા ગૃહ્યન્તે । પ્રત્યુત્તબ્ધ્યૈ સયત્વાય । સૌર્યં એતદહઃ પશુરાલભ્યતે । સૌર્‍યોઽતિગ્રાહ્યો ગૃહ્યતે । અહરેવ રૂપેણ સમર્ધયન્તિ । અથો અહ્ન એવૈષ બલિર્હ્રિયતે । સપ્તૈતદહરતિગ્રાહ્યા ગૃહ્યન્તે ॥ ૧। ૨। ૩। ૨॥

૩૫ સપ્ત વૈ શીર્ષણ્યાઃ પ્રાણાઃ । અસાવાદિત્યઃ શિરઃ પ્રજાનામ્ । શીર્ષન્નેવ પ્રજાનાં પ્રાણાન્દધાતિ । તસ્માથ્સપ્ત શીર્ષન્પ્રાણાઃ । ઇન્દ્રો વૃત્ર ँ હત્વા । અસુરાન્પરાભાવ્ય । સ ઇમાન્ લોકાનભ્યજયત્ । તસ્યાસૌ લોકોઽનભિજિત આસીત્ । તં વિશ્વકર્મા ભૂત્વાઽભ્યજયત્ । યદ્વૈશ્વકર્મણો ગૃહ્યતે ॥ ૧। ૨। ૩। ૩॥

૩૬ સુવર્ગસ્ય લોકસ્યાભિજિત્યૈ । પ્ર વા એતેઽસ્માલ્લોકાચ્ચ્યવન્તે
। યે વૈશ્વકર્મણં ગૃહ્ણતે । આદિત્યઃ શ્વો ગૃહ્યતે ।
ઇયં વા અદિતિઃ । અસ્યામેવ પ્રતિતિષ્ઠન્તિ । અન્યોન્યો ગૃહ્યેતે ।
વિશ્વાન્યેવાન્યેન કર્માણિ કુર્વાણા યન્તિ । અસ્યામન્યેન પ્રતિતિષ્ઠન્તિ
। તાવાપરાર્ધાથ્સંવથ્સરસ્યાન્યોન્યો ગૃહ્યેતે । તાવુભૌ સહ
મહાવ્રતે ગૃહ્યેતે । યજ્ઞસ્યૈવાન્તં ગત્વા । ઉભયોર્લોકયોઃ
પ્રતિતિષ્ઠન્તિ । અર્ક્યમુક્થં ભવતિ । અન્નાદ્યસ્યાવરુધ્યૈ ॥ ૧। ૨। ૩। ૪॥
સમાયચ્છત્યતિગ્રાહ્યા ગૃહ્યન્તે ગૃહ્યતે સંવથ્સરસ્યાન્યોન્યો ગૃહ્યેતે
પઞ્ચ ચ ॥ ૩॥

૩૭ એકવિ ँ શ એષ ભવતિ । એતેન વૈ દેવા એકવિ ँ શેન
। આદિત્યમિત ઉત્તમ ँ સુવર્ગં લોકમારોહયન્ન્ । સ વા એષ ઇત
એકવિ ँ શઃ । તસ્ય દશાવસ્તાદહાનિ । દશ પરસ્તાત્ । સ વા એષ
વિરાજ્યુભયતઃ પ્રતિષ્ઠિતઃ । વિરાજિ હિ વા એષ ઉભયતઃ પ્રતિષ્ઠિતઃ
। તસ્માદન્તરેમૌ લોકૌ યન્ । સર્વેષુ સુવર્ગેષુ લોકેષ્વભિતપન્નેતિ ॥

૧। ૨। ૪। ૧॥

૩૮ દેવા વા આદિત્યસ્ય સુવર્ગસ્ય લોકસ્ય । પરાચોઽતિપાદાદબિભયુઃ
। તં છન્દોભિરદૃ ँ હન્ધૃત્યૈ । દેવા વા આદિત્યસ્ય સુવર્ગસ્ય
લોકસ્ય । અવાચોઽવપાદાદબિભયુઃ । તં પઞ્ચભી રશ્મિભિરુદવયન્ન્
। તસ્માદેકવિ ँ શેઽહન્પઞ્ચ દિવાકીર્ત્યાનિ ક્રિયન્તે । રશ્મયો વૈ
દિવાકીર્ત્યાનિ । યે ગાયત્રે । તે ગાયત્રીષૂત્તરયોઃ પવમાનયોઃ ॥ ૧। ૨। ૪। ૨॥

૩૯ મહાદિવાકીર્ત્ય ँ હોતુઃ પૃષ્ઠમ્ । વિકર્ણં બ્રહ્મસામમ્ ।
ભાસોઽગ્નિષ્ટોમઃ । અથૈતાનિ પરાણિ । પરૈર્વૈ દેવા આદિત્ય ँ સુવર્ગં
લોકમપારયન્ન્ । યદપારયન્ન્ । તત્પરાણાં પરત્વમ્ । પારયન્ત્યેનં પરાણિ ।
ય એવં વેદ । અથૈતાનિ સ્પરાણિ । સ્પરૈર્વૈ દેવા આદિત્ય ँ સુવર્ગં
લોકમસ્પારયન્ન્ । યદસ્પારયન્ન્ । તથ્સ્પરાણાગ્ સ્પરત્વમ્ । સ્પારયન્ત્યેનગ્ગ્
સ્પરાણિ । ય એવં વેદ ॥ ૧। ૨। ૪। ૩॥ એતિ પવમાનયોઃ સ્પરાણિ પઞ્ચ

ચ ॥ ૪॥

૪૦ અપ્રતિષ્ઠાં વા એતે ગચ્છન્તિ । યેષાꣳ સંવત્સરેઽનાપ્તેઽથ ।
એકાદશિન્યાપ્યતે । વૈષ્ણવં વામનમાલભન્તે । યજ્ઞો વૈ વિષ્ણુઃ
। યજ્ઞમેવાલભન્તે પ્રતિષ્ઠિત્યૈ । ઐન્દ્રાગ્નમાલભન્તે । ઇન્દ્રાગ્ની વૈ
દેવાનામયાતયામાનૌ । યે એવ દેવતે અયાતયામ્ની । તે એવાલભન્તે ॥ ૧। ૨। ૫। ૧॥

૪૧ વૈશ્વદેવમાલભન્તે । દેવતા એવાવરુન્ધતે । દ્યાવાપૃથિવ્યાં
ધેનુમાલભન્તે । દ્યાવાપૃથિવ્યોરેવ પ્રતિતિષ્ઠન્તિ । વાયવ્યં
વત્સમાલભન્તે । વાયુરેવૈભ્યો યથાઽઽયતનાદ્દેવતા અવરુન્ધે ।
આદિત્યામવિં વશામાલભન્તે । ઇયં વા અદિતિઃ । અસ્યામેવ પ્રતિતિષ્ઠન્તિ ।
મૈત્રાવરુણીમાલભન્તે ॥ ૧। ૨। ૫। ૨॥

૪૨ મિત્રેણૈવ યજ્ઞસ્ય સ્વિષ્ટꣳ શમયન્તિ । વરુણેન દુરિષ્ટમ્ ।
પ્રાજાપત્યં તૂપરં મહાવ્રત આલભન્તે । પ્રાજાપત્યોઽતિગ્રાહ્યો
ગૃહ્યતે । અહરેવ રૂપેણ સમર્ધયન્તિ । અથો અહ્ન એવૈષ
બલિર્હ્રિયતે । આગ્નેયમાલભન્તે પ્રતિ પ્રજ્ઞાત્યૈ । અજપેત્વાન્, વા એતે
પૂર્વૈર્માસૈરવરુન્ધતે । યદેતે ગવ્યાઃ પશવ આલભ્યન્તે । ઉભયેષાં
પશૂનામવરુધ્યૈ ॥ ૧। ૨। ૫। ૩॥

૪૩ યદતિરિક્તામેકાદશિનીમાલભેરન્ । અપ્રિયં ભ્રાતૃવ્યમભ્યતિરિચ્યેત ।
યદ્વૌ દ્વૌ પશૂ સમસ્યેયુઃ । કનીય આયુઃ કુર્વીરન્ । યદેતે બ્રાહ્મણવન્તઃ
પશવ આલભ્યન્તે । નાપ્રિયં ભ્રાતૃવ્યમભ્યતિરિચ્યતે । ન કનીય
આયુઃ કુર્વતે ॥ ૧। ૨। ૫। ૪॥ તે એવાલભન્તે મૈત્રાવરુણીમાલભન્તેઽવરુધ્યૈ
સપ્ત ચ ॥ ૫॥

૪૪ પ્રજાપતિઃ પ્રજાઃ સૃષ્ટ્વા વૃત્તોઽશયત્ । તં દેવા ભૂતાનાꣳ રસં
તેજઃ સંભૃત્ય । તેનૈનમભિષજ્યન્ । મહાનવવર્તીતિ । તન્મહાવ્રતસ્ય
મહાવ્રતત્વમ્ । મહદ્વ્રતમિતિ । તન્મહાવ્રતસ્ય મહાવ્રતત્વમ્ । મહતો
વ્રતમિતિ । તન્મહાવ્રતસ્ય મહાવ્રતત્વમ્ । પઞ્ચવિꣳશઃ સ્તોમો
ભવતિ ॥ ૧। ૨। ૬। ૧॥

૪૫ ચતુર્વિꣳશત્યર્ધમાસઃ સંવત્સરઃ । યદ્વા એતસ્મિન્ત્સંવત્સરેઽધિ

પ્રાજાયત । તદન્નં પઞ્ચવિꣳશમભવત્ । મધ્યતઃ ક્રિયતે । મધ્યતો
હ્યન્નમશિતં ધિનોતિ । અથો મધ્યત એવ પ્રજાનામૂર્ધીયતે । અથ
યદ્વા ઇદમન્તતઃ ક્રિયતે । તસ્માદુદન્તે પ્રજાઃ સમેધન્તે । અન્તતઃ
ક્રિયતે પ્રજનનાયૈવ । ત્રિવૃચ્છિરો ભવતિ ॥ ૧। ૨। ૬। ૨॥

૪૬ ત્રેધા વિહિતꣳ હિ શિરઃ । લોમ છવીરસ્થિ । પરાચા સ્તુવન્તિ
। તસ્માત્તથ્સદૃગેવ । ન મેદ્યતોઽનુમેદ્યતિ । ન કૃશ્યતોઽનુ
કૃશ્યતિ । પઞ્ચદશોઽન્યઃ પક્ષો ભવતિ । સપ્તદશોઽન્યઃ ।
તસ્માદ્વયાગ્સ્યન્યતરમર્ધમભિ પર્યાવર્તન્તે । અન્યતરતો હિ તદ્વરીયઃ
ક્રિયતે ॥ ૧। ૨। ૬। ૩॥

૪૭ પઞ્ચવિꣳશ આત્મા ભવતિ । તસ્માન્મધ્યતઃ પશવો વરિષ્ઠાઃ
। એકવિꣳશં પુચ્છમ્ । દ્વિપદાસુ સ્તુવન્તિ પ્રતિષ્ઠિત્યૈ ।
સર્વેણ સહ સ્તુવન્તિ । સર્વેણ હ્યાત્મનાઽઽત્મન્વી । સહોત્પતન્તિ ।
એકૈકામુચ્છિꣳષન્તિ । આત્મન્ હ્યઙ્ગાનિ બદ્ધાનિ । ન વા એતેન સર્વઃ
પુરુષઃ ॥ ૧। ૨। ૬। ૪॥

૪૮ યદિત ઇતો લોમાનિ દતો નખાન્ । પરિમાદઃ ક્રિયન્તે । તાન્યેવ
તેન પ્રત્યુપ્યન્તે । ઔદુમ્બરસ્તલ્પો ભવતિ । ઊર્ગ્વા અન્નમુદુમ્બરઃ ।
ઊર્જ એવાન્નાદ્યસ્યાવરુધ્યૈ । યસ્ય તલ્પસદ્યમનભિજિતગ્ગ્ સ્યાત્ । સ
દેવાનાꣳ સામ્યક્ષે । તલ્પસદ્યમભિજયાનીતિ તલ્પમારુહ્યોદ્ગાયેત્ ।
તલ્પસદ્યમેવાભિજયતિ ॥ ૧। ૨। ૬। ૫॥

૪૯ યસ્ય તલ્પસદ્યમભિજિતગ્ગ્ સ્યાત્ । સ દેવાનાꣳ સામ્યક્ષે ।
તલ્પસદ્યં મા પરાજેષીતિ તલ્પમારુહ્યોદ્ગાયેત્ । ન તલ્પસદ્યં
પરાજયતે । પ્લેઙ્ખે શꣳસતિ । મહો વૈ પ્લેઙ્ખઃ । મહસ
એવાન્નાદ્યસ્યાવરુદ્ધ્યૈ । દેવાસુરાઃ સંયત્તા આસન્ । ત આદિત્યે વ્યાયચ્છન્ત ।
તં દેવાઃ સમજયન્ ॥ ૧। ૨। ૬। ૬॥

૫૦ બ્રાહ્મણશ્ચ શૂદ્રશ્ચ ચર્મકર્તે વ્યાયચ્છેતે । દૈવ્યો
વૈ વર્ણો બ્રાહ્મણઃ । અસુર્યઃ શૂદ્રઃ । ઇમેઽરાથ્સુરિમે
સુભૂતમક્રન્નિત્યન્યતરો બ્રૂયાત્ । ઇમ ઉદ્વાસીકારિણ ઇમે

દુર્ભૂતમક્રન્નિત્યન્યતરઃ । યદ્દેવૈષા ꣳ સુકૃતં યા રાદ્ધિઃ
। તદન્યતરોઽભિશ્રીણાતિ । યદ્દેવૈષાં દુષ્કૃતં યાઽરાદ્ધિઃ
। તદન્યતરોઽપહન્તિ । બ્રાહ્મણઃ સંજયતિ । અમુમેવાદિત્યં
ભ્રાતૃવ્યસ્ય સં વિન્દન્તે ॥ ૧। ૨। ૬। ૭॥ ભવતિ ભવતિ ક્રિયતે
પુરુષો જયત્યજયઞ્જયત્યેકં ચ ॥ ૬॥

ઉદ્ધન્યમાનં નવૈતાનિ સન્તતિરેકવિ ꣳ શ એષોઽપ્રતિષ્ઠાં
પ્રજાપતિર્વૃત્તષ્ષટ્ ॥ ૬॥

ઉદ્ધન્યમાન ꣳ શોચિષ્કેશોઽગ્ને સપત્નાનતિગ્રાહ્યા
વૈશ્વદેવમાલભન્તે પઞ્ચાશત્ ॥ ૫૦॥

ઉદ્ધન્યમાન ꣳ સંવિંદન્તે ॥

## પ્રથમાષ્ટકે તૃતીયઃ પ્રપાઠકઃ ૩

૧ દેવાસુરાઃ સંયત્તા આસન્ । તે દેવા વિજયમુપયન્તઃ ।
અગ્નીષોમયોસ્તેજસ્વિનીસ્તનૂઃ સંન્યદધત । ઇદમુ નો ભવિષ્યતિ ।
યદિ નો જેષ્યન્તીતિ । તેનાગ્નીષોમાવપાક્રામતામ્ । તે દેવા વિજિત્ય ।
અગ્નીષોમાવન્વૈચ્છન્ । તેઽગ્નિમન્વવિન્દન્નૃતુષૂત્સન્નમ્ । તસ્ય
વિભક્તીભિસ્તેજસ્વિનીસ્તનૂરવારુન્ધત ॥ ૧। ૩। ૧। ૧॥

૨ તે સોમમન્વવિન્દન્ । તમઘ્નન્ । તસ્ય યથાઽભિજ્ઞાયં તનૂર્વ્યગૃહ્ણત । તે
ગ્રહા અભવન્ । તદ્ગ્રહાણાં ગ્રહત્વમ્ । યસ્યૈવં વિદુષો ગ્રહા ગૃહ્યન્તે
। તસ્ય ત્વેવ ગૃહીતાઃ । નાનાગ્નેયં પુનરાધેયે કુર્યાત્ । યદનાગ્નેયં
પુનરાધેયે કુર્યાત્ । વ્યૃદ્ધમેવ તત્ ॥ ૧। ૩। ૧। ૨॥

૩ અનાગ્નેયં વા એતત્ક્રિયતે । યથ્સમિધસ્તનૂનપાતમિડો બર્હિર્યજતિ
। ઉભાવાગ્નેયાવાજ્યભાગૌ સ્યાતામ્ । અનાજ્યભાગૌ ભવત ઇત્યાહુઃ ।
યદુભાવાગ્નેયાવન્વઞ્ચાવિતિ । અગ્નયે પવમાનાયોત્તરઃ સ્યાત્ ।
યત્પવમાનાય । તેનાજ્યભાગઃ । તેન સૌમ્યઃ । બુધન્વત્યાગ્નેયસ્યાજ્યભાગસ્ય
પુરોઽનુવાક્યા ભવતિ ॥ ૧। ૩। ૧। ૩॥

૪ યથા સુપ્તં બોધયતિ । તાદૃગેવ તત્ । અગ્નિન્ચક્તાઃ
પત્નીસંયાજાનામૃચઃ સ્યુઃ । તેનાગ્નેયꣳ સર્વં ભવતિ । એકધા
તેજસ્વિનીં દેવતામુપૈતીત્યાહુઃ । સૈનમીશ્વરા પ્રદહ ઇતિ । નેતિ
બ્રૂયાત્ । પ્રજનનં વા અગ્નિઃ । પ્રજનનમેવોપૈતીતિ । કૃતયજુઃ
સંભૃતસંભાર ઇત્યાહુઃ ॥ ૧। ૩। ૧। ૪॥

૫ ન સંભૃત્યાઃ સંભારાઃ । ન યજુઃ કાર્યમિતિ । અથો ખલુ । સંભૃત્યા
એવ સંભારાઃ । કાર્યં યજુઃ । પુનરાધેયસ્ય સમૃદ્ધ્યૈ ।
તેનોપાꣳશુ પ્રચરતિ । એષ્ય ઇવ વા એષઃ । યત્પુનરાધેયઃ ।
યથોપાꣳશુ નષ્ટમિચ્છતિ ॥ ૧। ૩। ૧। ૫॥

૬ તાદૃગેવ તત્ । ઉચ્ચૈઃ સ્વિષ્ટકૃતમુત્સૃજતિ । યથા નષ્ટં વિત્ત્વા
પ્રાહાયમિતિ । તાદૃગેવ તત્ । એકધા તેજસ્વિનીં દેવતામુપૈતીત્યાહુઃ ।
સૈનમીશ્વરા પ્રદહ ઇતિ । તત્તથા નોપૈતિ । પ્રયાજાનૂયાજેષ્વેવ
વિભક્તીઃ કુર્યાત્ । યથાપૂર્વમાજ્યભાગૌ સ્યાતામ્ । એવં પત્નીસંયાજાઃ ॥
૧। ૩। ૧। ૬॥

૭ તદ્વૈશ્વાનરવત્પ્રજનનવત્તરમુપૈતીતિ । તદાહુઃ । વ્યૃદ્ધં વા
એતત્ । અનાગ્નેયં વા એતત્ક્રિયત ઇતિ । નેતિ બ્રૂયાત્ । અગ્નિં પ્રથમં
વિભક્તીનાં યજતિ । અગ્નિમુત્તમં પત્નીસંયાજાનામ્ । તેનાગ્નેયમ્ ।
તેન સમૃદ્ધં ક્રિયત ઇતિ ॥ ૧। ૩। ૧। ૭॥ અરુન્ધતૈવ તદ્ભવતિ
સંભૃતસંભાર ઇત્યાહુરિચ્છતિ પત્નીસંયાજા નવ ચ ॥ ૧॥

૮ દેવા વૈ યથાદર્શં યજ્ઞાનાહરન્ત । યોઽગ્નિષ્ટોમમ્ । ય ઉક્થ્યમ્
। યોઽતિરાત્રમ્ । તે સહૈવ સર્વે વાજપેયમપશ્યન્ । તે । અન્યોન્યસ્મૈ
નાતિષ્ઠન્ત । અહમનેન યજા ઇતિ । તેઽબ્રુવન્ । આજિમસ્ય ધાવામેતિ
॥ ૧। ૩। ૨। ૧॥

૯ તસ્મિન્નાજિમધાવન્ । તં બૃહસ્પતિરુદજયત્ । તેનાયજત । સ
સ્વારાજ્યમગચ્છત્ । તમિન્દ્રોઽબ્રવીત્ । મામનેન યાજયેતિ । તેનેન્દ્રમયાજયત્
। સોઽગ્રં દેવતાનાં પર્યૈત્ । અગચ્છત્સ્વારાજ્યમ્ । અતિષ્ઠન્તાસ્મૈ
જ્યૈષ્ઠ્યાય ॥ ૧। ૩। ૨। ૨॥

૧૦ ય એવં વિદ્વાન્, વાજપેયેન યજતે । ગચ્છતિ સ્વારાજ્યમ્ । અગ્રꣳ
સમાનાનાં પર્યેતિ । તિષ્ઠન્તેઽસ્મૈ જ્યૈષ્ઠ્યાય । સ વા એષ બ્રાહ્મણસ્ય
ચૈવ રાજન્યસ્ય ચ યજ્ઞઃ । તં વા એતં વાજપેય ઇત્યાહુઃ । વાજાપ્યો
વા એષઃ । વાજગ્ગ્ હ્યેતેન દેવા ઐપ્સન્ન્ । સોમો વૈ વાજપેયઃ । યો વૈ
સોમં વાજપેયં વેદ ॥ ૧। ૩। ૨। ૩॥

૧૧ વાજ્યેવૈનં પીત્વા ભવતિ । આઽસ્ય વાજી જાયતે । અન્નં વૈ વાજપેયઃ
। ય એવં વેદ । અત્ત્યન્નમ્ । આઽસ્યાન્નાદો જાયતે । બ્રહ્મ વૈ વાજપેયઃ ।
ય એવં વેદ । અત્તિ બ્રહ્મણાઽન્નમ્ । આઽસ્ય બ્રહ્મા જાયતે ॥ ૧। ૩। ૨। ૪॥

૧૨ વાગ્વૈ વાજસ્ય પ્રસવઃ । ય એવં વેદ । કરોતિ વાચા વીર્યમ્ ।
ઐનં વાચા ગચ્છતિ । અપિવતીં વાચં વદતિ । પ્રજાપતિર્દેવેભ્યો
યજ્ઞાન્વ્યાદિશત્ । સ આત્મન્વાજપેયમધત્ત । તં દેવા અબ્રુવન્ । એષ વાવ
યજ્ઞઃ । યદ્વાજપેયઃ ॥ ૧। ૩। ૨। ૫॥

૧૩ અપ્યેવ નોઽત્રાસ્ત્વિતિ । તેભ્ય એતા ઉજ્જિતીઃ પ્રાયચ્છત્ । તા વા એતા
ઉજ્જિતયો વ્યાખ્યાયન્તે । યજ્ઞસ્ય સર્વત્વાય । દેવતાનામનિર્ભાગાય । દેવા
વૈ બ્રહ્મણશ્ચાન્નસ્ય ચ શમલમપાઘ્નન્ । યદ્બ્રહ્મણઃ શમલમાસીત્
। સા ગાથા નારાશગ્ગ્સ્યભવત્ । યદન્નસ્ય । સા સુરા ॥ ૧। ૩। ૨। ૬॥

૧૪ તસ્માદ્ગાયતશ્ચ મત્તસ્ય ચ ન પ્રતિગૃહ્યમ્ । યત્પ્રતિગૃહ્ણીયાત્ ।
શમલં પ્રતિગૃહ્ણીયાત્ । સર્વા વા એતસ્ય વાચોઽવરુદ્ધાઃ । યો વાજપેયયાજી ।
યા પૃથિવ્યાં યાઽગ્નૌ યા રથન્તરે । યાઽન્તરિક્ષે યા વાયૌ યા વામદેવ્યે
। યા દિવિ યાઽઽદિત્યે યા બૃહતિ । યાઽપ્સુ યૌષધીષુ યા વનસ્પતિષુ ।
તસ્માદ્વાજપેયયાજ્યાર્ત્વિજીનઃ । સર્વા હ્યસ્ય વાચોઽવરુદ્ધાઃ ॥ ૧। ૩। ૨। ૭॥

ધાવામેતિ જ્યૈષ્ઠ્યાય વેદ બ્રહ્મા જાયતે વાજપેયઃ સુરાઽઽર્ત્વિજીન
એકં ચ ॥ ૨॥

૧૫ દેવા વૈ યદન્યૈર્ગ્રહૈર્યજ્ઞસ્ય નાવારુન્ધત ।
તદતિગ્રાહ્યૈરતિગૃહ્યાવારુન્ધત । તદતિગ્રાહ્યાણામતિગ્રાહ્યત્વમ્ ।
યદતિગ્રાહ્યા ગૃહ્યન્તે । યદેવાન્યૈર્ગ્રહૈર્યજ્ઞસ્ય નાવરુન્ધે

। તદેવ તૈરતિગૃહ્યાવરુન્ધે । પઞ્ચ ગૃહ્યન્તે । પાઙ્ક્તો યજ્ઞઃ ।
યાવાનેવ યજ્ઞઃ । તમાપ્ત્વાઽવરુન્ધે ॥ ૧। ૩। ૩। ૧॥

૧૬ સર્વ ઐન્દ્રા ભવન્તિ । એકધૈવ યજમાન ઇન્દ્રિયં દધતિ । સપ્તદશ
પ્રાજાપત્યા ગ્રહા ગૃહ્યન્તે । સપ્તદશઃ પ્રજાપતિઃ । પ્રજાપતેરાપ્ત્યૈ ।
એકયર્ચા ગૃહ્ણાતિ । એકધૈવ યજમાને વીર્યં દધાતિ । સોમગ્રહાગ્શ્ચ
સુરાગ્રહાગ્શ્ચ ગૃહ્ણાતિ । એતદ્વૈ દેવાનાં પરમમન્નમ્ । યત્સોમઃ ॥ ૧। ૩। ૩। ૨॥

૧૭ એતન્મનુષ્યાણામ્ । યત્સુરા । પરમેણૈવાસ્મા
અન્નાદ્યેનાવરમન્નાદ્યમવરુન્ધે । સોમગ્રહાન્ગૃહ્ણાતિ । બ્રહ્મણો
વા એતત્તેજઃ । યત્સોમઃ । બ્રહ્મણ એવ તેજસા તેજો યજમાને દધાતિ ।
સુરાગ્રહાન્ગૃહ્ણાતિ । અન્નસ્ય વા એતચ્છમલમ્ । યત્સુરા ॥ ૧। ૩। ૩। ૩॥

૧૮ અન્નસ્યૈવ શમલેન શમલં યજમાનાદપહન્તિ । સોમગ્રહાગ્શ્ચ
સુરાગ્રહાગ્શ્ચ ગૃહ્ણાતિ । પુમાન્ વૈ સોમઃ । સ્ત્રી સુરા । તન્મિથુનમ્ ।
મિથુનમેવાસ્ય તદ્યજ્ઞે કરોતિ પ્રજનનાય । આત્માનમેવ સોમગ્રહૈઃ
સ્પૃણોતિ । જાયાઁ સુરાગ્રહૈઃ । તસ્માદ્વાજપેયયાજ્યમુષ્મિં લ્લોકે
સ્ત્રિયઁ સંભવતિ । વાજપેયાભિજિતગ્ગ્ હ્યસ્ય ॥ ૧। ૩। ૩। ૪॥

૧૯ પૂર્વે સોમગ્રહા ગૃહ્યન્તે । અપરે સુરાગ્રહાઃ । પુરોક્ષઁ
સોમગ્રહાન્ત્સાદયતિ । પશ્ચાદક્ષઁ સુરાગ્રહાન્ । પાપવસ્યસસ્ય
વિધૃત્યૈ । એષ વૈ યજમાનઃ । યત્સોમઃ । અન્નઁ સુરા ।
સોમગ્રહાગ્શ્ચ સુરાગ્રહાગ્શ્ચ વ્યતિષજતિ । અન્નાદ્યેનૈવૈનં
વ્યતિષજતિ ॥ ૧। ૩। ૩। ૫॥

૨૦ સંપૃચઃ સ્થ સં મા ભદ્રેણ પૃઙ્ક્તેત્યાહ । અન્નં વૈ ભદ્રમ્ ।
અન્નાદ્યેનૈવૈનઁ સઁ સૃજતિ । અન્નસ્ય વા એતચ્છમલમ્ । યત્સુરા
। પાપ્મેવ ખલુ વૈ શમલમ્ । પાપ્મના વા એનમેતચ્છમલેન વ્યતિષજતિ ।
યત્સોમગ્રહાગ્શ્ચ સુરાગ્રહાગ્શ્ચ વ્યતિષજતિ । વિપૃચઃ સ્થ વિ મા
પાપ્મના પૃઙ્ક્તેત્યાહ । પાપ્મનૈવૈનઁ શમલેન વ્યાવર્તયતિ ॥
૧। ૩। ૩। ૬॥

૨૧ તસ્માદ્વાજપેયયાજી પૂતો મેધ્યો દક્ષિણ્યઃ । પ્રાઙ્દ્રવતિ સોમગ્રહૈઃ
। અમુમેવ તૈર્લોકમભિજયતિ । પ્રત્યઙ્ખ્સુરાગ્રહૈઃ । ઇમમેવ
તૈર્લોકમભિજયતિ । પ્રતિષ્ઠન્તિ સોમગ્રહૈઃ । યાવદેવ સત્યમ્ । તેન
સૂયતે । વાજસૃદ્ભ્યઃ સુરાગ્રહાન્ હરન્તિ । અનૃતેનૈવ વિશ ઁ
સ ઁ સૃજતિ । હિરણ્યપાત્રં મધોઃ પૂર્ણં દદાતિ । મધવ્યોઽસાનીતિ
। એકધા બ્રહ્મણ ઉપહરતિ । એકધૈવ યજમાન આયુસ્તેજો દધાતિ ॥ ૧। ૩। ૩। ૭॥ આપ્ત્વાઽવરુન્ધે
સોમઃ શમલં યથ્સુરા હ્યસ્યૈનં વ્યતિષજતિ
વ્યાવર્તયતિ સૃજતિ ચત્વારિ ચ ॥ ૩॥

૨૨ બ્રહ્મવાદિનો વદન્તિ । નાગ્નિષ્ટોમો નોક્થ્યઃ । ન ષોડશી
નાતિરાત્રઃ । અથ કસ્માદ્વાજપેયે સર્વે યજ્ઞક્રતવોઽવરુધ્યન્ત ઇતિ
। પશુભિરિતિ બ્રૂયાત્ । આગ્નેયં પશુમાલભતે । અગ્નિષ્ટોમમેવ
તેનાવરુન્ધે । ઐન્દ્રાગ્નેનોક્થ્યમ્ । ઐન્દ્રેણ ષોડશિનઃ સ્તોત્રમ્ ।
સારસ્વત્યાઽતિરાત્રમ્ ॥ ૧। ૩। ૪। ૧॥

૨૩ મારુત્યા બૃહતઃ સ્તોત્રમ્ । એતાવન્તો વૈ યજ્ઞક્રતવઃ
। તાન્પશુભિરેવાવરુન્ધે । આત્માનમેવ સ્પૃણોત્યગ્નિષ્ટોમેન
। પ્રાણાપાનાવુક્થ્યેન । વીર્ય ઁ ષોડશિનઃ સ્તોત્રેણ ।
વાચમતિરાત્રેણ । પ્રજાં બૃહતઃ સ્તોત્રેણ । ઇમમેવ લોકમભિ
જયત્યગ્નિષ્ટોમેન । અન્તરિક્ષમુક્થ્યેન ॥ ૧। ૩। ૪। ૨॥

૨૪ સુવર્ગં લોક ઁ ષોડશિનઃ સ્તોત્રેણ । દેવયાનાનેવ
પથ આરોહત્યતિરાત્રેણ । નાક ઁ રોહતિ બૃહતઃ સ્તોત્રેણ ।
તેજ એવાઽઽત્મન્ધત્ત આગ્નેયેન પશુના । ઓજો બલમૈન્દ્રાગ્નેન
। ઇન્દ્રિયમૈન્દ્રેણ । વાચ ઁ સારસ્વત્યા । ઉભાવેવ દેવલોકં
ચ મનુષ્યલોકં ચાભિજયતિ મારુત્યા વશયા । સપ્તદશ
પ્રાજાપત્યાન્પશૂનાલભતે । સપ્તદશઃ પ્રજાપતિઃ ॥ ૧। ૩। ૪। ૩॥

૨૫ પ્રજાપતેરાપ્ત્યૈ । શ્યામા એકરૂપા ભવન્તિ । એવમિવ હિ
પ્રજાપતિઃ સમૃદ્ધ્યૈ । તાન્પર્યગ્નિકૃતાનુથ્સૃજતિ । મરુતો
યજ્ઞમજિઘા ઁ સન્પ્રજાપતેઃ । તેભ્ય એતાં મારુતીં વશામાલભત ।

તયૈવૈનાનશમયત્ । મારુત્યા પ્રચર્ય । એતાન્થ્સંજ્ઞપયેત્ । મરુત
એવ શમયિત્વા ॥ ૧। ૩। ૪। ૪॥

૨૬ એતૈઃ પ્રચરતિ । યજ્ઞસ્યાઘાતાય । એકધા વપા જુહોતિ ।
એકદેવત્યા હિ । એતે । અથો એકધૈવ યજમાને વીર્યં દધાતિ ।
નૈવારેણ સપ્તદશશરાવેણૈતર્હિ પ્રચરતિ । એતત્પુરોડાશા હ્યેતે
। અથો પશૂનામેવ છિદ્રમપિદધાતિ । સારસ્વત્યોત્તમયા પ્રચરતિ ।
વાગ્વૈ સરસ્વતી । તસ્માત્પ્રાણાનાં વાગુત્તમા । અથો પ્રજાપતાવેવ યજ્ઞં
પ્રતિષ્ઠાપયતિ । પ્રજાપતિર્હિ વાક્ । અપન્નદતી ભવતિ । તસ્માન્મનુષ્યાઃ
સર્વાં વાચં વદન્તિ ॥ ૧। ૩। ૪। ૫॥ અતિરાત્રમન્તરિક્ષમુક્થ્યેન પ્રજાપતિઃ
શમયિત્વોત્તમયા પ્રચરતિ ષટ્ચ ॥ ૪॥

૨૭ સાવિત્રં જુહોતિ કર્મણઃકર્મણઃ પુરસ્તાત્ । કસ્તદ્વેદેત્યાહુઃ ।
યદ્વાજપેયસ્ય પૂર્વં યદપરમિતિ । સવિતૃપ્રસૂત એવ યથાપૂર્વં
કર્માણિ કરોતિ । સવને સવને જુહોતિ । આક્રમણમેવ તથ્સેતું યજમાનઃ કુરુતે ।
સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ । વાચસ્પતિર્વાચમદ્ય સ્વદાતિ ન ઇત્યાહ
। વાગ્વૈ દેવાનાં પુરાઽન્નમાસીત્ । વાચમેવાસ્મા અન્નગ્ગ્ સ્વદયતિ ॥ ૧। ૩। ૫। ૧॥

૨૮ ઇન્દ્રસ્ય વજ્રોઽસિ વાર્ત્રઘ્ન ઇતિ રથમુપાવહરતિ
વિજિત્યૈ । વાજસ્ય નુ પ્રસવે માતરં મહીમિત્યાહ । યચ્ચૈવેયમ્ ।
યચ્ચાસ્યામધિ । તદેવાવરુન્ધે । અથો તસ્મિન્નેવોભયેઽભિષિચ્યતે ।
અપ્સ્વન્તરમૃતમપ્સુ ભેષજમિત્યશ્વાન્પલ્પૂલયતિ । અપ્સુ વા અશ્વસ્ય
તૃતીયં પ્રવિષ્ટમ્ । તદનુવેનન્વવપ્લવતે । યદપ્સુ પલ્પૂલયતિ ॥
૧। ૩। ૫। ૨॥

૨૯ યદેવાસ્યાપ્સુ પ્રવિષ્ટમ્ । તદેવાવરુન્ધે । બહુ વા અશ્વોઽમેધ્યમુપગચ્છતિ
। યદપ્સુ પલ્પૂલયતિ । મેધ્યાનેવૈનાન્કરોતિ । વાયુર્વા ત્વા મનુર્વા
ત્વેત્યાહ । એતા વા એતં દેવતા અગ્રે અશ્વમયુઞ્જન્ । તાભિરેવૈનાન્ યુનક્તિ ।
સવસ્યોજ્જિત્યૈ । યજુષા યુનક્તિ વ્યાવૃત્ત્યૈ ॥ ૧। ૩। ૫। ૩॥

૩૦ અપાં ન પાદાશુહેમન્નિતિ સંમાર્ષ્ટિ । મેધ્યાનેવૈનાન્કરોતિ । અથો
સ્તૌત્યેવૈનાનાજિઁ સરિષ્યતઃ । વિષ્ણુક્રમાન્ક્રમતે । વિષ્ણુરેવ

ભૂત્વેમાન્ લોકાનભિજયતિ । વૈશ્વદેવો વૈ રથઃ । અઙ્ગૌ ન્યઙ્ગાવભિતો
રથં યાવિત્યાહ । યા એવ દેવતા રથે પ્રવિષ્ટાઃ । તાભ્ય એવ નમસ્કરોતિ ।
આત્મનોઽનાર્ત્યૈ । અશમરથં ભાવુકોઽસ્ય રથો ભવતિ । ય એવં વેદ ॥ ૧। ૩। ૫। ૪॥ સ્વદયતિ પલ્પૂલયતિ
વ્યાવૃત્ત્યા અનાર્ત્યૈ દ્વે ચ ॥ ૫॥

૩૧ દેવસ્યાહ ઁ સવિતુઃ પ્રસવે બૃહસ્પતિના વાજજિતા વાજં
જેષમિત્યાહ । સવિતૃપ્રસૂત એવ બ્રહ્મણા વાજમુજ્જયતિ ।
દેવસ્યાહ ઁ સવિતુઃ પ્રસવે બૃહસ્પતિના વાજજિતા વર્ષિષ્ઠં
નાક ઁ રુહેયમિત્યાહ । સવિતૃપ્રસૂત એવ બ્રહ્મણા વર્ષિષ્ઠં
નાક ઁ રોહતિ । ચાત્વાલે રથચક્રં નિમિત ઁ રોહતિ । અતો વા અંગિરસ
ઉત્તમાઃ સુવર્ગં લોકમાયન્ । સાક્ષાદેવ યજમાનઃ સુવર્ગં લોકમેતિ ।
આવેષ્ટયતિ । વજ્રો વૈ રથઃ । વજ્રેણૈવ દિશોઽભિ જયતિ ॥ ૧। ૩। ૬। ૧॥

૩૨ વાજિના ઁ સામ ગાયતે । અન્નં વૈ વાજઃ । અન્નમેવાવરુન્ધે
। વાચો વર્ષ્મ દેવેભ્યોઽપાક્રામત્ । તદ્વનસ્પતીન્પ્રાવિશત્ । સૈષા
વાગ્વનસ્પતિષુ વદતિ । યા દુન્દુભૌ । તસ્માદ્દુન્દુભિઃ સર્વા વાચોઽતિવદતિ ।
દુન્દુભીન્થ્સમાઘ્નન્તિ । પરમા વા એષા વાક્ ॥ ૧। ૩। ૬। ૨॥

૩૩ યા દુન્દુભૌ । પરમયૈવ વાચાઽવરાં વાચમવરુન્ધે । અથો
વાચ એવ વર્ષ્મ યજમાનોઽવરુન્ધે । ઇન્દ્રાય વાચં વદતેન્દ્રં વાજં
જાપયતેન્દ્રો વાજમજયિદિત્યાહ । એષ વા એતર્હીન્દ્રઃ । યો યજતે । યજમાન
એવ વાજમુજ્જયતિ । સપ્તદશ પ્રવ્યાધાનાજિં ધાવન્તિ । સપ્તદશર ઁ
સ્તોત્રં ભવતિ । સપ્તદશ સપ્તદશ દીયન્તે ॥ ૧। ૩। ૬। ૩॥

૩૪ સપ્તદશઃ પ્રજાપતિઃ । પ્રજાપતેરાપ્ત્યૈ । અર્વાઽસિ
સપ્તિરસિ વાજ્યસીત્યાહ । અગ્નિર્વા અર્વા । વાયુઃ સપ્તિઃ । આદિત્યો વાજી ।
એતાભિરેવાસ્મૈ દેવતાભિર્દેવરથં યુનક્તિ । પ્રષ્ટિવાહિનં યુનક્તિ ।
પ્રષ્ટિવાહી વૈ દેવરથઃ । દેવરથમેવાસ્મૈ યુનક્તિ ॥ ૧। ૩। ૬। ૪॥

૩૫ વાજિનો વાજં ધાવત કાષ્ઠાં ગચ્છતેત્યાહ । સુવર્ગો વૈ લોકઃ કાષ્ઠા
। સુવર્ગમેવ લોકં યન્તિ । સુવર્ગં વા એતે લોકં યન્તિ । ય આજિં ધાવન્તિ
। પ્રાઞ્ચો ધાવન્તિ । પ્રાઙિવ હિ સુવર્ગો લોકઃ । ચતસૃભિરનુ મન્ત્રયતે

। ચત્વારિ છન્દાઁસિ । છન્દોભિરેવૈનાન્થ્સુવર્ગં લોકં ગમયતિ ॥ ૧। ૩। ૬। ૫॥

૩૬ પ્ર વા એતેઽસ્માલ્લોકાચ્ચ્યવન્તે । ય આજિં ધાવન્તિ । ઉદઞ્ચ આવર્તન્તે ।
અસ્માદેવ તેન લોકાન્નયન્તિ । રથવિમોચનીયં જુહોતિ પ્રતિષ્ઠિત્યૈ ।
આમા વાજસ્ય પ્રસવો જગમ્યાદિત્યાહ । અન્નં વૈ વાજઃ । અન્નમેવાવરુન્ધે ।
યથાલોકં વા એત ઉજ્જયન્તિ । ય આજિં ધાવન્તિ ॥ ૧। ૩। ૬। ૬॥

૩૭ કૃષ્ણલં કૃષ્ણલં વાજસૃદ્ભ્યઃ પ્રયચ્છતિ । યમેવ તે વાજં
લોકમુજ્જયન્તિ । તં પરિક્રીયાવરુન્ધે । એકધા બ્રહ્મણ ઉપહરતિ
। એકધૈવ યજમાને વીર્યં દધાતિ । દેવા વા ઓષધીષ્વાજિમયુઃ । તા
બૃહસ્પતિરુદજયત્ । સ નીવારાન્નિરવૃણીત । તન્નીવારાણાં નીવારત્વમ્ ।
નૈવારશ્ચરુર્ભવતિ ॥ ૧। ૩। ૬। ૭॥

૩૮ એતદ્વૈ દેવાનાં પરમમન્નમ્ । યન્નીવારાઃ । પરમેણૈવાસ્મા
અન્નાદ્યેનાવરમન્નાદ્યમવરુન્ધે । સપ્તદશશરાવો ભવતિ । સપ્તદશઃ
પ્રજાપતિઃ । પ્રજાપતેરાપ્ત્યૈ । ક્ષીરે ભવતિ । રુચમેવાસ્મિન્દધાતિ ।
સર્પિષ્વાન્ભવતિ મેધ્યત્વાય । બાર્હસ્પત્યો વા એષ દેવતયા ॥ ૧। ૩। ૬। ૮॥

૩૯ યો વાજપેયેન યજતે । બાર્હસ્પત્ય એષ ચરુઃ । અશ્વાન્થ્સરિષ્યતઃ
સસ્રુષશ્ચાવ ઘ્રાપયતિ । યમેવ તે વાજં લોકમુજ્જયન્તિ । તમેવાવરુન્ધે ।
અજીજિપત વનસ્પતય ઇન્દ્રં વાજં વિમુચ્યધ્વમિતિ દુન્દુભીન્, વિમુઞ્ચતિ ।
યમેવ તે વાજં લોકમિન્દ્રિયં દુન્દુભય ઉજ્જયન્તિ । તમેવાવરુન્ધે
॥ ૧। ૩। ૬। ૯॥ અભિજયતિ વા એષા વાગ્દીયન્તેઽસ્મૈ યુનક્તિ ગમયતિ ય આજિં
ધાવન્તિ ભવતિ દેવતયાઽષ્ટૌ ચ ॥ ૬॥

૪૦ તાર્પ્યં યજમાનં પરિધાપયતિ । યજ્ઞો વૈ તાર્પ્યમ્ । યજ્ઞેનૈવૈનઁ
સમર્ધયતિ । દર્ભમયં પરિધાપયતિ । પવિત્રં વૈ દર્ભાઃ ।
પુનાત્યેવૈનમ્ । વાજં વા એષોઽવરુરુત્થ્સતે । યો વાજપેયેન યજતે ।
ઓષધયઃ ખલુ વૈ વાજઃ । યદ્દર્ભમયં પરિધાપયતિ ॥ ૧। ૩। ૭। ૧॥

૪૧ વાજસ્યાવરુદ્ધ્યૈ । જાય એહિ સુવો રોહાવેત્યાહ । પત્નિયા એવૈષ
યજ્ઞસ્યાન્વારમ્ભોઽનવચ્છિત્યૈ । સપ્તદશારત્નિર્યૂપો ભવતિ ।
સપ્તદશઃ પ્રજાપતિઃ । પ્રજાપતેરાપ્ત્યૈ । તૂપરશ્ચતુરશ્રિર્ભવતિ ।

ગૌધૂમં ચષાલમ્ । ન વા એતે વ્રીહયો ન યવાઃ । યદ્ગોધૂમાઃ ॥ ૧। ૩। ૭। ૨॥

૪૨ એવમિવ હિ પ્રજાપતિઃ સમૃદ્ધ્યૈ । અથો અમુમેવાસ્મૈ લોકમન્નવન્તં કરોતિ । વાસોભિર્વેષ્ટયતિ । એષ વૈ યજમાનઃ । યદ્યૂપઃ । સર્વદેવત્યં વાસઃ । સર્વાભિરેવૈનં દેવતાભિઃ સમર્ધયતિ । અથો આક્રમણમેવ તથ્સેતું યજમાનઃ કુરુતે । સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ । દ્વાદશ વાજપ્રસવીયાનિ જુહોતિ ॥ ૧। ૩। ૭। ૩॥

૪૩ દ્વાદશ માસાઃ સંવથ્સરઃ । સંવથ્સરમેવ પ્રીણાતિ । અથો સંવથ્સરમેવાસ્મા ઉપદધાતિ । સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ । દશભિઃ કલ્પૈ રોહતિ । નવ વૈ પુરુષે પ્રાણાઃ । નાભિર્દશમી । પ્રાણાનેવ યથાસ્થાનં કલ્પયિત્વા । સુવર્ગં લોકમેતિ । એતાવદ્વૈ પુરુષસ્ય સ્વમ્ ॥ ૧। ૩। ૭। ૪॥

૪૪ યાવત્પ્રાણાઃ । યાવદેવાસ્યાસ્તિ । તેન સહ સુવર્ગં લોકમેતિ । સુવર્દેવાઁ અગન્મેત્યાહ । સુવર્ગમેવ લોકમેતિ । અમૃતા અભૂમેત્યાહ । અમૃતમિવ હિ સુવર્ગો લોકઃ । પ્રજાપતેઃ પ્રજા અભૂમેત્યાહ । પ્રાજાપત્યો વા અયં લોકઃ । અસ્માદેવ તેન લોકાન્નૈતિ ॥ ૧। ૩। ૭। ૫॥

૪૫ સમહં પ્રજયા સં મયા પ્રજેત્યાહ । આશિષમેવૈતામાશાસ્તે । આસપુટૈર્ઘ્નન્તિ । અન્નં વા ઇયમ્ । અન્નાદ્યેનૈવૈન ઁ સમર્ધયન્તિ । ઊષૈર્ઘ્નન્તિ । એતે હિ સાક્ષાદન્નમ્ । યદૂષાઃ । સાક્ષાદેવૈનમન્નાદ્યેન સમર્ધયન્તિ । પુરસ્તાત્પ્રત્યઞ્ચં ઘ્નન્તિ ॥ ૧। ૩। ૭। ૬॥

૪૬ પુરસ્તાદ્ધિ પ્રતીચીનમન્નમદ્યતે । શીર્ષતો ઘ્નન્તિ । શીર્ષતો હ્યન્નમદ્યતે । દિગ્ભ્યો ઘ્નન્તિ । દિગ્ભ્ય એવાસ્મા અન્નાદ્યમવરુન્ધતે । ઈશ્વરો વા એષ પરાઙ્પ્રદઘઃ । યો યૂપ ઁ રોહતિ । હિરણ્યમધ્યવરોહતિ । અમૃતં વૈ હિરણ્યમ્ । અમૃત ઁ સુવર્ગો લોકઃ ।

૪૭ અમૃત એવ સુવર્ગે લોકે પ્રતિતિષ્ઠતિ । શતમાનં ભવતિ । શતાયુઃ પુરુષઃ શતેન્દ્રિયઃ । આયુષ્યેવેન્દ્રિયે પ્રતિતિષ્ઠતિ । પુષ્ટ્યૈ વા એતદ્રૂપમ્

। યદજા । ત્રિઃ સંવથ્સરસ્યાન્યાન્પશૂન્પરિ પ્રજાયતે । બસ્તાજિનમધ્યવ
રોહતિ । પુષ્ટ્યામેવ પ્રજનને પ્રતિતિષ્ઠતિ ॥ ૧। ૩। ૭। ૭॥ પરિધાપયતિ
ગોધૂમા જુહોતિ સ્વં નૈતિ પ્રત્યઞ્ચં ઘ્નન્તિ લોકો નવ ચ ॥ ૭॥
૪૮ સપ્તાન્નહોમાઞ્જુહોતિ । સપ્ત વા અન્નાનિ । યાવન્ત્યેવાન્નાનિ
। તાન્યેવાવરુન્ધે । સપ્ત ગ્રામ્યા ઓષધયઃ । સપ્તારણ્યાઃ ।
ઉભયીષામવરુદ્ધ્યૈ । અન્નસ્યાન્નસ્ય જુહોતિ । અન્નસ્યાન્નસ્યાવરુદ્ધ્યૈ ।
યદ્વાજપેયયાજ્યનવ રુદ્ધસ્યાશ્નીયાત્ ॥ ૧। ૩। ૮। ૧॥
૪૯ અવરુદ્ધેન વ્યૃદ્ધ્યેત । સર્વસ્ય સમવદાય જુહોતિ ।
અનવરુદ્ધસ્યાવરુદ્ધ્યૈ । ઔદુમ્બરેણ સ્રુવેણ જુહોતિ । ઊર્ગ્વા અન્નમુદુમ્બરઃ
। ઊર્જ એવાન્નાદ્યસ્યાવરુદ્ધ્યૈ । દેવસ્ય ત્વા સવિતુઃ પ્રસવ ઇત્યાહ
। સવિતૃ પ્રસૂત એવૈનં બ્રહ્મણા દેવતાભિરભિષિઞ્ચતિ ।
અન્નસ્યાન્નસ્યાભિષિઞ્ચતિ । અન્નસ્યાન્નસ્યાવરુદ્ધ્યૈ ॥ ૧। ૩। ૮। ૨॥
૫૦ પુરસ્તાત્ પ્રત્યઞ્ચમભિષિઞ્ચતિ । પુરસ્તાદ્ધિ
પ્રતીચીનમન્નમદ્યતે । શીર્ષતોઽભિષિઞ્ચતિ । શીર્ષતો
હ્યન્નમદ્યતે । આ મુખાદન્વવ સ્રાવયતિ । મુખત એવાસ્મા અન્નાદ્યં
દધાતિ । અગ્નેસ્ત્વા સામ્રાજ્યેનાભિષિઞ્ચામીત્યાહ । એષ વા અગ્નેઃ સવઃ ।
તેનૈવૈનમભિષિઞ્ચતિ । ઇન્દ્રસ્ય ત્વા સામ્રાજ્યેનાભિષિઞ્ચામીત્યાહ ॥
૧। ૩। ૮। ૩॥
૫૧ ઇન્દ્રિયમેવાસ્મિન્નેતેન દધાતિ । બૃહસ્પતેસ્ત્વા
સામ્રાજ્યેનાભિષિઞ્ચામીત્યાહ । બ્રહ્મ વૈ દેવાનાં બૃહસ્પતિઃ
। બ્રહ્મણૈવૈનમભિષિઞ્ચતિ । સોમગ્રહાઁશ્ચાવદાનીયાનિ
ચર્ત્વિગ્ભ્ય ઉપ હરન્તિ । અમુમેવ તૈર્લોકમન્નવન્તં કરોતિ ।
સુરાગ્રહાઁશ્ચાનવદાનીયાનિ ચ વાજસૃદ્ભ્યઃ । ઇમમેવ
તૈર્લોકમન્નવન્તં કરોતિ । અથો ઉભયીષ્વેવાભિષિચ્યતે । વિમાથં
કુર્વતે વાજસૃતઃ ॥ ૧। ૩। ૮। ૪॥
૫૨ ઇન્દ્રિયસ્યાવરુદ્ધ્યૈ । અનિરુક્તાભિઃ પ્રાતઃસવને સ્તુવતે । અનિરુક્તઃ
પ્રજાપતિઃ । પ્રજાપતેરાપ્ત્યૈ । વાજવતીભિર્માધ્યન્દિને । અન્નં વૈ

વાજઃ । અન્નમેવાવરુન્ધે । શિપિવિષ્ટવતીભિસ્તૃતીયસવને । યજ્ઞો
વૈ વિષ્ણુઃ । પશવઃ શિપિઃ । યજ્ઞ એવ પશુષુ પ્રતિતિષ્ઠતિ
। બૃહદન્ત્યં ભવતિ । અન્તમેવૈનગ્ં શ્રિયૈ ગમયતિ ॥ ૧। ૩। ૮। ૫॥
અશ્રીયાદન્નસ્યાન્નસ્યાવરુદ્ધ્યા ઇન્દ્રસ્ય ત્વા સામ્રાજ્યેનાભિષિઞ્ચામીત્યાહ
વાજસૃતઃ શિપિસ્ત્રીણિ ચ ॥ ૮॥
૫૩ નૃષદં ત્વેત્યાહ । પ્રજા વૈ નૃન્ । પ્રજાનામેવૈતેન સૂયતે ।
દ્રુષદમિત્યાહ । વનસ્પતયો વૈ દ્રુ । વનસ્પતીનામેવૈતેન સૂયતે ।
ભુવનસદમિત્યાહ । યદા વૈ વસીયાન્ભવતિ । ભુવનમગન્નિતિ વૈ
તમાહુઃ । ભુવનમેવૈતેન ગચ્છતિ ॥ ૧। ૩। ૯। ૧॥
૫૪ અપ્સુષદં ત્વા ઘૃતસદમિત્યાહ । અપામેવૈતેન ઘૃતસ્ય સૂયતે ।
વ્યોમસદમિત્યાહ । યદા વૈ વસીયાન્ભવતિ । વ્યોમાગન્નિતિ વૈ તમાહુઃ
। વ્યોમૈવૈતેન ગચ્છતિ । પૃથિવિષદં ત્વાઽન્તરિક્ષસદમિત્યાહ
। એષામેવૈતેન લોકાનાઁસૂયતે । તસ્માદ્વાજપેયયાજી ન કં ચન
પ્રત્યવરોહતિ । અપીવ હિ દેવતાનાઁ સૂયતે ॥ ૧। ૩। ૯। ૨॥
૫૫ નાકસદમિત્યાહ । યદા વૈ વસીયાન્ભવતિ । નાકમગન્નિતિ વૈ
તમાહુઃ । નાકમેવૈતેન ગચ્છતિ । યે ગ્રહાઃ પઞ્ચજનીના ઇત્યાહ ।
પઞ્ચજનાનામેવૈતેન સૂયતે । અપાઁ રસમુદ્વયસમિત્યાહ ।
અપામેવૈતેન રસસ્ય સૂયતે । સૂર્યરશ્મિઁ સમાભૃતમિત્યાહ
સશુક્રત્વાય ॥ ૧। ૩। ૯। ૩॥ ગચ્છતિ સૂયતે નવ ચ ॥ ૯॥
૫૬ ઇન્દ્રો વૃત્રઁ હત્વા । અસુરાન્પરાભાવ્ય । સોઽમાવાસ્યાં પ્રત્યાગચ્છત્
। તે પિતરઃ પૂર્વેદ્યુરાગચ્છન્ । પિતૄન્, યજ્ઞોઽગચ્છત્ । તં દેવાઃ
પુનરયાચન્ત । તમેભ્યો ન પુનરદદુઃ । તેઽબ્રુવન્વરં વૃણામહૈ । અથ
વઃ પુનર્દાસ્યામઃ । અસ્મભ્યમેવ પૂર્વેદ્યુઃ ક્રિયાતા ઇતિ ॥ ૧। ૩। ૧૦। ૧॥
૫૭ તમેભ્યઃ પુનરદદુઃ । તસ્માત્પિતૃભ્યઃ પૂર્વેદ્યુઃ ક્રિયતે ।
યત્પિતૃભ્યઃ પૂર્વેદ્યુઃ કરોતિ । પિતૃભ્ય એવ તદ્યજ્ઞં નિષ્ક્રીય
યજમાનઃ પ્રતનુતે । સોમાય પિતૃપીતાય સ્વધા નમ ઇત્યાહ । પિતુરેવાધિ
સોમપીથમવરુન્ધે । ન હિ પિતા પ્રમીયમાણ આહૈષ સોમપીથ ઇતિ ।

ઇન્દ્રિયં વૈ સોમપીથઃ । ઇન્દ્રિયમેવ સોમપીથમવરુન્ધે । તેનેન્દ્રિયેણ
દ્વિતીયાં જાયામભ્યશ્નુતે ॥ ૧। ૩। ૧૦। ૨॥

૫૮ એતદ્ધૈ બ્રાહ્મણં પુરા વાજશ્રવસા વિદામક્રન્ । તસ્માત્તે દ્વેદ્વે
જાયે અભ્યાક્ષત । ય એવં વેદ । અભિ દ્વિતીયાં જાયામશ્નુતે । અગ્નયે
કવ્યવાહનાય સ્વધા નમ ઇત્યાહ । ય એવ પિતૃણામગ્નિઃ । તં પ્રીણાતિ ।
તિસ્ર આહુતીર્જુહોતિ । ત્રિર્નિદધાતિ । ષટ્થ્ સંપદ્યન્તે ॥ ૧। ૩। ૧૦। ૩॥

૫૯ ષડ્વા ઋતવઃ । ઋતૂનેવ પ્રીણાતિ । તૂષ્ણીં મેક્ષણમાદધાતિ ।
અસ્તિ વા હિ ષષ્ઠ ઋતુર્ન વા । દેવાન્, વૈ પિતૃન્પ્રીતાન્ । મનુષ્યાઃ
પિતરોઽનુ પ્રપિપતે । તિસ્ર આહુતીર્જુહોતિ । ત્રિર્નિદધાતિ । ષટ્થ્ સંપદ્યન્તે ।
ષડ્વા ઋતવઃ ॥ ૧। ૩। ૧૦। ૪॥

૬૦ ઋતવઃ ખલુ વૈ દેવાઃ પિતરઃ । ઋતૂનેવ દેવાન્પિતૃન્પ્રીણાતિ
। તાન્પ્રીતાન્ । મનુષ્યાઃ પિતરોઽનુ પ્રપિપતે । સકૃદાચ્છિન્નં
બર્હિર્ભવતિ । સકૃદિવ હિ પિતરઃ । ત્રિર્નિદધાતિ । તૃતીયે વા
ઇતો લોકે પિતરઃ । તાનેવ પ્રીણાતિ । પરાઙાવર્તતે ॥ ૧। ૩। ૧૦। ૫॥

૬૧ હ્લીકા હિ પિતરઃ । ઓષ્મણો વ્યાવૃત ઉપાસ્તે । ઊષ્મભાગા હિ પિતરઃ
। બ્રહ્મવાદિનો વદન્તિ । પ્રાશ્યાં ૩ ન પ્રાશ્યા ૩ મિતિ । યત્પ્રાશ્નીયાત્ ।
જન્યમન્નમદ્યાત્ । પ્રમાયુકઃ સ્યાત્ । યન્ન પ્રાશ્નીયાત્ । અહવિઃ સ્યાત્ ॥ ૧। ૩। ૧૦। ૬॥

૬૨ પિતૃભ્ય આવૃશ્ચેત । અવઘ્રેયમેવ । તન્નેવ પ્રાશિતં
નેવાપ્રાશિતમ્ । વીરં વા વૈ પિતરઃ પ્રયન્તો હરન્તિ । વીરં વા દદતિ
। દશાં છિનત્તિ । હરણભાગા હિ પિતરઃ । પિતૃનેવ નિરવદયતે ।
ઉત્તર આયુષિ લોમ છિન્દીત । પિતૃણાગ્ હ્યેતર્હિ નેદીયઃ ॥ ૧। ૩। ૧૦। ૭॥

૬૩ નમસ્કરોતિ । નમસ્કારો હિ પિતૃણામ્ । નમો વઃ પિતરો રસાય । નમો
વઃ પિતરઃ શુષ્માય । નમો વઃ પિતરો જીવાય । નમો વઃ પિતરઃ સ્વધાયૈ
। નમો વઃ પિતરો મન્યવે । નમો વઃ પિતરો ઘોરાય । પિતરો નમો વઃ ।
ય એતસ્મિં લ્લોકે સ્થ ॥ ૧। ૩। ૧૦। ૮॥

૬૪ યુષ્માગ્ સ્તેઽનુ । યેઽસ્મિં લ્લોકે । માં તેઽનુ । ય એતસ્મિં લ્લોકે સ્થ ।

યૂયં તેષાં વસિષ્ઠા ભૂયાસ્ત । યેઽસ્મિં લ્લોકે । અહં તેષાં વસિષ્ઠો
ભૂયાસમિત્યાહ । વસિષ્ઠઃ સમાનાનાં ભવતિ । ય એવં વિદ્વાન્પિતૃભ્યઃ
કરોતિ । એષ વૈ મનુષ્યાણાં યજ્ઞઃ ॥ ૧। ૩। ૧૦। ૯॥

૬૫ દેવાનાં વા ઇતરે યજ્ઞાઃ । તેન વા એતત્પિતૃલોકે ચરતિ ।
યત્પિતૃભ્યઃ કરોતિ । સ ઈશ્વરઃ પ્રમેતોઃ । પ્રાજાપત્યયર્ચા
પુનરૈતિ । યજ્ઞો વૈ પ્રજાપતિઃ । યજ્ઞેનૈવ સહ પુનરૈતિ । ન
પ્રમાયુકો ભવતિ । પિતૃલોકે વા એતદ્યજમાનશ્ચરતિ । યત્પિતૃભ્યઃ
કરોતિ । સ ઈશ્વર આર્તિમાર્તોઃ । પ્રજાપતિસ્ત્વાવૈનં તત
ઉન્નેતુમર્હતીત્યાહુઃ । યત્પ્રાજાપત્યયર્ચા પુનરૈતિ । પ્રજાપતિરેવૈનં
તત ઉન્નયતિ । નાર્તિમાર્છતિ યજમાનઃ ॥ ૧। ૩। ૧૦। ૧૦॥ ઇત્યશ્રુતે
પદ્યન્તે પદ્યન્તે ષડ્વા ઋતવો વર્તતેઽહવિઃ સ્યાન્નેદીયઃ સ્થ યજ્ઞો
યજમાનશ્ચરતિ યત્પિતૃભ્યઃ કરોતિ પઞ્ચ ચ ॥ ૧૦॥

દેવાસુરા અગ્નીષોમયોર્દેવા વૈ યથા દર્શં દેવા વૈ
યદન્યૈર્ગ્રહૈર્બ્રહ્મવાદિનો નાગ્નિષ્ટોમો ન સાવિત્રં દેવસ્યાહં તાર્ક્ષ્યઁ
સપ્તાન્નહોમાન્નૃષદં ત્વેન્દ્રો વૃત્રઁ હત્વા દશ ॥ ૧૦॥
દેવાસુરા વાજ્યેવૈનં તસ્માદ્વાજપેયયાજી દેવસ્યાહં વાજસ્યાવરુદ્ધ્યા
ઇન્દ્રિયમેવાસ્મિન્ ક્ષીકા હિ પિતરઃ પઞ્ચષષ્ટિઃ ॥ ૬૫॥
દેવાસુરા યજમાનઃ ॥

## પ્રથમાષ્ટકે ચતુર્થઃ પ્રપાઠકઃ ૪

૧ ઉભયે વા એતે પ્રજાપતેરધ્યસૃજ્યન્ત । દેવાશ્ચાસુરાશ્ચ ।
તાન્ન વ્યજાનાત્ । ઇમેઽન્ય ઇમેઽન્ય ઇતિ । સ દેવાન્ ઁ શૂનકરોત્ ।
તાનભ્યષુણોત્ । તાન્પવિત્રેણાપુનાત્ । તાન્પરસ્તાત્પવિત્રસ્ય વ્યગૃહ્ણાત્ ।
તે ગ્રહા અભવન્ । તદ્ગ્રહાણાં ગ્રહત્વમ્ ॥ ૧। ૪। ૧। ૧॥
૨ દેવતા વા એતા યજમાનસ્ય ગૃહે ગૃહ્યન્તે । યદ્ગ્રહાઃ । વિદુરેનં દેવાઃ
। યસ્યૈવં વિદુષ એતે ગ્રહા ગૃહ્યન્તે । એષા વૈ સોમસ્યાહુતિઃ ।

યદુપાꣳશુઃ । સોમેન દેવાꣳસ્તર્પયાણીતિ ખલુ વૈ સોમેન યજતે ।
યદુપાꣳશું જુહોતિ । સોમેનૈવ તદ્દેવાꣳસ્તર્પયતિ । યદ્ગ્રહાઞ્જુહોતિ
॥ ૧। ૪। ૧। ૨॥

૩ દેવા એવ તદ્દેવાન્ગચ્છન્તિ । યચ્ચમસાઞ્જુહોતિ । તેનૈવાનુરૂપેણ
યજમાનઃ સુવર્ગં લોકમેતિ । કિં ન્વેતદગ્ર આસીદિત્યાહુઃ । યત્પાત્રાણીતિ
। ઇયં વા એતદગ્ર આસીત્ । મૃન્મયાનિ વા એતાન્યાસન્ । તૈર્દેવા ન
વ્યાવૃતમગચ્છન્ । ત એતાનિ દારુમયાણિ પાત્રાણ્યપશ્યન્ । તાન્યકુર્વત ॥
૧। ૪। ૧। ૩॥

૪ તૈર્વૈ તે વ્યાવૃતમગચ્છન્ । યદ્દારુમયાણિ પાત્રાણિ ભવન્તિ ।
વ્યાવૃતમેવ તૈર્યજમાનો ગચ્છતિ । યાનિ દારુમયાણિ પાત્રાણિ
ભવન્તિ । અમુમેવ તૈર્લોકમભિજયતિ । યાનિ મૃન્મયાનિ ।
ઇમમેવ તૈર્લોકમભિજયતિ । બ્રહ્મવાદિનો વદન્તિ । કાશ્ચતસ્રઃ
સ્થાલીર્વાયવ્યાઃ સોમગ્રહણીરિતિ । દેવા વૈ પૃશ્નિમદુહ્રન્ ॥ ૧। ૪। ૧। ૪॥

૫ તસ્યા એતે સ્તના આસન્ । ઇયં વૈ પૃશ્નિઃ । તામાદિત્યા આદિત્યસ્થાલ્યા
ચતુષ્પદઃ પશૂનદુહ્રન્ । યદાદિત્યસ્થાલી ભવતિ । ચતુષ્પદ એવ
તયા પશૂન્, યજમાન ઇમાં દુહે । તામિન્દ્ર ઉક્થ્યસ્થાલ્યેન્દ્રિયમદુહત્ ।
યદુક્થ્યસ્થાલી ભવતિ । ઇન્દ્રિયમેવ તયા યજમાન ઇમાં દુહે । તાં વિશ્વે
દેવા આગ્રયણસ્થાલ્યોર્જમદુહ્રન્ । યદાગ્રયણસ્થાલી ભવતિ ॥ ૧। ૪। ૧। ૫॥

૬ ઊર્જમેવ તયા યજમાન ઇમાં દુહે । તાં મનુષ્યા
ધ્રુવસ્થાલ્યાऽऽયુરદુહ્રન્ । યદ્ધ્રુવસ્થાલી ભવતિ । આયુરેવ તયા યજમાન
ઇમાં દુહે । સ્થાલ્યા ગૃહ્ણાતિ । વાયવ્યેન જુહોતિ । તસ્માદન્યેન પાત્રેણ
પશૂન્દુહન્તિ । અન્યેન પ્રતિગૃહ્ણન્તિ । અથો વ્યાવૃતમેવ તદ્યજમાનો
ગચ્છતિ ॥ ૧। ૪। ૧। ૬॥ ગ્રહત્વં ગ્રહાઞ્જુહોત્યકુર્વતાદુહ્રન્નાગ્રયણસ્થાલી
ભવતિ નવ ચ ॥ ૧॥

૭ યુવꣳ સુરામમશ્વિના । નમુચાવાऽऽસુરે સચા । વિપિપાના શુભસ્પતી
। ઇન્દ્રં કર્મસ્વાવતમ્ । પુત્રમિવ પિતરાવશ્વિનોભા । ઇન્દ્રાવતં
કર્મણા દꣳસનાભિઃ । યત્સુરામં વ્યપિબઃ શચીભિઃ । સરસ્વતી ત્વા

મઘવન્નભીષ્ણાત્ । અહાવ્યગ્રે હવિરાસ્યે તે । સ્રુચીવ ઘૃતં ચમૂ ઇવ
સોમઃ ॥ ૧। ૪। ૨। ૧॥

૮ વાજસનિ ँ રયિમસ્મે સુવીરમ્ । પ્રશસ્તં ધેહિ યશસં
બૃહન્તમ્ । યસ્મિન્નશ્વાસ ઋષભાસ ઉક્ષણઃ । વશા મેષા
અવસૃષ્ટાસ આહુતાઃ । કીલાલપે સોમપૃષ્ઠાય વેધસે । હૃદા મતિં
જનય ચારુમગ્નયે । નાના હિ વાં દેવહિત ँ સદો મિતમ્ । મા
સ ँ સૃક્ષાથાં પરમે વ્યોમન્ । સુરા ત્વમસિ શુષ્મિણી સોમ એષઃ ।
મા મા હિ ँ સીઃ સ્વાં યોનિમાવિશન્ ॥ ૧। ૪। ૨। ૨॥

૯ યદત્ર શિષ્ટ ँ રસિનઃ સુતસ્ય । યદિન્દ્રો અપિબચ્છચીભિઃ ।
અહં તદસ્ય મનસા શિવેન । સોમ ँ રાજાનમિહ ભક્ષયામિ । દ્વે
સ્રુતી અશ્ૃણવં પિતૃણામ્ । અહં દેવાનામુત મર્ત્યાનામ્ । તાભ્યામિદં
વિશ્વં ભુવન ँ સમેતિ । અન્તરા પૂર્વમપરં ચ કેતુમ્ । યસ્તે
દેવ વરુણ ગાયત્રછન્દાઃ પાશઃ । તં ત એતેનાવયજે ॥ ૧। ૪। ૨। ૩॥

૧૦ યસ્તે દેવ વરુણ ત્રિષ્ટુપ્છન્દાઃ પાશઃ । તં ત એતેનાવયજે । યસ્તે
દેવ વરુણ જગતીછન્દાઃ પાશઃ । તં ત એતેનાવયજે । સોમો વા એતસ્ય
રાજ્યમાદત્તે । યો રાજા સન્રાજ્યો વા સોમેન યજતે । દેવસુવામેતાનિ
હવી ँ ષિ ભવન્તિ । એતાવન્તો વૈ દેવાના ँ સવાઃ । ત એવાસ્મૈ
સવાન્પ્રયચ્છન્તિ । ત એનં પુનઃ સુવન્તે રાજ્યાય । દેવસૂ રાજા ભવતિ ॥
૧। ૪। ૨। ૪॥ સોમ આવિશન્, યજે રાજ્યાયૈકં ચ ॥ ૨॥

૧૧ ઉદસ્થાદ્દેવ્યદિતિર્વિશ્વરૂપી । આયુર્યજ્ઞપતાવધાત્ । ઇન્દ્રાય કૃણ્વતી
ભાગમ્ । મિત્રાય વરુણાય ચ । ઇયં વા અગ્નિહોત્રી । ઇયં વા એતસ્ય નિષીદતિ
। યસ્યાગ્નિહોત્રી નિષીદતિ । તામુત્થાપયેત્ । ઉદસ્થાદ્દેવ્યદિતિરિતિ । ઇયં
વૈ દેવ્યદિતિઃ ॥ ૧। ૪। ૩। ૧॥

૧૨ ઇમામેવાસ્મા ઉત્થાપયતિ । આયુર્યજ્ઞપતાવધાદિત્યાહ ।
આયુરેવાસ્મિન્દધાતિ । ઇન્દ્રાય કૃણ્વતી ભાગં મિત્રાય વરુણાય ચેત્યાહ
। યથા યજુરેવૈતત્ । અવર્તિં વા એષૈતસ્ય પાપ્માનં પ્રતિખ્યાય
નિષીદતિ । યસ્યાગ્નિહોત્ર્યુપસૃષ્ટા નિષીદતિ । તાં દુગ્ધ્વા બ્રાહ્મણાય

દદ્યાત્ । યસ્યાન્નં નાદ્યાત્ । અવર્તિમેવાસ્મિન્પાપ્માનં પ્રતિમુઞ્ચતિ ॥ ૧। ૪। ૩। ૨॥

૧૩ દુગ્ધ્વા દદાતિ । ન હ્યદૃષ્ટા દક્ષિણા દીયતે । પૃથિવીં વા એતસ્ય
પયઃ પ્રવિશતિ । યસ્યાગ્નિહોત્રં દુહ્યમાનગ્ગ્ં સ્કન્દતિ । યદદ્ય દુગ્ધં
પૃથિવીમસક્ત । યદોષધીરપ્યસરદ્યદાપઃ । પયો ગૃહેષુ પયો
અઘ્નિયાસુ । પયો વત્સેષુ પયો અસ્તુ તન્મયીત્યાહ । પય એવાત્મન્ગૃહેષુ
પશુષુ ધત્તે । અપ ઉપસૃજતિ ॥ ૧। ૪। ૩। ૩॥

૧૪ અદ્ભિરેવૈનદાપ્નોતિ । યો વૈ યજ્ઞસ્યાર્તેનાનાર્તꣳ સꣳસૃજતિ । ઉભે
વૈ તે તર્હ્યાર્છતઃ । આર્છતિ ખલુ વા એતદગ્નિહોત્રમ્ । યદ્દુહ્યમાનગ્ગ્ં
સ્કન્દતિ । યદભિદુહ્યાત્ । આર્તેનાનાર્તં યજ્ઞસ્ય સꣳસૃજેત્ ।
તદેવ યાદૃક્કીદૃક્ચ હોતવ્યમ્ । અથાન્યાં દુગ્ધ્વા પુનર્ હોતવ્યમ્ ।
અનાર્તેનૈવાર્તં યજ્ઞસ્ય નિષ્કરોતિ ॥ ૧। ૪। ૩। ૪॥

૧૫ યદ્યુદ્ધ્રુતસ્ય સ્કન્દેત્ । યત્તતોઽહુત્વા પુનરેયાત્ । યજ્ઞં વિચ્છિન્દ્યાત્
। યત્ર સ્કન્દેત્ । તન્નિષદ્ય પુનર્ગૃહ્ણીયાત્ । યત્રૈવ સ્કન્દતિ । તત
એવૈનત્પુનર્ગૃહ્ણાતિ । તદેવ યાદૃક્કીદૃક્ચ હોતવ્યમ્ । અથાન્યાં
દુગ્ધ્વા પુનર્ હોતવ્યમ્ । અનાર્તેનૈવાર્તં યજ્ઞસ્ય નિષ્કરોતિ ॥ ૧। ૪। ૩। ૫॥

૧૬ વિ વા એતસ્ય યજ્ઞશ્છિદ્યતે । યસ્યાગ્નિહોત્રેઽધિશ્રિતે શ્વાઽન્તરા
ધાવતિ । રુદ્રઃ ખલુ વા એષઃ । યદગ્નિઃ । યદ્ગામન્વત્યાવર્તયેત્
। રુદ્રાય પશૂનપિદધ્યાત્ । અપશુર્યજમાનઃ સ્યાત્ ।
યદપોઽન્વતિષિઞ્ચેત્ । અનાદ્યમગ્નેરાપઃ । અનાદ્યમાભ્યામપિ
દધ્યાત્ । ગાર્હપત્યાદ્ભસ્માદાય । ઇદં વિષ્ણુર્વિચક્રમ ઇતિ
વૈષ્ણવ્યર્ચાઽહવનીયાદ્ધ્વꣳસયન્નુદ્દ્રવેત્ । યજ્ઞો વૈ વિષ્ણુઃ ।
યજ્ઞેનૈવ યજ્ઞꣳ સંતનોતિ । ભસ્મના પદમપિ વપતિ શાન્ત્યૈ ॥ ૧। ૪। ૩। ૬॥ વૈ દેવ્યદિતિર્મુઞ્ચતિ સૃજતિ
કરોતિ કરોત્યાભ્યામપિ દધ્યાત્પઞ્ચ
ચ ॥ ૩॥

૧૭ નિ વા એતસ્યાહવનીયો ગાર્હપત્યં કામયતે । નિ ગાર્હપત્ય આહવનીયમ્ ।
યસ્યાગ્નિમનુદ્ધૃતꣳ સૂર્યોઽભિનિમ્રોચતિ । દર્ભેણ હિરણ્યં
પ્રબધ્ય પુરસ્તાદ્ધરેત્ । અથાગ્નિમ્ । અથાગ્નિહોત્રમ્ । યદ્ધિરણ્યં

પુરસ્તાદ્ધરતિ । જ્યોતિર્વૈ હિરણ્યમ્ । જ્યોતિરેવૈનં પશ્યન્નુદ્ધરતિ ।
યદગ્નિં પૂર્વ ँ હરત્યથાગ્નિહોત્રમ્ ॥ ૧। ૪। ૪। ૧॥
૧૮ ભાગધેયેનૈવૈનં પ્રણયતિ । બ્રાહ્મણ આર્ષેય ઉદ્ધરેત્ ।
બ્રાહ્મણો વૈ સર્વા દેવતાઃ । સર્વાભિરેવૈનં દેવતાભિરુદ્ધરતિ ।
અગ્નિહોત્રમુપસાદ્યાતમિતોરાસીત । વ્રતમેવ હતમનુ મ્રિયતે । અન્તં
વા એષ આત્મનો ગચ્છતિ । યસ્તામ્યતિ । અન્તમેષ યજ્ઞસ્ય ગચ્છતિ ।
યસ્યાગ્નિમનુદ્ધૃત ँ સૂર ્યોઽભિનિમ્રોચતિ ॥ ૧। ૪। ૪। ૨॥
૧૯ પુનઃ સમન્ય જુહોતિ । અન્તેનૈવાન્તં યજ્ઞસ્ય નિષ્કરોતિ । વરુણો વા
એતસ્ય યજ્ઞં ગૃહ્ણાતિ । યસ્યાગ્નિમનુદ્ધૃત ँ સૂર ્યોઽભિનિમ્રોચતિ ।
વારુણં ચરું નિર્વપેત્ । તેનૈવ યજ્ઞં નિષ્ક્રીણીતે । નિ વા એતસ્યાહવનીયો
ગાર્હપત્યં કામયતે । નિ ગાર્હપત્ય આહવનીયમ્ । યસ્યાગ્નિમનુદ્ધૃત ँ
સૂર ્યોઽભ્યુદેતિ । ચતુર્ગૃહીતમાજ્યં પુરસ્તાદ્ધરેત્ ॥ ૧। ૪। ૪। ૩॥
૨૦ અથાગ્નિમ્ । અથાગ્નિહોત્રમ્ । યદાજ્યં પુરસ્તાદ્ધરતિ । એતદ્વા અગ્નેઃ પ્રિયં
ધામ । યદાજ્યમ્ । પ્રિયેણૈવૈનં ધામ્ના સમર્ધયતિ । યદગ્નિં પૂર્વ ँ
હરત્યથાગ્નિહોત્રમ્ । ભાગધેયેનૈવૈનં પ્રણયતિ । બ્રાહ્મણ આર્ષેય
ઉદ્ધરેત્ । બ્રાહ્મણો વૈ સર્વા દેવતાઃ ॥ ૧। ૪। ૪। ૪॥
૨૧ સર્વાભિરેવૈનં દેવતાભિરુદ્ધરતિ । પરાચી વા એતસ્મૈ
વ્યુચ્છન્તી વ્યુચ્છતિ । યસ્યાગ્નિમનુદ્ધૃત ँ સૂર ્યોઽભ્યુદેતિ । ઉષાઃ
કેતુના જુષતામ્ । યજ્ઞં દેવેભિરન્વિતમ્ । દેવેભ્યો મધુમત્તમગ્ગ્
સ્વાહેતિ પ્રત્યઙ્ઙ્ નિષદ્યાજ્યેન જુહુયાત્ । પ્રતીચીમેવાસ્મૈ વિવાસયતિ ।
અગ્નિહોત્રમુપસાદ્યાતમિતોરાસીત । વ્રતમેવ હતમનુ મ્રિયતે । અન્તં
વા એષ આત્મનો ગચ્છતિ ॥ ૧। ૪। ૪। ૫॥
૨૨ યસ્તામ્યતિ । અન્તમેષ યજ્ઞસ્ય ગચ્છતિ । યસ્યાગ્નિમનુદ્ધૃત ँ
સૂર ્યોઽભ્યુદેતિ । પુનઃ સમન્ય જુહોતિ । અન્તેનૈવાન્તં યજ્ઞસ્ય
નિષ્કરોતિ । મિત્રો વા એતસ્ય યજ્ઞં ગૃહ્ણાતિ । યસ્યાગ્નિમનુદ્ધૃત ँ
સૂર ્યોઽભ્યુદેતિ । મૈત્રં ચરું નિર્વપેત્ । તેનૈવ યજ્ઞં નિષ્ક્રીણીતે ।
યસ્યાહવનીયેઽનુદ્વાતે ગાર્હપત્ય ઉદ્વાયેત્ ॥ ૧। ૪। ૪। ૬॥

૨૩ યદાહવનીયમનુદ્વાપ્ય ગાર્હપત્યં મન્થેત્ । વિચ્છિન્દ્યાત્ ।
ભ્રાતૃવ્યમસ્મૈ જનયેત્ । યદ્વૈ યજ્ઞસ્ય વાસ્તવ્યં ક્રિયતે । તદનુ
રુદ્રોઽવચરતિ । યત્પૂર્વમન્વવસ્યેત્ । વાસ્તવ્યમગ્નિમુપાસીત । રુદ્રોઽસ્ય
પશૂન્ઘાતુકઃ સ્યાત્ । આહવનીયમુદ્વાપ્ય । ગાર્હપત્યં મન્થેત્ ॥ ૧। ૪। ૪। ૭॥
૨૪ ઇતઃ પ્રથમં જજ્ઞે અગ્નિઃ । સ્વાદ્યોનેરધિ જાતવેદાઃ । સ
ગાયત્રિયા ત્રિષ્ટુભા જગત્યા । દેવેભ્યો હવ્યં વહતુ પ્રજાનન્નિતિ ।
છન્દોભિરેવૈનગ્ગ્ં સ્વાદ્યોનેઃ પ્રજનયતિ । ગાર્હપત્યં મન્થતિ । ગાર્હપત્યં
વા અન્વાહિતાગ્નેઃ પશવ ઉપતિષ્ઠન્તે । સ યદુદ્વાયતિ । તદનુ પશવોઽપ
ક્રામન્તિ । ઇષે રય્યૈ રમસ્વ ॥ ૧। ૪। ૪। ૮॥
૨૫ સહસે દ્યુમ્નાય । ઊર્જે પત્યાયેત્યાહ । પશવો વૈ રયિઃ । પશૂનેવાસ્મૈ
રમયતિ । સારસ્વતૌ ત્વોત્સૌ સમિન્ધાતામિત્યાહ । ઋખ્સામે વૈ
સારસ્વતાવુત્સૌ । ઋખ્સામાભ્યામેવૈન ँ સમિન્ધે । સમ્રાડસિ
વિરાડસીત્યાહ । રથન્તરં વૈ સમ્રાટ્ । બૃહદ્વિરાટ્ ॥ ૧। ૪। ૪। ૯॥
૨૬ તાભ્યામેવૈન ँ સમિન્ધે । વજ્રો વૈ ચક્રમ્ । વજ્રો વા એતસ્ય યજ્ઞં
વિચ્છિનત્તિ । યસ્યાનો વા રથો વાઽન્તરાઽગ્ની યાતિ । આહવનીયમુદ્વાપ્ય ।
ગાર્હપત્યાદુદ્ધરેત્ । યદગ્ને પૂર્વં પ્રભૃતં પદ ँ હિ તે । સૂર્યસ્ય
રશ્મીનન્વાતતાન । તત્ર રયિષ્ઠામનુ સંભરૈતમ્ । સં નઃ સૃજ
સુમત્યા વાજવત્યેતિ ॥ ૧। ૪। ૪। ૧૦॥
૨૭ પૂર્વેણૈવાસ્ય યજ્ઞેન યજ્ઞમનુ સં તનોતિ । ત્વમગ્ને સપ્રથા
અસીત્યાહ । અગ્નિઃ સર્વા દેવતાઃ । દેવતાભિરેવ યજ્ઞ ँ સં તનોતિ
। અગ્નયે પથિકૃતે પુરોડાશમષ્ટાકપાલં નિર્વપેત્ । અગ્નિમેવ
પથિકૃતગ્ગ્ં સ્વેન ભાગધેયેનોપ ધાવતિ । સ એવૈનં યજ્ઞિયં
પન્થામપિ નયતિ । અનડ્વાન્દક્ષિણા । વહી હ્યેષ સમૃદ્ધ્યૈ ॥ ૧। ૪। ૪। ૧૧॥
હરત્યથાગ્નિહોત્રં નિમ્રોચતિ હરેદ્દેવતા ગચ્છત્યુદ્વાયેન્મન્થેદ્રમસ્વ
બૃહદ્વિરાડિતિ નવ ચ ॥ ૪॥ નિ વૈ પૂર્વં ત્રીણિ નિમ્રોચતિ દર્ભેણ
યદ્ધિરણ્યમગ્નિહોત્રં પુનર્વરુણો વારુણં નિ વા એતસ્યાભ્યુદેતિ

ચતુર્ગૃહીતમાજ્યં યદાજ્યં પરાચ્યુષાઃ પુનર્મિત્રો મૈત્રં
યસ્યાહવનીયેઽનુદ્વાતે ગાર્હપત્યે યદ્વૈ ॥

૨૮ યસ્ય પ્રાતઃસવને સોમોઽતિરિચ્યતે । માધ્યન્દિનꣳ સવનં
કામયમાનોઽભ્યતિરિચ્યતે । ગૌર્ધયતિ મરુતામિતિ ધયદ્વતીષુ કુર્વન્તિ ।
હિનસ્તિ વૈ સન્ધ્યધીતમ્ । સન્ધીવ ખલુ વા એતત્ । યથ્સવનસ્યાતિરિચ્યતે
। યદ્ધયદ્વતીષુ કુર્વન્તિ । સન્ધેઃ શાન્ત્યૈ । ગાયત્રꣳ સામ ભવતિ
પઞ્ચદશઃ સ્તોમઃ । તેનૈવ પ્રાતઃસવનાન્ન યન્તિ ॥ ૧। ૪। ૫। ૧॥

૨૯ મરુત્વતીષુ કુર્વન્તિ । તેનૈવ માધ્યન્દિનાથ્સવનાન્ન યન્તિ ।
હોતુશ્ચમસમનૂન્નયન્તે । હોતાઽનુશꣳસતિ । મધ્યત એવ યજ્ઞꣳ
સમાદધાતિ । યસ્ય માધ્યન્દિને સવને સોમોઽતિરિચ્યતે । આદિત્યં
તૃતીયસવનં કામયમાનોઽભ્યતિરિચ્યતે । ગૌરિવીતꣳ સામ ભવતિ ।
અતિરિક્તં વૈ ગૌરિવીતમ્ । અતિરિક્તં યથ્સવનસ્યાતિરિચ્યતે ॥ ૧। ૪। ૫। ૨॥

૩૦ અતિરિક્તસ્ય શાન્ત્યૈ । બણ્મહાꣳ અસિ સૂર્યેતિ કુર્વન્તિ । યસ્યૈવાદિત્યસ્ય
સવનસ્ય કામેનાતિરિચ્યતે । તેનૈવૈનં કામેન સમર્ધયન્તિ
। ગૌરિવીતꣳ સામ ભવતિ । તેનૈવ માધ્યન્દિનાથ્સવનાન્ન
યન્તિ । સપ્તદશઃ સ્તોમઃ । તેનૈવ તૃતીયસવનાન્ન યન્તિ ।
હોતુશ્ચમસમનૂન્નયન્તે । હોતાઽનુશꣳસતિ ॥ ૧। ૪। ૫। ૩॥

૩૧ મધ્યત એવ યજ્ઞꣳ સમાદધાતિ । યસ્ય તૃતીયસવને
સોમોઽતિરિચ્યેત । ઉક્થ્યં કુર્વીત । યસ્યોક્થ્યેઽતિરિચ્યેત ।
અતિરાત્રં કુર્વીત । યસ્યાતિરાત્રેઽતિરિચ્યતે । તત્ત્વૈ દુષ્પ્રજ્ઞાનમ્
। યજમાનં વા એતત્પશવ આસાદ્ય યન્તિ । બૃહથ્સામ ભવતિ ।
બૃહદ્વા ઇમાન્ લોકાન્દાધાર । બાર્હતાઃ પશવઃ । બૃહતૈવાસ્મૈ
પશૂન્દાધાર । શિપિવિષ્ટવતીષુ કુર્વન્તિ । શિપિવિષ્ટો વૈ દેવાનાં
પુષ્ટમ્ । પુષ્ટ્યૈવૈનꣳ સમર્ધયન્તિ । હોતુશ્ચમસમનૂન્નયન્તે ।
હોતાઽનુશꣳસતિ । મધ્યત એવ યજ્ઞꣳ સમાદધાતિ ॥ ૧। ૪। ૫। ૪॥

યન્તિ સવનસ્યાતિરિચ્યતે શꣳસતિ દાધારાષ્ટૌ ચ ॥ ૫॥

૩૨ એકૈકો વૈ જનતાયામિન્દ્રઃ । એકં વા એતાવિન્દ્રમભિ સꣳસુનુતઃ

। યૌ દ્વૌ સ ꣳસુનુતઃ । પ્રજાપતિર્વા એષ વિતાયતે । યદ્યજ્ઞઃ ।
તસ્ય ગ્રાવાણો દન્તાઃ । અન્યતરં વા એતે સ ꣳસુન્વતોર્નિર્બપ્સતિ ।
પૂર્વેણોપસૃત્યા દેવતા ઇત્યાહુઃ । પૂર્વોપસૃતસ્ય વૈ શ્રેયાન્ભવતિ ।
એતિવન્ત્યાજ્યાનિ ભવન્ત્યભિજિત્યૈ ॥ ૧। ૪। ૬। ૧॥

33 મરુત્વતીઃ પ્રતિપદઃ । મરુતો વૈ દેવાનામપરાજિતમાયતનમ્ ।
દેવાનામેવાપરાજિત આયતને યતતે । ઉભે બૃહદ્રથન્તરે ભવતઃ । ઇયં
વાવ રથન્તરમ્ । અસૌ બૃહત્ । આભ્યામેવૈનમન્તરેતિ । વાચશ્ચ
મનસશ્ચ । પ્રાણાચ્ચાપાનાચ્ચ । દિવશ્ચ પૃથિવ્યાશ્ચ ॥ ૧। ૪। ૬। ૨॥

34 સર્વસ્માદ્વિત્તાદ્વેદ્યાત્ । અભિવર્તો બ્રહ્મસામં ભવતિ । સુવર્ગસ્ય
લોકસ્યાભિવૃત્ત્યૈ । અભિજિદ્ભવતિ । સુવર્ગસ્ય લોકસ્યાભિજિત્યૈ ।
વિશ્વજિદ્ભવતિ । વિશ્વસ્ય જિત્યૈ । યસ્ય ભૂયા ꣳસો યજ્ઞક્રતવ
ઇત્યાહુઃ । સ દેવતા વૃઙ્ક્ત ઇતિ । યદ્યગ્નિષ્ટોમઃ સોમઃ પરસ્તાથ્સ્યાત્ ॥
૧। ૪। ૬। ૩॥

35 ઉક્થ્યં કુર્વીત । યદ્યુક્થ્યઃ સ્યાત્ । અતિરાત્રં કુર્વીત ।
યજ્ઞક્રતુભિરેવાસ્ય દેવતા વૃઙ્ક્તે । યો વૈ છન્દોભિરભિભવતિ ।
સ સ ꣳસુન્વતોરભિભવતિ । સંવેશાય ત્વોપવેશાય ત્વેત્યાહ
। છન્દા ꣳસિ વૈ સંવેશ ઉપવેશઃ । છન્દોભિરેવાસ્ય
છન્દાગ્સ્યભિભવતિ । ઇષ્ટર્ગો વા ઋત્વિજામધ્વર્યુઃ ॥ ૧। ૪। ૬। ૪॥

36 ઇષ્ટર્ગઃ ખલુ વૈ પૂર્વોઽર્ષ્ટુઃ, ક્ષીયતે । પ્રાણાપાનૌ મૃત્યોર્મા
પાતમિત્યાહ । પ્રાણાપાનયોરેવ શ્રયતે । પ્રાણાપાનૌ મા મા
હાસિષ્ટમિત્યાહ । નૈનં પુરાઽઽયુષઃ પ્રાણાપાનૌ જહિતઃ । આર્તિં વા
એતે નિયન્તિ । યેષાં દીક્ષિતાનાં પ્રમીયતે । તં યદવવર્જેયુઃ ।
ક્રૂરકૃતામિવૈષાં લોકઃ સ્યાત્ । આહર દહેતિ બ્રૂયાત્ ॥ ૧। ૪। ૬। ૫॥

37 તં દક્ષિણતો વેદ્યૈ નિધાય । સર્પરાજ્ઞિયા ઋગ્ભિઃ સ્તુયુઃ । ઇયં
વૈ સર્પતો રાજ્ઞી । અસ્યા એવૈનં પરિદદતિ । વ્યૃદ્ધં તદિત્યાહુઃ ।
યથ્સ્તુતમનનુશસ્તમિતિ । હોતા પ્રથમઃ પ્રાચીનાવીતી માર્જાલીયં
પરીયાત્ । યામીરનુબ્રુવન્ । સર્પરાજ્ઞીનાં કીર્તયેત્ । ઉભયોરેવૈનં

લોકયોઃ પરિદદતિ ॥ ૧। ૪। ૬। ૬॥

૩૮ અથો ધુવન્ત્યેવૈનમ્ । અથો ન્યેવાસ્મૈ હ્નુવતે । ત્રિઃ પરિયન્તિ । ત્રય
ઇમે લોકાઃ । એભ્ય એવૈનં લોકેભ્યો ધુવતે । ત્રિઃ પુનઃ પરિયન્તિ ।
ષટ્થ્ સંપદ્યન્તે । ષડ્વા ઋતવઃ । ઋતુભિરેવૈનં ધુવતે । અગ્ન
આયૂꣳષિ પવસ ઇતિ પ્રતિપદં કુર્વીરન્ । રથન્તરસામૈષાꣳ
સોમઃ સ્યાત્ । આયુરેવાત્મન્દધતે । અથો પાપ્માનમેવ વિજહતો યન્તિ ॥ ૧। ૪। ૬। ૭॥ અભિજિત્યૈ
પૃથિવ્યાશ્ચ સ્યાદધ્વર્યુર્બ્રૂયાલ્લોકયોઃ પરિદદતિ
કુર્વીરꣳꣳ સ્ત્રીણિ ચ ॥ ૬॥

૩૯ અસુર્યં વા એતસ્માદ્વર્ણં કૃત્વા । પશવો વીર્યમપક્રામન્તિ
। યસ્ય યૂપો વિરોહતિ । ત્વાષ્ટ્રં બહુરૂપમાલભેત । ત્વષ્ટા વૈ
રૂપાણામીશે । ય એવ રૂપાણામીશે । સોઽસ્મિન્પશૂન્, વીર્યં યચ્છતિ
। નાસ્માત્પશવો વીર્યમપ ક્રામન્તિ । આર્તિં વા એતે નિયન્તિ । યેષાં
દીક્ષિતાનામગ્નિરુદ્વાયતિ ॥ ૧। ૪। ૭। ૧॥

૪૦ યદાહવનીય ઉદ્વાયેત્ । યત્તં મન્થેત્ । વિચ્છિન્દ્યાત્ । ભ્રાતૃવ્યમસ્મૈ
જનયેત્ । યદાહવનીય ઉદ્વાયેત્ । આગ્નીદ્ધ્રાદુદ્ધરેત્ । યદાગ્નીદ્ધ્ર ઉદ્વાયેત્
। ગાર્હપત્યાદુદ્ધરેત્ । યદ્ગાર્હપત્ય ઉદ્વાયેત્ । અત એવ પુનર્મન્થેત્ ॥ ૧। ૪। ૭। ૨॥

૪૧ અત્ર વાવ સ નિલયતે । યત્ર ખલુ વૈ નિલીનમુત્તમં પશ્યન્તિ ।
તદેનમિચ્છન્તિ । યસ્માદ્દારોરુદ્વાયેત્ । તસ્યારણી કુર્યાત્ । ક્રુમુકમપિ
કુર્યાત્ । એષા વા અગ્નેઃ પ્રિયા તનૂઃ । યત્ક્રુમુકઃ । પ્રિયયૈવૈનં તનુવા
સમર્ધયતિ । ગાર્હપત્યં મન્થતિ ॥ ૧। ૪। ૭। ૩॥

૪૨ ગાર્હપત્યો વા અગ્નેર્યોનિઃ । સ્વાદેવૈનં યોનેર્જનયતિ । નાસ્મૈ ભ્રાતૃવ્યં
જનયતિ । યસ્ય સોમ ઉપદસ્યેત્ । સુવર્ણꣳ હિરણ્યં દ્વેધા વિચ્છિદ્ય
। ઋજીષેઽન્યદા ધૂનુયાત્ । જુહુયાદન્યત્ । સોમમેવાભિષુણોતિ ।
સોમં જુહોતિ । સોમસ્ય વા અભિષૂયમાણસ્ય પ્રિયા તનૂરુદક્રામત્ ॥ ૧। ૪। ૭। ૪॥

૪૩ તથ્સુવર્ણꣳ હિરણ્યમભવત્ । યથ્સુવર્ણꣳ હિરણ્યં કુર્વન્તિ ।
પ્રિયયૈવૈનં તનુવા સમર્ધયન્તિ । યસ્યાક્રીતꣳ સોમમપહરેયુઃ
। ક્રીણીયાદેવ । સૈવ તતઃ પ્રાયશ્ચિત્તિઃ । યસ્ય ક્રીતમપહરેયુઃ ।

આદારાગ્શ્ચ ફાલ્ગુનાનિ ચાભિષુણુયાત્ । ગાયત્રી યꣳ સોમમાહરત્ ।
તસ્ય યોઽꣳશુઃ પરાઽપતત્ ॥ ૧। ૪। ૭। ૫॥

૪૪ ત આદારા અભવન્ । ઇન્દ્રો વૃત્રમહન્ । તસ્ય વલ્કઃ પરાઽપતત્ ।
તાનિ ફાલ્ગુનાન્યભવન્ । પશવો વૈ ફાલ્ગુનાનિ । પશવઃ સોમો રાજા ।
યદાદારાગ્શ્ચ ફાલ્ગુનાનિ ચાભિષુણોતિ । સોમમેવ રાજાનમભિષુણોતિ ।
શૃતેન પ્રાતઃસવને શ્રીણીયાત્ । દધ્ના મધ્યન્દિને ॥ ૧। ૪। ૭। ૬॥

૪૫ નીતમિશ્રેણ તૃતીયસવને । અગ્નિષ્ટોમઃ સોમઃ સ્યાદ્રથન્તરસામા ।
ય એવર્ત્વિજો વૃતાઃ સ્યુઃ । ત એનં યાજયેયુઃ । એકાં ગાં દક્ષિણાં દદ્યાત્તેભ્ય
એવ । પુનઃ સોમં ક્રીણીયાત્ । યજ્ઞેનૈવ તદ્યજ્ઞમિચ્છતિ । સૈવ તતઃ
પ્રાયશ્ચિત્તિઃ । સર્વાભ્યો વા એષ દેવતાભ્યઃ સર્વેભ્યઃ પૃષ્ઠેભ્ય
આત્માનમાગુરતે । યઃ સત્ત્રાયાગુરતે । એતાવાન્ખલુ વૈ પુરુષઃ । યાવદસ્ય
વિત્તમ્ । સર્વવેદસેન યજેત । સર્વપૃષ્ઠોઽસ્ય સોમઃ સ્યાત્ । સર્વાભ્ય
એવ દેવતાભ્યઃ સર્વેભ્યઃ પૃષ્ઠેભ્ય આત્માનં નિષ્ક્રીણીતે ॥ ૧। ૪। ૭। ૭॥

ઉદ્વાયતિ મન્થેન્મન્થત્યક્રામત્પરાઽપતન્મધ્યન્દિન આગુરતે પઞ્ચ ચ ॥ ૭॥

૪૬ પવમાનઃ સુવર્જનઃ । પવિત્રેણ વિચર્ષણિઃ । યઃ પોતા સ પુનાતુ મા ।
પુનન્તુ મા દેવજનાઃ । પુનન્તુ મનવો ધિયા । પુનન્તુ વિશ્વ આયવઃ ।
જાતવેદઃ પવિત્રવત્ । પવિત્રેણ પુનાહિ મા । શુક્રેણ દેવ દીદ્યત્ । અગ્ને
ક્રત્વા ક્રતૂꣳરનુ ॥ ૧। ૪। ૮। ૧॥

૪૭ યત્તે પવિત્રમર્ચિષિ । અગ્ને વિતતમન્તરા । બ્રહ્મ તેન પુનીમહે
। ઉભાભ્યાં દેવ સવિતઃ । પવિત્રેણ સવેન ચ । ઇદં બ્રહ્મ પુનીમહે ।
વૈશ્વદેવી પુનતી દેવ્યાગાત્ । યસ્યૈ બહ્વીસ્તનુવો વીતપૃષ્ઠાઃ ।
તયા મદન્તઃ સધ માદ્યેષુ । વયꣳ સ્યામ પતયો રયીણામ્ ॥ ૧। ૪। ૮। ૨॥

૪૮ વૈશ્વાનરો રશ્મિભિર્મા પુનાતુ । વાતઃ પ્રાણેનેષિરો મયોભૂઃ ।
દ્યાવાપૃથિવી પયસા પયોભિઃ । ઋતાવરી યજ્ઞિયે મા પુનીતામ્ । બૃહદ્ભિઃ
સવિતસ્તૃભિઃ । વર્ષિષ્ઠૈર્દેવ મન્મભિઃ । અગ્ને દક્ષૈઃ પુનાહિ મા । યેન
દેવા અપુનત । યેનાપો દિવ્યં કશઃ । તેન દિવ્યેન બ્રહ્મણા ॥ ૧। ૪। ૮। ૩॥

૪૯ ઇદં બ્રહ્મ પુનીમહે । યઃ પાવમાનીરધ્યેતિ । ઋષિભિઃ સંભૃતꣳ રસમ્ । સર્વꣳ સ પૂતમશ્નાતિ । સ્વદિતં માતરિશ્વના । પાવમાનીર્યો અધ્યેતિ । ઋષિભિઃ સંભૃતꣳ રસમ્ । તસ્મૈ સરસ્વતી દુહે । ક્ષીરꣳ સર્પિર્મધૂદકમ્ । પાવમાનીઃ સ્વસ્ત્યયનીઃ ॥ ૧। ૪। ૮। ૪॥

૫૦ સુદુઘા હિ પયસ્વતીઃ । ઋષિભિઃ સંભૃતો રસઃ । બ્રાહ્મણેષ્વમૃતꣳહિતમ્ । પાવમાનીર્દિશન્તુ નઃ । ઇમં લોકમથો અમુમ્ । કામાન્થ્સમર્ધયન્તુ નઃ । દેવીર્દેવૈઃ સમાભૃતાઃ । પાવમાનીઃ સ્વસ્ત્યયનીઃ । સુદુઘા હિ ઘૃતશ્ચુતઃ । ઋષિભિઃ સંભૃતો રસઃ ॥ ૧। ૪। ૮। ૫॥

૫૧ બ્રાહ્મણેષ્વમૃતꣳહિતમ્ । યેન દેવાઃ પવિત્રેણ । આત્માનં પુનતે સદા । તેન સહસ્રધારેણ । પાવમાન્યઃ પુનન્તુ મા । પ્રાજાપત્યં પવિત્રમ્ । શતોદ્યામꣳ હિરણ્મયમ્ । તેન બ્રહ્મવિદો વયમ્ । પૂતં બ્રહ્મ પુનીમહે । ઇન્દ્રઃ સુનીતી સહ મા પુનાતુ । સોમઃ સ્વસ્ત્યા વરુણઃ સમીચ્યા । યમો રાજા પ્રમૃણાભિઃ પુનાતુ મા । જાતવેદા મોર્જયન્ત્યા પુનાતુ ॥ ૧। ૪। ૮। ૬॥ અનુ રયીણાં બ્રહ્મણા સ્વસ્ત્યયનીઃ સુદુઘા હિ ઘૃતશ્ચુત ઋષિભિઃ સંભૃતો રસઃ પુનાતુ ત્રીણિ ચ ॥ ૮॥

૫૨ પ્રજા વૈ સત્રમાસત તપસ્તપ્યમાના અજુહ્વતીઃ । દેવા અપશ્યઞ્ચમસં ઘૃતસ્ય પૂર્ણꣳ સ્વધામ્ । તમુપોદતિષ્ઠન્તમજુહવુઃ । તેનાર્ધમાસ ઊર્જમવારુન્ધત । તસ્માદર્ધમાસે દેવા ઇજ્યન્તે । પિતરોઽપશ્યઞ્ચમસં ઘૃતસ્ય પૂર્ણꣳ સ્વધામ્ । તમુપોદતિષ્ઠન્તમજુહવુઃ । તેન માસ્યૂર્જમવારુન્ધત । તસ્માન્માસિ પિતૃભ્યઃ ક્રિયતે । મનુષ્યા અપશ્યઞ્ચમસં ઘૃતસ્ય પૂર્ણગ્ગ્ સ્વધામ્ ॥ ૧। ૪। ૯। ૧॥

૫૩ તમુપોદતિષ્ઠન્તમજુહવુઃ । તેન દ્વયીમૂર્જમવારુન્ધત । તસ્માદ્દ્વિરહ્નો મનુષ્યેભ્ય ઉપ હ્રિયતે । પ્રાતશ્ચ સાયં ચ । પશવોઽપશ્યઞ્ચમસં ઘૃતસ્ય પૂર્ણꣳ સ્વધામ્ । તમુપોદતિષ્ઠન્તમજુહવુઃ । તેન ત્રયીમૂર્જમવારુન્ધત । તસ્માત્ત્રિરહ્નઃ પશવઃ પ્રેરતે । પ્રાતઃ સઙ્ગવે સાયમ્ । અસુરા અપશ્યઞ્ચમસં ઘૃતસ્ય પૂર્ણꣳ સ્વધામ્ ॥ ૧। ૪। ૯। ૨॥

૫૪ તમુપોદતિષ્ઠન્તમજુહવુઃ । તેન સંવથ્સર ઊર્જમવારુન્ધત । તે
દેવા અમન્યન્ત । અમી વા ઇદમભૂવન્ । યદ્વયરઁ સ્મ ઇતિ । ત એતાનિ
ચાતુર્માસ્યાન્યપશ્યન્ । તાનિ નિરવપન્ । તૈરેવૈષાં તામૂર્જમવૃઞ્જત ।
તતો દેવા અભવન્ । પરાઽસુરાઃ ॥ ૧। ૪। ૯। ૩॥

૫૫ યદ્યજતે । યામેવ દેવા ઊર્જમવારુન્ધત । તાં તેનાવરુન્ધે ।
યત્પિતૃભ્યઃ કરોતિ । યામેવ પિતર ઊર્જમવારુન્ધત । તાં તેનાવરુન્ધે
। યદાવસથેઽન્નઁ હરન્તિ । યામેવ મનુષ્યા ઊર્જમવારુન્ધત ।
તાં તેનાવરુન્ધે । યદ્દક્ષિણાં દદાતિ ॥ ૧। ૪। ૯। ૪॥

૫૬ યામેવ પશવ ઊર્જમવારુન્ધત । તાં તેનાવરુન્ધે ।
યચ્ચાતુર્માસ્યૈર્યજતે । યામેવાસુરા ઊર્જમવારુન્ધત । તાં તેનાવરુન્ધે
। ભવત્યાત્મના । પરાઽસ્ય ભ્રાતૃવ્યો ભવતિ । વિરાજો વા એષા
વિક્રાન્તિઃ । યચ્ચાતુર્માસ્યાનિ । વૈશ્વદેવેનાસ્મિં લ્લોકે પ્રત્યતિષ્ઠત્ ।
વરુણપ્રઘાસૈરન્તરિક્ષે । સાકમેધૈરમુષ્મિં લ્લોકે । એષ
હત્વાવૈ તથ્સર્વં ભવતિ । ય એવં વિદ્વાઞ્ચાતુર્માસ્યૈર્યજતે ॥ ૧। ૪। ૯। ૫॥ મનુષ્યા અપશ્યઞ્ચમસં ઘૃતસ્ય
પૂર્ણરઁ સ્વધામસુરા
અપશ્યઞ્ચમસં ઘૃતસ્ય પૂર્ણરઁ સ્વધામસુરા દદાત્યતિષ્ઠઞ્ચત્વારિ
ચ ॥ ૯॥

૫૭ અગ્નિર્વાવ સંવથ્સરઃ । આદિત્યઃ પરિવથ્સરઃ । ચન્દ્રમા
ઇદાવથ્સરઃ । વાયુરનુવથ્સરઃ । યદ્વૈશ્વદેવેન યજતે । અગ્નિમેવ
તથ્સંવથ્સરમાપ્નોતિ । તસ્માદ્વૈશ્વદેવેન યજમાનઃ । સંવથ્સરીણાગ્ં
સ્વસ્તિમાશાસ્ત ઇત્યાશાસીત । યદ્વરુણપ્રઘાસૈર્યજતે । આદિત્યમેવ
તત્પરિવથ્સરમાપ્નોતિ ॥ ૧। ૪। ૧૦। ૧॥

૫૮ તસ્માદ્વરુણપ્રઘાસૈર્યજમાનઃ । પરિવથ્સરીણાગ્ં સ્વસ્તિમાશાસ્ત
ઇત્યાશાસીત । યથ્સાકમેધૈર્યજતે । ચન્દ્રમસમેવ તદિદાવથ્સરમાપ્નોતિ ।
તસ્માથ્સાકમેધૈર્યજમાનઃ । ઇદાવથ્સરીણાગ્ં સ્વસ્તિમાશાસ્ત ઇત્યાશાસીત
। યત્પિતૃયજ્ઞેન યજતે । દેવાનેવ તદન્વવસ્યતિ । અથ વા અસ્ય
વાયુશ્ચાનુવથ્સરશ્ચાપ્રીતાવુચ્છિષ્યેતે । યચ્છુનાસીરીયેણ યજતે ॥

૧। ૪। ૧૦। ૨॥

૫૯ વાયુમેવ તદનુવથ્સરમાપ્નોતિ । તસ્માચ્છુનાસીરીયેણ યજમાનઃ
। અનુવથ્સરીણાગ્ સ્વસ્તિમાશાસ્ત ઇત્યાશાસીત । સંવથ્સરં વા
એષ ઈપ્સતીત્યાહુઃ । યશ્ચાતુર્માસ્યૈર્યજત ઇતિ । એષ હ ત્વૈ
સંવથ્સરમાપ્નોતિ । ય એવં વિદ્વાગ્શ્ચાતુર્માસ્યૈર્યજતે । વિશ્વે દેવાઃ
સમયજન્ત । તેઽગ્નિમેવાયજન્ત । ત એતં લોકમજયન્ ॥ ૧। ૪। ૧૦। ૩॥

૬૦ યસ્મિન્નગ્નિઃ । યદ્વૈશ્વદેવેન યજતે । એતમેવ લોકં
જયતિ । યસ્મિન્નગ્નિઃ । અગ્નેરેવ સાયુજ્યમુપૈતિ । યદા
વૈશ્વદેવેન યજતે । અથ સંવથ્સરસ્ય ગૃહપતિમાપ્નોતિ । યદા
સંવથ્સરસ્ય ગૃહપતિમાપ્નોતિ । અથ સહસ્રયાજિનમાપ્નોતિ । યદા
સહસ્રયાજિનમાપ્નોતિ ॥ ૧। ૪। ૧૦। ૪॥

૬૧ અથ ગૃહમેધિનમાપ્નોતિ । યદા ગૃહમેધિનમાપ્નોતિ । અથાગ્નિર્ભવતિ
। યદાઽગ્નિર્ભવતિ । અથ ગૌર્ભવતિ । એષા વૈ વૈશ્વદેવસ્ય માત્રા
। એતદ્વા એતેષામવમમ્ । અતોઽતો વા ઉત્તરાણિ શ્રેયાꣳસિ ભવન્તિ ।
યદ્વિશ્વે દેવાઃ સમયજન્ત । તદ્વૈશ્વદેવસ્ય વૈશ્વદેવત્વમ્ ॥ ૧। ૪। ૧૦। ૫॥

૬૨ અથાદિત્યો વરુણꣳ રાજાનં વરુણપ્રઘાસૈરયજત । સ એતં
લોકમજયત્ । યસ્મિન્નાદિત્યઃ । યદ્વરુણપ્રઘાસૈર્યજતે । એતમેવ લોકં
જયતિ । યસ્મિન્નાદિત્યઃ । આદિત્યસ્યૈવ સાયુજ્યમુપૈતિ । યદાદિત્યો
વરુણꣳ રાજાનં વરુણપ્રઘાસૈરયજત । તદ્વરુણપ્રઘાસાનાં
વરુણપ્રઘાસત્વમ્ । અથ સોમો રાજા છન્દાꣳસિ સાકમેધૈરયજત ॥ ૧। ૪। ૧૦। ૬॥

૬૩ સ એતં લોકમજયત્ । યસ્મિગ્ગ્શ્ચન્દ્રમા વિભાતિ । યથ્સાકમેધૈર્યજતે
। એતમેવ લોકં જયતિ । યસ્મિગ્ગ્શ્ચન્દ્રમા વિભાતિ । ચન્દ્રમસ એવ
સાયુજ્યમુપૈતિ । સોમો વૈ ચન્દ્રમાઃ । એષ હ ત્વૈ સાક્ષાથ્સોમં ભક્ષયતિ
। ય એવં વિદ્વાન્થ્સાકમેધૈર્યજતે । યથ્સોમશ્ચ રાજા છન્દાꣳસિ ચ
સમૈધન્ત ॥ ૧। ૪। ૧૦। ૭॥

૬૪ તથ્સાકમેધાનાꣳ સાકમેધત્વમ્ । અથર્તવઃ પિતરઃ પ્રજાપતિં
પિતરં પિતૃયજ્ઞેનાયજન્ત । ત એતં લોકમજયન્ । યસ્મિન્નૃતવઃ

। યત્પિતૃયજ્ઞેન યજતે । એતમેવ લોકં જયતિ । યસ્મિન્નૃતવઃ ।
ઋતૂનામેવ સાયુજ્યમુપૈતિ । યદૃતવઃ પિતરઃ પ્રજાપતિં પિતરં
પિતૃયજ્ઞેનાયજન્ત । તત્પિતૃયજ્ઞસ્ય પિતૃયજ્ઞત્વમ્ ॥ ૧। ૪। ૧૦। ૮॥

૬૫ અથૌષધય ઇમં દેવં ત્ર્યમ્બકૈરયજન્ત પ્રથેમહીતિ । તતો
વૈ તા અપ્રથન્ત । ય એવં વિદ્વાગ્સ્ત્ર્યમ્બકૈર્યજતે । પ્રથતે પ્રજયા
પશુભિઃ । અથ વાયુઃ પરમેષ્ઠિન૰ઁશુનાસીરીયેણાયજત । સ એતં
લોકમજયત્ । યસ્મિન્વાયુઃ । યચ્છુનાસીરીયેણ યજતે । એતમેવ લોકં
જયતિ । યસ્મિન્વાયુઃ ॥ ૧। ૪। ૧૦। ૯॥

૬૬ વાયોરેવ સાયુજ્યમુપૈતિ । બ્રહ્મવાદિનો વદન્તિ । પ્ર ચાતુર્માસ્યયાજી
મીયતા૩ ન પ્રમીયતા૩ ઇતિ । જીવન્વા એષ ઋતૂનપ્યેતિ । યદિ વસન્તા
પ્રમીયતે । વસન્તો ભવતિ । યદિ ગ્રીષ્મે ગ્રીષ્મઃ । યદિ વર્ષાસુ
વર્ષાઃ । યદિ શરદિ શરત્ । યદિ હેમન્ હેમન્તઃ । ઋતુર્ભૂત્વા
સંવથ્સરમપ્યેતિ । સંવથ્સરઃ પ્રજાપતિઃ । પ્રજાપતિર્વાવૈષઃ ॥

૧। ૪। ૧૦। ૧૦॥

પરિવથ્સરમાપ્નોતિ શુનાસીરીયેણ યજતેઽજયન્થ્સહસ્રયાજિનમાપ્નોતિ
વૈશ્વદેવત્વ૰ઁ સાકમેધૈરયજત સમૈધન્ત પિતૃયજ્ઞત્વં જયતિ
યસ્મિન્વાયુર્હેમન્તસ્ત્રીણિ ચ ॥ ૧૦॥

ઉભયે યુવ૰ઁ સુરામમુદસ્થાન્નિ વૈ યસ્ય પ્રાતઃસવન એકૈકોઽસુર્યં
પવમાનઃ પ્રજા વૈ સત્રમાસતાગ્નિર્વાવ સંવથ્સરો દશ ॥ ૧૦॥

ઉભયે વા ઉદસ્થાથ્સર્વાભિર્મધ્યતોઽત્ર વાવ બ્રાહ્મણેષ્વથ
ગૃહમેધિન૰ઁ ષટ્થ્ ષષ્ટિઃ ॥ ૬૬॥

ઉભયે વા વૈષઃ ॥

## પ્રથમાષ્ટકે પઞ્ચમઃ પ્રપાઠકઃ ૫

૧ અગ્નેઃ કૃત્તિકાઃ । શુક્રં પરસ્તાજ્જ્યોતિરવસ્તાત્ । પ્રજાપતે
રોહિણી । આપઃ પરસ્તાદોષધયોઽવસ્તાત્ । સોમસ્યેન્વકા વિતતાનિ

। પરસ્તાદ્વયન્તોઽવસ્તાત્ । રુદ્રસ્ય બાહૂ । મૃગયવઃ
પરસ્તાદ્વિક્ષારોઽવસ્તાત્ । અદિત્યૈ પુનર્વસૂ । વાતઃ
પરસ્તાદાર્દ્રમવસ્તાત્ ॥ ૧। ૫। ૧। ૧॥

૨ બૃહસ્પતેસ્તિષ્યઃ । જુહ્વતઃ પરસ્તાદ્યજમાના અવસ્તાત્ ।
સર્પાણામાશ્રેષાઃ । અભ્યાગચ્છન્તઃ પરસ્તાદભ્યાનૃત્યન્તોઽવસ્તાત્ ।
પિતૃણાં મઘાઃ । રુદન્તઃ પરસ્તાદપભ્રꣳ શોઽવસ્તાત્ । અર્યમ્ણઃ
પૂર્વે ફલ્ગુની । જાયા પરસ્તાદૃષભોઽવસ્તાત્ । ભગસ્યોત્તરે ।
વહતવઃ પરસ્તાદ્વહમાના અવસ્તાત્ ॥ ૧। ૫। ૧। ૨॥

૩ દેવસ્ય સવિતુર્હસ્તઃ । પ્રસવઃ પરસ્તાથ્સનિરવસ્તાત્ ।
ઇન્દ્રસ્ય ચિત્રા । ઋતં પરસ્તાથ્સત્યમવસ્તાત્ । વાયોર્નિષ્ટ્યા
વ્રતતિઃ । પરસ્તાદસિદ્ધિરવસ્તાત્ । ઇન્દ્રાગ્નિયોર્વિશાખે ।
યુગાનિ પરસ્તાત્કૃષમાણા અવસ્તાત્ । મિત્રસ્યાનૂરાધાઃ ।
અભ્યારોહત્પરસ્તાદભ્યારૂઢમવસ્તાત્ ॥ ૧। ૫। ૧। ૩॥

૪ ઇન્દ્રસ્ય રોહિણી । શꣳ ણત્પરસ્તાત્પ્રતિશꣳ ણદવસ્તાત્ । નિરૃત્યૈ
મૂલવર્હણી । પ્રતિભઞ્જન્તઃ પરસ્તાત્પ્રતિશꣳ ણન્તોઽવસ્તાત્ ।
અપાં પૂર્વા અષાઢાઃ । વર્ચઃ પરસ્તાથ્સમિતિરવસ્તાત્ । વિશ્વેષાં
દેવાનામુત્તરાઃ । અભિજયત્પરસ્તાદભિજિતમવસ્તાત્ । વિષ્ણોઃ
શ્રોણા પૃચ્છમાનાઃ । પરસ્તાત્પન્થા અવસ્તાત્ ॥ ૧। ૫। ૧। ૪॥

૫ વસૂનાꣳ શ્રવિષ્ઠાઃ । ભૂતં પરસ્તાદ્ભૂતિરવસ્તાત્ । ઇન્દ્રસ્ય
શતભિષક્ । વિશ્વવ્યચાઃ પરસ્તાદ્વિશ્વક્ષિતિરવસ્તાત્
। અજસ્યૈકપદઃ પૂર્વે પ્રોષ્ઠપદાઃ । વૈશ્વાનરં
પરસ્તાદ્વૈશ્વાવસવમવસ્તાત્ । અહેર્બુધ્નિયસ્યોત્તરે । અભિષિઞ્ચન્તઃ
પરસ્તાદભિષુણ્વન્તોઽવસ્તાત્ । પૂષ્ણો રેવતી । ગાવઃ પરસ્તાદ્વથ્સા
અવસ્તાત્ । અશ્વિનોરશ્વયુજૌ । ગ્રામઃ પરસ્તાથ્સેનાઽવસ્તાત્ ।
યમસ્યાપભરણીઃ । અપકર્ષન્તઃ પરસ્તાદપવહન્તોઽવસ્તાત્ ।
પૂર્ણા પશ્ચાદ્યત્તે દેવા અદધુઃ ॥ ૧। ૫। ૧। ૫॥ આર્દ્રમવસ્તાદ્વહમાના
અવસ્તાદભ્યારૂઢમવસ્તાત્પન્થા અવસ્તાદ્વથ્સા અવસ્તાત્પઞ્ચ ચ ॥ ૧॥

૬ યત્પુણ્યં નક્ષત્રમ્ । તદ્બટ્ કુર્વીતોપવ્યુષમ્ । યદા વૈ સૂર્ય ઉદેતિ ।
અથ નક્ષત્રં નૈતિ । યાવતિ તત્ર સૂર઼્યો ગચ્છેત્ । યત્ર જઘન્યં
પશ્યેત્ । તાવતિ કુર્વીત યત્કારી સ્યાત્ । પુણ્યાહ એવ કુરુતે । એવઁ હ
વૈ યજ્ઞેષું ચ શતદ્યુમ્નં ચ માત્સ્યો નિરવસાયયાઞ્ચકાર ॥ ૧। ૫। ૨। ૧॥

૭ યો વૈ નક્ષત્રિયં પ્રજાપતિં વેદ । ઉભયોરેનં લોકયોર્વિદુઃ ।
હસ્ત એવાસ્ય હસ્તઃ । ચિત્રા શિરઃ । નિષ્ટ્યા હૃદયમ્ । ઊરૂ વિશાખે ।
પ્રતિષ્ઠાઽનૂરાધાઃ । એષ વૈ નક્ષત્રિયઃ પ્રજાપતિઃ । ય એવં વેદ
। ઉભયોરેનં લોકયોર્વિદુઃ ॥ ૧। ૫। ૨। ૨॥

૮ અસ્મિરઁ શ્ચામુષ્મિઁગ્શ્ચ । યાં કામયેત દુહિતરં પ્રિયા સ્યાદિતિ । તાં
નિષ્ટ્યાયાં દદ્યાત્ । પ્રિયૈવ ભવતિ । નૈવ તુ પુનરાગચ્છતિ । અભિજિન્નામ
નક્ષત્રમ્ । ઉપરિષ્ટાદષાઢાનામ્ । અવસ્તાચ્છ્રોણાયૈ । દેવાસુરાઃ
સંયત્તા આસન્ । તે દેવાસ્તસ્મિન્નક્ષત્રેઽભ્યજયન્ ॥ ૧। ૫। ૨। ૩॥

૯ યદભ્યજયન્ । તદભિજિતોઽભિજિત્ત્વમ્ । યં કામયેતાનપજય્યં
જયેદિતિ । તમેતસ્મિન્નક્ષત્રે યાતયેત્ । અનપજય્યમેવ જયતિ
। પાપપરાજિતમિવ તુ । પ્રજાપતિઃ પશૂનસૃજત । તે નક્ષત્રં
નક્ષત્રમુપાતિષ્ઠન્ત । તે સમાવન્ત એવાભવન્ । તે રેવતીમુપાતિષ્ઠન્ત ॥
૧। ૫। ૨। ૪॥

૧૦ તે રેવત્યાં પ્રાભવન્ । તસ્માદ્રેવત્યાં પશૂનાં કુર્વીત । યત્કિં
ચાર્વાચીનઁ સોમાત્ । પ્રૈવ ભવન્તિ । સલિલં વા ઇદમન્તરાસીત્
। યદતરન્ । તત્તારકાણાં તારકત્વમ્ । યો વા ઇહ યજતે । અમુઁ સલોકં
નક્ષતે । તન્નક્ષત્રાણાં નક્ષત્રત્વમ્ ॥ ૧। ૫। ૨। ૫॥

૧૧ દેવગૃહા વૈ નક્ષત્રાણિ । ય એવં વેદ । ગૃહ્યેવ
ભવતિ । યાનિ વા ઇમાનિ પૃથિવ્યાશ્ચિત્રાણિ । તાનિ નક્ષત્રાણિ ।
તસ્માદશ્લીલનામરઁ શ્ચિત્રે । નાવસ્યેન્ન યજેત । યથા પાપાહે કુરુતે
। તાદૃગેવ તત્ । દેવનક્ષત્રાણિ વા અન્યાનિ ॥ ૧। ૫। ૨। ૬॥

૧૨ યમનક્ષત્રાણ્યન્યાનિ । કૃત્તિકાઃ પ્રથમમ્ । વિશાખે ઉત્તમમ્ ।

તાનિ દેવનક્ષત્રાણિ । અનૂરાધાઃ પ્રથમમ્ । અપભરણીરુત્તમમ્ ।
તાનિ યમનક્ષત્રાણિ । યાનિ દેવનક્ષત્રાણિ । તાનિ દક્ષિણેન પરિયન્તિ ।
યાનિ યમનક્ષત્રાણિ ॥ ૧। ૫। ૨। ૭॥

૧૩ તાન્યુત્તરેણ । અન્વેષામરાત્સ્મેતિ । તદનૂરાધાઃ ।
જ્યેષ્ઠમેષામવધિષ્મેતિ । તજ્જ્યેષ્ઠઘ્ની । મૂલમેષામવૃક્ષામેતિ ।
તન્મૂલવર્હણી । યન્નાસહન્ત । તદષાઢાઃ । યદશ્લોણત્ ॥ ૧। ૫। ૨। ૮॥

૧૪ તચ્છ્રોણા । યદશૃણોત્ । તચ્છ્રવિષ્ઠાઃ । યચ્છતમભિષજ્યન્ ।
તચ્છતભિષક્ । પ્રોષ્ઠપદેષૂદયચ્છન્ત । રેવત્યામરવન્ત ।
અશ્વયુજોરયુઞ્જત । અપભરણીષ્વપાવહન્ । તાનિ વા એતાનિ
યમનક્ષત્રાણિ । યાન્યેવ દેવનક્ષત્રાણિ । તેષુ કુર્વીત યત્કારી
સ્યાત્ । પુણ્યાહ એવ કુરુતે ॥ ૧। ૫। ૨। ૯॥ ચકારૈવં વેદોભયોરેનં
લોકયોર્વિદુરજયન્નેવતીમુપાતિષ્ઠન્ત નક્ષત્રત્વમન્યાનિ યાનિ
યમનક્ષત્રાણ્યશ્લોણદ્યમનક્ષત્રાણિ ત્રીણિ ચ ॥ ૨॥

૧૫ દેવસ્ય સવિતુઃ પ્રાતઃ પ્રસવઃ પ્રાણઃ । વરુણસ્ય સાયમાસવોઽપાનઃ
। યત્પ્રતીચીનં પ્રાતસ્તનાત્ । પ્રાચીનꣳ સંગવાત્ । તતો
દેવા અગ્નિષ્ટોમં નિરમિમત । તત્તદાત્તવીર્યં નિર્માર્ગઃ । મિત્રસ્ય
સંગવઃ । તત્પુણ્યં તેજસ્વ્યહઃ । તસ્માત્તર્હિ પશવઃ સમાયન્તિ ।
યત્પ્રતીચીનꣳ સંગવાત્ ॥ ૧। ૫। ૩। ૧॥

૧૬ પ્રાચીનં મધ્યન્દિનાત્ । તતો દેવા ઉક્થ્યં નિરમિમત । તત્તદાત્તવીર્યં
નિર્માર્ગઃ । બૃહસ્પતેર્મધ્યન્દિનઃ । તત્પુણ્યં તેજસ્વ્યહઃ । તસ્માત્તર્હિ
તેક્ષ્ણિષ્ઠં તપતિ । યત્પ્રતીચીનં મધ્યન્દિનાત્ । પ્રાચીનમપરાહ્ણાત્ ।
તતો દેવાઃ ષોડશિનં નિરમિમત । તત્તદાત્તવીર્યં નિર્માર્ગઃ ॥ ૧। ૫। ૩। ૨॥

૧૭ ભગસ્યાપરાહ્ણઃ । તત્પુણ્યં તેજસ્વ્યહઃ । તસ્માદપરાહ્ણે કુમાર્યો
ભગમિચ્છમાનાશ્ચરન્તિ । યત્પ્રતીચીનમપરાહ્ણાત્ । પ્રાચીનꣳ સાયાત્ ।
તતો દેવા અતિરાત્રં નિરમિમત । તત્તદાત્તવીર્યં નિર્માર્ગઃ । વરુણસ્ય સાયમ્
। તત્પુણ્યં તેજસ્વ્યહઃ । તસ્માત્તર્હિ નાનૃતં વદેત્ ॥ ૧। ૫। ૩। ૩॥

૧૮ બ્રાહ્મણો વા અષ્ટાવિꣳશો નક્ષત્રાણામ્ । સમાનસ્યાહ્નઃ પઞ્ચ

પુણ્યાનિ નક્ષત્રાણિ । ચત્વાર્યશ્લીલાનિ । તાનિ નવ । યચ્ચ
પરસ્તાન્નક્ષત્રાણાં યચ્ચાવસ્તાત્ । તાન્યેકાદશ । બ્રાહ્મણો દ્વાદશઃ
। ય એવં વિદ્વાન્થ્સંવથ્સરં વ્રતં ચરતિ । સંવથ્સરેણૈવાસ્ય
વ્રતં ગુપ્તં ભવતિ । સમાનસ્યાહ્નઃ પઞ્ચ પુણ્યાનિ નક્ષત્રાણિ
। ચત્વાર્યશ્લીલાનિ । તાનિ નવ । આગ્નેયી રાત્રિઃ । ઐન્દ્રમહઃ ।
તાન્યેકાદશ । આદિત્યો દ્વાદશઃ । ય એવં વિદ્વાન્થ્સંવથ્સરં વ્રતં
ચરતિ । સંવથ્સરેણૈવાસ્ય વ્રતં ગુપ્તં ભવતિ ॥ ૧। ૫। ૩। ૪॥
સંગવાત્ષોડશિનં નિરમિમત તત્તદાત્તવીર્યં નિર્માર્ગો વદેદ્ભવતિ
સમાનસ્યાહ્નઃ પઞ્ચ પુણ્યાનિ નક્ષત્રાણ્યષ્ટૌ ચ ॥ ૩॥

૧૯ બ્રહ્મવાદિનો વદન્તિ । કતિ પાત્રાણિ યજ્ઞં વહન્તીતિ । ત્રયોદશેતિ
બ્રૂયાત્ । સ યદ્બ્રૂયાત્ । કસ્તાનિ નિરમિમીતેતિ । પ્રજાપતિરિતિ
બ્રૂયાત્ । સ યદ્બ્રૂયાત્ । કુતસ્તાનિ નિરમિમીતેતિ । આત્મન ઇતિ ।
પ્રાણાપાનાભ્યામેવોપાગ્શ્વન્તર્યામૌ નિરમિમીત ॥ ૧। ૫। ૪। ૧॥

૨૦ વ્યાનાદુપાꣳશુસવનમ્ । વાચ ઐન્દ્રવાયવમ્ । દક્ષક્રતુભ્યાં
મૈત્રાવરુણમ્ । શ્રોત્રાદાશ્વિનમ્ । ચક્ષુષઃ શુક્રામન્થિનૌ । આત્મન
આગ્રયણમ્ । અઙ્ગેભ્ય ઉક્થ્યમ્ । આયુષો ધ્રુવમ્ । પ્રતિષ્ઠાયા ઋતુપાત્રે ।
યજ્ઞં વાવ તં પ્રજાપતિર્નિરમિમીત । સ નિર્મિતો નાદ્ધ્રિયત સમવ્લીયત ।
સ એતાન્પ્રજાપતિરપિવાપાનપશ્યત્ । તાન્નિરવપત્ । તૈર્વૈ સ યજ્ઞમપ્યવપત્
। યદપિવાપા ભવન્તિ । યજ્ઞસ્ય ધૃત્યા અસંવ્લયાય ॥ ૧। ૫। ૪। ૨॥
ઉપાગ્શ્વન્તર્યામૌ નિરમિમીતામિમીત ષટ્ ચ ॥ ૪॥

૨૧ ઋતમેવ પરમેષ્ઠિ । ઋતં નાત્યેતિ કિં ચન । ઋતે સમુદ્ર
આહિતઃ । ઋતે ભૂમિરિયꣳ શ્રિતા । અગ્નિસ્તિગ્મેન શોચિષા ।
તપ આક્રાન્તમુષ્ણિહા । શિરસ્તપસ્યાહિતમ્ । વૈશ્વાનરસ્ય તેજસા ।
ઋતેનાસ્ય નિવર્તયે । સત્યેન પરિવર્તયે ॥ ૧। ૫। ૫। ૧॥

૨૨ તપસાઽસ્યાનુવર્તયે । શિવેનાસ્યોપવર્તયે । શગ્મેનાસ્યાભિવર્તયે ।
તદૃતં તથ્સત્યમ્ । તદ્વ્રતં તચ્છકેયમ્ । તેન શકેયં તેન રાધ્યાસમ્ ।
યદ્ઘર્મઃ પર્યવર્તયત્ । અન્તાન્પૃથિવ્યા દિવઃ । અગ્નિરીશાન ઓજસા ।

વરુણો ધીતિભિઃ સહ ॥ ૧। ૫। ૫। ૨॥

૨૩ ઇન્દ્રો મરુદ્ભિઃ સખિભિઃ સહ । અગ્નિસ્તિગ્મેન શોચિષા । તપ
આક્રાન્તમુષ્ણિહા । શિરસ્તપસ્યાહિતમ્ । વૈશ્વાનરસ્ય તેજસા ।
ઋતેનાસ્ય નિવર્તયે । સત્યેન પરિવર્તયે । તપસાઽસ્યાનુવર્તયે ।
શિવેનાસ્યોપવર્તયે । શગ્મેનાસ્યાભિવર્તયે ॥ ૧। ૫। ૫। ૩॥

૨૪ તદૃતં તથ્સત્યમ્ । તદ્વ્રતં તચ્છકેયમ્ । તેન શકેયં તેન રાધ્યાસમ્ ।
યો અસ્યાઃ પૃથિવ્યાસ્ત્વચિ । નિવર્તયત્યોષધીઃ । અગ્નિરીશાન ઓજસા ।
વરુણો ધીતિભિઃ સહ । ઇન્દ્રો મરુદ્ભિઃ સખિભિઃ સહ । અગ્નિસ્તિગ્મેન
શોચિષા । તપ આક્રાન્તમુષ્ણિહા ॥ ૧। ૫। ૫। ૪॥

૨૫ શિરસ્તપસ્યાહિતમ્ । વૈશ્વાનરસ્ય તેજસા । ઋતેનાસ્ય નિવર્તયે
। સત્યેન પરિવર્તયે । તપસાઽસ્યાનુવર્તયે । શિવેનાસ્યોપવર્તયે ।
શગ્મેનાસ્યાભિવર્તયે । તદૃતં તથ્સત્યમ્ । તદ્વ્રતં તચ્છકેયમ્ । તેન
શકેયં તેન રાધ્યાસમ્ ॥ ૧। ૫। ૫। ૫॥

૨૬ એકં માસમુદસૃજત્ । પરમેષ્ઠી પ્રજાભ્યઃ । તેનાભ્યો મહ આવહત્
। અમૃતં મર્ત્યાભ્યઃ । પ્રજામનુ પ્રજાયસે । તદુ તે મર્ત્યામૃતમ્ । યેન
માસા અર્ધમાસાઃ । ઋતવઃ પરિવથ્સરાઃ । યેન તે તે પ્રજાપતે । ઈજાનસ્ય
ન્યવર્તયન્ ॥ ૧। ૫। ૫। ૬॥

૨૭ તેનાહમસ્ય બ્રહ્મણા । નિવર્તયામિ જીવસે । અગ્નિસ્તિગ્મેન શોચિષા
। તપ આક્રાન્તમુષ્ણિહા । શિરસ્તપસ્યાહિતમ્ । વૈશ્વાનરસ્ય તેજસા
। ઋતેનાસ્ય નિવર્તયે । સત્યેન પરિવર્તયે । તપસાઽસ્યાનુવર્તયે
। શિવેનાસ્યોપવર્તયે । શગ્મેનાસ્યાભિવર્તયે । તદૃતં તથ્સત્યમ્ ।
તદ્વ્રતં તચ્છકેયમ્ । તેન શકેયં તેન રાધ્યાસમ્ ॥ ૧। ૫। ૫। ૭॥ પરિવર્તયે
સહાભિવર્તય ઉષ્ણિહા રાધ્યાસં ન્યવર્તયન્નુપવર્તયે ચત્વારિ ચ ॥ ૫॥

૨૮ દેવા વૈ યદ્યજ્ઞેઽકુર્વત । તદસુરા અકુર્વત । તેઽસુરા ઊર્ધ્વં
પૃષ્ઠેભ્યો નાપશ્યન્ । તે કેશાનગ્રેઽવપન્ત । અથ શ્મશ્રૂણિ ।
અથોપપક્ષૌ । તતસ્તેઽવાઞ્ચ આયન્ । પરાઽભવન્ । યસ્યૈવં વપન્તિ ।
અવાઙેતિ ॥ ૧। ૫। ૬। ૧॥

૨૯ અથો પરૈવ ભવતિ । અથ દેવા ઊર્ધ્વં પૃષ્ઠેભ્યોઽપશ્યન્ । ત
ઉપપક્ષાવગ્રેઽવપન્ત । અથ શ્મશ્રૂણિ । અથ કેશાન્ । તતસ્તેઽભવન્ ।
સુવર્ગં લોકમાયન્ । યસ્યૈવં વપન્તિ । ભવત્યાત્મના । અથો સુવર્ગં
લોકમેતિ ॥ ૧। ૫। ૬। ૨॥

૩૦ અથૈતન્મનુર્વપ્ત્રે મિથુનમપશ્યત્ । સ શ્મશ્રૂણ્યગ્રેઽવપત ।
અથોપપક્ષૌ । અથ કેશાન્ । તતો વૈ સ પ્રાજાયત પ્રજયા પશુભિઃ ।
યસ્યૈવં વપન્તિ । પ્ર પ્રજયા પશુભિર્મિથુનૈર્જાયતે । દેવાસુરાઃ
સંયત્તા આસન્ । તે સંવથ્સરે વ્યાયચ્છન્ત । તાન્દેવાશ્ચાતુર્માસ્યૈરેવાભિ
પ્રાયુઞ્જત ॥ ૧। ૫। ૬। ૩॥

૩૧ વૈશ્વદેવેન ચતુરો માસોઽવૃઞ્જતેન્દ્ર રાજાનઃ । તાન્ છીરૂષન્નિ
ચાવર્તયન્ત પરિ ચ । વરુણપ્રઘાસૈશ્ચતુરો માસોઽવૃઞ્જત
વરુણરાજાનઃ । તાન્ છીરૂષન્નિ ચાવર્તયન્ત પરિ ચ । સાકમેધૈશ્ચતુરો
માસોઽવૃઞ્જત સોમરાજાનઃ । તાન્ છીરૂષન્નિ ચાવર્તયન્ત પરિ ચ ।
યા સંવથ્સર ઉપજીવાઽઽસીત્ । તામેષામવૃઞ્જત । તતો દેવા અભવન્ ।
પરાઽસુરાઃ ॥ ૧। ૫। ૬। ૪॥

૩૨ ય એવં વિદ્વાગ્શ્ચાતુર્માસ્યૈર્યજતે । ભ્રાતૃવ્યસ્યૈવ માસો વૃક્ત્વા ।
શીરૂષન્નિ ચ વર્તયતે પરિ ચ । યૈષા સંવથ્સર ઉપજીવા । વૃઙ્ક્તે
તાં ભ્રાતૃવ્યસ્ય । ક્ષુધાઽસ્ય ભ્રાતૃવ્યઃ પરાભવતિ । લોહિતાયસેન
નિવર્તયતે । યદ્વા ઇમામગ્નિરૃતાવાગતે નિવર્તયતિ । એતદેવૈનાꣳ
રૂપં કૃત્વા નિવર્તયતિ । સા તતઃ શ્વઃ શ્વો ભૂયસી ભવન્ત્યેતિ ॥ ૧। ૫। ૬। ૫॥

૩૩ પ્રજાયતે । ય એવં વિદ્વાં લ્લોહિતાયસેન નિવર્તયતે । એતદેવ રૂપં
કૃત્વા નિવર્તયતે । સ તતઃ શ્વઃ શ્વો ભૂયાન્ભવન્નેતિ । પ્રૈવ જાયતે ।
ત્રેણ્યા શલલ્યા નિવર્તયેત । ત્રીણિત્રીણિ વૈ દેવાનામૃદ્ધાનિ । ત્રીણિ
છન્દાꣳસિ । ત્રીણિ સવનાનિ । ત્રય ઇમે લોકાઃ ॥ ૧। ૫। ૬। ૬॥

૩૪ ઋદ્ધ્યામેવ તદ્વીર્ય એષુ લોકેષુ પ્રતિતિષ્ઠતિ ।
યચ્ચાતુર્માસ્યયાજ્યાત્મનો નાવદ્યેત્ । દેવેભ્ય આવૃશ્ચ્યેત ।

ચતૃષુ ચતૃષુ માસેષુ નિવર્તયેત । પરોક્ષમેવ તદ્દેવેભ્ય
આત્મનોઽવદ્યત્યનાવ્રસ્કાય । દેવાનાં વા એષ આનીતઃ । યશ્ચાતુર્માસ્યયાજી
। ય એવં વિદ્વાન્નિ ચ વર્તયતે પરિ ચ । દેવતા એવાપ્યેતિ । નાસ્ય
રુદ્રઃ પ્રજાં પશૂનભિ મન્યતે ॥ ૧। ૫। ૬। ૭॥ એત્યેત્યયુઞ્જતાસુરા
એતિ લોકા મન્યતે ॥ ૬॥

૩૫ (મેરએલ્લગીએહેળબેકુ) આયુષઃ પ્રાણꣳ સંતનુ । પ્રાણાદપાનꣳ
સંતનુ । અપાનાદ્વ્યાનꣳ સંતનુ । વ્યાનાચ્ચક્ષુઃ સંતનુ । ચક્ષુષઃ
શ્રોત્રꣳ સંતનુ । શ્રોત્રાન્મનઃ સંતનુ । મનસો વાચꣳ સંતનુ ।
વાચ આત્માનꣳ સંતનુ । આત્મનઃ પૃથિવીꣳ સંતનુ । પૃથિવ્યા
અન્તરિક્ષꣳ સંતનુ । અન્તરિક્ષાદ્દિવꣳ સંતનુ । દિવઃ સુવઃ
સંતનુ ॥ ૧। ૫। ૭। ૧॥ અન્તરિક્ષꣳ સંતનુ દ્વે ચ ॥ ૭॥

(ઇલ્લિયવરેરએગીએમેરએલ્લગીએહેળબેકુ)

૩૬ ઇન્દ્રો દધીચો અસ્થભિઃ । વૃત્રાણ્યપ્રતિષ્કુતઃ । જઘાન નવતીર્નવ ।
ઇચ્છન્નશ્વસ્ય યચ્છિરઃ । પર્વતેષ્વપશ્રિતમ્ । તદ્વિદચ્છર્યણાવતિ
। અત્રાહ ગોરમન્વત । નામ ત્વષ્ટુરપીચ્યમ્ । ઇત્થા ચન્દ્રમસો ગૃહે ।
ઇન્દ્રમિદ્ગાથિનો બૃહત્ ॥ ૧। ૫। ૮। ૧॥

૩૭ ઇન્દ્રમર્કેભિરર્કિણઃ । ઇન્દ્રં વાણીરનૂષત । ઇન્દ્ર ઇદ્ધર્યોઃ સચા
। સંમિશ્લ આવચો યુજા । ઇન્દ્રો વજ્રી હિરણ્યયઃ । ઇન્દ્રો દીર્ઘાય
ચક્ષસે । આ સૂર્યꣳરોહયદ્દિવિ । વિ ગોભિરદ્રિમૈરયત્ । ઇન્દ્ર વાજેષુ નો
અવ । સહસ્રપ્રધનેષુ ચ ॥ ૧। ૫। ૮। ૨॥

૩૮ ઉગ્ર ઉગ્રાભિરૂતિભિઃ । તમિન્દ્રં વાજયામસિ । મહે વૃત્રાય હન્તવે ।
સ વૃષા વૃષભો ભુવત્ । ઇન્દ્રઃ સ દામને કૃતઃ । ઓજિષ્ઠઃ સ બલે
હિતઃ । દ્યુમ્ની શ્લોકી સ સૌમ્યઃ । ગિરા વજ્રો ન સંભૃતઃ । સબલો
અનપચ્યુતઃ । વવક્ષુરુગ્રો અસ્તૃતઃ ॥ ૧। ૫। ૮। ૩॥ બૃહચ્ચાસ્તૃતઃ ॥ ૮॥

૩૯ દેવાસુરાઃ સંયત્તા આસન્ । સ પ્રજાપતિરિન્દ્રં જ્યેષ્ઠં પુત્રમપ
ન્યધત્ત । નેદેનમસુરા બલીયાꣳસોઽહનન્નિતિ । પ્રહ્રાદો હ
વૈ કાયાધવઃ । વિરોચનꣳ સ્વં પુત્રમપ ન્યધત્ત । નેદેનં દેવા

અહનન્નિતિ । તે દેવાઃ પ્રજાપતિમુપસમેત્યોચુઃ । નારાજકસ્ય યુદ્ધમસ્તિ
। ઇન્દ્રમન્વિચ્છામેતિ । તં યજ્ઞક્રતુભિરન્વૈચ્છન્ ॥ ૧। ૫। ૯। ૧॥

૪૦ તં યજ્ઞક્રતુભિર્નાન્વવિન્દન્ । તમિષ્ટિભિરન્વૈચ્છન્ ।
તમિષ્ટિભિરન્વવિન્દન્ । તદિષ્ટીનામિષ્ટિત્વમ્ । એષ્ટયો હ વૈ નામ । તા
ઇષ્ટય ઇત્યાચક્ષતે પરોક્ષેણ । પરોક્ષપ્રિયા ઇવ હિ દેવાઃ । તસ્મા
એતમાગ્નાવૈષ્ણવમેકાદશકપાલં દીક્ષણીયં નિરવપન્ । તદપદ્રુત્યાતન્વત
। તાન્પત્નીસંયાજાન્ત ઉપાનયન્ ॥ ૧। ૫। ૯। ૨॥

૪૧ તે તદન્તમેવ કૃત્વોદદ્રવન્ । તે પ્રાયણીયમભિ સમારોહન્
। તદપદ્રુત્યાતન્વત । તાઞ્છંય્વન્ત ઉપાનયન્ । તે તદન્તમેવ
કૃત્વોદદ્રવન્ । ત આતિથ્યમભિ સમારોહન્ । તદપદ્રુત્યાતન્વત ।
તાનિડાન્ત ઉપાનયન્ । તે તદન્તમેવ કૃત્વોદદ્રવન્ । તસ્માદેતા એતદન્તા
ઇષ્ટયઃ સંતિષ્ઠન્તે ॥ ૧। ૫। ૯। ૩॥

૪૨ એવꣳ હિ દેવા અકુર્વત । ઇતિ દેવા અકુર્વત । ઇત્યુ વૈ મનુષ્યાઃ
કુર્વતે । તે દેવા ઊચુઃ । યદ્વા ઇદમુચ્ચૈર્યજ્ઞેન ચરામ । તન્નોઽસુરાઃ
પાપ્માઽનુવિન્દન્તિ । ઉપાꣳશૂપસદા ચરામ । તથા નોઽસુરાઃ
પાપ્મા નાનુવેથ્સ્યન્તીતિ । ત ઉપાꣳશૂપસદમતન્વત । તિસ્ર એવ
સામિધેનીરનૂચ્ય ॥ ૧। ૫। ૯। ૪॥

૪૩ સ્રુવેણાઘારમાઘાર્ય । તિસ્રઃ પરાચીરાહુતીર્હુત્વા । સ્રુવેણોપસદં
જુહવાઞ્ચક્રુઃ । ઉગ્રં વચો અપાવધીં ત્વેષં વચો અપાવધીગ્ સ્વાહેતિ ।
અશનયાપિપાસે હ વા ઉગ્રં વચઃ । એનશ્ચ વૈરહત્યં ચ ત્વેષં
વચઃ । એતꣳ હ વાવ તચ્ચતુર્ધા વિહિતં પાપ્માનં દેવા અપજઘ્નિરે
। તથો એવૈતદેવં વિદ્યજમાનઃ । તિસ્ર એવ સામિધેનીરનૂચ્ય ।
સ્રુવેણાઘારમાઘાર્ય ॥ ૧। ૫। ૯। ૫॥

૪૪ તિસ્રઃ પરાચીરાહુતીર્હુત્વા । સ્રુવેણોપસદં જુહોતિ । ઉગ્રં વચો
અપાવધીં ત્વેષં વચો અપાવધીગ્ સ્વાહેતિ । અશનયાપિપાસે હ
વા ઉગ્રં વચઃ । એનશ્ચ વૈરહત્યં ચ ત્વેષં વચઃ । એતમેવ
તચ્ચતુર્ધા વિહિતં પાપ્માનં યજમાનોઽપહતે । તેઽભિનીયૈવાહઃ

પશુમાઽલભન્ત । અહ્ન એવ તદ્દેવા અવર્તિં પાપ્માનં મૃત્યુમપજઘ્નિરે ।
તેનાભિનીયેવ રાત્રેઃ પ્રાચરન્ । રાત્રિયા એવ તદ્દેવા અવર્તિં પાપ્માનં
મૃત્યુમપજઘ્નિરે ॥ ૧। ૫। ૯। ૬॥

૪૫ તસ્માદભિનીયૈવાહ્નઃ પશુમાલભેત । અહ્ન એવ તદ્યજમાનોઽવર્તિં
પાપ્માનં ભ્રાતૃવ્યાનપનુદતે । તેનાભિનીયેવ રાત્રેઃ પ્રચરેત્ ।
રાત્રિયા એવ તદ્યજમાનોઽવર્તિં પાપ્માનં ભ્રાતૃવ્યાનપનુદતે ।
સ એષ ઉપવસથીયેઽહન્દ્વિદેવત્યઃ પશુરાલભ્યતે । દ્વયં વા
અસ્મિં લ્લોકે યજમાનઃ । અસ્થિ ચ મા ઁ સં ચ । અસ્થિ ચૈવ તેન
મા ઁ સં ચ યજમાનઃ સર ઁ સ્કુરુતે । તા વા એતાઃ પઞ્ચ દેવતાઃ ।
અગ્નીષોમાવગ્નિર્મિત્રાવરુણૌ ॥ ૧। ૫। ૯। ૭॥

૪૬ પઞ્ચપઞ્ચી વૈ યજમાનઃ । ત્વઙ્મા ઁ સ ઁ સ્નાવાઽસ્થિ
મજ્જા । એતમેવ તત્પઞ્ચધા વિહિતમાત્માનં વરુણપાશાન્મુઞ્ચતિ
। ભેષજતાયૈ નિર્વરુણત્વાય । ત ઁ સમભિશ્છન્દોભિઃ
પ્રાતરહ્વયન્ । તસ્માત્સપ્ત ચતુરુત્તરાણિ છન્દા ઁ સિ
પ્રાતરનુવાકેઽનૂચ્યન્તે । તમેતયોપસમેત્યોપાસીદન્ । ઉપાસ્મૈ ગાયતા
નર ઇતિ । તસ્માદેતયા બહિષ્પવમાન ઉપસદ્યઃ ॥ ૧। ૫। ૯। ૮॥

ઐચ્છન્નનયગ્ગ્સ્તિષ્ઠન્તેઽનૂચ્યાનૂચ્ય સ્રુવેણાઘારમાઘાર્ય
રાત્રિયા એવ તદ્દેવા અવર્તિં પાપ્માનં મૃત્યુમપજઘ્નિરે મિત્રાવરુણૌ
નવ ચ ॥ ૯॥ દેવા યજમાનો દેવા દેવા યજમાનો યજમાનોઽલભન્ત
પ્રાચરંલ્લભેત પ્રચરેતાલભન્તાલભેત મૃત્યુમપજઘ્નિરે
ભ્રાતૃવ્યાન્ ॥

૪૭ સ સમુદ્ર ઉત્તરતઃ પ્રાજ્વલદ્ભૂમ્યન્તેન । એષ વાવ સ સમુદ્રઃ ।
યચ્ચાત્વાલઃ । એષ ઉ વેવ સ ભૂમ્યન્તઃ । યદ્વેદ્યન્તઃ । તદેતત્ત્રિશલં
ત્રિપૂરુષમ્ । તસ્માત્તં ત્રિવિતસ્તં ખનન્તિ । સ સુવર્ણરજતાભ્યાં
કુશીભ્યાં પરિગૃહીત આસીત્ । તં યદસ્યા અધ્યજનયન્ । તસ્માદાદિત્યઃ ॥ ૧। ૫। ૧૦। ૧॥

૪૮ અથ યત્સુવર્ણરજતાભ્યાં કુશીભ્યાં પરિગૃહીત આસીત્ । સાઽસ્ય
કૌશિકતા । તં ત્રિવૃતાઽભિ પ્રાસ્તુવત । તં ત્રિવૃતાઽઽદદત ।

તં ત્રિવૃતાઽઽહરન્ । યાવતી ત્રિવૃતો માત્રા । તં પઞ્ચદશેનાભિ
પ્રાસ્તુવત । તં પઞ્ચદશેનાદદત । તં પઞ્ચદશેનાહરન્ । યાવતી
પઞ્ચદશસ્ય માત્રા ॥ ૧। ૫। ૧૦। ૨॥

૪૯ તꣳ સપ્તદશેનાભિ પ્રાસ્તુવત । તꣳ સપ્તદશેનાદદત
। તꣳ સપ્તદશેનાહરન્ । યાવતી સપ્તદશસ્ય માત્રા । તસ્ય
સપ્તદશેન હ્રિયમાણસ્ય તેજો હરોઽપતત્ । તમેકવિꣳશેનાભિ
પ્રાસ્તુવત । તમેકવિꣳશેનાદદત । તમેકવિꣳશેનાહરન્ ।
યાવત્યેકવિꣳશસ્ય માત્રા । તે યત્ત્રિવૃતા સ્તુવતે ॥ ૧। ૫। ૧૦। ૩॥

૫૦ ત્રિવૃતૈવ તદ્યજમાનમાદદતે । તં ત્રિવૃતૈવ હરન્તિ । યાવતી
ત્રિવૃતો માત્રા । અગ્નિર્વૈ ત્રિવૃત્ । યાવદ્વા અગ્નેર્દહતો ધૂમ ઉદેત્યાનુ
વ્યેતિ । તાવતી ત્રિવૃતો માત્રા । અગ્નેરેવૈનં તત્ । માત્રાꣳ સાયુજ્યꣳ
સલોકતાં ગમયન્તિ । અથ યત્પઞ્ચદશેન સ્તુવતે । પઞ્ચદશેનૈવ
તદ્યજમાનમાદદતે ॥ ૧। ૫। ૧૦। ૪॥

૫૧ તં પઞ્ચદશેનૈવ હરન્તિ । યાવતી પઞ્ચદશસ્ય માત્રા ।
ચન્દ્રમા વૈ પઞ્ચદશઃ । એષ હિ પઞ્ચદશ્યામપક્ષીયતે ।
પઞ્ચદશ્યામાપૂર્યતે । ચન્દ્રમસ એવૈનં તત્ । માત્રાꣳ
સાયુજ્યꣳ સલોકતાં ગમયન્તિ । અથ યત્સપ્તદશેન સ્તુવતે ।
સપ્તદશેનૈવ તદ્યજમાનમાદદતે । તꣳ સપ્તદશેનૈવ હરન્તિ ॥
૧। ૫। ૧૦। ૫॥

૫૨ યાવતી સપ્તદશસ્ય માત્રા । પ્રજાપતિર્વૈ સપ્તદશઃ ।
પ્રજાપતેરેવૈનં તત્ । માત્રાꣳ સાયુજ્યꣳ સલોકતાં ગમયન્તિ । અથ
યદેકવિꣳશેન સ્તુવતે । એકવિꣳશેનૈવ તદ્યજમાનમાદદતે
। તમેકવિꣳશેનૈવ હરન્તિ । યાવત્યેકવિꣳશસ્ય માત્રા । અસૌ
વા આદિત્ય એકવિꣳશઃ । આદિત્યસ્યૈવૈનં તત્ ॥ ૧। ૫। ૧૦। ૬॥

૫૩ માત્રાꣳ સાયુજ્યꣳ સલોકતાં ગમયન્તિ । તે કુશ્યૌ । વ્યઘ્નન્ ।
તે અહોરાત્રે અભવતામ્ । અહરેવ સુવર્ણાઽભવત્ । રજતા રાત્રિઃ ।
સ યદાદિત્ય ઉદેતિ । એતામેવ તત્સુવર્ણાં કુશીમનુ સમેતિ । અથ

યદસ્તમેતિ । એતામેવ તદ્વ્રજતાં કુશીમનુ સંવિશતિ । પ્રહ્રાદો હ
વૈ કાયાધવઃ । વિરોચનગ્ગ્ં સ્વં પુત્રમુદાસ્યત્ । સ પ્રદરોઽભવત્ ।
તસ્માત્પ્રદરાદુદકં નાચામેત્ ॥ ૧। ૫। ૧૦। ૭॥ આદિત્યઃ પઞ્ચદશસ્ય
માત્રા સ્તુવતે પઞ્ચદશેનૈવ તદ્યજમાનમાદદતે સપ્તદશેનૈવ
હરન્ત્યાદિત્યસ્યૈવૈનં તદ્વિશતિ ચત્વારિ ચ ॥ ૧૦॥

પ૪ યે વૈ ચત્વારઃ સ્તોમાઃ । કૃતં તત્ । અથ યે પઞ્ચ । કલિઃ સઃ ।
તસ્માચ્ચતુષ્ટોમઃ । તચ્ચતુષ્ટોમસ્ય ચતુષ્ટોમત્વમ્ । તદાહુઃ । કતમાનિ
તાનિ જ્યોતીꣳષિ । ય એતસ્ય સ્તોમા ઇતિ । ત્રિવૃત્પઞ્ચદશઃ સપ્તદશ
એકવિꣳશઃ ॥ ૧। ૫। ૧૧। ૧॥

પપ એતાનિ વાવ તાનિ જ્યોતીꣳષિ । ય એતસ્ય સ્તોમાઃ । સોઽબ્રવીત્ ।
સપ્તદશેન હ્રિયમાણો વ્યલેશિષિ । ભિષજ્યતમેતિ । તમશ્વિનૌ
ધાનાભિરભિષજ્યતામ્ । પૂષા કરમ્ભેણ । ભારતી પરિવાપેણ ।
મિત્રાવરુણૌ પયસ્યયા । તદાહુઃ ॥ ૧। ૫। ૧૧। ૨॥

પ૬ યદશ્વિભ્યાં ધાનાઃ । પૂષ્ણઃ કરમ્ભઃ । ભારત્યૈ
પરિવાપઃ । મિત્રાવરુણયોઃ પયસ્યાઽથ । કસ્માદેતેષાꣳ
હવિષામિન્દ્રમેવ યજન્તીતિ । એતા હ્યેનં દેવતા ઇતિ બ્રૂયાત્ ।
એતૈર્હવિર્ભિરભિષજ્યગ્ગ્સ્તસ્માદિતિ । તં વસવોઽષ્ટાકપાલેન
પ્રાતઃસવનેઽભિષજ્યન્ । રુદ્રા એકાદશકપાલેન માધ્યન્દિને સવને । વિશ્વે
દેવા દ્વાદશકપાલેન તૃતીયસવને ॥ ૧। ૫। ૧૧। ૩॥

પ૭ સ યદષ્ટાકપાલાન્પ્રાતઃસવને કુર્યાત્ । એકાદશ કપાલાન્માધ્યન્દિને
સવને । દ્વાદશકપાલાગ્સ્તૃતીયસવને । વિલોમ તદ્યજ્ઞસ્ય ક્રિયેત ।
એકાદશકપાલાનેવ પ્રાતઃસવને કુર્યાત્ । એકાદશકપાલાન્માધ્યન્દિને સવને ।
એકાદશકપાલાગ્સ્તૃતીયસવને । યજ્ઞસ્ય સલોમત્વાય । તદાહુઃ । યદ્વસૂનાં
પ્રાતઃસવનમ્ । રુદ્રાણાં માધ્યન્દિનꣳ સવનમ્ । વિશ્વેષાં દેવાનાં
તૃતીયસવનમ્ । અથ કસ્માદેતેષાꣳહવિષામિન્દ્રમેવ યજન્તીતિ ।
એતા હ્યેનં દેવતા ઇતિ બ્રૂયાત્ । એતૈર્હવિર્ભિરભિષજ્યગ્ગ્સ્તસ્માદિતિ
॥ ૧। ૫। ૧૧। ૪॥ એકવિꣳશ આહુસ્તૃતીયસવને પ્રાતઃ સવનં પઞ્ચ

ચ ॥ ૧૧॥

૫૮ તસ્યા વાચોઽવપાદાદબિભયુઃ । તમેતેષુ સપ્તસુ છન્દઃસ્વશ્રયન્
। યદશ્રયન્ । તચ્છ્રાયન્તીયસ્ય શ્રાયન્તીયત્વમ્ । યદવારયન્ ।
તદ્વારવન્તીયસ્ય વારવન્તીયત્વમ્ । તસ્યા વાચ એવાવપાદાદબિભયુઃ ।
તસ્મા એતાનિ સપ્ત ચતુરુત્તરાણિ છન્દાગ્સ્યુપાદધુઃ । તેષામતિ
ત્રીણ્યરિચ્યન્ત । ન ત્રીણ્યુદભવન્ ॥ ૧। ૫। ૧૨। ૧॥

૫૯ સ બૃહતીમેવાસ્પૃશત્ । દ્વાભ્યામક્ષરાભ્યામ્ । અહોરાત્રાભ્યામેવ
। તદાહુઃ । કતમા સા દેવાક્ષરા બૃહતી । યસ્યાં તત્પ્રત્યતિષ્ઠત્ ।
દ્વાદશ પૌર્ણમાસ્યઃ । દ્વાદશાષ્ટકાઃ । દ્વાદશામાવાસ્યાઃ । એષા વાવ સા
દેવાક્ષરા બૃહતી ॥ ૧। ૫। ૧૨। ૨॥

૬૦ યસ્યાં તત્પ્રત્યતિષ્ઠદિતિ । યાનિ ચ છન્દાગ્સ્યત્યરિચ્યન્ત । યાનિ
ચ નોદભવન્ । તાનિ નિર્વીર્યાણિ હીનાન્યમન્યન્ત । સાઽબ્રવીદ્બૃહતી । મામેવ
ભૂત્વા । મામુપ સરँશ્રયતેતિ । ચતુર્ભિરક્ષરૈરનુષ્ટુગ્બૃહતીં
નોદભવત્ । ચતુર્ભિરક્ષરૈઃ પઙ્ક્તિર્બૃહતીમત્યરિચ્યત ।
તસ્યામેતાનિ ચત્વાર્યક્ષરાણ્યપચ્છિદ્યાદધાત્ ॥ ૧। ૫। ૧૨। ૩॥

૬૧ તે બૃહતી એવ ભૂત્વા । બૃહતીમુપ સમશ્રયતામ્
। અષ્ટાભિરક્ષરૈરુષ્ણિગ્બૃહતીં નોદભવત્
। અષ્ટાભિરક્ષરૈસ્ત્રિષ્ટુગ્ બૃહતીમત્યરિચ્યત ।
તસ્યામેતાન્યષ્ટાવક્ષરાણ્યપચ્છિદ્યાદધાત્ । તે બૃહતી એવ ભૂત્વા ।
બૃહતીમુપ સમશ્રયતામ્ । દ્વાદશભિરક્ષરૈર્ગાયત્રી બૃહતીં
નોદભવત્ । દ્વાદશભિરક્ષરૈર્જગતી બૃહતીમત્યરિચ્યત ।
તસ્યામેતાનિ દ્વાદશાક્ષરાણ્યપચ્છિદ્યાદધાત્ ॥ ૧। ૫। ૧૨। ૪॥

૬૨ તે બૃહતી એવ ભૂત્વા । બૃહતીમુપ સમશ્રયતામ્
। સોઽબ્રવીત્પ્રજાપતિઃ । છન્દાँસિ રથો મે ભવત ।
યુષ્માભિરહમેતમધ્વાનમનુ સંચરાણીતિ । તસ્ય ગાયત્રી
ચ જગતી ચ પક્ષાવભવતામ્ । ઉષ્ણિક્ચ ત્રિષ્ટુપ્ચ પ્રષ્ટ્યૌ
। અનુષ્ટુપ્ચ પઙ્ક્તિશ્ચ ધુર્યૌ । બૃહત્યેવોદ્ધિરભવત્ । સ

એતં છન્દોરથમાસ્થાય । એતમધ્વાનમનુ સમચરત્ । એત ँ
હ વૈ છન્દોરથમાસ્થાય । એતમધ્વાનમનુ સંચરતિ । યેનૈષ
એતથ્સંચરતિ । ય એવં વિદ્વાન્થ્સોમેન યજતે । ય ઉ ચૈનમેવં
વેદ ॥ ૧। ૫। ૧૨। ૫॥ અભવન્વાવ સા દેવાક્ષરા બૃહત્યદધાદ્
દ્વાદશાક્ષરાણ્યપ ચ્છિદ્યાદધાદા સ્થાય ષટ્ચ ॥ ૧૨॥

અગ્નેઃ કૃત્તિકા યત્પુણ્યં દેવસ્ય સવિતુર્બ્રહ્મવાદિનઃ કત્યૃતમેવ
દેવા વા આયુષઃ પ્રાણમિન્દ્રો દધીચો દેવાસુરાઃ સ પ્રજાપતિઃ સ સમુદ્રો
યે વૈ ચત્વારસ્તસ્યાવાચો દ્વાદશ ॥ ૧૨॥

અગ્નેઃ કૃત્તિકા દેવગૃહા ઋતમેવ વૈશ્વદેવેન તે તદન્તં તં
પઞ્ચદશેન તે બૃહતી એવ દ્વિષષ્ટિઃ ॥ ૬૨॥

અગ્નેઃ કૃત્તિકા ય ઉચૈનમેવં વેદ ॥

## પ્રથમાષ્ટકે ષષ્ઠઃ પ્રપાઠકઃ ૬

૧ અનુમત્યૈ પુરોડાશમષ્ટાકપાલં નિર્વપતિ । યે પ્રત્યઞ્ચઃ શમ્યાયા
અવશીયન્તે । તન્નૈરૃતમેકકપાલમ્ । ઇયં વા અનુમતિઃ । ઇયં નિરૃતિઃ
। નૈરૃતેન પૂર્વેણ પ્રચરતિ । પાપ્માનમેવ નિરૃતિં પૂર્વાં
નિરવદયતે । એકકપાલો ભવતિ । એકધૈવ નિરૃતિં નિરવદયતે ।
યદહુત્વા ગાર્હપત્ય ઈયુઃ ॥ ૧। ૬। ૧। ૧॥

૨ રુદ્રો ભૂત્વાઽગ્નિરનૂત્થાય । અધ્વર્યું ચ યજમાનં ચ હન્યાત્
। વીહિ સ્વાહાઽઽહુતિં જુષાણ ઇત્યાહ । આહુત્યૈવૈન ँશમયતિ ।
નાર્તિમાર્ચ્છત્યધ્વર્યુર્ન યજમાનઃ । એકોલ્મુકેન યન્તિ । તદ્ધિ નિરૃત્યૈ
ભાગધેયમ્ । ઇમાં દિશં યન્તિ । એષા વૈ નિરૃત્યૈ દિક્ । સ્વાયામેવ
દિશિ નિરૃતિં નિરવદયતે ॥ ૧। ૬। ૧। ૨॥

૩ સ્વકૃત ઇરિણે જુહોતિ પ્રદરે વા । એતદ્વૈ નિરૃત્યા આયતનમ્ । સ્વ
એવાયતને નિરૃતિં નિરવદયતે । એષ તે નિરૃતે ભાગ ઇત્યાહ ।
નિર્દિશત્યેવૈનામ્ । ભૂતે હવિષ્મત્યસીત્યાહ । ભૂતિમેવોપાવર્તતે ।

મુઞ્ચેમમ ँ હસ ઇત્યાહ । અ ँ હસ એવૈનં મુઞ્ચતિ । અઙ્ગુષ્ઠાભ્યાં
જુહોતિ ॥ ૧। ૬। ૧। ૩॥

૪ અન્તત એવ નિરૃતિં નિરવદયતે । કૃષ્ણં વાસઃ કૃષ્ણતૂષં
દક્ષિણા । એતદ્વૈ નિરૃત્યૈ રૂપમ્ । રૂપેણૈવ નિરૃતિં નિરવદયતે ।
અપ્રતીક્ષમાયન્તિ । નિરૃત્યા અન્તર્હિત્યૈ । સ્વાહા નમો ય ઇદં ચકારેતિ
પુનરેત્ય ગાર્હપત્યે જુહોતિ । આહુત્યૈવ નમસ્યન્તો ગાર્હપત્યમુપાવર્તન્તે
। આનુમતેન પ્રચરતિ । ઇયં વા અનુમતિઃ ॥ ૧। ૬। ૧। ૪॥

૫ ઇયમેવાસ્મૈ રાજ્યમનુ મન્યતે । ધેનુર્દક્ષિણા । ઇમામેવ ધેનું કુરુતે ।
આદિત્યં ચરું નિર્વપતિ । ઉભયીષ્વેવ પ્રજાસ્વભિષિચ્યતે । દૈવીષુ
ચ માનુષીષુ ચ । વરો દક્ષિણા । વરો હિ રાજ્ય ँ સમૃદ્ધ્યૈ ।
આગ્નાવૈષ્ણવમેકાદશકપાલં નિર્વપતિ । અગ્નિઃ સર્વા દેવતાઃ ॥ ૧। ૬। ૧। ૫॥

૬ વિષ્ણુર્યજ્ઞઃ । દેવતાશ્ચૈવ યજ્ઞં ચાવરુન્ધે । વામનો વહી
દક્ષિણા । યદ્વહી । તેનાગ્નેયઃ । યદ્વામનઃ । તેન વૈષ્ણવઃ સમૃદ્ધ્યૈ
। અગ્નીષોમીયમેકાદશકપાલં નિર્વપતિ । અગ્નીષોમાભ્યાં વા ઇન્દ્રો
વૃત્રમહન્નિતિ । યદગ્નીષોમીયમેકાદશકપાલં નિર્વપતિ ॥ ૧। ૬। ૧। ૬॥

૭ વાર્ત્રઘ્નમેવ વિજિત્યૈ । હિરણ્યં દક્ષિણા સમૃદ્ધ્યૈ । ઇન્દ્રો
વૃત્ર ँ હત્વા । દેવતાભિશ્ચેન્દ્રિયેણ ચ વ્યાર્ધ્યત ।
સ એતમૈન્દ્રાગ્નમેકાદશકપાલમપશ્યત્ । તન્નિરવપત્ । તેન વૈ સ
દેવતાશ્ચેન્દ્રિયં ચાવારુન્ધ । યદૈન્દ્રાગ્નમેકાદશકપાલં નિર્વપતિ ।
દેવતાશ્ચૈવ તેનેન્દ્રિયં ચ યજમાનોઽવરુન્ધે । ઋષભો વહી
દક્ષિણા ॥ ૧। ૬। ૧। ૭॥

૮ યદ્વહી । તેનાગ્નેયઃ । યદૃષભઃ । તેનૈન્દ્રઃ સમૃદ્ધ્યૈ ।
આગ્નેયમષ્ટાકપાલં નિર્વપતિ । ઐન્દ્રં દધિ । યદાગ્નેયો ભવતિ ।
અગ્નિર્વૈ યજ્ઞમુખમ્ । યજ્ઞમુખમેવર્દ્ધિં પુરસ્તાદ્ધત્તે । યદૈન્દ્રં
દધિ ॥ ૧। ૬। ૧। ૮॥

૯ ઇન્દ્રિયમેવાવરુન્ધે । ઋષભો વહી દક્ષિણા । યદ્વહી ।
તેનાગ્નેયઃ । યદૃષભઃ । તેનૈન્દ્રઃ સમૃદ્ધ્યૈ । યાવતીર્વૈ પ્રજા

ઓષધીનામહુતાનામાશ્નન્ । તાઃ પરાઽભવન્ । આગ્રયણં ભવતિ
હુતાદ્યાય । યજમાનસ્યાપરાભાવાય ॥ ૧। ૬। ૧। ૯॥

૧૦ દેવા વા ઓષધીષ્વાજિમયુઃ । તા ઇન્દ્રાગ્ની ઉદજયતામ્ । તાવેતમૈન્દ્રાગ્નં
દ્વાદશકપાલં નિરવૃણાતામ્ । યદૈન્દ્રાગ્નો ભવત્યુજ્જિત્યૈ । દ્વાદશકપાલો
ભવતિ । દ્વાદશ માસાઃ સંવથ્સરઃ । સંવથ્સરેણૈવાસ્મા અન્નમવરુન્ધે
। વૈશ્વદેવશ્ચરુર્ભવતિ । વૈશ્વદેવં વા અન્નમ્ । અન્નમેવાસ્મૈ
સ્વદયતિ ॥ ૧। ૬। ૧। ૧૦॥

૧૧ પ્રથમજો વથ્સો દક્ષિણા સમૃદ્ધ્યૈ । સૌમ્યꣳ શ્યામાકં ચરું
નિર્વપતિ । સોમો વા અકૃષ્ટપચ્યસ્ય રાજા । અકૃષ્ટપચ્યમેવાસ્મૈ
સ્વદયતિ । વાસો દક્ષિણા । સૌમ્યꣳ હિ દેવતયા વાસઃ સમૃદ્ધ્યૈ ।
સરસ્વત્યૈ ચરું નિર્વપતિ । સરસ્વતે ચરુમ્ । મિથુનમેવાવરુન્ધે ।
મિથુનૌ ગાવૌ દક્ષિણા સમૃદ્ધ્યૈ । એતિ વા એષ યજ્ઞમુખાદૃદ્ધ્યાઃ ।
યોઽગ્નેર્દેવતાયા એતિ । અષ્ટાવેતાનિ હવીꣳષિ ભવન્તિ । અષ્ટાક્ષરા
ગાયત્રી । ગાયત્રોઽગ્નિઃ । તેનૈવ યજ્ઞમુખાદૃદ્ધ્યા અગ્નેર્દેવતાયૈ
નૈતિ ॥ ૧। ૬। ૧। ૧૧॥ ઈયુર્નિરવદયતેઽઙ્ગુષ્ઠાભ્યાં જુહોત્યનુમતિર્દેવતા
નિર્વપતિ વહી દક્ષિણા યદૈન્દ્રં દધ્યપરાભાવાય સ્વદયતિ ગાવૌ
દક્ષિણા સમૃદ્ધ્યૈ ષટ્ચ ॥ ૧॥

૧૨ વૈશ્વદેવેન વૈ પ્રજાપતિઃ પ્રજા અસૃજત । તાઃ સૃષ્ટા ન પ્રાજાયન્ત ।
સોઽગ્નિરકામયત । અહમિમાઃ પ્રજનયેયમિતિ । સ પ્રજાપતયે શુચમદધાત્
। સોઽશોચત્પ્રજામિચ્છમાનઃ । તસ્માદ્યં ચ પ્રજા ભુનક્તિ યં ચ ન ।
તાવુભૌ શોચતઃ પ્રજામિચ્છમાનૌ । તાસ્વગ્નિમપ્યસૃજત્ । તા અગ્નિરધ્યૈત્
॥ ૧। ૬। ૨। ૧૨॥

૧૩ સોમો રેતોઽદધાત્ । સવિતા પ્રાજનયત્ । સરસ્વતી વાચમદધાત્ ।
પૂષાઽપોષયત્ । તે વા એતે ત્રિઃ સંવથ્સરસ્ય પ્રયુજ્યન્તે । યે દેવાઃ
પુષ્ટિપતયઃ । સંવથ્સરો વૈ પ્રજાપતિઃ । સંવથ્સરેણૈવાસ્મૈ પ્રજાઃ
પ્રાજનયત્ । તાઃ પ્રજા જાતા મરુતોઽઘ્નન્ । અસ્માનપિ ન પ્રાયુક્ષતેતિ ॥
૧। ૬। ૨। ૧૩॥

૧૪ સ એતં પ્રજાપતિર્માર્ુત ँ સપ્તકપાલમપશ્યત્ । તં નિરવપત્ । તતો
વૈ પ્રજાભ્યોઽકલ્પત । યન્માર્ુતો નિર્ુપ્યતે । યજ્ઞસ્ય ક્લૃપ્ત્યૈ
। પ્રજાનામઘાતાય । સપ્તકપાલો ભવતિ । સપ્ત ગણા વૈ મર્ુતઃ ।
ગણશ એવાસ્મૈ વિશં કલ્પયતિ । સ પ્રજાપતિરશોચત્ ॥ ૧। ૬। ૨। ૧૪॥
૧૫ યાઃ પૂર્વાઃ પ્રજા અસૃક્ષિ । મર્ુતસ્તા અવધિષુઃ । કથમપરાઃ સૃજેયેતિ
। તસ્ય શુષ્મ આણ્ડં ભૂતં નિરવર્તત । તદ્વ્યુદહરત્ । તદપોષયત્ ।
તત્પ્રાજાયત । આણ્ડસ્ય વા એતદ્રૂપમ્ । યદામિક્ષા । યદ્વ્યુદ્ધરતિ ॥ ૧। ૬। ૨। ૧૫॥
૧૬ પ્રજા એવ તદ્યજમાનઃ પોષયતિ । વૈશ્વદેવ્યામિક્ષા ભવતિ ।
વૈશ્વદેવ્યો વૈ પ્રજાઃ । પ્રજા એવાસ્મૈ પ્રજનયતિ । વાજિનમાનયતિ ।
પ્રજાસ્વેવ પ્રજાતાસુ રેતો દધાતિ । દ્યાવાપૃથિવ્ય એકકપાલો ભવતિ ।
પ્રજા એવ પ્રજાતા દ્યાવાપૃથિવીભ્યામુભયતઃ પરિગૃહ્ણાતિ । દેવાસુરાઃ
સંયત્તા આસન્ । સોઽગ્નિરબ્રવીત્ ॥ ૧। ૬। ૨। ૧૬॥
૧૭ મામગ્રે યજત । મયા મુખેનાસુરાઞ્જેષ્યથેતિ । માં દ્વિતીયમિતિ
સોમોઽબ્રવીત્ । મયા રાજ્ઞા જેષ્યથેતિ । માં તૃતીયમિતિ સવિતા । મયા
પ્રસૂતા જેષ્યથેતિ । માં ચતુર્થીમિતિ સરસ્વતી । ઇન્દ્રિયં વોઽહં
ધાસ્યામીતિ । માં પઞ્ચમમિતિ પૂષા । મયા પ્રતિષ્ઠયા જેષ્યથેતિ
॥ ૧। ૬। ૨। ૧૭॥
૧૮ તેઽગ્નિના મુખેનાસુરાનજયન્ । સોમેન રાજ્ઞા । સવિત્રા પ્રસૂતાઃ ।
સરસ્વતીન્દ્રિયમદધાત્ । પૂષા પ્રતિષ્ઠાઽઽસીત્ । તતો વૈ દેવા વ્યજયન્ત
। યદેતાનિ હવી ँ ષિ નિરુપ્યન્તે વિજિત્યૈ । નોત્તરવેદિમુપવપતિ ।
પશવો વા ઉત્તરવેદિઃ । અજાતા ઇવ હ્યેતર્હિ પશવઃ ॥ ૧। ૬। ૨। ૧૮॥
ઐદિત્યશોચદ્વ્યુદ્ધરત્યબ્રવીત્પ્રતિષ્ઠાયા જેષ્યથેત્યેતર્હિ પશવઃ
॥ ૨॥
૧૯ ત્રિવૃદ્બર્હિર્ભવતિ । માતા પિતા પુત્રઃ । તદેવ તન્મિથુનમ્ । ઉલ્બં
ગર્ભો જરાયુ । તદેવ તન્મિથુનમ્ । ત્રેધા બર્હિઃ સંનદ્ધં ભવતિ
। ત્રય ઇમે લોકાઃ । એષ્વેવ લોકેષુ પ્રતિતિષ્ઠતિ । એકધા પુનઃ
સંનદ્ધં ભવતિ । એક ઇવ હ્યયં લોકઃ ॥ ૧। ૬। ૩। ૧૯॥

૨૦ અસ્મિન્નેવ તેન  લોકે પ્રતિતિષ્ઠતિ । પ્રસુવો  ભવન્તિ । પ્રથમજામેવ
પુષ્ટિમવરુન્ધે । પ્રથમજો વથ્સો દક્ષિણા  સમૃદ્ધ્યૈ ।
પૃષદાજ્યં ગૃહ્ણાતિ । પશવો  વૈ પૃષદાજ્યમ્ । પશૂનેવાવરુન્ધે ।
પઞ્ચગૃહીતં ભવતિ । પાઙ્ક્તા  હિ પશવઃ  । બહુરૂપં ભવતિ ॥

૧। ૬। ૩। ૨૦॥

૨૧ બહુરૂપા હિ પશવઃ  સમૃદ્ધ્યૈ । અગ્નિં મન્થન્તિ । અગ્નિમુખા  વૈ
પ્રજાપતિઃ પ્રજા અસૃજત । યદગ્નિં મન્થન્તિ । અગ્નિમુખા એવ તત્પ્રજા
યજમાનઃ સૃજતે । નવ  પ્રયાજા ઇજ્યન્તે । નવાનૂયાજાઃ । અષ્ટૌ હવીꣳષિ
। દ્વાવાઘારૌ । દ્વાવાજ્યભાગૌ ॥ ૧। ૬। ૩। ૨૧॥

૨૨ ત્રિꣳ શથ્સંપદ્યન્તે । ત્રિꣳ શદક્ષરા વિરાટ્ । અન્નં  વિરાટ્
। વિરાજૈવાન્નાદ્યમવરુન્ધે । યજમાનો  વા એકકપાલઃ । તેજ  આજ્યમ્ ।
યદેકકપાલ  આજ્યમાનયતિ । યજમાનમેવ તેજસા  સમર્ધયતિ । યજમાનો
વા એકકપાલઃ । પશવ  આજ્યમ્ ॥ ૧। ૬। ૩। ૨૨॥

૨૩ યદેકકપાલ  આજ્યમાનયતિ । યજમાનમેવ પશુભિઃ  સમર્ધયતિ
। યદલ્પમાનયેત્ । અલ્પા  એનં પશવો  ભુઞ્જન્ત  ઉપતિષ્ઠેરન્ ।
યદ્બહ્વાનયેત્ । બહવ  એનં પશવોઽભુઞ્જન્ત  ઉપતિષ્ઠેરન્ ।
બહ્વાનીયાવિઃ પૃષ્ઠં કુર્યાત્ । બહવ  એવૈનં  પશવો  ભુઞ્જન્ત
ઉપતિષ્ઠન્તે । યજમાનો  વા એકકપાલઃ । યદેકકપાલસ્યાવદ્યેત્ ॥ ૧। ૬। ૩। ૨૩॥

૨૪ યજમાનસ્યાવદ્યેત્ । ઉદ્વા  માદ્યેદ્યજમાનઃ । પ્ર વા  મીયેત । સકૃદેવ
હોતવ્યઃ  । સકૃદિવ  હિ સુવર્ગો લોકઃ । હુત્વાઽભિ જુહોતિ ।
યજમાનમેવ સુવર્ગં લોકં ગમયિત્વા । તેજસા  સમર્ધયતિ । યજમાનો
વા એકકપાલઃ । સુવર્ગો લોક આહવનીયઃ  ॥ ૧। ૬। ૩। ૨૪॥

૨૫ યદેકકપાલમાહવનીયે  જુહોતિ  । યજમાનમેવ સુવર્ગં લોકં ગમયતિ ।
યદ્ધસ્તેન જુહુયાત્ । સુવર્ગાલ્લોકાદ્યજમાનમવવિધ્યેત્ । સ્રુચા જુહોતિ ।
સુવર્ગસ્ય  લોકસ્ય  સમષ્ટ્યૈ । યત્પ્રાઙ્પદ્યેત । દેવલોકમભિ જયેત્ ।
યદ્દક્ષિણા પિતૃલોકમ્ । યત્પ્રત્યક્ ॥ ૧। ૬। ૩। ૨૫॥

૨૬ રક્ષાઁસિ યજ્ઞઁ હન્યુઃ । યદ્દુદ્ઙ્ઙ્ । મનુષ્યલોકમભિજયેત્ ।
પ્રતિષ્ઠિતો હોતવ્યઃ । એકકપાલં વૈ પ્રતિતિષ્ઠન્તં દ્યાવાપૃથિવી
અનુ પ્રતિતિષ્ઠતઃ । દ્યાવાપૃથિવી ઋતવઃ । ઋતૂન્, યજ્ઞઃ । યજ્ઞં
યજમાનઃ । યજમાનં પ્રજાઃ । તસ્માત્પ્રતિષ્ઠિતો હોતવ્યઃ ॥ ૧। ૬। ૩। ૨૬॥

૨૭ વાજિનો યજતિ । અગ્નિર્વાયુઃ સૂર્યઃ । તે વૈ વાજિનઃ । તાનેવ તદ્યજતિ
। અથો ખલ્વાહુઃ । છન્દાઁસિ વૈ વાજિન ઇતિ । તાન્યેવ તદ્યજતિ ।
ઋખ્સામે વા ઇન્દ્રસ્ય હરી સોમપાનૌ । તયોઃ પરિધય આધાનમ્ ।
વાજિનં ભાગધેયમ્ ॥ ૧। ૬। ૩। ૨૭॥

૨૮ યદપ્રહૃત્ય પરિધીઞ્જુહુયાત્ । અન્તરાધાનાભ્યાં ઘાસં પ્રયચ્છેત્
। પ્રહૃત્ય પરિધીઞ્જુહોતિ । નિરાધાનાભ્યામેવ ઘાસં પ્રયચ્છતિ ।
બર્હિષિ વિષિઞ્ચન્વાજિનમાનયતિ । પ્રજા વૈ બર્હિઃ । રેતો વાજિનમ્
। પ્રજાસ્વેવ રેતો દધાતિ । સમુપહૂય ભક્ષયન્તિ । એતથ્સોમપીથા
હ્યેતે । અથો આત્મન્નેવ રેતો દધતે । યજમાન ઉત્તમો ભક્ષયતિ ।
પશવો વૈ વાજિનમ્ । યજમાન એવ પશૂન્પ્રતિષ્ઠાપયન્તિ ॥ ૧। ૬। ૩। ૨૮॥

લોકો બહુરૂપં ભવત્યાજ્યભાગૌ પશવ આજ્યમવદ્યેદાહવનીયઃ
પ્રત્યક્તસ્માત્પ્રતિષ્ઠિતો હોતવ્યો ભાગધેયમેતે ચત્વારિ ચ ॥ ૩॥

૨૯ પ્રજાપતિઃ સવિતા ભૂત્વા પ્રજા અસૃજત । તા એનમત્યમન્યન્ત ।
તા અસ્માદપાક્રામન્ । તા વરુણો ભૂત્વા પ્રજા વરુણેનાગ્રાહયત્ । તાઃ પ્રજા
વરુણગૃહીતાઃ । પ્રજાપતિં પુનરુપાધાવન્નાથમિચ્છમાનાઃ । સ
એતાન્પ્રજાપતિર્વરુણપ્રઘાસાનપશ્યત્ । તાન્નિરવપત્ । તૈર્વૈ સ પ્રજા
વરુણપાશાદમુઞ્ચત્ । યદ્વરુણપ્રઘાસા નિરુપ્યન્તે ॥ ૧। ૬। ૪। ૨૯॥

૩૦ પ્રજાનામવરુણગ્રાહાય । તાસાં દક્ષિણો બાહુર્ન્યક્ન આસીત્ ।
સવ્યઃ પ્રસૃતઃ । સ એતાં દ્વિતીયાં દક્ષિણતો વેદિમુદહન્ । તતો
વૈ સ પ્રજાનાં દક્ષિણં બાહું પ્રાસારયત્ । યદ્દ્વિતીયાં દક્ષિણતો
વેદિમુદ્ધન્તિ । પ્રજાનામેવ તદ્યજમાનો દક્ષિણં બાહું પ્રસારયતિ ।
તસ્માચ્ચાતુર્માસ્યયાજ્યમુષ્મિં લ્લોક ઉભયાબાહુઃ । યજ્ઞાભિજિતગ્ગ્
હ્યસ્ય । પૃથમાત્રાદ્વેદી અસંભિન્ને ભવતઃ ॥ ૧। ૬। ૪। ૩૦॥

૩૧ તસ્માત્પૃથમાત્રં વ્યꣳસૌ । ઉત્તરસ્યાં વેદ્યામુત્તરવેદિમુપ વપતિ ।
પશવો વા ઉત્તરવેદિઃ । પશૂનેવાવરુન્ધે । અથો યજ્ઞપરુષોઽનન્તરિત્યૈ
। એતદ્બ્રાહ્મણાન્યેવ પઞ્ચ હવીꣳષિ । અથૈષ ઐન્દ્રાગ્નો ભવતિ ।
પ્રાણાપાનૌ વા એતૌ દેવાનામ્ । યદિન્દ્રાગ્ની । યદૈન્દ્રાગ્નો ભવતિ ॥ ૧। ૬। ૪। ૩૧॥
૩૨ પ્રાણાપાનાવેવાવરુન્ધે । ઓજો બલં વા એતૌ દેવાનામ્ । યદિન્દ્રાગ્ની ।
યદૈન્દ્રાગ્નો ભવતિ । ઓજો બલમેવાવરુન્ધે । મારુત્યામિક્ષા ભવતિ ।
વારુણ્યામિક્ષા । મેષી ચ મેષશ્ચ ભવતઃ । મિથુના એવ પ્રજા
વરુણપાશાન્મુઞ્ચતિ । લોમશૌ ભવતો મેધ્યત્વાય ॥ ૧। ૬। ૪। ૩૨॥
૩૩ શમીપર્ણાન્યુપ વપતિ । ઘાસમેવાભ્યામપિ યચ્છતિ
। પ્રજાપતિમન્નાદ્યં નોપાનમત્ । સ એતેન શતેધ્મેન
હવિષાઽન્નાદ્યમવારુન્ધ । યત્પરઃ શતાનિ શમીપર્ણાનિ
ભવન્તિ । અન્નાદ્યસ્યાવરુદ્ધ્યૈ । સૌમ્યાનિ વૈ કરીરાણિ । સૌમ્યા
ખલુ વા આહુતિર્દિવો વૃષ્ટિં ચ્યાવયતિ । યત્કરીરાણિ ભવન્તિ ।
સૌમ્યયૈવાહુત્યા દિવો વૃષ્ટિમવરુન્ધે । કાય એકકપાલો ભવતિ ।
પ્રજાનાં કન્ત્વાય । પ્રતિપૂરુષં કરમ્ભપાત્રાણિ ભવન્તિ । જાતા
એવ પ્રજા વરુણપાશાન્મુઞ્ચતિ । એકમતિરિક્તમ્ । જનિષ્યમાણા એવ
પ્રજા વરુણપાશાન્મુઞ્ચતિ ॥ ૧। ૬। ૪। ૩૩॥ નિરુપ્યન્તે ભવતો ભવતિ
મેધ્યત્વાય રુન્ધે ષટ્ચ ॥ ૪॥
૩૪ ઉત્તરસ્યાં વેદ્યામન્યાનિ હવીꣳષિ સાદયતિ । દક્ષિણાયાં મારુતીમ્ ।
અપધુરમેવૈના યુનક્તિ । અથો ઓજ એવાસામવ હરતિ । તસ્માદ્બ્રહ્મણશ્ચ
ક્ષત્રાચ્ચ વિશોઽન્યતોપક્રમિણીઃ । મારુત્યા પૂર્વયા પ્રચરતિ ।
અનૃતમેવાવ યજતે । વારુણ્યોત્તરયા । અન્તત એવ વરુણમવ યજતે ।
યદ્દેવાધ્વર્યુઃ કરોતિ ॥ ૧। ૬। ૫। ૩૪॥
૩૫ તત્પ્રતિપ્રસ્થાતા કરોતિ । તસ્માદ્યચ્છ્રેયાન્કરોતિ । તત્પાપીયાન્કરોતિ ।
પત્નીં વાચયતિ । મેધ્યામેવૈનાં કરોતિ । અથો તપ એવૈનામુપ નયતિ ।
યજ્જારꣳ સન્તં ન પ્રબ્રૂયાત્ । પ્રિયં જ્ઞાતિꣳ રુન્ધ્યાત્ । અસૌ મે

જાર ઇતિ નિર્દિશેત્ । નિર્દિશ્યૈવૈનં વરુણપાશેન ગ્રાહયતિ ॥ ૧। ૬। ૫। ૩૫॥

૩૬ પ્રઘાસ્યાન્ હવામહ ઇતિ પત્નીમુદાનયતિ । અહ્નતૈવૈનામ્ । યત્પત્ની
પુરોનુવાક્યામનુ બ્રૂયાત્ । નિર્વીર્યો યજમાનઃ સ્યાત્ । યજમાનોઽન્વાહ
। આત્મન્નેવ વીર્યં ધત્તે । ઉભૌ યાજ્યા ँસવીર્યત્વાય ।
યદ્ગ્રામે યદરણ્ય ઇત્યાહ । યથોદિતમેવ વરુણમવ યજતે ।
યજમાનદેવત્યો વા આહવનીયઃ ॥ ૧। ૬। ૫। ૩૬॥

૩૭ ભ્રાતૃવ્યદેવત્યો દક્ષિણઃ । યદાહવનીયે જુહુયાત્ । યજમાનં
વરુણપાશેન ગ્રાહયેત્ । દક્ષિણેઽગ્નૌ જુહોતિ । ભ્રાતૃવ્યમેવ વરુણપાશેન
ગ્રાહયતિ । શૂર્પેણ જુહોતિ । અન્નમેવ વરુણમવયજતે । શીર્ષન્નધિ
નિધાય જુહોતિ । શીર્ષત એવ વરુણમવયજતે । પ્રત્યઙ્તિષ્ઠઞ્જુહોતિ
॥ ૧। ૬। ૫। ૩૭॥

૩૮ પ્રત્યઙ્ઙેવ વરુણપાશાન્નિર્મુચ્યતે । અક્રન્કર્મ કર્મકૃત ઇત્યાહ
। દેવાનૃણં નિરવદાય । અનૃણા ગૃહાનુપપ્રેતેતિ વાવૈતદાહ ।
વરુણગૃહીતં વા એતદ્યજ્ઞસ્ય । યદ્યજુષા ગૃહીતસ્યાતિરિચ્યતે ।
તુષાશ્ચ નિષ્કાસશ્ચ । તુષૈશ્ચ નિષ્કાસેન ચાવભૃથમવૈતિ ।
વરુણગૃહીતેનૈવ વરુણમવયજતે । અપોઽવભૃથમવૈતિ ॥ ૧। ૬। ૫। ૩૮॥

૩૯ અપ્સુ વૈ વરુણઃ । સાક્ષાદેવ વરુણમવ યજતે । પ્રતિયુતો વરુણસ્ય
પાશ ઇત્યાહ । વરુણપાશાદેવ નિર્મુચ્યતે । અપ્રતીક્ષમાયન્તિ ।
વરુણસ્યાન્તર્હિત્યૈ । એધોઽસ્યેધિષીમહીત્યાહ । સમિધૈવાગ્નિં નમસ્યન્ત
ઉપાયન્તિ । તેજોસિ તેજો મયિ ધેહીત્યાહ । તેજ એવાત્મન્ધત્તે ॥ ૧। ૬। ૫। ૩૯॥

કરોતિ ગ્રાહયત્યાહવનીયસ્તિષ્ઠઞ્જુહોત્યપોઽવભૃથમવૈતિ ધત્તે ॥ ૫॥

૪૦ દેવાસુરાઃ સંયત્તા આસન્ । સોઽગ્નિરબ્રવીત્ । મમેયમનીકવતી તનૂઃ ।
તાં પ્રીણીત । અથાસુરાનભિ ભવિષ્યથેતિ । તે દેવા અગ્નયેઽનીકવતે
પુરોડાશમષ્ટાકપાલં નિરવપન્ । સોઽગ્નિરનીકવાન્થ્સ્વેન ભાગધેયેન
પ્રીતઃ । ચતુર્ધાઽનીકાન્યજનયત । તતો દેવા અભવન્ । પરાઽસુરાઃ ॥ ૧। ૬। ૬। ૧॥

૪૧ યદગ્નયેઽનીકવતે પુરોડાશમષ્ટાકપાલં નિર્વપતિ ।
અગ્નિમેવાનીકવન્તગ્ગ્ં સ્વેન ભાગધેયેન પ્રીણાતિ । સોઽગ્નિરનીકવાન્થ્સ્વેન

ભાગધેયેન પ્રીતઃ । ચતુર્ધાઽનીકાનિ જનયતે । અસૌ વા
આદિત્યોઽગ્નિરનીકવાન્ । તસ્ય રશ્મયોઽનીકાનિ । સાકꣳ સૂર્યેણોદ્યતા
નિર્વપતિ । સાક્ષાદેવાસ્મા અનીકાનિ જનયતિ । તેઽસુરાઃ પરાજિતા યન્તઃ ।
દ્યાવાપૃથિવી ઉપાશ્રયન્ ॥ ૧। ૬। ૬। ૨॥

૪૨ તે દેવા મરુદ્ભ્યઃ સાંતપનેભ્યશ્ચરું નિરવપન્ ।
તાન્દ્યાવાપૃથિવીભ્યામેવોભયતઃ સમતપન્ । યન્મરુદ્ભ્યઃ
સાન્તપનેભ્યશ્ચરું નિર્વપતિ । દ્યાવાપૃથિવીભ્યામેવ તદુભયતો
યજમાનો ભ્રાતૃવ્યાન્થ્સંતપતિ । મધ્યન્દિને નિર્વપતિ । તર્હિ હિ
તેઽક્ષિણિષ્ઠં તપતિ । ચરુર્ભવતિ । સર્વત એવૈનાન્થ્સંતપતિ ।
તે દેવાઃ શ્વોવિજયિનઃ સન્તઃ । સર્વાસાં દુગ્ધે ગૃહમેધીયં ચરું
નિરવપન્ ॥ ૧। ૬। ૬। ૩॥

૪૩ આશિતા એવાદ્યોપવસામ । કસ્ય વાઽહેદમ્ । કસ્ય વા શ્વો ભવિતેતિ ।
સ શ૰તોઽભવત્ । તસ્યાહુતસ્ય નાશ્નન્ । ન હિ દેવા અહુતસ્યાશ્નન્તિ
। તેઽબ્રુવન્ । કસ્મા ઇમꣳ હોષ્યામ ઇતિ । મરુદ્ભ્યો ગૃહમેધિભ્ય
ઇત્યબ્રુવન્ । તં મરુદ્ભ્યો ગૃહમેધિભ્યોઽજુહવુઃ ॥ ૧। ૬। ૬। ૪॥

૪૪ તતો દેવા અભવન્ । પરાઽસુરાઃ । યસ્યૈવં વિદુષો મરુદ્ભ્યો
ગૃહમેધિભ્યો ગૃહે જુહ્વતિ । ભવત્યાત્મના । પરાઽસ્ય ભ્રાતૃવ્યો
ભવતિ । યદ્વૈ યજ્ઞસ્ય પાકત્રા ક્રિયતે । પશવ્યં તત્ । પાકત્રા વા
એતત્ક્રિયતે । યન્નેધ્મા બર્હિર્ભવતિ । ન સામિધેનીરન્વાહ ॥ ૧। ૬। ૬। ૫॥

૪૫ ન પ્રયાજા ઇજ્યન્તે । નાનૂયાજાઃ । ય એવં વેદ । પશુમાન્ભવતિ
। આજ્યભાગૌ યજતિ । યજ્ઞસ્યૈવ ચક્ષુષી નાન્તરેતિ । મરુતો
ગૃહમેધિનો યજતિ । ભાગધેયેનૈવૈનાન્થ્સમર્ધયતિ । અગ્નિꣳ
સ્વિષ્ટકૃતં યજતિ પ્રતિષ્ઠિત્યૈ । ઇડાન્તો ભવતિ । પશવો વા ઇડા ।
પશુષ્વેવોપરિષ્ટાત્પ્રતિતિષ્ઠતિ ॥ ૧। ૬। ૬। ૬॥ અસુરા અશ્રયન્ગૃહમેધીયં
ચરું નિરવપન્નજુહવુરન્વાહેડાન્તો ભવતિ દ્વે ચ ॥ ૬॥

૪૬ યત્પત્ની ગૃહમેધીયસ્યાશ્નીયાત્ । ગૃહમેધ્યેવ સ્યાત્ । વિ ત્વસ્ય
યજ્ઞ ઋધ્યેત । યન્નાશ્નીયાત્ । અગૃહમેધી સ્યાત્ । નાસ્ય યજ્ઞો વ્યૃદ્ધ્યેત ।

પ્રતિવેશં પચેયુઃ । તસ્યાશ્નીયાત્ । ગૃહમેધ્યેવ ભવતિ । નાસ્ય યજ્ઞો
વ્યૃદ્ધ્યતે ॥ ૧। ૬। ૭। ૧॥

૪૭ તે દેવા ગૃહમેધીયેનેષ્ટ્વા । આશિતા અભવન્ । આઞ્જતાભ્યઞ્જત ।
અનુવથ્સાનવાસયન્ । તેભ્યોઽસુરાઃ, ક્ષુધં પ્રાહિણ્વન્ । સા દેવેષુ
લોકમવિત્ત્વા । અસુરાન્પુનરગચ્છત્ । ગૃહમેધીયેનેષ્ટ્વા । આશિતા
ભવન્તિ । આઞ્જતેઽભ્યઞ્જતે ॥ ૧। ૬। ૭। ૨॥

૪૮ અનુવથ્સાન્, વાસયન્તિ । ભ્રાતૃવ્યાયૈવ તદ્યજમાનઃ, ક્ષુધં પ્રહિણોતિ
। તે દેવા ગૃહમેધીયેનેષ્ટ્વા । ઇન્દ્રાય નિષ્કાસં ન્યદધુઃ । અસ્માનેવ
શ્વ ઇન્દ્રો નિહિતભાગ ઉપાવર્તિતેતિ । તાનિન્દ્રો નિહિતભાગ ઉપાવર્તત ।
ગૃહમેધીયેનેષ્ટ્વા । ઇન્દ્રાય નિષ્કાસં નિદધ્યાત્ । ઇન્દ્ર એવૈનં
નિહિતભાગ ઉપાવર્તતે । ગાર્હપત્યે જુહોતિ ॥ ૧। ૬। ૭। ૩॥

૪૯ ભાગધેયેનૈવૈન ँ સમર્ધયતિ । ઋષભમાહ્વયતિ ।
વષટ્કાર એવાસ્ય સઃ । અથો ઇન્દ્રિયમેવ તદ્વીર્યં યજમાનો
ભ્રાતૃવ્યસ્ય વૃઙ્ક્તે । ઇન્દ્રો વૃત્ર ँ હત્વા । પરાં પરાવતમગચ્છત્
। અપારાધમિતિ મન્યમાનઃ । સોઽબ્રવીત્ । ક ઇદં વેદિષ્યતીતિ ।
તેઽબ્રુવન્મરુતો વરં વૃણામહૈ ॥ ૧। ૬। ૭। ૪॥

૫૦ અથ વયં વેદામ । અસ્મભ્યમેવ પ્રથમ ँ હવિર્નિરુપ્યાતા ઇતિ
। ત એનમધ્યક્રીડન્ । તત્ક્રીડિનાં ક્રીડિત્વમ્ । યન્મરુદ્ભ્યઃ ક્રીડિભ્યઃ
પ્રથમ ँ હવિર્નિરુપ્યતે વિજિત્યૈ । સાક ँ સૂર્યેણોદ્યતા
નિર્વપતિ । એતસ્મિન્વૈ લોક ઇન્દ્રો વૃત્રમહન્થ્સમૃદ્ધ્યૈ
। એતદ્બ્રાહ્મણાન્યેવ પઞ્ચ હવી ँ ષિ । એતદ્બ્રાહ્મણ ઐન્દ્રાગ્નઃ ।
અથૈષ ઐન્દ્રશ્ચરુર્ભવતિ ।

૫૧ ઉદ્ધારં વા એતમિન્દ્ર ઉદહરત । વૃત્ર ँ હત્વા । અન્યાસુ
દેવતાસ્વધિ । યદેષ ઐન્દ્રશ્ચરુર્ભવતિ । ઉદ્ધારમેવ તં
યજમાન ઉદ્ધરતે । અન્યાસુ પ્રજાસ્વધિ । વૈશ્વકર્મણ એકકપાલો
ભવતિ । વિશ્વાન્યેવ તેન કર્માણિ યજમાનોઽવરુન્ધે ॥ ૧। ૬। ૭। ૫॥

ઋદ્ધ્યતેઽભ્યઞ્જતે જુહોતિ વૃણામહૈ ભવત્યષ્ટૌ ચ ॥ ૭॥

૫૨ વૈશ્વદેવેન વૈ પ્રજાપતિઃ પ્રજા અસૃજત । તા
વરુણપ્રઘાસૈર્વરુણપાશાદમુઞ્ચત્ । સાકમેધૈઃ પ્રત્યસ્થાપયત્ ।
ત્ર્યમ્બકૈ રુદ્રં નિરવાદયત । પિતૃયજ્ઞેન સુવર્ગં લોકમગમયત્
। યદ્વૈશ્વદેવેન યજતે । પ્રજા એવ તદ્યજમાનઃ સૃજતે । તા
વરુણપ્રઘાસૈર્વરુણપાશાન્મુઞ્ચતિ । સાકમેધૈઃ પ્રતિષ્ઠાપયતિ ।
ત્ર્યમ્બકૈ રુદ્રં નિરવદયતે ॥ ૧। ૬। ૮। ૧॥

૫૩ પિતૃયજ્ઞેન સુવર્ગં લોકં ગમયતિ । દક્ષિણતઃ પ્રાચીનાવીતી
નિર્વપતિ । દક્ષિણાવૃદ્ધિ પિતૃણામ્ । અનાદૃત્ય તત્ । ઉત્તરત
એવોપવીય નિર્વપેત્ । ઉભયે હિ દેવાશ્ચ પિતરશ્ચેજ્યન્તે । અથો
યદેવ દક્ષિણાર્ધેઽધિ શ્રયતિ । તેન દક્ષિણાવૃત્ । સોમાય પિતૃમતે
પુરોડાશꣳ ષટ્કપાલં નિર્વપતિ । સંવથ્સરો વૈ સોમઃ પિતૃમાન્ ॥
૧। ૬। ૮। ૨॥

૫૪ સંવથ્સરમેવ પ્રીણાતિ । પિતૃભ્યો બર્હિષદ્ભ્યો ધાનાઃ । માસા
વૈ પિતરો બર્હિષદઃ । માસાનેવ પ્રીણાતિ । યસ્મિન્વા ઋતૌ પુરુષઃ
પ્રમીયતે । સોઽસ્યામુષ્મિં લ્લોકે ભવતિ । બહુરૂપા ધાના ભવન્તિ ।
અહોરાત્રાણામભિજિત્યૈ । પિતૃભ્યોઽગ્નિષ્વાત્તેભ્યો મન્થમ્ । અર્ધમાસા
વૈ પિતરોઽગ્નિષ્વાત્તાઃ ॥ ૧। ૬। ૮। ૩॥

૫૫ અર્ધમાસાનેવ પ્રીણાતિ । અભિવાન્યાયૈ દુગ્ધે ભવતિ । સા
હિ પિતૃદેવત્યં દુહે । યત્પૂર્ણમ્ । તન્મનુષ્યાણામ્ । ઉપર્યર્ધો
દેવાનામ્ । અર્ધઃ પિતૃણામ્ । અર્ધ ઉપમન્થતિ । અર્ધો હિ પિતૃણામ્ ।
એકયોપમન્થતિ ॥ ૧। ૬। ૮। ૪॥

૫૬ એકા હિ પિતૃણામ્ । દક્ષિણોપમન્થતિ । દક્ષિણાવૃદ્ધિ પિતૃણામ્ ।
અનારભ્યોપમન્થતિ । તદ્ધિ પિતૄન્ગચ્છતિ । ઇમાં દિશં વેદિમુદ્ધન્તિ
। ઉભયે હિ દેવાશ્ચ પિતરશ્ચેજ્યન્તે । ચતુઃસ્રક્તિર્ભવતિ । સર્વા
હ્યનુ દિશઃ પિતરઃ । અખાતા ભવતિ ॥

૫૭ ખાતા હિ દેવાનામ્ । મધ્યતોઽગ્નિરાધીયતે । અન્તતો હિ દેવાનામાધીયતે

। વર્ષીયાનિધ્મ ઇધ્માદ્ભવતિ વ્યાવૃત્ત્યૈ । પરિ શ્રયતિ । અન્તર્હિતો
હિ પિતૃલોકો મનુષ્યલોકાત્ । યત્પરુષિ દિનમ્ । તદ્દેવાનામ્ । યદન્તરા ।
તન્મનુષ્યાણામ્ ॥ ૧। ૬। ૮। ૬॥

૫૮ યથ્સમૂલમ્ । તત્પિતૃણામ્ । સમૂલં બર્હિર્ભવતિ વ્યાવૃત્ત્યૈ ।
દક્ષિણા સ્તૃણાતિ । દક્ષિણાવૃદ્ધિ પિતૃણામ્ । ત્રિઃ પર્યેતિ । તૃતીયે
વા ઇતો લોકે પિતરઃ । તાનેવ પ્રીણાતિ । ત્રિઃ પુનઃ પર્યેતિ । ષટ્થ્સંપદ્યન્તે
॥ ૧। ૬। ૮। ૭॥

૫૯ ષડ્વા ઋતવઃ । ઋતૂનેવ પ્રીણાતિ । યત્પ્રસ્તરં યજુષા ગૃહ્ણીયાત્ ।
પ્રમાયુકો યજમાનઃ સ્યાત્ । યન્ન ગૃહ્ણીયાત્ । અનાયતનઃ સ્યાત્
। તૂષ્ણીમેવ ન્યસ્યેત્ । ન પ્રમાયુકો ભવતિ । નાનાયતનઃ ।
યત્રીન્પરિધીન્પરિદધ્યાત્ ॥ ૧। ૬। ૮। ૮॥

૬૦ મૃત્યુના યજમાનં પરિગૃહ્ણીયાત્ । યન્ન પરિદધ્યાત્ । રક્ષાꣳસિ
યજ્ઞꣳ હન્યુઃ । દ્વૌ પરિધી પરિદધાતિ । રક્ષસામપહત્યૈ । અથો
મૃત્યોરેવ યજમાનમુથ્સૃજતિ । યત્ત્રીણિ ત્રીણિ હવીગ્ષ્યુદાહરેયુઃ ।
ત્રયસ્ત્રય એષાꣳ સાકં પ્રમીયેરન્ । એકૈકમનૂચીનાન્યુદાહરન્તિ
। એકૈક એવૈષામન્વઞ્ચઃ પ્રમીયતે । કશિપુ કશિપવ્યાય ।
ઉપબર્હણમુપબર્હણ્યાય । આઞ્જનમાઞ્જન્યાય । અભ્યઞ્જનમભ્યઞ્જન્યાય
। યથાભાગમેવૈનાન્પ્રીણાતિ ॥ ૧। ૬। ૮। ૯॥ નિરવદયતે પિતૃમાનગ્નિષ્વાત્તા
એકયોપ મન્થત્યખાતા ભવતિ મનુષ્યાણાં પદ્યન્તે પરિદધ્યાન્મીયતે
પઞ્ચ ચ ॥ ૮॥

૬૧ અગ્નયે દેવેભ્યઃ પિતૃભ્યઃ સમિધ્યમાનાયાનુ બ્રૂહીત્યાહ ।
ઉભયે હિ દેવાશ્ચ પિતરશ્ચેજ્યન્તે । એકામન્વાહ । એકા હિ પિતૃણામ્ ।
ત્રિરન્વાહ । ત્રિર્હિ દેવાનામ્ । આઘારાવાઘારયતિ । યજ્ઞપરુષોરનન્તરિત્યૈ
। નાર્ષેયં વૃણીતે । ન હોતારમ્ ॥ ૧। ૬। ૯। ૧॥

૬૨ યદાર્ષેયં વૃણીત । યદ્ધોતારમ્ । પ્રમાયુકો યજમાનઃ સ્યાત્ ।
પ્રમાયુકો હોતા । તસ્માન્ન વૃણીતે । યજમાનસ્ય હોતુર્ગોપીથાય । અપ
બર્હિષઃ પ્રયાજાન્, યજતિ । પ્રજા વૈ બર્હિઃ । પ્રજા એવ મૃત્યોરુથ્સૃજતિ

। આજ્યભાગૌ યજતિ ॥ ૧। ૬। ૯। ૨॥

૬૩ યજ્ઞસ્યૈવ ચક્ષુષી નાન્તરેતિ । પ્રાચીનાવીતી સોમં યજતિ ।
પિતૃદેવત્યા હિ । એષાઽઽહુતિઃ । પઞ્ચકૃત્વોઽવદ્યતિ । પઞ્ચ
હ્યેતા દેવતાઃ । દ્વે પુરોઽનુવાક્યે । યાજ્યા દેવતા વષટ્કારઃ । તા એવ
પ્રીણાતિ । સન્તતમવદ્યતિ ॥ ૧। ૬। ૯। ૩॥

૬૪ ઋતૂનાꣳ સંતત્યૈ । પ્રૈવૈભ્યઃ પૂર્વયા પુરોઽનુવાક્યયાઽઽહ ।
પ્રણયતિ દ્વિતીયયા । ગમયતિ યાજ્યયા । તૃતીયે વા ઇતો લોકે પિતરઃ
। અહ્ન એવૈનાન્ પૂર્વયા પુરોઽનુવાક્યયાઽત્યાનયતિ । રાત્રિયૈ દ્વિતીયયા
। ઐવૈનાન્ યાજ્યયા ગમયતિ । દક્ષિણતોઽવદાય । ઉદઙ્ઙતિક્રામતિ
વ્યાવૃત્ત્યૈ ॥ ૧। ૬। ૯। ૪॥

૬૫ આસ્વધેત્યાશ્રાવયતિ । અસ્તુ સ્વધેતિ પ્રત્યાશ્રાવયતિ । સ્વધા નમ ઇતિ
વષટ્કરોતિ । સ્વધાકારો હિ પિતૃણામ્ । સોમમગ્રે યજતિ । સોમપ્રયાજા
હિ પિતરઃ । સોમં પિતૃમન્તં યજતિ । સંવથ્સરો વૈ સોમઃ પિતૃમાન્ ।
સંવથ્સરમેવ તદ્યજતિ । પિતૄન્બર્હિષદો યજતિ ॥ ૧। ૬। ૯। ૫॥

૬૬ યે વૈ યજ્વાનઃ । તે પિતરો બર્હિષદઃ । તાનેવ તદ્યજતિ ।
પિતૄનગ્નિષ્વાત્તાન્, યજતિ । યે વા અયજ્વાનો ગૃહમેધિનઃ । તે
પિતરોઽગ્નિષ્વાત્તાઃ । તાનેવ તદ્યજતિ । અગ્નિં કવ્યવાહનં યજતિ । ય
એવ પિતૃણામગ્નિઃ । તમેવ તદ્યજતિ ॥ ૧। ૬। ૯। ૬॥

૬૭ અથો યથાઽગ્નિરꣳ સ્વિષ્ટકૃતં યજતિ । તાદૃગેવ તત્ ।
એતત્તે તત યે ચ ત્વામન્વિતિ તિસૃષુ સ્રક્તીષુ નિદધાતિ । તસ્માદા
તૃતીયાત્પુરુષાન્નામ ન ગૃહ્ણન્તિ । એતાવન્તો હીજ્યન્તે । અત્ર પિતરો
યથાભાગં મન્દધ્વમિત્યાહ । હ્રીકા હિ પિતરઃ । ઉદઞ્ચો નિષ્ક્રામન્તિ ।
એષા વૈ મનુષ્યાણાં દિક્ । સ્વામેવ તદ્દિશમનુ નિષ્ક્રામન્તિ ॥ ૧। ૬। ૯। ૭॥

૬૮ આહવનીયમુપતિષ્ઠન્તે । ન્યેવાસ્મૈ તદ્હ્નુવતે । યથ્સત્યાહવનીયે
। અથાન્યત્ર ચરન્તિ । આતમિતોરુપતિષ્ઠન્તે । અગ્નિમેવોપદ્રષ્ટારં
કૃત્વા । પિતૄન્નિરવદયન્તે । અન્તં વા એતે પ્રાણાનાં ગચ્છન્તિ । ય
આતમિતોરુપ તિષ્ઠન્તે । સુસંદૃશં ત્વા વયમિત્યાહ ॥ ૧। ૬। ૯। ૮॥

૬૯ પ્રાણો વૈ સુસંદૃક્ । પ્રાણમેવાત્મન્દધતે । યોજાન્વિન્દ્ર તે હરી ઇત્યાહ
। પ્રાણમેવ પુનરયુક્ત । અક્ષન્નમીમદન્ત હીતિ ગાર્હપત્યમુપતિષ્ઠન્તે ।
અક્ષન્નમીમદન્તાથ ત્વોપતિષ્ઠામહ ઇતિ વાવૈતદાહ । અમીમદન્ત પિતરઃ
સોમ્યા ઇત્યભિ પ્રપદ્યન્તે । અમીમદન્ત પિતરોઽથ ત્વાઽભિ પ્રપદ્યામહ
ઇતિ વાવૈતદાહ । અપઃ પરિષિઞ્ચતિ । માર્જયત્યેવૈનાન્ ॥ ૧। ૬। ૯। ૯॥

૭૦ અથો તર્પયત્યેવ । તૃપ્યતિ પ્રજયા પશુભિઃ । ય એવં વેદ । અપ
બર્હિષાવનૂયાજૌ યજતિ । પ્રજા વૈ બર્હિઃ । પ્રજા એવ મૃત્યોરુત્સૃજતિ ।
ચતુરઃ પ્રયાજાન્, યજતિ । દ્વાવનૂયાજૌ । ષટ્થ્સંપદ્યન્તે । ષડ્વા ઋતવઃ
॥ ૧। ૬। ૯। ૧૦॥

૭૧ ઋતૂનેવ પ્રીણાતિ । ન પત્ન્યન્વાસ્તે । ન સંયાજયન્તિ । યત્પત્ન્યન્વાસીત
। યથ્સંયાજયેયુઃ । પ્રમાયુકા સ્યાત્ । તસ્માન્નાન્વાસ્તે । ન સંયાજયન્તિ
। પત્નિયૈ ગોપીથાય ॥ ૧। ૬। ૯। ૧૧॥ હોતારમાજ્યભાગૌ યજતિ
સંતતમવ દ્યતિ વ્યાવૃત્ત્યૈ બર્હિષદો યજતિ તમેવ તદ્યજત્યનુ
નિષ્કામન્ત્યાહૈનાનૃતવો નવ ચ ॥ ૯॥

૭૨ પ્રતિપૂરુષમેકકપાલાન્નિર્વપતિ । જાતા એવ પ્રજા રુદ્રાન્નિરવદયતે
। એકમતિરિક્તમ્ । જનિષ્યમાણા એવ પ્રજા રુદ્રાન્નિરવદયતે । એકકપાલા
ભવન્તિ । એકધૈવ રુદ્રં નિરવદયતે । નાભિઘારયતિ । યદભિઘારયેત્ ।
અન્તરવચારિણꣳ રુદ્રં કુર્યાત્ । એકોલ્મુકેન યન્તિ ॥ ૧। ૬। ૧૦। ૧॥

૭૩ તદ્ધિ રુદ્રસ્ય ભાગધેયમ્ । ઇમાં દિશં યન્તિ । એષા વૈ રુદ્રસ્ય દિક્ ।
સ્વાયામેવ દિશિ રુદ્રં નિરવદયતે । રુદ્રો વા અપશુકાયા આહુત્યૈ
નાતિષ્ઠત । અસૌ તે પશુરિતિ નિર્દિશેદ્યં દ્વિષ્યાત્ । યમેવ દ્વેષ્ટિ ।
તમસ્મૈ પશું નિર્દિશતિ । યદિ ન દ્વિષ્યાત્ । આખુસ્તે પશુરિતિ બ્રૂયાત્ ॥
૧। ૬। ૧૦। ૨॥

૭૪ ન ગ્રામ્યાન્પશૂન્ હિનસ્તિ । નારણ્યાન્ । ચતુષ્પથે જુહોતિ । એષ વા
અગ્નીનાં પડ્બીશો નામ । અગ્નિવત્યેવ જુહોતિ । મધ્યમેન પર્ણેન
જુહોતિ । સ્રુગ્ઘ્યેષા । અથો ખલુ । અન્તમેનૈવ હોતવ્યમ્ । અન્તત એવ

રુદ્રં નિરવદયતે ॥ ૧। ૬। ૧૦। ૩॥

૭૫ એષ તે રુદ્ર ભાગઃ સહ સ્વસ્રાઽમ્બિકયેત્યાહ । શરદ્વા અસ્યામ્બિકા સ્વસા । તયા વા એષ હિનસ્તિ । યꣳ હિનસ્તિ । તયૈવૈનꣳસહ શમયતિ । ભેષજં ગવ ઇત્યાહ । યાવન્ત એવ ગ્રામ્યાઃ પશવઃ । તેભ્યો ભેષજં કરોતિ । અવામ્બ રુદ્રમદિમહીત્યાહ । આશિષમેવૈતામાશાસ્તે ॥

૧। ૬। ૧૦। ૪॥

૭૬ ત્ર્યમ્બકં યજામહ ઇત્યાહ । મૃત્યોર્મુક્ષીય માઽમૃતાદિતિ વાવૈતદાહ । ઉત્કિરન્તિ । ભગસ્ય લીપ્સન્તે । મૂતે કૃત્વાઽઽસજન્તિ । યથા જનં યતેઽવસં કરોતિ । તાદૃગેવ તત્ । એષ તે રુદ્ર ભાગ ઇત્યાહ નિરવત્ત્યૈ । અપ્રતીક્ષમાયન્તિ । અપઃ પરિષિઞ્ચતિ । રુદ્રસ્યાન્તર્હિત્યૈ । પ્ર વા એતેઽસ્માલ્લોકાચ્ચ્યવન્તે । યે ત્ર્યમ્બકૈશ્ચરન્તિ । આદિત્યં ચરું પુનરેત્ય નિર્વપતિ । ઇયં વા અદિતિઃ । અસ્યામેવ પ્રતિતિષ્ઠન્તિ ॥ ૧। ૬। ૧૦। ૫॥

યન્તિ બ્રૂયાન્નિરવદયતે શાસ્તે સિઞ્ચતિ ષટ્ચ ॥ ૧૦॥

અનુમત્યૈ વૈશ્વદેવેન તાઃ સૃષ્ટાસ્ત્રિવૃત્પ્રજાપતિઃ સવિતોત્તરસ્યાં દેવાસુરાઃ સોઽગ્નિર્યત્પત્ની વૈશ્વદેવેન તા વરુણપ્રઘાસૈરગ્નયે દેવેભ્યઃ પ્રતિપૂરુષં દશ ॥ ૧૦॥

અનુમત્યૈ પ્રથમજો વત્સો બહુરૂપા હિ પશવસ્તસ્માત્પૃથમાત્રં યદગ્નયેઽનીકવત ઉદ્ધારં વા અગ્નયે દેવેભ્ય ઋતૂનેવ ષટ્થ્સપ્તતિઃ ॥ ૭૬॥

અનુમત્યૈ પ્રતિતિષ્ઠંતિ ॥

## પ્રથમાષ્ટકે સપ્તમઃ પ્રપાઠકઃ ૭

૧ એતદ્બ્રાહ્મણાન્યેવ પઞ્ચ હવીꣳષિ । અથેન્દ્રાય શુનાસીરાય પુરોડાશં દ્વાદશકપાલં નિર્વપતિ । સંવથ્સરો વા ઇન્દ્રા શુનાસીરઃ । સંવથ્સરેણૈવાસ્મા અન્નમવરુન્ધે । વાયવ્યં પયો ભવતિ । વાયુર્વૈ વૃષ્ટ્યૈ પ્રદાપયિતા । સ એવાસ્મૈ વૃષ્ટિં પ્રદાપયતિ । સૌર્ય એકકપાલો

ભવતિ । સૂર્યેણ વા અમુષ્મિં લ્લોકે વૃષ્ટિર્ધૃતા । સ એવાસ્મૈ વૃષ્ટિં
નિયચ્છતિ ॥ ૧। ૭। ૧। ૧॥

૨ દ્વાદશગવꣳ સીરં દક્ષિણા સમૃદ્ધ્યૈ । દેવાસુરાઃ સંયત્તા આસન્
। તે દેવા અગ્નિમબ્રુવન્ । ત્વયા વીરેણાસુરાનભિભવામેતિ । સોઽબ્રવીત્
। ત્રેધાઽહમાત્માનં વિકરિષ્ય ઇતિ । સ ત્રેધાઽઽત્માનં વ્યકુરુત ।
અગ્નિં તૃતીયમ્ । રુદ્રં તૃતીયમ્ । વરુણં તૃતીયમ્ ॥ ૧। ૭। ૧। ૨॥

૩ સોઽબ્રવીત્ । ક ઇદં તુરીયમિતિ । અહમિતીન્દ્રોઽબ્રવીત્ । સં તુ સૃજાવહા
ઇતિ । તૌ સમસૃજેતામ્ । સ ઇન્દ્રસ્તુરીયમભવત્ । યદિન્દ્રસ્તુરીયમભવત્ ।
તદિન્દ્રતુરીયસ્યેન્દ્રતુરીયત્વમ્ । તતો વૈ દેવા વ્યજયન્ત । યદિન્દ્રતુરીયં
નિરુપ્યતે વિજિત્યૈ ॥ ૧। ૭। ૧। ૩॥

૪ વહિની ધેનુર્દક્ષિણા । યદ્વહિની । તેનાઽઽગ્નેયી । યદ્ગૌઃ । તેન રૌદ્રી
। યદ્ધેનુઃ । તેનૈન્દ્રી । યત્સ્ત્રી સતી દાન્તા । તેન વારુણી સમૃદ્ધ્યૈ ।
પ્રજાપતિર્યજ્ઞમસૃજત ॥ ૧। ૭। ૧। ૪॥

૫ તꣳ સૃષ્ટꣳ રક્ષાꣳસ્યજિઘાꣳસન્ । સ એતાઃ પ્રજાપતિરાત્મનો
દેવતા નિરમિમીત । તાભિર્વૈ સ દિગ્ભ્યો રક્ષાꣳસિ પ્રાણુદત ।
યત્પઞ્ચાવત્તીયં જુહોતિ । દિગ્ભ્ય એવ તદ્યજમાનો રક્ષાꣳસિ
પ્રણુદતે । સમૂઢꣳ રક્ષઃ સંદગ્ધꣳ રક્ષ ઇત્યાહ ।
રક્ષાꣳસ્યેવ સંદહતિ । અગ્નયે રક્ષોઘ્ને સ્વાહેત્યાહ । દેવતાભ્ય
એવ વિજિગ્યાનાભ્યો ભાગધેયં કરોતિ । પ્રષ્ટિવાહી રથો દક્ષિણા
સમૃદ્ધ્યૈ ॥ ૧। ૭। ૧। ૫॥

૬ ઇન્દ્રો વૃત્રꣳ હત્વા । અસુરાન્પરાભાવ્ય । નમુચિમાસુરં નાલભત ।
તꣳ શચ્યાઽગૃહ્ણાત્ । તૌ સમલભેતામ્ । સોઽસ્માદભિશુનતરોઽભવત્
। સોઽબ્રવીત્ । સંધાꣳ સંદધાવહૈ । અથ ત્વાઽવ સ્રક્ષ્યામિ । ન મા
શુષ્કેણ નાર્દ્રેણ હનઃ ॥ ૧। ૭। ૧। ૬॥

૭ ન દિવા ન નક્તમિતિ । સ એતમપાં ફેનમસિઞ્ચત્ । ન વા એષ
શુષ્કો નાર્દ્રો વ્યુષ્ટાઽઽસીત્ । અનુદિતઃ સૂર્યઃ । ન વા એતદ્દિવા ન
નક્તમ્ । તસ્યૈતસ્મિꣳલ્લોકે । અપાં ફેનેન શિર ઉદવર્તયત્ ।

તદેનમન્વવર્તત । મિત્રદ્રુગિતિ ॥ ૧। ૭। ૧। ૭॥

૮ સ એતાનપામાર્ગાનજનયત્ । તાનજુહોત્ । તૈર્વૈ સ રક્ષાગ્સ્યપાહત ।
યદપામાર્ગહોમો ભવતિ । રક્ષસામપહત્યૈ । એકોલ્મુકેન યન્તિ ।
તદ્ધિ રક્ષસાં ભાગધેયમ્ । ઇમાં દિશં યન્તિ । એષા વૈ રક્ષસાં દિક્ ।
સ્વાયામેવ દિશિ રક્ષાꣳસિ હન્તિ ॥ ૧। ૭। ૧। ૮॥

૯ સ્વકૃત ઇરિણે જુહોતિ પ્રદરે વા । એતદ્વૈ રક્ષસામાયતનમ્ । સ્વ
એવાયતને રક્ષાꣳસિ હન્તિ । પર્ણમયેન સ્રુવેણ જુહોતિ । બ્રહ્મ
વૈ પર્ણઃ । બ્રહ્મણૈવ રક્ષાꣳસિ હન્તિ । દેવસ્ય ત્વા સવિતુઃ પ્રસવ
ઇત્યાહ । સવિતૃપ્રસૂત એવ રક્ષાꣳસિ હન્તિ । હતꣳ રક્ષોઽવધિષ્મ
રક્ષ ઇત્યાહ । રક્ષસાગ્ સ્તૃત્યૈ । યદ્વસ્તે તદ્દક્ષિણા નિરવત્ત્યૈ ।
અપ્રતીક્ષમાયન્તિ । રક્ષસામન્તર્હિત્યૈ ॥ ૧। ૭। ૧। ૯॥ યચ્છતિ વરુણં
તૃતીયં વિજિત્યા અસૃજત સમૃદ્ધ્યૈ હનો મિત્રદ્રુગિતિ હન્તિ સ્તૃત્યૈ
ત્રીણિ ચ ॥ ૧॥

૧૦ ધાત્રે પુરોડાશં દ્વાદશકપાલં નિર્વપતિ । સંવથ્સરો વૈ ધાતા ।
સંવથ્સરેણૈવાસ્મૈ પ્રજાઃ પ્રજનયતિ । અન્વેવાસ્મા અનુમતિર્મન્યતે । રાતે
રાકા । પ્ર સિનીવાલી જનયતિ । પ્રજાસ્વેવ પ્રજાતાસુ કુહ્વા વાચં દધાતિ ।
મિથુનૌ ગાવૌ દક્ષિણા સમૃદ્ધ્યૈ । આગ્નાવૈષ્ણવમેકાદશકપાલં
નિર્વપતિ । ઐન્દ્રાવૈષ્ણવમેકાદશકપાલમ્ ॥ ૧। ૭। ૨। ૧॥

૧૧ વૈષ્ણવં ત્રિકપાલમ્ । વીર્યં વા અગ્નિઃ । વીર્યમિન્દ્રઃ । વીર્યં
વિષ્ણુઃ । પ્રજા એવ પ્રજાતા વીર્યે પ્રતિષ્ઠાપયતિ । તસ્માત્પ્રજા વીર્યાવતીઃ
। વામન ઋષભો વહી દક્ષિણા । યદ્વહી । તેનાગ્નેયઃ । યદૃષભઃ ॥
૧। ૭। ૨। ૨॥

૧૨ તેનૈન્દ્રઃ । યદ્વામનઃ । તેન વૈષ્ણવઃ સમૃદ્ધ્યૈ ।
અગ્નીષોમીયમેકાદશકપાલં નિર્વપતિ । ઇન્દ્રાસોમીયમેકાદશકપાલમ્
। સૌમ્યં ચરુમ્ । સોમો વૈ રેતોધાઃ । અગ્નિઃ પ્રજાનાં પ્રજનયિતા ।
વૃદ્ધાનામિન્દ્રઃ પ્રદાપયિતા । સોમ એવાસ્મૈ રેતો દધાતિ ॥ ૧। ૭। ૨। ૩॥

૧૩ અગ્નિઃ પ્રજાં પ્રજનયતિ । વૃદ્ધામિન્દ્રઃ પ્રયચ્છતિ । બભ્રુર્દક્ષિણા
સમૃદ્ધ્યૈ । સોમાપૌષ્ણં ચરું નિર્વપતિ । ઐન્દ્રાપૌષ્ણં ચરુમ્ ।
સોમો વૈ રેતોધાઃ । પૂષા પશૂનાં પ્રજનયિતા । વૃદ્ધાનામિન્દ્રઃ
પ્રદાપયિતા । સોમ એવાસ્મૈ રેતો દધાતિ । પૂષા પશૂન્પ્રજનયતિ ॥

૧૪ વૃદ્ધાનિન્દ્રઃ પ્રયચ્છતિ । પૌષ્ણશ્ચરુર્ભવતિ । ઇયં વૈ પૂષા ।
અસ્યામેવ પ્રતિતિષ્ઠતિ । શ્યામો દક્ષિણા સમૃદ્ધ્યૈ । બહુ વૈ પુરુષો
મેધ્યમુપગચ્છતિ । વૈશ્વાનરં દ્વાદશકપાલં નિર્વપતિ । સંવત્સરો
વા અગ્નિર્વૈશ્વાનરઃ । સંવત્સરેણૈવૈનગ્ં સ્વદયતિ । હિરણ્યં દક્ષિણા
॥ ૧। ૭। ૨। ૫॥

૧૫ પવિત્રં વૈ હિરણ્યમ્ । પુનાત્યેવૈનમ્ । બહુ વૈ રાજન્યોઽનૃતં
કરોતિ । ઉપજામ્યૈ હરતે । જિનાતિ બ્રાહ્મણમ્ । વદત્યનૃતમ્ । અનૃતે
ખલુ વૈ ક્રિયમાણે વરુણો ગૃહ્ણાતિ । વારુણં યવમયં ચરું
નિર્વપતિ । વરુણપાશાદેવૈનં મુઞ્ચતિ । અશ્વો દક્ષિણા । વારુણો હિ
દેવતયાઽશ્વઃ સમૃદ્ધ્યૈ ॥ ૧। ૭। ૨। ૬॥ ઐન્દ્રાવૈષ્ણવમેકાદશકપાલં
યદૃષભો દધાતિ પૂષા પશૂન્પ્રજનયતિ હિરણ્યં દક્ષિણા
દક્ષિણૈકં ચ ॥ ૨॥

૧૬ રત્નિનામેતાનિ હવીꣳષિ ભવન્તિ । એતે વૈ રાષ્ટ્રસ્ય પ્રદાતારઃ
। એતેઽપાદાતારઃ । ય એવ રાષ્ટ્રસ્ય પ્રદાતારઃ । યેઽપાદાતારઃ ।
ત એવાસ્મૈ રાષ્ટ્રં પ્રયચ્છન્તિ । રાષ્ટ્રમેવ ભવતિ । યત્સમાહૃત્ય
નિર્વપેત્ । અરત્નિનઃ સ્યુઃ । યથાયથં નિર્વપતિ રત્નિત્વાય ॥ ૧। ૭। ૩। ૧॥

૧૭ યત્સદ્યો નિર્વપેત્ । યાવતીમેકેન હવિષાઽઽશિષમવ રુન્ધે ।
તાવતીમવરુન્ધીત । અન્વહં નિર્વપતિ । ભૂયસીમેવાશિષમવરુન્ધે ।
ભૂયસો યજ્ઞક્રતૂનુપૈતિ । બાર્હસ્પત્યં ચરું નિર્વપતિ બ્રહ્મણો
ગૃહે । મુખત એવાસ્મૈ બ્રહ્મ સરꣳશ્યતિ । અથો બ્રહ્મન્નેવ
ક્ષત્ત્રમન્વારમ્ભયતિ । શિતિપૃષ્ઠો દક્ષિણા સમૃદ્ધ્યૈ ॥ ૧। ૭। ૩। ૨॥

૧૮ ઐન્દ્રમેકાદશકપાલꣳ રાજન્યસ્ય ગૃહે । ઇન્દ્રિયમેવાવરુન્ધે ।
ઋષભો દક્ષિણા સમૃદ્ધ્યૈ । આદિત્યં ચરું મહિષ્યૈ ગૃહે । ઇયં

વા અદિતિઃ । અસ્યામેવ પ્રતિતિષ્ઠતિ । ધેનુર્દક્ષિણા સમૃદ્ધ્યૈ । ભગાય
ચરું વાવાતાયૈ ગૃહે । ભગમેવાસ્મિન્દધાતિ । વિચિત્તગર્ભા પષ્ઠૌહી
દક્ષિણા સમૃદ્ધ્યૈ ॥ ૧। ૭। ૩। ૩॥

૧૯ નૈરૃતં ચરું પરિવૃક્ત્યૈ ગૃહે કૃષ્ણાનાં વ્રીહીણાં
નખનિર્ભિન્નમ્ । પાપ્માનમેવ નિરૃતિં નિરવદયતે । કૃષ્ણા કૂટા
દક્ષિણા સમૃદ્ધ્યૈ । આગ્નેયમષ્ટાકપાલꣳ સેનાન્યો ગૃહે ।
સેનામેવાસ્ય સરꣳશ્યતિ । હિરણ્યં દક્ષિણા સમૃદ્ધ્યૈ । વારુણં
દશકપાલꣳ સૂતસ્ય ગૃહે । વરુણસવમેવાવરુન્ધે । મહાનિરષ્ટો
દક્ષિણા સમૃદ્ધ્યૈ । મારુતꣳ સપ્તકપાલં ગ્રામણ્યો ગૃહે ॥ ૧। ૭। ૩। ૪॥

૨૦ અન્નં વૈ મરુતઃ । અન્નમેવાવરુન્ધે । પૃશ્નિર્દક્ષિણા સમૃદ્ધ્યૈ ।
સાવિત્રં દ્વાદશકપાલં ક્ષત્તુર્ગૃહે પ્રસૂત્યૈ । ઉપધ્વસ્તો દક્ષિણા
સમૃદ્ધ્યૈ । આશ્વિનં દ્વિકપાલꣳ સંગ્રહીતુર્ગૃહે । અશ્વિનૌ
વૈ દેવાનાં ભિષજૌ । તાભ્યામેવાસ્મૈ ભેષજં કરોતિ । સવાત્યૌ
દક્ષિણા સમૃદ્ધ્યૈ । પૌષ્ણં ચરું ભાગદુઘસ્ય ગૃહે ॥ ૧। ૭। ૩। ૫॥

૨૧ અન્નં વૈ પૂષા । અન્નમેવાવરુન્ધે । શ્યામો દક્ષિણા સમૃદ્ધ્યૈ ।
રૌદ્રં ગાવીધુકં ચરુમક્ષાવાપસ્ય ગૃહે । અન્તત એવ રુદ્રં
નિરવદયતે । શબલ ઉદ્વારો દક્ષિણા સમૃદ્ધ્યૈ । દ્વાદશૈતાનિ
હવીꣳષિ ભવન્તિ । દ્વાદશ માસાઃ સંવથ્સરઃ । સંવથ્સરેણૈવાસ્મૈ
રાષ્ટ્રમવરુન્ધે । રાષ્ટ્રમેવ ભવતિ ॥ ૧। ૭। ૩। ૬॥

૨૨ યન્ન પ્રતિનિર્વપેત્ । રત્નિન આશિષોઽવરુન્ધીરન્ । પ્રતિનિર્વપતિ ।
ઇન્દ્રાય સુત્રામ્ણે પુરોડાશમેકાદશકપાલમ્ । ઇન્દ્રાયાꣳહોમુચે । આશિષ
એવાવરુન્ધે । અયન્નો રાજા વૃત્રહા રાજા ભૂત્વા વૃત્રં વધ્યાદિત્યાહ
। આશિષમેવૈતામાશાસ્તે । મૈત્રાબાર્હસ્પત્યં ભવતિ । શ્વેતાયૈ
શ્વેતવથ્સાયૈ દુગ્ધે ॥ ૧। ૭। ૩। ૭॥

૨૩ બાર્હસ્પત્યે મૈત્રમપિ દધાતિ । બ્રહ્મ ચૈવાસ્મૈ ક્ષત્રં
ચ સમીચી દધાતિ । અથો બ્રહ્મન્નેવ ક્ષત્રં પ્રતિષ્ઠાપયતિ
। બાર્હસ્પત્યેન પૂર્વેણ પ્રચરતિ । મુખત એવાસ્મૈ

બ્રહ્મ સરꣳશ્યતિ । અથો બ્રહ્મન્નેવ ક્ષત્રમન્વારમ્ભયતિ ।
સ્વયંકૃતા વેદિર્ભવતિ । સ્વયંદિનં બર્હિઃ । સ્વયંકૃત ઇધ્મઃ
। અનભિજિતસ્યાભિજિત્યૈ । તસ્માદ્રાજ્ઞામરણ્યમભિજિતમ્ । સૈવ શ્વેતા
શ્વેતવથ્સા દક્ષિણા સમૃદ્ધ્યૈ ॥ ૧। ૭। ૩। ૮॥ રત્નિત્વાય સમૃદ્ધ્યૈ
પષ્ઠૌહી દક્ષિણા સમૃદ્ધ્યૈ ગ્રામણ્યો ગૃહે ભાગદુઘસ્ય ગૃહે
ભવતિ દુગ્ઘેઽભિજિત્યૈ દ્વે ચ ॥ ૩॥

૨૪ દેવસુવામેતાનિ હવીꣳષિ ભવન્તિ । એતાવન્તો વૈ દેવાનાꣳ
સવાઃ । ત એવાસ્મૈ સવાન્પ્રયચ્છન્તિ । ત એનꣳ સુવન્તે । અગ્નિરેવૈનં
ગૃહપતીનાꣳ સુવતે । સોમો વનસ્પતીનામ્ । રુદ્રઃ પશૂનામ્ ।
બૃહસ્પતિર્વાચામ્ । ઇન્દ્રો જ્યેષ્ઠાનામ્ । મિત્રઃ સત્યાનામ્ ॥ ૧। ૭। ૪। ૧॥

૨૫ વરુણો ધર્મપતીનામ્ । એતદેવ સર્વં ભવતિ । સવિતા ત્વા પ્રસવાનાꣳ
સુવતામિતિ હસ્તં ગૃહ્ણાતિ પ્રસૂત્યૈ । યે દેવા દેવસુવઃ સ્થેત્યાહ ।
યથા યજુરેવૈતત્ । મહતે ક્ષત્રાય મહત આધિપત્યાય મહતે
જાનરાજ્યાયેત્યાહ । આશિષમેવૈતામાશાસ્તે । એષ વો ભરતા રાજા
સોમોઽસ્માકં બ્રાહ્મણાનાꣳ રાજેત્યાહ । તસ્માથ્સોમરાજાનો બ્રાહ્મણાઃ ।
પ્રતિત્યન્નામ રાજ્યમધાયીત્યાહ ॥ ૧। ૭। ૪। ૨॥

૨૬ રાજ્યમેવાસ્મિન્ પ્રતિદધાતિ । સ્વાં તનુવં વરુણો અશિશ્રેદિત્યાહ
। વરુણસવમેવાવરુન્ધે । શુચેર્મિત્રસ્ય વ્રત્યા અભૂમેત્યાહ ।
શુચિમેવૈનં વ્રત્યં કરોતિ । અમન્મહિ મહત ઋતસ્ય નામેત્યાહ । મનુત
એવૈનમ્ । સર્વે વ્રાતા વરુણસ્યાભૂવન્નિત્યાહ । સર્વવ્રાતમેવૈનં કરોતિ ।
વિ મિત્ર એવૈરરાતિમતારીદિત્યાહ ॥ ૧। ૭। ૪। ૩॥

૨૭ અરાતિમેવૈનં તારયતિ । અસૂષુદન્ત યજ્ઞિયા ઋતેનેત્યાહ
। સ્વદયત્યેવૈનમ્ । વ્યુત્રિતો જરિમાણં ન આનડિત્યાહ ।
આયુરેવાસ્મિન્દધાતિ । દ્વાભ્યાં વિમૃષ્ટે । દ્વિપાદ્યજમાનઃ પ્રતિષ્ઠિત્યૈ
। અગ્નીષોમીયસ્ય ચૈકાદશકપાલસ્ય દેવસુવાં ચ હવિષામગ્રયે
સ્વિષ્ટકૃતે સમવદ્યતિ । દેવતાભિરેવૈનમુભયતઃ પરિગૃહ્ણાતિ ।

વિષ્ણુક્રમાન્ક્રમતે । વિષ્ણુરેવ ભૂત્વેમાન્ લોકાનભિજયતિ ॥ ૧। ૭। ૪। ૪॥ સત્યાનામધાયીત્યાહાતારીદિત્યાહ ક્રમત એકં ચ ॥ ૪॥

૨૮ અર્થેતઃ સ્થેતિ જુહોતિ । આહુત્યૈવૈના નિષ્ક્રીય ગૃહ્ણાતિ । અથો હવિષ્કૃતાનામેવાભિઘૃતાનાં ગૃહ્ણાતિ । વહન્તીનાં ગૃહ્ણાતિ । એતા વા અપાઁ રાષ્ટ્રમ્ । રાષ્ટ્રમેવાસ્મૈ ગૃહ્ણાતિ । અથો શ્રિયમેવૈનમભિવહન્તિ । અપાં પતિરસીત્યાહ । મિથુનમેવાકઃ । વૃષાઽસ્યૂર્મિરિત્યાહ ॥ ૧। ૭। ૫। ૧॥

૨૯ ઊર્મિમન્તમેવૈનં કરોતિ । વૃષસેનોઽસીત્યાહ । સેનામેવાસ્ય સરઁશ્યતિ । વ્રજક્ષિતઃ સ્થેત્યાહ । એતા વા અપાં વિશઃ । વિશમેવાસ્મૈ પર્યૂહતિ । મરુતામોજઃ સ્થેત્યાહ । અન્નં વૈ મરુતઃ । અન્નમેવાવરુન્ધે । સૂર્યવર્ચસઃ સ્થેત્યાહ ॥ ૧। ૭। ૫। ૨॥

૩૦ રાષ્ટ્રમેવ વર્ચસ્વ્યકઃ । સૂર્યત્વચસઃ સ્થેત્યાહ । સત્યં વા એતત્ । યદ્વર્ષતિ । અનૃતં યદા તપતિ વર્ષતિ । સત્યાનૃતે એવાવરુન્ધે । નૈનઁસત્યાનૃતે ઉદિતે હિઁગ્સ્તઃ । ય એવં વેદ । માન્દાઃ સ્થેત્યાહ । રાષ્ટ્રમેવ બ્રહ્મવર્ચસ્યકઃ ॥ ૧। ૭। ૫। ૩॥

૩૧ વાશાઃ સ્થેત્યાહ । રાષ્ટ્રમેવ વશ્યકઃ । શક્વરીઃ સ્થેત્યાહ । પશવો વૈ શક્વરીઃ । પશૂનેવાવરુન્ધે । વિશ્વભૃતઃ સ્થેત્યાહ । રાષ્ટ્રમેવ પયસ્વ્યકઃ । જનભૃતઃ સ્થેત્યાહ । રાષ્ટ્રમેવેન્દ્રિયાવ્યકઃ । અગ્નેસ્તેજસ્યાઃ સ્થેત્યાહ ॥ ૧। ૭। ૫। ૪॥

૩૨ રાષ્ટ્રમેવ તેજસ્વ્યકઃ । અપામોષધીનાઁ રસઃ સ્થેત્યાહ । રાષ્ટ્રમેવ મધવ્યમકઃ । સારસ્વતં ગ્રહં ગૃહ્ણાતિ । એષા વા અપાં પૃષ્ઠમ્ । યત્સરસ્વતી । પૃષ્ઠમેવૈનઁસમાનાનાં કરોતિ । ષોડશભિર્ગૃહ્ણાતિ । ષોડશકલો વૈ પુરુષઃ । યાવાનેવ પુરુષઃ । તસ્મિન્વીર્યં દધાતિ । ષોડશભિર્જુહોતિ ષોડશભિર્ગૃહ્ણાતિ । દ્વાત્રિઁશથ્સંપદ્યન્તે । દ્વાત્રિઁશદક્ષરાઽનુષ્ટુક્ । વાગનુષ્ટુપ્ સર્વાણિ છન્દાઁસિ । વાચૈવૈનઁ સર્વેભિશ્છન્દોભિરભિષિઞ્ચતિ ॥ ૧। ૭। ૫। ૫॥ ઊર્મિરિત્યાહ સૂર્યવર્ચસઃ સ્થેત્યાહ બ્રહ્મવર્ચસ્યકસ્તેજસ્યાઃ સ્થેત્યાહૈવ પુરુષઃ ષટ્ચ ॥ ૫॥

૩૩ દેવીરાપઃ સં મધુમતીર્મધુમતીભિઃ સૃજ્યધ્વમિત્યાહ । બ્રહ્મણૈવૈનાઃ
સꣳ સૃજતિ । અનાધૃષ્ટાઃ સીદતેત્યાહ । બ્રહ્મણૈવૈનાઃ સાદયતિ । અન્તરા
હોતુશ્ચ ધિષ્ણિયં બ્રાહ્મણાચ્છꣳસિનશ્ચ સાદયતિ । આગ્નેયો વૈ હોતા ।
ઐન્દ્રો બ્રાહ્મણાચ્છꣳસી । તેજસા ચૈવેન્દ્રિયેણ ચોભયતો રાષ્ટ્રં
પરિગૃહ્ણાતિ । હિરણ્યેનોત્પુનાતિ । આહુત્યૈ હિ પવિત્રાભ્યામુત્પુનન્તિ
વ્યાવૃત્ત્યૈ ॥ ૧। ૭। ૬। ૧॥

૩૪ શતમાનં ભવતિ । શતાયુઃ પુરુષઃ શતેન્દ્રિયઃ । આયુષ્યેવેન્દ્રિયે
પ્રતિતિષ્ઠતિ । અનિભૃષ્ટમસીત્યાહ । અનિભૃષ્ટગ્ગ્ હ્યેતત્ । વાચો
બન્ધુરિત્યાહ । વાચો હ્યેષ બન્ધુઃ । તપોજા ઇત્યાહ । તપોજા હ્યેતત્ ।
સોમસ્ય દાત્રમસીત્યાહ ॥ ૧। ૭। ૬। ૨॥

૩૫ સોમસ્ય હ્યેતદ્દાત્રમ્ । શુક્રા વઃ શુક્રેણોત્પુનામીત્યાહ । શુક્રા
હ્યાપઃ । શુક્રꣳ હિરણ્યમ્ । ચન્દ્રાશ્ચન્દ્રેણેત્યાહ । ચન્દ્રા હ્યાપઃ
। ચન્દ્રꣳ હિરણ્યમ્ । અમૃતા અમૃતેનેત્યાહ । અમૃતા હ્યાપઃ ।
અમૃતꣳ હિરણ્યમ્ ॥ ૧। ૭। ૬। ૩॥

૩૬ સ્વાહા રાજસૂયાયેત્યાહ । રાજસૂયાય હ્યેના ઉત્પુનાતિ । સધમાદો
દ્યુમ્નિનીરૂર્જ એતા ઇતિ વારુણ્યર્ચા ગૃહ્ણાતિ । વરુણસવમેવાવરુન્ધે
। એકયા ગૃહ્ણાતિ । એકધૈવ યજમાને વીર્યં દધાતિ । ક્ષત્રસ્યોલ્બમસિ
ક્ષત્રસ્ય યોનિરસીતિ તાર્પ્યં ચોષ્ણીષં ચ પ્રયચ્છતિ સયોનિત્વાય
। એકશતેન દર્ભપુંજીલૈઃ પવયતિ । શતાયુર્વૈ પુરુષઃ શતવીર્યઃ ।
આત્મૈકશતઃ ॥ ૧। ૭। ૬। ૪॥

૩૭ યાવાનેવ પુરુષઃ । તસ્મિન્વીર્યં દધાતિ । દધ્યાશયતિ ।
ઇન્દ્રિયમેવાવરુન્ધે । ઉદુમ્બરમાશયતિ । અન્નાદ્યસ્યાવરુદ્ધ્યૈ ।
શષ્પાણ્યાશયતિ । સુરાબલિમેવૈનં કરોતિ । આવિદ એતા ભવન્તિ ।
આવિદમેવૈનં ગમયન્તિ ॥ ૧। ૭। ૬। ૫॥

૩૮ અગ્નિરેવૈનં ગાર્હપત્યેનાવતિ । ઇન્દ્ર ઇન્દ્રિયેણ । પૂષા પશુભિઃ
। મિત્રાવરુણૌ પ્રાણાપાનાભ્યામ્ । ઇન્દ્રો વૃત્રાય વજ્રમુદયચ્છત્ ।

સ દિવમલિખત્ । સોઽર્યમણઃ પન્થા અભવત્ । સ આવિન્ને દ્યાવાપૃથિવી
ધૃતવ્રતે ઇતિ દ્યાવાપૃથિવી ઉપાધાવત્ । સ આભ્યામેવ પ્રસૂત ઇન્દ્રો
વૃત્રાય વજ્રં પ્રાહરત્ । આવિન્ને દ્યાવાપૃથિવી ધૃતવ્રતે ઇતિ
યદાહ ॥ ૧। ૭। ૬। ૬॥

૩૯ આભ્યામેવ પ્રસૂતો યજમાનો વજ્રં ભ્રાતૃવ્યાય પ્રહરતિ । આવિન્ના
દેવ્યદિતિર્વિશ્વરૂપીત્યાહ । ઇયં વૈ દેવ્યદિતિર્વિશ્વરૂપી । અસ્યામેવ
પ્રતિતિષ્ઠતિ । આવિન્નોઽયમસાવામુષ્યાયણોઽસ્યાં વિશ્યસ્મિન્રાષ્ટ્ર ઇત્યાહ
। વિશૈવૈન ઁરાષ્ટ્રેણ સમર્ધયતિ । મહતે ક્ષત્રાય મહત
આધિપત્યાય મહતે જાનરાજ્યાયેત્યાહ । આશિષમેવૈતામાશાસ્તે । એષ વો
ભરતા રાજા સોમોઽસ્માકં બ્રાહ્મણાના ઁ રાજેત્યાહ । તસ્માત્સોમરાજાનો
બ્રાહ્મણાઃ ॥ ૧। ૭। ૬। ૭॥

૪૦ ઇન્દ્રસ્ય વજ્રોઽસિ વાર્ત્રઘ્ન ઇતિ ધનુઃ પ્રયચ્છતિ વિજિત્યૈ
। શત્રુબાધનાઃ સ્થેતીષૂન્ । શત્રૂનેવાસ્ય બાધન્તે । પાત મા
પ્રત્યઞ્ચં પાત મા તિર્યઞ્ચમન્વઞ્ચં મા પાતેત્યાહ । તિસ્રો
વૈ શરવ્યાઃ । પ્રતીચી તિરશ્ચ્યનૂચી । તાભ્ય એવૈનં પાન્તિ ।
દિગ્ભ્યો મા પાતેત્યાહ । દિગ્ભ્ય એવૈનં પાન્તિ । વિશ્વાભ્યો મા નાષ્ટ્રાભ્યઃ
પાતેત્યાહ । અપરિમિતાદેવૈનં પાન્તિ । હિરણ્યવર્ણાવુષસાં વિરોક
ઇતિ ત્રિષ્ટુભા બાહૂ ઉદ્ગૃહ્ણાતિ । ઇન્દ્રિયં વૈ વીર્યં ત્રિષ્ટુક્ ।
ઇન્દ્રિયમેવ વીર્યમુપરિષ્ટાદાત્મન્ધત્તે ॥ ૧। ૭। ૬। ૮॥ વ્યાવૃત્ત્યૈ
દાત્રમસીત્યાહામૃત ઁ હિરણ્યમેકશતો ગમયન્ત્યાહ બ્રાહ્મણા
નાષ્ટ્રાભ્યઃ પાતેત્યાહ ચત્વારિ ચ ॥ ૬॥

૪૧ દિશો વ્યાસ્થાપયતિ । દિશામભિજિત્યૈ । યદનુપ્રક્રામેત્ । અભિ દિશો
જયેત્ । ઉત્તુ માદ્યેત્ । મનસાઽનુ પ્રક્રામતિ । અભિ દિશો જયતિ । નોન્માદ્યતિ ।
સમિધમા તિષ્ઠેત્યાહ । તેજ એવાવરુન્ધે ॥ ૧। ૭। ૭। ૧॥

૪૨ ઉગ્રા મા તિષ્ઠેત્યાહ । ઇન્દ્રિયમેવાવરુન્ધે । વિરાજ મા તિષ્ઠેત્યાહ
। અન્નાદ્યમેવાવરુન્ધે । ઉદીચી મા તિષ્ઠેત્યાહ । પશૂનેવાવરુન્ધે ।
ઊર્ધ્વા મા તિષ્ઠેત્યાહ । સુવર્ગમેવ લોકમભિજયતિ । અનૂજ્જિહીતે ।

સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ ॥ ૧। ૭। ૭। ૨॥

૪૩ મારુત એષ ભવતિ । અન્નં વૈ મરુતઃ । અન્નમેવાવરુન્ધે ।
એકવિꣳશતિકપાલો ભવતિ પ્રતિષ્ઠિત્યૈ । યોઽરણ્યેઽનુવાક્યો ગણઃ । તં
મધ્યત ઉપદધાતિ । ગ્રામ્યૈરેવ પશુભિરારણ્યાન્ પશૂન્ પરિગૃહ્ણાતિ ।
તસ્માદ્ગ્રામ્યૈઃ પશુભિરારણ્યાઃ પશવઃ પરિગૃહીતાઃ । પૃથિર્વૈન્યઃ ।
અભ્યષિચ્યત ॥ ૧। ૭। ૭। ૩॥

૪૪ સ રાષ્ટ્રં નાભવત્ । સ એતાનિ પાર્થાન્યપશ્યત્ । તાન્યજુહોત્ ।
તૈર્વૈ સ રાષ્ટ્રમભવત્ । યત્પાર્થાનિ જુહોતિ । રાષ્ટ્રમેવ ભવતિ ।
બાર્હસ્પત્યં પૂર્વેષામુત્તમં ભવતિ । ઐન્દ્રમુત્તરેષાં પ્રથમમ્ ।
બ્રહ્મ ચૈવાસ્મૈ ક્ષત્રં ચ સમીચી દધાતિ । અથો બ્રહ્મન્નેવ
ક્ષત્રં પ્રતિષ્ઠાપયતિ ॥ ૧। ૭। ૭। ૪॥

૪૫ ષટ્પુરસ્તાદભિષેકસ્ય જુહોતિ । ષડુપરિષ્ટાત્ । દ્વાદશ સંપદ્યન્તે
। દ્વાદશ માસાઃ સંવથ્સરઃ । સંવથ્સરઃ ખલુ વૈ દેવાનાં પૂઃ ।
દેવાનામેવ પુરં મધ્યતો વ્યવસર્પતિ । તસ્ય ન કુતશ્ચનોપાવ્યાધો
ભવતિ । ભૂતાનામવેષ્ટીર્જુહોતિ । અત્રાત્ર વૈ મૃત્યુર્જાયતે । યત્ર
યત્રૈવ મૃત્યુર્જાયતે । તત એવૈનમવયજતે । તસ્માદ્રાજસૂયેનેજાનઃ
સર્વમાયુરેતિ । સર્વે હ્યસ્ય મૃત્યવોઽવેષ્ટાઃ । તસ્માદ્રાજસૂયેનેજાનો
નાભિચરિતવૈ । પ્રત્યગેનમભિચારઃ સ્તૃણુતે ॥ ૧। ૭। ૭। ૫॥ રુન્ધે
સમષ્ટ્યા અસિચ્યત સ્થાપયતિ જાયતે પઞ્ચ ચ ॥ ૭॥

૪૬ સોમસ્ય ત્વિષિરસિ તવેવ મે ત્વિષિર્ભૂયાદિતિ શાર્દૂલચર્મોપસ્તૃણાતિ
। યૈવ સોમે ત્વિષિઃ । યા શાર્દૂલે । તામેવાવરુન્ધે । મૃત્યોર્વા એષ વર્ણઃ
। યચ્છાર્દૂલઃ । અમૃતꣳ હિરણ્યમ્ । અમૃતમસિ મૃત્યોર્મા પાહીતિ
હિરણ્યમુપાસ્યતિ । અમૃતમેવ મૃત્યોરન્તર્ધત્તે । શતમાનં ભવતિ ॥

૧। ૭। ૮। ૧॥

૪૭ શતાયુઃ પુરુષઃ શતેન્દ્રિયઃ । આયુષ્યેવેન્દ્રિયે પ્રતિતિષ્ઠતિ ।
દિદ્યોન્મા પાહીત્યુપરિષ્ટાદધિ નિદધાતિ । ઉભયત એવાસ્મૈ
શર્મ દધાતિ । અવેષ્ટા દન્દશૂકા ઇતિ ક્લીબꣳ સીસેન વિધ્યતિ ।

દન્દશૂકાનેવાવયજતે । તસ્માત્ક્લીબં દન્દશૂકા દ૯ઁ શુકાઃ ।
નિરસ્તં નમુચેઃ શિર ઇતિ લોહિતાયસં નિરસ્યતિ । પાપ્માનમેવ નમુચિં
નિરવદયતે । પ્રાણા આત્મનઃ પૂર્વેઽભિષિચ્યા ઇત્યાહુઃ ॥ ૧। ૭। ૮। ૨॥

૪૮ સોમો રાજા વરુણઃ । દેવા ધર્મસુવશ્ચ યે । તે તે વાચઁસુવન્તાં
તે તે પ્રાણઁ સુવન્તામિત્યાહ । પ્રાણાનેવાત્મનઃ પૂર્વાનભિષિઞ્ચતિ
। યદ્બ્રૂયાત્ । અગ્નેસ્ત્વા તેજસાઽભિષિઞ્ચામીતિ । તેજસ્વ્યેવ સ્યાત્ ।
દુશ્ચર્મા તુ ભવેત્ । સોમસ્ય ત્વા દ્યુમ્નેનાભિષિઞ્ચામીત્યાહ । સૌમ્યો
વૈ દેવતયા પુરુષઃ ॥ ૧। ૭। ૮। ૩॥

૪૯ સ્વયૈવૈનં દેવતયાઽભિષિઞ્ચતિ । અગ્નેસ્તેજસેત્યાહ
। તેજ એવાસ્મિન્દધાતિ । સૂર્યસ્ય વર્ચસેત્યાહ । વર્ચ
એવાસ્મિન્દધાતિ । ઇન્દ્રસ્યેન્દ્રિયેણેત્યાહ । ઇન્દ્રિયમેવાસ્મિન્દધાતિ ।
મિત્રાવરુણયોર્વીર્યેણેત્યાહ । વીર્યમેવાસ્મિન્દધાતિ । મરુતામોજસેત્યાહ
॥ ૧। ૭। ૮। ૪॥

૫૦ ઓજ એવાસ્મિન્દધાતિ । ક્ષત્રાણાં ક્ષત્રપતિરસીત્યાહ ।
ક્ષત્રાણામેવૈનં ક્ષત્રપતિં કરોતિ । અતિદિવસ્પાહીત્યાહ ।
અત્યન્યાન્પાહીતિ વાવૈતદાહ । સમાવવૃત્રન્નધરાગુદીચીરિત્યાહ ।
રાષ્ટ્રમેવાસ્મિન્ધ્રુવમકઃ । ઉચ્છેષણેન જુહોતિ । ઉચ્છેષણભાગો
વૈ રુદ્રઃ । ભાગધેયેનૈવ રુદ્રં નિરવદયતે ॥ ૧। ૭। ૮। ૫॥

૫૧ ઉદઙ્પરેત્યાગ્નીદ્ધ્રે જુહોતિ । એષા વૈ રુદ્રસ્ય દિક્ । સ્વાયામેવ દિશિ
રુદ્રં નિરવદયતે । રુદ્ર યત્તે ક્રયીપરં નામેત્યાહ । યદ્વા અસ્ય
ક્રયીપરં નામ । તેન વા એષ હિનસ્તિ । યઁ હિનસ્તિ । તેનૈવૈનઁ
સહ શમયતિ । તસ્મૈ હુતમસિ યમેષ્ટમસીત્યાહ । યમાદેવાસ્ય
મૃત્યુમવયજતે ॥ ૧। ૭। ૮। ૬॥

૫૨ પ્રજાપતે ન ત્વદેતાન્યન્ય ઇતિ તસ્યૈ ગૃહે જુહુયાત્ । યાં કામયેત
રાષ્ટ્રમસ્યૈ પ્રજા સ્યાદિતિ । રાષ્ટ્રમેવાસ્યૈ પ્રજા ભવતિ ।
પર્ણમયેનાધ્વર્યુરભિષિઞ્ચતિ । બ્રહ્મવર્ચસમેવાસ્મિન્ત્વિષિં
દધાતિ । ઔદુમ્બરેણ રાજન્યઃ । ઊર્જમેવાસ્મિન્નન્નાદ્યં દધાતિ ।

આશ્વત્થેન વૈશ્યઃ । વિશમેવાસ્મિન્પુષ્ટિં દધાતિ । નૈયગ્રોધેન જન્યઃ
। મિત્રાણ્યેવાસ્મૈ કલ્પયતિ । અથો પ્રતિષ્ઠિત્યૈ ॥ ૧। ૭। ૮। ૭॥ ભવત્યાહુઃ
પુરુષ ઓજસેત્યાહ નિરવદયતે યજતે જન્યો દ્વે ચ ॥ ૮॥

૫૩ ઇન્દ્રસ્ય વજ્રોસિ વાર્ત્રઘ્ન ઇતિ રથમુપાવહરતિ વિજિત્યૈ ।
મિત્રાવરુણયોસ્ત્વા પ્રશાસ્ત્રોઃ પ્રશિષા યુનજ્મીત્યાહ । બ્રહ્મણૈવૈનં
દેવતાભ્યાં યુનક્તિ । પ્રષ્ટિવાહિનં યુનક્તિ । પ્રષ્ટિવાહી વૈ દેવરથઃ ।
દેવરથમેવાસ્મૈ યુનક્તિ । ત્રયોઽશ્વા ભવન્તિ । રથશ્ચતુર્થઃ । દ્વૌ
સવ્યેષ્ઠસારથી । ષટ્થ્સંપદ્યન્તે ॥ ૧। ૭। ૯। ૧॥

૫૪ ષડ્વા ઋતવઃ । ઋતુભિરેવૈનં યુનક્તિ । વિષ્ણુક્રમાન્ક્રમતે
। વિષ્ણુરેવ ભૂત્વેમાન્ લોકાનભિજયતિ । યઃ, ક્ષત્રિયઃ પ્રતિહિતઃ ।
સોઽન્વારભતે । રાષ્ટ્રમેવ ભવતિ । ત્રિષ્ટુભાઽન્વારભતે । ઇન્દ્રિયં
વૈ ત્રિષ્ટુક્ । ઇન્દ્રિયમેવ યજમાને દધાતિ ॥ ૧। ૭। ૯। ૨॥

૫૫ મરુતાં પ્રસવે જેષમિત્યાહ । મરુદ્ભિરેવ પ્રસૂત ઉજ્જયતિ ।
આપ્તં મન ઇત્યાહ । યદેવ મનસૈપ્સીત્ । તદાપત્ । રાજન્યં જિનાતિ ।
અનાક્રાન્ત એવાક્રમતે । વિ વા એષ ઇન્દ્રિયેણ વીર્યેણર્દ્ધ્યતે । યો રાજન્યં
જિનાતિ । સમહમિન્દ્રિયેણ વીર્યેણેત્યાહ ॥ ૧। ૭। ૯। ૩॥

૫૬ ઇન્દ્રિયમેવ વીર્યમાત્મન્ધત્તે । પશૂનાં મન્યુરસિ તવેવ
મે મન્યુર્ભૂયાદિતિ વારાહી ઉપાનહાવુપમુઞ્ચતે । પશૂનાં વા એષ
મન્યુઃ । યદ્વરાહઃ । તેનૈવ પશૂનાં મન્યુમાત્મન્ધત્તે । અભિ વા
ઇય~ઁ સુષુવાણં કામયતે । તસ્યેશ્વરેન્દ્રિયં વીર્યમાદાતોઃ । વારાહી
ઉપાનહાવુપમુઞ્ચતે । અસ્યા એવાન્તર્ધત્તે । ઇન્દ્રિયસ્ય વીર્યસ્યાનાત્યૈ ॥
૧। ૭। ૯। ૪॥

૫૭ નમો માત્રે પૃથિવ્યા ઇત્યાહાહિ~ઁસાયૈ । ઇયદસ્યાયુરસ્યાયુર્મે
ધેહીત્યાહ । આયુરેવાત્મન્ધત્તે । ઊર્ગસ્યૂર્જં મે ધેહીત્યાહ
। ઊર્જમેવાત્મન્ધત્તે । યુઙ્ઙસિ વર્ચોઽસિ વર્ચો મયિ ધેહીત્યાહ ।
વર્ચ એવાત્મન્ધત્તે । એકધા બ્રહ્મણ ઉપહરતિ । એકધૈવ યજમાન
આયુરૂર્જં વર્ચો દધાતિ । રથવિમોચનીયા જુહોતિ પ્રતિષ્ઠિત્યૈ ॥ ૧। ૭। ૯। ૫॥

૫૮ ત્રયોઽશ્વા ભવન્તિ । રથશ્ચતુર્થઃ । તસ્માચ્ચતુર્જુહોતિ ।
યદુભૌ સહાવતિષ્ઠેતામ્ । સમાનં લોકમિયાતામ્ । સહ સંગ્રહીત્રા
રથવાહને રથમાદધાતિ । સુવર્ગાદેવૈનં લોકાદન્તર્દધાતિ
। હ ꣳ સઃ શુચિષદિત્યાદધાતિ । બ્રહ્મણૈવૈનમુપાવહરતિ ।
બ્રહ્મણાઽઽદધાતિ । અતિચ્છન્દસાઽઽદધાતિ । અતિચ્છન્દા વૈ સર્વાણિ
છન્દાꣳસિ । સર્વેભિરેવૈનં છન્દોભિરાદધાતિ । વર્ષ્મ વા એષા
છન્દસામ્ । યદતિચ્છન્દાઃ । યદતિચ્છન્દસા દધાતિ । વર્ષ્મૈવૈનꣳ
સમાનાનાં કરોતિ ॥ ૧। ૭। ૯। ૬॥ પદ્યન્તે દધાતિ વીર્યેણેત્યાહાનાત્યૈ
પ્રતિષ્ઠિત્યૈ બ્રહ્મણાઽઽદધાતિ સપ્ત ચ ॥ ૯॥

૫૯ મિત્રોઽસિ વરુણોઽસીત્યાહ । મૈત્રં વા અહઃ । વારુણી રાત્રિઃ ।
અહોરાત્રાભ્યામેવૈનમુપાવહરતિ । મિત્રોઽસિ વરુણોઽસીત્યાહ ।
મૈત્રો વૈ દક્ષિણઃ । વારુણઃ સવ્યઃ । વૈશ્વદેવ્યામિક્ષા । સ્વમેવૈનૌ
ભાગધેયમુપાવહરતિ । સમહં વિશ્વૈર્દેવૈરિત્યાહ ॥ ૧। ૭। ૧૦। ૧॥

૬૦ વૈશ્વદેવ્યો વૈ પ્રજાઃ । તા એવાદ્યાઃ કુરુતે । ક્ષત્રસ્ય નાભિરસિ
ક્ષત્રસ્ય યોનિરસીત્યધીવાસમાસ્તૃણાતિ સયોનિત્વાય । સ્યોના માસીદ
સુષદા માસીદેત્યાહ । યથા યજુરેવૈતત્ । મા ત્વા હિꣳ સીન્મા મા
હિꣳ સીદિત્યાહાહિꣳસાયૈ । નિષસાદ ધૃતવ્રતો વરુણઃ પસ્ત્યાસ્વા
સામ્રાજ્યાય સુક્રતુરિત્યાહ । સામ્રાજ્યમેવૈનꣳસુક્રતું કરોતિ ।
બ્રહ્મા ૩ ન્ત્વꣳ રાજન્બ્રહ્માઽસિ સવિતાઽસિ સત્યસવ ઇત્યાહ ।
સવિતારમેવૈનꣳસત્યસવં કરોતિ ॥ ૧। ૭। ૧૦। ૨॥

૬૧ બ્રહ્મા ૩ ન્ત્વꣳ રાજન્બ્રહ્માઽસીન્દ્રોઽસિ સત્યૌજા ઇત્યાહ
। ઇન્દ્રમેવૈનꣳસત્યૌજસં કરોતિ । બ્રહ્મા ૩ ન્ત્વꣳ રાજન્
બ્રહ્માઽસિ મિત્રોઽસિ સુશેવ ઇત્યાહ । મિત્રમેવૈનꣳસુશેવં
કરોતિ । બ્રહ્મા ૩ ન્ત્વꣳ રાજન્ બ્રહ્માઽસિ વરુણોઽસિ સત્યધર્મેત્યાહ ।
વરુણમેવૈનꣳસત્યધર્માણં કરોતિ । સવિતાઽસિ સત્યસવ
ઇત્યાહ । ગાયત્રીમેવૈતેનાભિવ્યાહરતિ । ઇન્દ્રોઽસિ સત્યૌજા ઇત્યાહ ।

ત્રિષ્ટુભમેવૈતેનાભિવ્યાહરતિ ॥ ૧। ૭। ૧૦। ૩॥

૬૨ મિત્રોઽસિ સુશેવ ઇત્યાહ । જગતીમેવૈતેનાભિવ્યાહરતિ । સત્યમેતા
દેવતાઃ । સત્યમેતાનિ છન્દાꣳસિ । સત્યમેવાવરુન્ધે । વરુણોઽસિ
સત્યધર્મેત્યાહ । અનુષ્ટુભમેવૈતેનાભિવ્યાહરતિ । સત્યાનૃતે વા
અનુષ્ટુપ્ । સત્યાનૃતે વરુણઃ । સત્યાનૃતે એવાવરુન્ધે ॥ ૧। ૭। ૧૦। ૪॥

૬૩ નૈનꣳસત્યાનૃતે ઉદિતે હિꣳસ્તઃ । ય એવં વેદ । ઇન્દ્રસ્ય વજ્રોઽસિ
વાર્ત્રઘ્ન ઇતિ સ્ફ્યં પ્રયચ્છતિ । વજ્રો વૈ સ્ફ્યઃ । વજ્રેણૈવાસ્મા
અવરપરꣳ રન્ધયતિ । એવꣳ હિ તચ્છ્રેયઃ । યદસ્મા એતે રધ્યેયુઃ ।
દિશોઽભ્યયꣳ રાજાઽભૂદિતિ પઞ્ચાક્ષાન્પ્રયચ્છતિ । એતે વૈ સર્વેઽયાઃ
। અપરાજાયિનમેવૈનં કરોતિ ॥ ૧। ૭। ૧૦। ૫॥

૬૪ ઓદનમુદ્બ્રુવતે । પરમેષ્ઠી વા એષઃ । યદોદનઃ
। પરમામેવૈનગ્ં શ્રિયં ગમયતિ । સુશ્લોકા ૪ ં સુમઙ્ગલા ૪ ં
સત્યરાજા ૩ નિત્યાહ । આશિષમેવૈતામાશાસ્તે । શૌનઃશેપમાખ્યાપયતે
। વરુણપાશાદેવૈનં મુઞ્ચતિ । પરઃશતં ભવતિ । શતાયુઃ
પુરુષઃ શતેન્દ્રિયઃ । આયુષ્યેવેન્દ્રિયે પ્રતિતિષ્ઠતિ । મારુતસ્ય
ચૈકવિꣳશતિકપાલસ્ય વૈશ્વદેવ્યૈ ચામિક્ષાયા અગ્નયે સ્વિષ્ટકૃતે
સમવદ્યતિ । દેવતાભિરેવૈનમુભયતઃ પરિગૃહ્ણાતિ । અપાંનપ્ત્રે
સ્વાહોર્જોનપ્ત્રે સ્વાહાઽગ્નયે ગૃહપતયે સ્વાહેતિ તિસ્ર આહુતીર્જુહોતિ । ત્રય
ઇમે લોકાઃ । એષ્વેવ લોકેષુ પ્રતિતિષ્ઠતિ ॥ ૧। ૭। ૧૦। ૬॥ દેવૈરિત્યાહ
સત્યસવં કરોતિ ત્રિષ્ટુભમેવૈતેનાભિ વ્યાહરતિ સત્યાનૃતે એવાવરુન્ધે
કરોતિ શતેન્દ્રિયઃ ષટ્ચ ॥ ૧૦॥

એતદ્બ્રાહ્મણાનિ ધાત્રે રત્નિનાં દેવસુવામર્થેઽતો દેવીર્દિશઃ
સોમસ્યેન્દ્રસ્ય મિત્રો દશ ॥ ૧૦॥

એતદ્બ્રાહ્મણાનિ વૈષ્ણવં ત્રિકપાલમન્નં વૈ પૂષા વાશાઃ સ્થેત્યાહ
દિશો વ્યાસ્થાપયત્યુદઙ્પરેત્ય બ્રહ્મા ૩ ન્ત્વꣳ રાજઞ્ચતુઃ ષષ્ટિઃ ॥ ૬૪॥

એતદ્બ્રાહ્મણાનિ પ્રતિતિષ્ઠતિ ॥

## પ્રથમાષ્ટકે અષ્ટમઃ પ્રપાઠકઃ ૮

૧ વરુણસ્ય સુષુવાણસ્ય દશધેન્દ્રિયં વીર્યં પરાઽપતત્ ।
તથ્સઁ સૃદ્ભિરનુસમસર્પત્ । તથ્સઁ સૃપાઁસઁ સૃત્ત્વમ્
। અગ્નિના દેવેન પ્રથમેઽહં નનુ પ્રાયુઙ્ક્ત । સરસ્વત્યા વાચા
દ્વિતીયે । સવિત્રા પ્રસવેન તૃતીયે । પૂષ્ણા પશુભિશ્ચતુર્થે ।
બૃહસ્પતિના બ્રહ્મણા પઞ્ચમે । ઇન્દ્રેણ દેવેન ષષ્ઠે । વરુણેન
સ્વયા દેવતયા સપ્તમે ॥ ૧। ૮। ૧। ૧॥

૨ સોમેન રાજ્ઞાઽષ્ટમે । ત્વષ્ટ્રા રૂપેણ નવમે । વિષ્ણુના યજ્ઞેનાપ્નોત્
। યથ્સઁ સૃપો ભવન્તિ । ઇન્દ્રિયમેવ તદ્વીર્યં યજમાન
આપ્નોતિ । પૂર્વા પૂર્વા વેદિર્ભવતિ । ઇન્દ્રિયસ્ય વીર્યસ્યાવરુદ્ધ્યૈ ।
પુરસ્તાદુપસદાઁસૌમ્યેન પ્રચરતિ । સોમો વૈ રેતોધાઃ । રેત
એવ તદ્ધાતિ । અન્તરા ત્વાષ્ટ્રેણ । રેત એવ હિતં ત્વષ્ટા રૂપાણિ
વિકરોતિ । ઉપરિષ્ટાદ્વૈષ્ણવેન । યજ્ઞો વૈ વિષ્ણુઃ । યજ્ઞ એવાન્તતઃ
પ્રતિતિષ્ઠતિ ॥ ૧। ૮। ૧। ૨॥ સપ્તમે દધાતિ પઞ્ચ ચ ॥ ૧॥

૩ જામિ વા એતત્કુર્વન્તિ । યથ્સદ્યો દીક્ષયન્તિ સદ્યઃ સોમં ક્રીણન્તિ ।
પુણ્ડરિસ્રજાં પ્રયચ્છત્યજામિત્વાય । અંગિરસઃ સુવર્ગં લોકં યન્તઃ
। અપ્સુ દીક્ષાતપસી પ્રાવેશયન્ । તત્પુણ્ડરીકમભવત્ । યત્પુણ્ડરિસ્રજાં
પ્રયચ્છતિ । સાક્ષાદેવ દીક્ષાતપસી અવરુન્ધે । દશભિર્વથ્સતરૈઃ
સોમં ક્રીણાતિ । દશાક્ષરા વિરાટ્ ॥ ૧। ૮। ૨। ૧॥

૪ અન્નં વિરાટ્ । વિરાજૈવાન્નાદ્યમવરુન્ધે । મુષ્કરા ભવન્તિ સેન્દ્રત્વાય
। દશપેયો ભવતિ । અન્નાદ્યસ્યાવરુદ્ધ્યૈ । શતં બ્રાહ્મણાઃ પિબન્તિ
। શતાયુઃ પુરુષઃ શતેન્દ્રિયઃ । આયુષ્યેવેન્દ્રિયે પ્રતિતિષ્ઠતિ ।
સપ્તદશરઁ સ્તોત્રં ભવતિ । સપ્તદશઃ પ્રજાપતિઃ ॥ ૧। ૮। ૨। ૨॥

૫ પ્રજાપતેરાપ્ત્યૈ । પ્રાકાશાવધ્વર્યવે દદાતિ । પ્રકાશમેવૈનં
ગમયતિ । સ્રજમુદ્ગાત્રે । વ્યેવાસ્મૈ વાસયતિ । રુક્મઁ હોત્રે ।
આદિત્યમેવાસ્મા ઉન્નયતિ । અશ્વં પ્રસ્તોતૃપ્રતિહર્તૃભ્યામ્ । પ્રાજાપત્યો

વા અશ્વઃ । પ્રજાપતેરાપ્ત્યૈ ॥ ૧। ૮। ૨। ૩॥

૬ દ્વાદશ પષ્ઠૌહીર્બ્રહ્મણે । આયુરેવાવરુન્ધે । વશાં મૈત્રાવરુણાય

। રાષ્ટ્રમેવ વશ્યકઃ । ઋષભં બ્રાહ્મણાચ્છꣳસિને ।

રાષ્ટ્રમેવેન્દ્રિયાવ્યકઃ । વાસસી નેષ્ટાપોતૃભ્યામ્ । પવિત્રે એવાસ્યૈતે ।

સ્થૂરિ યવાચિતમચ્છાવાકાય । અન્તત એવ વરુણમવયજતે ॥ ૧। ૮। ૨। ૪॥

૭ અનડ્વાહમગ્નીધે । વહ્નિર્વા અનડ્વાન્ । વહ્નિરગ્નીત્ । વહ્નિનૈવ

વહ્નિ યજ્ઞસ્યાવરુન્ધે । ઇન્દ્રસ્ય સુષુવાણસ્ય ત્રેધેન્દ્રિયં વીર્યં

પરાઽપતત્ । ભૃગુસ્તૃતીયમભવત્ । શ્રાયન્તીયં તૃતીયમ્ ।

સરસ્વતી તૃતીયમ્ । ભાર્ગવો હોતા ભવતિ । શ્રાયન્તીયં બ્રહ્મસામં

ભવતિ । વારવન્તીયમગ્નિષ્ટોમસામમ્ । સારસ્વતીરપો ગૃહ્ણાતિ ।

ઇન્દ્રિયસ્ય વીર્યસ્યાવરુદ્ધ્યૈ । શ્રાયન્તીયં બ્રહ્મસામં ભવતિ

। ઇન્દ્રિયમેવાસ્મિન્વીર્યગ્ગ્ શ્રયતિ । વારવન્તીયમગ્નિષ્ટોમસામમ્ ।

ઇન્દ્રિયમેવાસ્મિન્વીર્યં વારયતિ ॥ ૧। ૮। ૨। ૫॥ વિરાટ્પ્રજાપતિરશ્વઃ

પ્રજાપતેરાપ્ત્યૈ યજતે બ્રહ્મસામં ભવતિ સપ્ત ચ ॥ ૨॥

૮ ઈશ્વરો વા એષ દિશોઽનૂન્મદિતોઃ । યં દિશોઽનુ વ્યાસ્થાપયન્તિ ।

દિશામવેષ્ટયો ભવન્તિ । દિક્ષ્વેવ પ્રતિ તિષ્ઠત્યનુન્માદાય । પઞ્ચ

દેવતા યજતિ । પઞ્ચ દિશઃ । દિક્ષ્વેવ પ્રતિતિષ્ઠતિ । હવિષો હવિષ

ઇષ્ટ્વા બાર્હસ્પત્યમભિઘારયતિ । યજમાનદેવત્યો વૈ બૃહસ્પતિઃ

। યજમાનમેવ તેજસા સમર્ધયતિ ॥ ૧। ૮। ૩। ૧॥

૯ આદિત્યાં મલ્હાં ગર્ભિણીમાલભતે । મારુતીં પૃશ્નિં પષ્ઠૌહીમ્ । વિશં

ચૈવાસ્મૈ રાષ્ટ્રં ચ સમીચી દધાતિ । આદિત્યયા પૂર્વયા પ્રચરતિ

। મારુત્યોત્તરયા । રાષ્ટ્ર એવ વિશમનુબધ્નાતિ । ઉચ્ચૈરાદિત્યાયા

આશ્રાવયતિ । ઉપાꣳશુ મારુત્યૈ । તસ્માદ્રાષ્ટ્રં વિશમતિવદતિ ।

ગર્ભિણ્યાદિત્યા ભવતિ ॥ ૧। ૮। ૩। ૨॥

૧૦ ઇન્દ્રિયં વૈ ગર્ભઃ । રાષ્ટ્રમેવેન્દ્રિયાવ્યકઃ । અગર્ભા મારુતી ।

વિડ્વૈ મરુતઃ । વિશમેવ નિરિન્દ્રિયામકઃ । દેવાસુરાઃ સંયત્તા આસન્ । તે દેવા

અશ્વિનોઃ પૂષન્વાચઃ સત્યꣳ સંનિધાય । અનૃતેનાસુરાનભ્યભવન્

। તેઽશ્વિભ્યાં પૂષ્ણે પુરોડાશં દ્વાદશકપાલં નિરવપન્ । તતો વૈ
તે વાચઃ સત્યમવારુન્ધત ॥ ૧। ૮। ૩। ૩॥
૧૧ યદશ્વિભ્યાં પૂષ્ણે પુરોડાશં દ્વાદશકપાલં નિર્વપતિ ।
અનૃતેનૈવ ભ્રાતૃવ્યાનભિભૂય । વાચઃ સત્યમવરુન્ધે । સરસ્વતે
સત્યવાચે ચરુમ્ । પૂર્વમેવોદિતમ્ । ઉત્તરેણાભિ ગૃણાતિ । સવિત્રે
સત્યપ્રસવાય પુરોડાશં દ્વાદશકપાલં પ્રસૂત્યૈ । દૂતાન્પ્રહિણોતિ ।
આવિદ એતા ભવન્તિ । આવિદમેવૈનં ગમયન્તિ । અથો દૂતેભ્ય એવ ન
છિદ્યતે । તિસૃધન્વઁ શુષ્કદૃતિર્દક્ષિણા સમૃદ્ધ્યૈ ॥ ૧। ૮। ૩। ૪॥ અર્ધયતિ ભવત્યરુન્ધત ગમયન્તિ દ્વે
ચ ॥ ૩॥
૧૨ આગ્નેયમષ્ટાકપાલં નિર્વપતિ । તસ્માચ્છિશિરે કુરુપઞ્ચાલાઃ
પ્રાઞ્ચો યાન્તિ । સૌમ્યં ચરુમ્ । તસ્માદ્વસન્તં વ્યવસાયાદયન્તિ ।
સાવિત્રં દ્વાદશકપાલમ્ । તસ્માત્પુરસ્તાદ્યવાનાઁ સવિત્રા વિરુન્ધતે ।
બાર્હસ્પત્યં ચરુમ્ । સવિત્રૈવ વિરુધ્ય । બ્રહ્મણા યવાનાદધતે ।
ત્વાષ્ટ્રમષ્ટાકપાલમ્ ॥ ૧। ૮। ૪। ૧॥
૧૩ રૂપાણ્યેવ તેન કુર્વતે । વૈશ્વાનરં દ્વાદશકપાલમ્ । તસ્માજ્જઘન્યે
નૈદાઘે પ્રત્યઞ્ચઃ કુરુપઞ્ચાલા યાન્તિ । સારસ્વતં ચરું નિર્વપતિ ।
તસ્માત્પ્રાવૃષિ સર્વા વાચો વદન્તિ । પૌષ્ણેન વ્યવસ્યન્તિ । મૈત્રેણ
કૃષન્તે । વારુણેન વિધૃતા આસતે । ક્ષૈત્રપત્યેન પાચયન્તે ।
આદિત્યેનાદધતે ॥ ૧। ૮। ૪। ૨॥
૧૪ માસિ માસ્યેતાનિ હવીઁષિ નિરુપ્યાણીત્યાહુઃ । તેનૈવર્તૂન્પ્રયુઙ્ક્ત
ઇતિ । અથો ખલ્વાહુઃ । કઃ સંવથ્સરં જીવિષ્યતીતિ । ષડેવ
પૂર્વેદ્યુર્નિરુપ્યાણિ । ષડુત્તરેદ્યુઃ । તેનૈવર્તૂન્પ્રયુઙ્ક્તે ।
દક્ષિણો રથવાહનવાહઃ પૂર્વેષાં દક્ષિણા । ઉત્તર ઉત્તરેષામ્ ।
સંવથ્સરસ્યૈવાન્તૌ યુનક્તિ । સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ ॥ ૧। ૮। ૪। ૩॥ ત્વાષ્ટ્રમષ્ટાકપાલં દધતે યુનક્ત્યેકં
ચ ॥ ૪॥
૧૫ ઇન્દ્રસ્ય સુષુવાણસ્ય દશધેન્દ્રિયં વીર્યં પરાઽપતત્ । સ યત્પ્રથમં
નિરષ્ઠીવત્ । તત્ક્વલમભવત્ । યદ્દ્વિતીયમ્ । તદ્બદરમ્ । યત્તૃતીયમ્ ।

તત્કર્કન્ધુ । યન્નસ્તઃ । સ સિꣳહઃ । યદક્ષ્યોઃ ॥ ૧। ૮। ૫। ૧॥

૧૬ સ શાર્દૂલઃ । યત્કર્ણયોઃ । સ વૃકઃ । ય ઊર્ધ્વઃ । સ સોમઃ । યાઽવાચી ।
સા સુરા । ત્રયાઃ સક્તવો ભવન્તિ । ઇન્દ્રિયસ્યાવરુદ્ધ્યૈ । ત્રયાણિ લોમાનિ ॥
૧। ૮। ૫। ૨॥

૧૭ ત્વિષિમેવાવરુન્ધે । ત્રયો ગ્રહાઃ । વીર્યમેવાવરુન્ધે । નામ્ના દશમી
। નવ વૈ પુરુષે પ્રાણાઃ । નાભિર્દશમી । પ્રાણા ઇન્દ્રિયં વીર્યમ્ ।
પ્રાણાનેવેન્દ્રિયં વીર્યં યજમાન આત્મન્ધત્તે । સીસેન ક્લીબાચ્છષ્પાણિ
ક્રીણાતિ । ન વા એતદયો ન હિરણ્યમ્ ॥ ૧। ૮। ૫। ૩॥

૧૮ યથ્સીસમ્ । ન સ્ત્રી ન પુમાન્ । યત્ક્લીબઃ । ન સોમો ન સુરા । યથ્સૌત્રામણી
સમૃદ્ધ્યૈ । સ્વાદ્વીં ત્વા સ્વાદુનેત્યાહ । સોમમેવૈનાં કરોતિ ।
સોમોઽસ્યશ્વિભ્યાં પચ્યસ્વ સરસ્વત્યૈ પચ્યસ્વેન્દ્રાય સુત્રામ્ણે
પચ્યસ્વેત્યાહ । એતાભ્યો હ્યેષા દેવતાભ્યઃ પચ્યતે । તિસ્રઃ
સꣳસૃષ્ટા વસતિ ॥ ૧। ૮। ૫। ૪॥

૧૯ તિસ્રો હિ રાત્રીઃ ક્રીતઃ સોમો વસતિ । પુનાતુ તે પરિસ્રુતમિતિ યજુષા
પુનાતિ વ્યાવૃત્ત્યૈ । પવિત્રેણ પુનાતિ । પવિત્રેણ હિ સોમં પુનન્તિ ।
વારેણ શશ્વતા તનેત્યાહ । વારેણ હિ સોમં પુનન્તિ । વાયુઃ પૂતઃ
પવિત્રેણેતિ નૈતયા પુનીયાત્ । વ્યૃદ્ધા હ્યેષા । અતિપવિતસ્યૈતયા
પુનીયાત્ । કુવિદઙ્ગેત્યનિરુક્તયા પ્રાજાપત્યયા ગૃહ્ણાતિ ॥ ૧। ૮। ૫। ૫॥

૨૦ અનિરુક્તઃ પ્રજાપતિઃ । પ્રજાપતેરાપ્ત્યૈ । એકયર્ચા ગૃહ્ણાતિ ।
એકધૈવ યજમાને વીર્યં દધાતિ । આશ્વિનં ધૂમ્રમાલભતે । અશ્વિનૌ
વૈ દેવાનાં ભિષજૌ । તાભ્યામેવાસ્મૈ ભેષજં કરોતિ । સારસ્વતં
મેષમ્ । વાગ્વૈ સરસ્વતી । વાચૈવૈનં ભિષજ્યતિ । ઐન્દ્રમૃષભꣳ
સેન્દ્રત્વાય ॥ ૧। ૮। ૫। ૬॥ અક્ષ્યોર્લોમાનિ હિરણ્યં વસતિ ગૃહ્ણાતિ
ભિષજ્યત્યેકં ચ ॥ ૫॥

૨૧ યત્રિષુ યૂપેષ્વાલભેત । બહિર્ધાઽસ્માદિન્દ્રિયં વીર્યં દધ્યાત્
। ભ્રાતૃવ્યમસ્મૈ જનયેત્ । એકયૂપ આલભતે । એકધૈવાસ્મિન્નિન્દ્રિયં

વીર્યં દધાતિ । નાસ્મૈ ભ્રાતૃવ્યં જનયતિ । નૈતેષાં પશૂનાં પુરોડાશા
ભવન્તિ । ગ્રહપુરોડાશા હ્યેતે । યુવ ँ સુરામમશ્વિનેતિ સર્વદેવત્યે
યાજ્યાનુવાક્યે ભવતઃ । સર્વા એવ દેવતાઃ પ્રીણાતિ ॥ ૧। ૮। ૬। ૧॥

૨૨ બ્રાહ્મણં પરિક્રીણીયાદુચ્છેષણસ્ય પાતારમ્ । બ્રાહ્મણો હ્યાહુત્યા
ઉચ્છેષણસ્ય પાતા । યદિ બ્રાહ્મણં ન વિન્દેત્ । વલ્મીકવપાયામવનયેત્ ।
સૈવ તતઃ પ્રાયશ્ચિત્તિઃ । યદ્વૈ સૌત્રામણ્યૈ વ્યૃદ્ધમ્ । તદસ્યૈ સમૃદ્ધમ્
। નાનાદેવત્યાઃ પશવશ્ચ પુરોડાશાશ્ચ ભવન્તિ સમૃદ્ધ્યૈ । ઐન્દ્રઃ
પશૂનામુત્તમો ભવતિ । ઐન્દ્રઃ પુરોડાશાનાં પ્રથમઃ ॥ ૧। ૮। ૬। ૨॥

૨૩ ઇન્દ્રિયે એવાસ્મૈ સમીચી દધાતિ । પુરસ્તાદનૂયાજાનાં
પુરોડાશૈઃ પ્રચરતિ । પશવો વૈ પુરોડાશાઃ । પશૂનેવાવરુન્ધે
। ઐન્દ્રમેકાદશકપાલં નિર્વપતિ । ઇન્દ્રિયમેવાવરુન્ધે । સાવિત્રં
દ્વાદશકપાલં પ્રસૂત્યૈ । વારુણં દશકપાલમ્ । અન્તત એવ
વરુણમવયજતે । વડબા દક્ષિણા ॥ ૧। ૮। ૬। ૩॥

૨૪ ઉત વા એષાઽશ્વ ँ સૂતે । ઉતાશ્વતરમ્ । ઉત સોમ
ઉત સુરા । યથ્સૌત્રામણી સમૃદ્ધ્યૈ । બાર્હસ્પત્યં પશું
ચતુર્થમતિપવિતસ્યાલભતે । બ્રહ્મ વૈ દેવાનાં બૃહસ્પતિઃ ।
બ્રહ્મણૈવ યજ્ઞસ્ય વ્યૃદ્ધમપિવપતિ । પુરોડાશવાનેષ
પશુર્ભવતિ । ન હ્યેતસ્ય ગ્રહં ગૃહ્ણન્તિ । સોમપ્રતીકાઃ
પિતરસ્તૃપ્ણુતેતિ શતાતૃણ્ણાયા ँ સમવનયતિ ॥ ૧। ૮। ૬। ૪॥

૨૫ શતાયુઃ પુરુષઃ શતેન્દ્રિયઃ । આયુષ્યેવેન્દ્રિયે પ્રતિતિષ્ઠતિ ।
દક્ષિણેઽગ્નૌ જુહોતિ । પાપવસ્યસસ્ય વ્યાવૃત્ત્યૈ । હિરણ્યમન્તરા
ધારયતિ । પૂતામેવૈનાં જુહોતિ । શતમાનં ભવતિ । શતાયુઃ પુરુષઃ
શતેન્દ્રિયઃ । આયુષ્યેવેન્દ્રિયે પ્રતિતિષ્ઠતિ । યત્રૈવ શતાતૃણ્ણાં
ધારયતિ ॥ ૧। ૮। ૬। ૫॥

૨૬ તન્નિદધાતિ પ્રતિષ્ઠિત્યૈ । પિતૄન્, વા એતસ્યેન્દ્રિયં વીર્યં ગચ્છતિ
। ય ँ સોમોઽતિપવતે । પિતૃણાં યાજ્યાનુવાક્યાભિરુપતિષ્ઠતે
। યદેવાસ્ય પિતૄનિન્દ્રિયં વીર્યં ગચ્છતિ । તદેવાવરુન્ધે ।

તિસૃભિરુપતિષ્ઠતે । તૃતીયે વા ઇતો લોકે પિતરઃ । તાનેવ પ્રીણાતિ ।
અથો ત્રીણિ વૈ યજ્ઞસ્યેન્દ્રિયાણિ । અધ્વર્યુર્હોતા બ્રહ્મા । ત ઉપતિષ્ઠન્તે
। યાન્યેવ યજ્ઞસ્યેન્દ્રિયાણિ । તૈરેવાસ્મૈ ભેષજં કરોતિ ॥ ૧। ૮। ૬। ૬॥

પ્રીણાતિ પ્રથમો દક્ષિણા સમવનયતિ ધારયતીન્દ્રિયાણિ ચત્વારિ
ચ ॥ ૬॥

૨૭ અગ્નિષ્ટોમમગ્ર આહરતિ । યજ્ઞમુખં વા
અગ્નિષ્ટોમઃ । યજ્ઞમુખમેવારભ્ય સવમાક્રમતે ।
અથૈષોઽભિષેચનીયશ્ચતુસ્ત્રિꣳશ પવમાનો ભવતિ ।
ત્રયસ્ત્રિꣳશદ્વૈ દેવતાઃ । તા એવાપ્નોતિ । પ્રજાપતિશ્ચતુસ્ત્રિꣳશઃ
। તમેવાપ્નોતિ । સꣳશર એષ સ્તોમાનામયથાપૂર્વમ્ । યદ્વિષમાઃ
સ્તોમાઃ ॥ ૧। ૮। ૭। ૧॥

૨૮ એતાવાન્ વૈ યજ્ઞઃ । યાવાન્પવમાનાઃ । અન્તઃશ્લેષણં ત્વા
અન્યત્ । યત્સમાઃ પવમાનાઃ । તેનાસꣳશરઃ । તેન યથાપૂર્વમ્ ।
આત્મનૈવાગ્નિષ્ટોમેનર્ધ્નોતિ । આત્મના પુણ્યો ભવતિ । પ્રજા વા ઉક્થાનિ
। પશવ ઉક્થાનિ । યદુક્થ્યો ભવત્યનુ સંતત્યૈ ॥ ૧। ૮। ૭। ૨॥ સ્તોમાઃ
પશવ ઉક્થાન્યેકં ચ ॥ ૭॥

૨૯ ઉપ ત્વા જામયો ગિર ઇતિ પ્રતિપદ્ભવતિ । વાગ્વૈ વાયુઃ । વાચ
એવૈષોઽભિષેકઃ । સર્વાસામેવ પ્રજાનાꣳસૂયતે । સર્વા એનં પ્રજા
રાજેતિ વદન્તિ । એતમુત્યં દશક્ષિપ ઇત્યાહ । આદિત્યા વૈ પ્રજાઃ ।
પ્રજાનામેવૈતેન સૂયતે । યન્તિ વા એતે યજ્ઞમુખાત્ । યે સમ્ભાર્યા
અક્રન્ ॥ ૧। ૮। ૮। ૧॥

૩૦ યદાહ પવસ્વ વાચો અગ્રિય ઇતિ । તેનૈવ યજ્ઞમુખાન્નયન્તિ ।
અનુષ્ટુક્પ્રથમા ભવતિ । અનુષ્ટુગુત્તમા । વાગ્વા અનુષ્ટુક્ । વાચૈવ
પ્રયન્તિ । વાચોદ્યન્તિ । ઉદ્વતીર્ભવન્તિ । ઉદ્વદ્વા અનુષ્ટુભો રૂપમ્ ।
આનુષ્ટુભો રાજન્યઃ ॥ ૧। ૮। ૮। ૨॥

૩૧ તસ્માદુદ્વતીર્ભવન્તિ । સૌર્યનુષ્ટુગુત્તમા ભવતિ । સુવર્ગસ્ય
લોકસ્ય સંતત્યૈ । યો વૈ સવાદેતિ । નૈનꣳસવ ઉપનમતિ । યઃ સામભ્ય

એતિ । પાપીયાન્થ્સુષુવાણો ભવતિ । એતાનિ ખલુ વૈ સામાનિ । યત્પૃષ્ઠાનિ
। યત્પૃષ્ઠાનિ ભવન્તિ ॥ ૧। ૮। ૮। ૩॥

૩૨ તૈરેવ સવાન્નૈતિ । યાનિ દેવરાજાનાꣳ સામાનિ । તૈરમુષ્મિં લ્લોક
ઋધ્નોતિ । યાનિ મનુષ્યરાજાનાꣳ સામાનિ । તૈરસ્મિં લ્લોક ઋધ્નોતિ
। ઉભયોરેવ લોકયોરૃધ્નોતિ । દેવલોકે ચ મનુષ્યલોકે ચ ।
એકવિꣳશોઽભિષેચનીયસ્યોત્તમો ભવતિ । એકવિꣳશઃ
કેશવપનીયસ્ય પ્રથમઃ । સપ્તદશો દશપેયઃ ॥ ૧। ૮। ૮। ૪॥

૩૩ વિટ્વા એકવિꣳશઃ । રાષ્ટ્રꣳ સપ્તદશઃ । વિશ
એવૈતન્મધ્યતોઽભિષિચ્યતે । તસ્માદ્વા એષ વિશાં પ્રિયઃ । વિશો
હિ મધ્યતોઽભિષિચ્યતે । યદ્વા એનમદો દિશોઽનુ વ્યાસ્થાપયન્તિ
। તથ્સુવર્ગં લોકમભ્યારોહતિ । યદિમં લોકં ન પ્રત્યવરોહેત્
। અતિજનં વેયાત્ । ઉદ્વા માદ્યેત્ । યદેષ પ્રતીચીનઃ સ્તોમો
ભવતિ । ઇમમેવ તેન લોકં પ્રત્યવરોહતિ । અથો અસ્મિન્નેવ લોકે
પ્રતિતિષ્ઠત્યનુન્માદાય ॥ ૧। ૮। ૮। ૫॥ અક્રન્રાજન્યો ભવન્તિ દશપેયો
માદ્યેત્ત્રીણિ ચ ॥ ૮॥

૩૪ ઇયં વૈ રજતા । અસૌ હરિણી । યદ્રુક્મૌ ભવતઃ
। આભ્યામેવૈનમુભયતઃ પરિગૃહ્ણાતિ । વરુણસ્ય વા
અભિષિચ્યમાનસ્યાપઃ । ઇન્દ્રિયં વીર્યં નિરઘ્નન્ । તથ્સુવર્ણꣳ
હિરણ્યમભવત્ । યદ્રુક્મમન્તર્દધાતિ । ઇન્દ્રિયસ્ય વીર્યસ્યાનિર્ઘાતાય
। શતમાનો ભવતિ શતક્ષરઃ । શતાયુઃ પુરુષઃ શતેન્દ્રિયઃ
। આયુષ્યેવેન્દ્રિયે પ્રતિતિષ્ઠતિ । આયુર્વૈ હિરણ્યમ્ । આયુષ્યા
એવૈનમભ્યતિ ક્ષરન્તિ । તેજો વૈ હિરણ્યમ્ । તેજસ્યા એવૈનમભ્યતિ
ક્ષરન્તિ । વર્ચો વૈ હિરણ્યમ્ । વર્ચસ્યા એવૈનમભ્યતિ ક્ષરન્તિ ॥ ૧। ૮। ૯। ૧॥ શતક્ષરોઽષ્ટૌ ચ ॥ ૯॥

૩૫ અપ્રતિષ્ઠિતો વા એષ ઇત્યાહુઃ । યો રાજસૂયેન યજત ઇતિ
। યદા વા એષ એતેન દ્વિરાત્રેણ યજતે । અથ પ્રતિષ્ઠા । અથ
સંવથ્સરમાપ્નોતિ । યાવન્તિ સંવથ્સરસ્યાહોરાત્રાણિ । તાવતીરેતસ્ય
સ્તોત્રીયાઃ । અહોરાત્રેષ્વેવ પ્રતિતિષ્ઠતિ । અગ્નિષ્ટોમઃ પૂર્વમહર્ભવતિ

। અતિરાત્ર ઉત્તરમ્ ॥ ૧। ૮। ૧૦। ૧॥

૩૬ નાનૈવાહોરાત્રયોઃ પ્રતિતિષ્ઠતિ । પૌર્ણમાસ્યાં પૂર્વમહર્ભવતિ ।
વ્યષ્ટકાયામુત્તરમ્ । નાનૈવાર્ધમાસયોઃ પ્રતિતિષ્ઠતિ । અમાવાસ્યાયાં
પૂર્વમહર્ભવતિ । ઉદ્દૃષ્ટ ઉત્તરમ્ । નાનૈવ માસયોઃ પ્રતિતિષ્ઠતિ । અથો
ખલુ । યે એવ સમાનપક્ષે પુણ્યાહે સ્યાતામ્ । તયોઃ કાર્યે પ્રતિષ્ઠિત્યૈ
॥ ૧। ૮। ૧૦। ૨॥

૩૭ અપશવ્યો દ્વિરાત્ર ઇત્યાહુઃ । દ્વે હ્યેતે છન્દસી । ગાયત્રં ચ
ત્રૈષ્ટુભં ચ । જગતીમન્તર્યન્તિ । ન તેન જગતી કૃતેત્યાહુઃ । યદેનાં
તૃતીયસવને કુર્વન્તીતિ । યદા વા એષાऽહીનસ્યાહર્ભજતે । સાહ્નસ્ય
વા સવનમ્ । અથૈવ જગતી કૃતા । અથ પશવ્યઃ । વ્યુષ્ટિર્વા એષ
દ્વિરાત્રઃ । ય એવં વિદ્વાન્દ્વિરાત્રેણ યજતે । વ્યેવાસ્મા ઉચ્છતિ । અથો
તમ એવાપહતે । અગ્નિષ્ટોમમન્તત આહરતિ । અગ્નિઃ સર્વા દેવતાઃ
। દેવતાસ્વેવ પ્રતિતિષ્ઠતિ ॥ ૧। ૮। ૧૦। ૩॥ ઉત્તરં પ્રતિષ્ઠિત્યૈ
પશવ્યઃ સપ્ત ચ ॥ ૧૦॥ વરુણસ્ય જામીશ્વર આગ્નેયમિન્દ્રસ્ય
યત્ત્રિષ્વગ્નિષ્ટોમમુપ ત્વેયં વૈ રજતાऽપ્રતિષ્ઠિતો દશ ॥ ૧૦॥
વરુણસ્ય યદશ્વિભ્યાં યત્ત્રિષુ તસ્માદુદ્ધતીઃ સપ્તત્રિँશત્ ॥ ૩૭॥
વરુણસ્ય પ્રતિતિષ્ઠતિ ॥

ઇતિ પ્રથમં અષ્ટકં સંપૂર્ણમ્ ॥

॥ તૈત્તિરીય-બ્રાહ્મણમ્ ॥

# તૈત્તિરીય-બ્રાહ્મણમ્

## ॥ દ્વિતીયં અષ્ટકમ્ ॥

॥ શ્રી ગુરુભ્યો નમઃ ॥ હરિઃ ઓ(૪)મ્ ॥

### દ્વિતીયાષ્ટકે પ્રથમઃ પ્રપાઠકઃ ૧

૧ અંગિરસો વૈ સત્રમાસત । તેષાં પૃશ્નિર્ઘર્મધુગાસીત્ । સર્જીષેણાજીવત્
। તેઽબ્રુવન્ । કસ્મૈ નુ સત્રમાસ્મહે । યેઽસ્યા ઓષધીર્ન જનયામ
ઇતિ । તે દિવોવૃષ્ટિમસૃજન્ત । યાવન્તઃ સ્તોકા અવાપદ્યન્ત ।
તાવતીરોષધયોઽજાયન્ત । તા જાતાઃ પિતરો વિષેણાલિમ્પન્ ॥ ૨। ૧। ૧। ૧॥
૨ તાસાં જગ્ધ્વા રુપ્યન્ત્યૈત્ । તેઽબ્રુવન્ । ક ઇદમિત્થમકરિતિ । વયં
ભાગધેયમિચ્છમાના ઇતિ પિતરોઽબ્રુવન્ । કિં વો ભાગધેયમિતિ ।
અગ્નિહોત્ર એવ નોઽપ્યસ્ત્વિત્યબ્રુવન્ । તેભ્ય એતદ્ભાગધેયં પ્રાયચ્છન્
। યદ્ધુત્વા નિમાર્ષ્ટિ । તતો વૈ ત ઓષધીરસ્વદયન્ । ય એવં વેદ ॥ ૨। ૧। ૧। ૨॥
૩ સ્વદન્તેઽસ્મા ઓષધયઃ । તે વત્સમુપાવાસૃજન્ । ઇદં નો હવ્યં
પ્રદાપયેતિ । સોઽબ્રવીદ્વરં વૃણૈ । દશ મા રાત્રીર્જાતં ન દોહન્ ।
આસઙ્ગવં માત્રા સહ ચરાણીતિ । તસ્માદ્વત્સં જાતં દશ રાત્રીર્ન
દુહન્તિ । આસઙ્ગવં માત્રા સહ ચરતિ । વારે વૃતગ્ગ્ હ્યસ્ય ।
તસ્માદ્વત્સઁ સઁસૃષ્ટધયઁ રુદ્રો ઘાતુકઃ । અતિ હિ સન્ધાં
ધયતિ ॥ ૨। ૧। ૧। ૩॥ અલિમ્પન્વેદ ઘાતુક એકં ચ ॥ ૧॥
૪ પ્રજાપતિરગ્નિમસૃજત । તં પ્રજા અન્વસૃજ્યન્ત । તમભાગ
ઉપાસ્ત । સોઽસ્ય પ્રજાભિરપાક્રામત્ । તમવરુરુત્સમાનોઽન્વૈત્ ।
તમવરુધન્નાશક્નોત્ । સ તપોઽતપ્યત । સોઽગ્નિરુપારમતાતાપિ વૈ સ્ય

પ્રજાપતિરિતિ । સ રરાટાદુદમૃષ્ટ ॥ ૨। ૧। ૨। ૧॥

૫ તદ્ભૃતમભવત્ । તસ્માદ્યસ્ય દક્ષિણતઃ કેશા ઉન્મૃષ્ટાઃ । તાં
જ્યેષ્ઠલક્ષ્મી પ્રાજાપત્યેત્યાહુઃ । યદ્રરાટાદુદમૃષ્ટ । તસ્માદ્રરાટે
કેશા ન સન્તિ । તદગ્નૌ પ્રાગૃહ્ણાત્ । તદ્વ્યચિકિત્સત્ । જુહવાની ૩ મા હૌષા
૩ મિતિ । તદ્વિચિકિત્સાયૈ જન્મ । ય એવં વિદ્વાન્વિચિકિત્સતિ ॥ ૨। ૧। ૨। ૨॥

૬ વસીય એવ ચેતયતે । તં વાગભ્યવદજ્જુહુધીતિ । સોઽબ્રવીત્ ।
કસ્ત્વમસીતિ । સ્વૈવ તે વાગિત્યબ્રવીત્ । સોઽજુહોત્સ્વાહેતિ । તત્સ્વાહાકારસ્ય
જન્મ । ય એવꣳ સ્વાહાકારસ્ય જન્મ વેદ । કરોતિ સ્વાહાકારેણ
વીર્યમ્ । યસ્યૈવં વિદુષઃ સ્વાહાકારેણ જુહ્વતિ ॥ ૨। ૧। ૨। ૩॥

૭ ભોગાયૈવાસ્ય હુતં ભવતિ । તસ્યા આહુત્યૈ પુરુષમસૃજત ।
દ્વિતીયમજુહોત્ । સોઽશ્વમસૃજત । તૃતીયમજુહોત્ । સ ગામસૃજત ।
ચતુર્થમજુહોત્ । સોઽવિમસૃજત । પઞ્ચમમજુહોત્ । સોઽજામસૃજત ॥
૨। ૧। ૨। ૪॥

૮ સોઽગ્નિરબિભેત્ । આહુતીભિર્વૈ માઽઽપ્નોતીતિ । સ પ્રજાપતિં
પુનઃ પ્રાવિશત્ । તં પ્રજાપતિરબ્રવીત્ । જાયસ્વેતિ । સોઽબ્રવીત્ । કિં
ભાગધેયમભિજનિષ્ય ઇતિ । તુભ્યમેવેદꣳ હૂયાતા ઇત્યબ્રવીત્ ।
સ એતદ્ભાગધેયમભ્યજાયત । યદગ્નિહોત્રમ્ ॥ ૨। ૧। ૨। ૫॥

૯ તસ્માદગ્નિહોત્રમુચ્યતે । તદ્ધૂયમાનમાદિત્યોઽબ્રવીત્ । મા હૌષીઃ ।
ઉભયોર્વૈ નાવેતદિતિ । સોઽગ્નિરબ્રવીત્ । કથં નૌ હોષ્યન્તીતિ
। સાયમેવ તુભ્યં જુહવન્ । પ્રાતર્મહ્યમિત્યબ્રવીત્ । તસ્માદગ્નયે
સાયꣳ હૂયતે । સૂર્યાય પ્રાતઃ ॥ ૨। ૧। ૨। ૬॥

૧૦ આગ્નેયી વૈ રાત્રિઃ । ઐન્દ્રમહઃ । યદનુદિતે સૂર્યે પ્રાતર્જુહુયાત્ ।
ઉભયમેવાગ્નેયરꣳ સ્યાત્ । ઉદિતે સૂર્યે પ્રાતર્જુહોતિ । તથાઽગ્નયે
સાયꣳ હૂયતે । સૂર્યાય પ્રાતઃ । રાત્રિં વા અનુ પ્રજાઃ પ્રજાયન્તે । અહ્ના
પ્રતિતિષ્ઠન્તિ । યત્સાયં જુહોતિ ॥

૧૧ પ્રૈવ તેન જાયતે । ઉદિતે સૂર્યે પ્રાતર્જુહોતિ । પ્રત્યેવ તેન તિષ્ઠતિ ।

પ્રજાપતિરકામયત પ્રજાયેયેતિ । સ એતદગ્નિહોત્રં મિથુનમપશ્યત્ ।
તદુદિતે સૂર્યેઽજુહોત્ । યજુષાઽન્યત્ । તૂષ્ણીમન્યત્ । તતો વૈ સ પ્રાજાયત ।
યસ્યૈવં વિદુષ ઉદિતે સૂર્યેઽગ્નિહોત્રં જુહ્વતિ ॥ ૨। ૧। ૨। ૮॥

૧૨ પ્રૈવ જાયતે । અથો યથા દિવા પ્રજાનન્નેતિ । તાદૃગેવ તત્ ।
અથો ખલ્વાહુઃ । યસ્ય વૈ દ્વૌ પુણ્યૌ ગૃહે વસતઃ । યસ્તયોરન્યꣳ
રાધયત્યન્યં ન । ઉભૌ વાવ સ તાવૃચ્છતીતિ । અગ્નિં વાવાદિત્યઃ સાયં
પ્રવિશતિ । તસ્માદગ્નિર્દૂરાન્નક્તં દદૃશે । ઉભે હિ તેજસી સંપદ્યેતે ॥
૨। ૧। ૨। ૯॥

૧૩ ઉદ્યન્તં વાવાદિત્યમગ્નિરનુસમારોહતિ । તસ્માદ્ધૂમ એવાગ્નેર્દિવા દદૃશે
। યદગ્નયે સાયં જુહુયાત્ । આ સૂર્યાય વૃશ્ચેત । યત્સૂર્યાય પ્રાતર્જુહુયાત્
। આઽગ્નયે વૃશ્ચેત । દેવતાભ્યઃ સમદં દધ્યાત્ । અગ્નિર્જ્યોતિર્જ્યોતિઃ
સૂર્યઃ સ્વાહેત્યેવ સાયꣳ હોતવ્યમ્ । સૂર્યો જ્યોતિર્જ્યોતિરગ્નિઃ સ્વાહેતિ
પ્રાતઃ । તથોભાભ્યાꣳસાયꣳ હૂયતે ॥ ૨। ૧। ૨। ૧૦॥

૧૪ ઉભાભ્યાં પ્રાતઃ । ન દેવતાભ્યઃ સમદં દધાતિ । અગ્નિર્જ્યોતિરિત્યાહ ।
અગ્નિર્વૈ રેતોધાઃ । પ્રજા જ્યોતિરિત્યાહ । પ્રજા એવાસ્મૈ પ્રજનયતિ । સૂર્યો
જ્યોતિરિત્યાહ । પ્રજાસ્વેવ પ્રજાતાસુ રેતો દધાતિ । જ્યોતિરગ્નિઃ સ્વાહેત્યાહ ।
પ્રજા એવ પ્રજાતા અસ્યાં પ્રતિષ્ઠાપયતિ ॥ ૨। ૧। ૨। ૧૧॥

૧૫ તૂષ્ણીમુત્તરામાહુતિં જુહોતિ । મિથુનત્વાય પ્રજાત્યૈ । યદુદિતે સૂર્યે
પ્રાતર્જુહુયાત્ । યથાઽતિથયે પ્રદ્રુતાય શૂન્યાયાવસથાયાહાર્યꣳ
હરન્તિ । તાદૃગેવ તત્ । ક્વાહ તતસ્તદ્ભવતીત્યાહુઃ । યત્સ ન વેદ ।
યસ્મૈ તદ્ધરન્તીતિ । તસ્માદ્યદૌષસં જુહોતિ । તદેવ સંપ્રતિ ।
અથો યથા પ્રાર્થમૌષસં પરિવેવેષ્ટિ । તાદૃગેવ તત્ ॥ ૨। ૧। ૨। ૧૨॥

અમૃષ્ટ વિચિકિત્સતિ જુહ્વત્યજામસૃજતાગ્નિહોત્રꣳ સૂર્યાય
પ્રાતર્જુહોતિ જુહ્વતિ સંપદ્યેતે હૂયતે સ્થાપયતિ સંપ્રતિ દ્વે ચ ॥ ૨॥

૧૬ રુદ્રો વા એષઃ । યદગ્નિઃ । પત્ની સ્થાલી । યન્મધ્યેઽગ્નેરધિશ્રયેત્ ।
રુદ્રાય પત્નીમપિ દધ્યાત્ । પ્રમાયુકા સ્યાત્ । ઉદીચોઽઙ્ગારાન્નિરૂહ્યાધિશ્રયતિ

। પત્નિયૈ ગોપીથાય । વ્યન્તાન્કરોતિ । તથા પત્ન્યપ્રમાયુકા ભવતિ ॥ ૨। ૧। ૩। ૧॥

૧૭ ઘર્મો વા એષોઽશાન્તઃ । અહરહઃ પ્રવૃજ્યતે । યદગ્નિહોત્રમ્ ।
પ્રતિષિઞ્ચેત્ પશુકામસ્ય । શાન્તમિવ હિ પશવ્યમ્ । ન પ્રતિષિઞ્ચેદ્
બ્રહ્મવર્ચસકામસ્ય । સમિદ્ધમિવ હિ બ્રહ્મવર્ચસમ્ । અથો ખલુ ।
પ્રતિષિચ્યમેવ । યત્પ્રતિષિઞ્ચતિ ॥ ૨। ૧। ૩। ૨॥

૧૮ તત્પશવ્યમ્ । યજ્જુહોતિ । તદ્બ્રહ્મવર્ચસિ । ઉભયમેવાકઃ
। પ્રચ્યુતં વા એતદસ્માલ્લોકાત્ । અગતં દેવલોકમ્ । યચ્છૃતꣳ
હવિરનભિઘારિતમ્ । અભિદ્યોતયતિ । અભ્યેવૈનદ્ધારયતિ । અથો
દેવત્રૈવૈનદ્ગમયતિ ॥ ૨। ૧। ૩। ૩॥

૧૯ પર્યગ્નિ કરોતિ । રક્ષસામપહત્યૈ । ત્રિઃ પર્યગ્નિ કરોતિ । ત્ર્યાવૃદ્ધિ
યજ્ઞઃ । અથો મેધ્યત્વાય । યત્પ્રાચીનમુદ્વાસયેત્ । યજમાનꣳ
શુચાઽર્પયેત્ । યદ્દક્ષિણા । પિતૃદેવત્યગ્ગ્ સ્યાત્ । યત્પ્રત્યક્ ॥ ૨। ૧। ૩। ૪॥

૨૦ પત્નીꣳ શુચાઽર્પયેત્ । ઉદીચીનમુદ્વાસયતિ । એષા વૈ
દેવમનુષ્યાણાꣳ શાન્તા દિક્ । તામેવૈનદનૂદ્વાસયતિ શાન્ત્યૈ । વર્ત્મ
કરોતિ । યજ્ઞસ્ય સંતત્યૈ । નિષ્ટપતિ । ઉપૈવ તથ્સ્તૃણાતિ । ચતુરુન્નયતિ
। ચતુષ્પાદઃ પશવઃ ॥ ૨। ૧। ૩। ૫॥

૨૧ પશૂનેવાવરુન્ધે । સર્વાન્પૂર્ણાનુન્નયતિ । સર્વે હિ પુણ્યા રાદ્ધાઃ ।
અનૂચ ઉન્નયતિ । પ્રજાયા અનૂચીનત્વાય । અનૂચ્યેવાસ્ય પ્રજાઽર્ધુકા
ભવતિ ॥
સંમૃશતિ વ્યાવૃત્ત્યૈ । નાહોષ્યન્નુપસાદયેત્ । યદહોષ્યન્નુપસાદયેત્ ।
યથાઽન્યસ્મા ઉપનિધાય ॥ ૨। ૧। ૩। ૬॥

૨૨ અન્યસ્મૈ પ્રયચ્છતિ । તાદૃગેવ તત્ । આઽસ્મૈ વૃશ્ચેત । યદેવ
ગાર્હપત્યેઽધિશ્રયતિ । તેન ગાર્હપત્યં પ્રીણાતિ । અગ્નિરબિભેત્ । આહુતયો
માઽત્યેષ્યન્તીતિ । સ એતાꣳ સમિધમપશ્યત્ । તામાઽધત્ત । તતો વા
અગ્નાવાહુતયોઽધ્રિયન્ત ॥ ૨। ૧। ૩। ૭॥

૨૩ યદેનꣳ સમયચ્છત્ । તથ્સમિધઃ સમિત્ત્વમ્ । સમિધમાદધાતિ ।

સમેવૈનં યચ્છતિ । આહુતીનાં ધૃત્યૈ । અથો અગ્નિહોત્રમેવેધ્મવત્કરોતિ
। આહુતીનાં પ્રતિષ્ઠિત્યૈ । બ્રહ્મવાદિનો વદન્તિ । યદેકાꣳ
સમિધમાધાય દ્વે આહુતી જુહોતિ । અથ કસ્યાꣳસમિધિ
દ્વિતીયામાહુતિં જુહોતીતિ ॥ ૨। ૧। ૩। ૮॥

૨૪ યદ્વે સમિધાવાદધ્યાત્ । ભ્રાતૃવ્યમસ્મૈ જનયેત્ । એકાꣳસમિધમાધાય
। યજુષાઽન્યામાહુતિં જુહોતિ । ઉભે એવ સમિદ્વતી આહુતી જુહોતિ । નાસ્મૈ
ભ્રાતૃવ્યં જનયતિ । આદીપ્તાયાં જુહોતિ । સમિદ્ધમિવ હિ બ્રહ્મવર્ચસમ્
। અથો યથાઽતિથિં જ્યોતિષ્કૃત્વા પરિવેવેષ્ટિ । તાદૃગેવ તત્ ।
ચતુરુન્નયતિ । દ્વિર્જુહોતિ । તસ્માદ્દ્વિપાચ્ચતુષ્પાદમત્તિ । અથો દ્વિપદ્યેવ
ચતુષ્પદઃ પ્રતિષ્ઠાપયતિ ॥ ૨। ૧। ૩। ૯॥ ભવતિ પ્રતિષિઞ્ચતિ
ગમયતિ પ્રત્યક્પશવ ઉપનિધાયાધ્રિયન્તેતિ તચ્ચત્વારિ ચ ॥ ૩॥

૨૫ ઉત્તરાવતીં વૈ દેવા આહુતિમજુહવુઃ । અવાચીમસુરાઃ । તતો દેવા
અભવન્ । પરાઽસુરાઃ । યં કામયેત વસીયાન્થ્સ્યાદિતિ । કનીયસ્તસ્ય
પૂર્વꣳહુત્વા । ઉત્તરં ભૂયો જુહુયાત્ । એષા વા ઉત્તરાવત્યાહુતિઃ ।
તાં દેવા અજુહવુઃ । તતસ્તેઽભવન્ ॥ ૨। ૧। ૪। ૧॥

૨૬ યસ્યૈવં જુહ્વતિ । ભવત્યેવ । યં કામયેત પાપીયાન્થ્સ્યાદિતિ ।
ભૂયસ્તસ્ય પૂર્વꣳહુત્વા । ઉત્તરં કનીયો જુહુયાત્ । એષા વા અવાચ્યાહુતિઃ ।
તામસુરા અજુહવુઃ । તતસ્તે પરાઽભવન્ । યસ્યૈવં જુહ્વતિ । પરૈવ ભવતિ ॥
૨। ૧। ૪। ૨॥

૨૭ હુત્વોપસાદયત્યજામિત્વાય । અથો વ્યાવૃત્ત્યૈ । ગાર્હપત્યં પ્રતીક્ષતે
। અનનુધ્યાયિનમેવૈનં કરોતિ । અગ્નિહોત્રસ્ય વૈ સ્થાણુરસ્તિ । તં ય
ઋચ્છેત્ । યજ્ઞસ્થાણુમૃચ્છેત્ । એષ વા અગ્નિહોત્રસ્ય સ્થાણુઃ ।
યત્પૂર્વાઽઽહુતિઃ । તાં યદુત્તરયાઽભિજુહુયાત્ ॥ ૨। ૧। ૪। ૩॥

૨૮ યજ્ઞસ્થાણુમૃચ્છેત્ । અતિહાય પૂર્વામાહુતિં જુહોતિ ।
યજ્ઞસ્થાણુમેવ પરિવૃણક્તિ । અથો ભ્રાતૃવ્યમેવાપ્ત્વાઽતિક્રામતિ ।
અવાચીનꣳસાયમુપમાર્ષ્ટિ । રેત એવ તદ્દધાતિ । ઊર્ધ્વં પ્રાતઃ ।
પ્રજનયત્યેવ તત્ । બ્રહ્મવાદિનો વદન્તિ । ચતુરુન્નયતિ ॥ ૨। ૧। ૪। ૪॥

૨૯ દ્વિર્જુહોતિ । અથ ક્વ દ્વે આહુતી ભવત ઇતિ । અગ્નૌ વૈશ્વાનર ઇતિ
બ્રૂયાત્ । એષ વા અગ્નિર્વૈશ્વાનરઃ । યદ્બ્રાહ્મણઃ । હુત્વા દ્વિઃ પ્રાશ્નાતિ ।
અગ્નાવેવ વૈશ્વાનરે દ્વે આહુતી જુહોતિ । દ્વિર્જુહોતિ । દ્વિર્નિમાર્ષ્ટિ । દ્વિઃ
પ્રાશ્નાતિ ॥ ૨। ૧। ૪। ૫॥

૩૦ ષટ્થ્સંપદ્યન્તે । ષડ્વા ઋતવઃ । ઋતૂનેવ પ્રીણાતિ ॥
બ્રહ્મવાદિનો વદન્તિ । કિંદેવત્યમગ્નિહોત્રમિતિ । વૈશ્વદેવમિતિ
બ્રૂયાત્ । યદ્યજુષા જુહોતિ । તદૈન્દ્રાગ્નમ્ । યત્તૂષ્ણીમ્ । તત્પ્રાજાપત્યમ્ ॥
૨। ૧। ૪। ૬॥

૩૧ યન્નિમાર્ષ્ટિ । તદોષધીનામ્ । યદ્વિતીયમ્ । તત્પિતૃણામ્ । યત્પ્રાશ્નાતિ ।
તદ્ગર્ભાણામ્ । તસ્માદ્ગર્ભા અનશ્નન્તો વર્ધન્તે । યદાચામતિ । તન્મનુષ્યાણામ્
। ઉદઙ્પર્યાવૃત્યાચામતિ ॥ ૨। ૧। ૪। ૭॥

૩૨ આત્મનો ગોપીથાય । નિર્ણેનેક્તિ શુદ્ધ્યૈ । નિષ્ટપતિ સ્વગાકૃત્યૈ ।
ઉદ્દિશતિ । સપ્તર્ષીનેવ પ્રીણાતિ । દક્ષિણા પર્યાવર્તતે । સ્વમેવ
વીર્યમનુપર્યાવર્તતે । તસ્માદ્દક્ષિણોઽર્ધ આત્મનો વીર્યાવત્તરઃ ।
અથો આદિત્યસ્યૈવાવૃતમનુપર્યાવર્તતે । હુત્વોપસમિન્ધે ॥ ૨। ૧। ૪। ૮॥

૩૩ બ્રહ્મવર્ચસસ્ય સમિદ્ધ્યૈ । ન બર્હિરનુપ્રહરેત્ । અસગ્ગ્સ્થિતો
વા એષ યજ્ઞઃ । યદગ્નિહોત્રમ્ । યદનુપ્રહરેત્ । યજ્ઞં વિચ્છિન્દ્યાત્
। તસ્માન્નાનુપ્રહૃત્યમ્ । યજ્ઞસ્ય સંતત્યૈ । અપો નિનયતિ ।
અવભૃથસ્યૈવ રૂપમકઃ ॥ ૨। ૧। ૪। ૯॥ અભવન્ભવતિ
જુહુયાન્નયતિ માર્ષ્ટિ દ્વિઃ પ્રાશ્નાતિ પ્રાજાપત્યમાચામતીન્ધેઽકઃ ॥ ૪॥

૩૪ બ્રહ્મવાદિનો વદન્તિ । અગ્નિહોત્રપ્રાયણા યજ્ઞાઃ । કિં
પ્રાયણમગ્નિહોત્રમિતિ । વથ્સો વા અગ્નિહોત્રસ્ય પ્રાયણમ્ । અગ્નિહોત્રં
યજ્ઞાનામ્ । તસ્ય પૃથિવી સદઃ । અન્તરિક્ષમાગ્નીદ્ધ્રમ્ ।
દ્યૌર્હવિર્ધાનમ્ । દિવ્યા આપઃ પ્રોક્ષણયઃ । ઓષધયો બર્હિઃ ॥ ૨। ૧। ૫। ૧॥

૩૫ વનસ્પતય ઇધ્મઃ । દિશઃ પરિધયઃ । આદિત્યો યૂપઃ । યજમાનઃ પશુઃ
। સમુદ્રોઽવભૃથઃ । સંવથ્સરઃ સ્વગાકારઃ । તસ્માદાહિતાગ્નેઃ

સર્વમેવ બર્હિષ્યં દત્તં ભવતિ । યથ્સાયં જુહોતિ । રાત્રિમેવ
તેન દક્ષિણ્યાં કુરુતે । યત્પ્રાતઃ ॥ ૨। ૧। ૫। ૨॥

૩૬ અહરેવ તેન દક્ષિણ્યં કુરુતે । યત્તતો દદાતિ । સા દક્ષિણા ।
યાવન્તો વૈ દેવા અહુતમાદન્ । તે પરાઽભવન્ । ત એતદગ્નિહોત્રꣳ
સર્વસ્યૈવ સમવદાયાજુહવુઃ । તસ્માદાહુઃ । અગ્નિહોત્રં વૈ દેવા ગૃહાણાં
નિષ્કૃતિમપશ્યન્નિતિ । યથ્સાયં જુહોતિ । રાત્રિયા એવ તદ્ધુતાદ્યાય ॥
૨। ૧। ૫। ૩॥

૩૭ યજમાનસ્યાપરાભાવાય । યત્પ્રાતઃ । અહ્ન એવ તદ્ધુતાદ્યાય ।
યજમાનસ્યાપરાભાવાય । યત્તતોઽશ્નાતિ । હુતમેવ તત્ । દ્વયોઃ પયસા
જુહુયાત્પશુકામસ્ય । એતદ્વા અગ્નિહોત્રં મિથુનમ્ । ય એવં વેદ । પ્ર
પ્રજયા પશુભિર્મિથુનૈર્જાયતે ॥ ૨। ૧। ૫। ૪॥

૩૮ ઇમામેવ પૂર્વયા દુહે । અમૂમુત્તરયા । અધિશ્રિત્યોત્તરમાનયતિ ।
યોનાવેવ તદ્રેતઃ સિઞ્ચતિ પ્રજનને । આજ્યેન જુહુયાત્તેજસ્કામસ્ય । તેજો વા
આજ્યમ્ । તેજસ્વ્યેવ ભવતિ । પયસા પશુકામસ્ય । એતદ્વૈ પશૂનાꣳ
રૂપમ્ । રૂપેણૈવાસ્મૈ પશૂનવરુન્ધે ॥ ૨। ૧। ૫। ૫॥

૩૯ પશુમાનેવ ભવતિ । દધ્નેન્દ્રિયકામસ્ય । ઇન્દ્રિયં વૈ દધિ ।
ઇન્દ્રિયાવ્યેવ ભવતિ । યવાગ્વા ગ્રામકામસ્યૌષધા વૈ મનુષ્યાઃ ।
ભાગધેયેનૈવાસ્મૈ સજાતાનવરુન્ધે । ગ્રામ્યેવ ભવતિ । અયજ્ઞો
વા એષઃ । યોઽસામા ॥ ૨। ૧। ૫। ૬॥

૪૦ ચતુરુન્નયતિ । ચતુરક્ષરꣳ રથન્તરમ્ । રથન્તરસ્યૈષ વર્ણઃ
। ઉપરીવ હરતિ । અન્તરિક્ષં વામદેવ્યમ્ । વામદેવ્યસ્યૈષ વર્ણઃ ।
દ્વિર્જુહોતિ । દ્વ્યક્ષરં બૃહત્ । બૃહત એષ વર્ણઃ । અગ્નિહોત્રમેવ
તથ્સામન્વત્કરોતિ ॥ ૨। ૧। ૫। ૭॥

૪૧ યો વા અગ્નિહોત્રસ્યોપસદો વેદ । ઉપૈનમુપસદો નમન્તિ । વિન્દત
ઉપસત્તારમ્ । ઉન્નીયોપસાદયતિ । પૃથિવીમેવ પ્રીણાતિ । હોષ્યન્નુપસાદયતિ
। અન્તરિક્ષમેવ પ્રીણાતિ । હુત્વોપસાદયતિ । દિવમેવ પ્રીણાતિ । એતા વા

અગ્નિહોત્રસ્યોપસદઃ ॥ ૨। ૧। ૫। ૮॥

૪૨ ય એવં વેદ । ઉપૈનમુપસદો નમન્તિ । વિન્દત ઉપસત્તારમ્ । યો વા
અગ્નિહોત્રસ્યાશ્રાવિતં પ્રત્યાશ્રાવિત ૐ હોતારં બ્રહ્માણં વષટ્કારં
વેદ । તસ્ય ત્વેવ હુતમ્ । પ્રાણો વા અગ્નિહોત્રસ્યાશ્રાવિતમ્ । અપાનઃ
પ્રત્યાશ્રાવિતમ્ । મનો હોતા । ચક્ષુર્બ્રહ્મા । નિમેષો વષટ્કારઃ ॥ ૨। ૧। ૫। ૯॥

૪૩ ય એવં વેદ । તસ્ય ત્વેવ હુતમ્ । સાયંયાવાનશ્ચ વૈ દેવાઃ
પ્રાતર્યાવાણશ્ચાગ્નિહોત્રિણો ગૃહમાગચ્છન્તિ । તાન્, યન્ન તર્પયેત્ ।
પ્રજયાઽસ્ય પશુભિર્વિતિષ્ઠેરન્ । યત્તર્પયેત્ । તૃપ્તા એનં પ્રજયા
પશુભિસ્તર્પયેયુઃ । સજૂર્દેવૈઃ સાયં યાવભિરિતિ સાય ૐ સંમૃશતિ ।
સજૂર્દેવૈઃ પ્રાતર્યાવભિરિતિ પ્રાતઃ । યે ચૈવ દેવાઃ સાયં યાવાનો
યે ચ પ્રાતર્યાવાણઃ ॥ ૨। ૧। ૫। ૧૦॥

૪૪ તાનેવોભયાગ્સ્તર્પયતિ । ત એનં તૃપ્તાઃ પ્રજયા પશુભિસ્તર્પયન્તિ ।
અરુણો હ સ્માહૌપવેશિઃ । અગ્નિહોત્ર એવાહ ૐ સાયં પ્રાતર્વજ્રં
ભ્રાતૃવ્યેભ્યઃ પ્રહરામિ । તસ્માન્મત્પાપીયા ૐ સો ભ્રાતૃવ્યા ઇતિ ।
ચતુરુન્નયતિ । દ્વિર્જુહોતિ । સમિથ્સપ્તમી । સપ્તપદા શક્વરી ।
શાક્વરો વજ્રઃ । અગ્નિહોત્ર એવ તથ્સાયં પ્રાતર્વજ્રં યજમાનો
ભ્રાતૃવ્યાય પ્રહરતિ । ભવત્યાત્મના । પરાઽસ્ય ભ્રાતૃવ્યો ભવતિ
॥ ૨। ૧। ૫। ૧૧॥ બર્હિઃ પ્રાતર્હુતાધાય જાયતે રુન્ધેઽસામા કરોત્યેતા વા
અગ્નિહોત્રસ્યોપસદો વષટ્કારશ્ચ પ્રાતર્યાવાણો વજ્રસ્ત્રીણિ ચ ॥ ૫॥

૪૫ પ્રજાપતિરકામયતાત્મન્વન્મે જાયેતેતિ । સોઽજુહોત્ । તસ્યાત્મન્વદજાયત ।
અગ્નિર્વાયુરાદિત્યઃ । તેઽબ્રુવન્ । પ્રજાપતિરહૌષીદાત્મન્વન્મે જાયેતેતિ ।
તસ્ય વયમજનિષ્મહિ । જાયતાં ન આત્મન્વદિતિ તેઽજુહવુઃ । પ્રાણાનામગ્નિઃ
। તનુવૈ વાયુઃ ॥ ૨। ૧। ૬। ૧॥

૪૬ ચક્ષુષ આદિત્યઃ । તેષા ૐ હુતાદજાયત ગૌરેવ । તસ્યૈ પયસિ
વ્યાયચ્છન્ત । મમ હુતાદજનિ મમેતિ । તે પ્રજાપતિં પ્રશ્નમાયન્
। સ આદિત્યોઽગ્નિમબ્રવીત્ । યતરો નૌ જયાત્ । તન્નૌ સહાસદિતિ ।
કસ્યૈકોઽહૌષીદિતિ પ્રજાપતિરબ્રવીત્કસ્યૈ ક ઇતિ । પ્રાણાનામહમિત્યગ્નિઃ

॥ ૨। ૧। ૬। ૨॥

૪૭ તનુવા અહમિતિ વાયુઃ । ચક્ષુષોઽહમિત્યાદિત્યઃ । ય એવ
પ્રાણાનામહૌષીત્ । તસ્ય હુતાદજનીતિ । અગ્નેર્હુતાદજનીતિ
। તદગ્નિહોત્રસ્યાગ્નિહોત્રત્વમ્ । ગૌર્વા અગ્નિહોત્રમ્ । ય એવં વેદ
ગૌરગ્નિહોત્રમિતિ । પ્રાણાપાનાભ્યામેવાગ્નિ ँ સમર્ધયતિ । અવ્યર્ધુકઃ
પ્રાણાપાનાભ્યાં ભવતિ ॥ ૨। ૧। ૬। ૩॥

૪૮ ય એવં વેદ । તૌ વાયુરબ્રવીત્ । અનુ મા ભજતમિતિ । યદેવ
ગાર્હપત્યેઽધિશ્રિત્યાહવનીયમભ્યુદ્દ્રવાન્ । તેન ત્વાં પ્રીણાનિત્યબ્રૂતામ્
। તસ્માદ્યદ્ગાર્હપત્યેઽધિશ્રિત્યાહવનીયમભ્યુદ્દ્રવતિ । વાયુમેવ
તેન પ્રીણાતિ । પ્રજાપતિર્દેવતાઃ સૃજમાનઃ । અગ્નિમેવ દેવતાનાં
પ્રથમમસૃજત । સોઽન્યદાલમ્ભ્યમવિત્ત્વા ॥ ૨। ૧। ૬। ૪॥

૪૯ પ્રજાપતિમભિપર્યાવર્તત । સ મૃત્યોરબિભેત્ । સોઽમુમાદિત્યમાત્મનો
નિરમિમીત । ત ँ હુત્વા પરાઙ્ પર્યાવર્તત । તતો વૈ સ મૃત્યુમપાજયત્
। અપમૃત્યું જયતિ । ય એવં વેદ । તસ્માદ્યસ્યૈવં વિદુષઃ
। ઉતૈકાહમુત દ્વ્યહં ન જુહ્વતિ । હુતમેવાસ્ય ભવતિ । અસૌ
હ્યાદિત્યોઽગ્નિહોત્રમ્ ॥ ૨। ૧। ૬। ૫॥ તનુવૈ વાયુરગ્નિર્ભવત્યવિત્ત્વા
ભવત્યેકં ચ ॥ ૬॥

૫૦ રૌદ્રં ગવિ । વાયવ્યમુપસૃષ્ટમ્ । આશ્વિનં દુહ્યમાનમ્ । સૌમ્યં
દુગ્ધમ્ । વારુણમધિશ્રિતમ્ । વૈશ્વદેવા ભિન્દવઃ । પૌષ્ણમુદન્તમ્
। સારસ્વતં વિષ્યન્દમાનમ્ । મૈત્ર ँ શરઃ । ધાતુરુદ્વાસિતમ્ ।
બૃહસ્પતેરુન્નીતમ્ । સવિતુઃ પ્રક્રાન્તમ્ । દ્યાવાપૃથિવ્યગ્ગ્ં હ્રિયમાણમ્
। ઐન્દ્રાગ્નમુપસન્નમ્ । અગ્નેઃ પૂર્વાઽઽહુતિઃ । પ્રજાપતેરુત્તરા । ઐન્દ્ર ँ
હુતમ્ ॥ ૨। ૧। ૭। ૧॥ ઉદ્વાસિત ँ સપ્ત ચ ॥ ૭॥

૫૧ દક્ષિણત ઉપસૃજતિ । પિતૃલોકમેવ તેન જયતિ । પ્રાચીમાવર્તયતિ ।
દેવલોકમેવ તેન જયતિ । ઉદીચીમાવૃત્ય દોગ્ધિ । મનુષ્યલોકમેવ
તેન જયતિ । પૂર્વૌ દુહ્યાજ્જ્યેષ્ઠસ્ય જ્યૈષ્ઠિનેયસ્ય । યો વા ગતશ્રીઃ
સ્યાત્ । અપરૌ દુહ્યાત્કનિષ્ઠસ્ય કાનિષ્ઠિનેયસ્ય । યો વા બુભૂષેત્ ॥ ૨। ૧। ૮। ૧॥

૫૨ ન સંમૃશતિ । પાપવસ્યસસ્ય વ્યાવૃત્ત્યૈ । વાયવ્યં વા
એતદુપસૃષ્ટમ્ । આશ્વિનં દુહ્યમાનમ્ । મૈત્રં દુગ્ધમ્ । અર્યમ્ણ
ઉદ્વાસ્યમાનમ્ । ત્વાષ્ટ્રમુન્નીયમાનમ્ । બૃહસ્પતેરુન્નીતમ્ । સવિતુઃ
પ્રક્રાન્તમ્ । દ્યાવાપૃથિવ્યગ્ંહ્રિયમાણમ્ ॥ ૨। ૧। ૮। ૨॥

૫૩ ઐન્દ્રાગ્નમુપસાદિતમ્ । સર્વાભ્યો વા એષ દેવતાભ્યો જુહોતિ । યોઽગ્નિહોત્રં
જુહોતિ । યથા ખલુ વૈ ધેનું તીર્થે તર્પયતિ । એવમગ્નિહોત્રી
યજમાનં તર્પયતિ । તૃપ્યતિ પ્રજયા પશુભિઃ । પ્ર સુવર્ગં લોકં જાનાતિ
। પશ્યતિ પુત્રમ્ । પશ્યતિ પૌત્રમ્ । પ્ર પ્રજયા પશુભિર્મિથુનૈર્જાયતે
। યસ્યૈવં વિદુષોઽગ્નિહોત્રં જુહ્વતિ । ય઼ ઉ ચૈનદેવં વેદ ॥ ૨। ૧। ૮। ૩॥ બુભૂષેદ્ધ્રિયમાણં જાયતે દ્વે ચ ॥
૮॥

૫૪ ત્રયો વૈ પ્રૈયમેધા આસન્ । તેષાં ત્રિરેકોઽગ્નિહોત્રમજુહોત્ । દ્વિરેકઃ
। સકૃદેકઃ । તેષાં યસ્ત્રિરજુહોત્ । સ ઋચાઽજુહોત્ । યો દ્વિઃ । સ યજુષા ।
યઃ સકૃત્ । સ તૂષ્ણીમ્ ॥ ૨। ૧। ૯। ૧॥

૫૫ યશ્ચ યજુષાઽજુહોદ્યશ્ચ તૂષ્ણીમ્ । તાવુભાવાર્ધ્નુતામ્ ।
તસ્માદ્યજુષાઽઽહુતિઃ પૂર્વા હોતવ્યા । તૂષ્ણીમુત્તરા । ઉભે એવર્દ્ધી
અવરુન્ધે । અગ્નિર્જ્યોતિર્જ્યોતિરગ્નિઃ સ્વાહેતિ સાયં જુહોતિ । રેત એવ
તદ્ધાતિ । સૂર્‍યો જ્યોતિર્જ્યોતિઃ સૂર્યઃ સ્વાહેતિ પ્રાતઃ । રેત એવ હિતં
પ્રજનયતિ । રેતો વા એતસ્ય હિતં ન પ્રજાયતે ॥ ૨। ૧। ૯। ૨॥

૫૬ યસ્યાગ્નિહોત્રમહુતꣳ સૂર્‍યોઽભ્યુદેતિ । યદ્યન્તે સ્યાત્ । ઉન્નીય
પ્રાઙુદાદ્રવેત્ । સ ઉપસાદ્યાતમિતોરાસીત । સ યદા તામ્યેત્ । અથ ભૂઃ સ્વાહેતિ
જુહુયાત્ । પ્રજાપતિર્વૈ ભૂતઃ । તમેવોપાસરત્ । સ એવૈનં તત ઉન્નયતિ ।
નાર્તિમાર્ચ્છતિ યજમાનઃ ॥ ૨। ૧। ૯। ૩॥ તૂષ્ણીં જાયતે યજમાનઃ ॥ ૯॥

૫૭ યદગ્નિમુદ્ધરતિ । વસવસ્તર્હ્યગ્નિઃ । તસ્મિન્ યસ્ય તથાવિધે
જુહ્વતિ । વસુષ્વેવાસ્યાગ્નિહોત્રꣳ હુતં ભવતિ । નિહિતો
ધૂપાયઞ્છેતે । રુદ્રાસ્તર્હ્યગ્નિઃ । તસ્મિન્ યસ્ય તથાવિધે જુહ્વતિ ।
રુદ્રેષ્વેવાસ્યાગ્નિહોત્રꣳ હુતં ભવતિ । પ્રથમમિધ્મમર્ચિરાલભતે
। આદિત્યાસ્તર્હ્યગ્નિઃ ॥ ૨। ૧। ૧૦। ૧॥

૫૮ તસ્મિન્ યસ્ય તથાવિધે જુહ્વતિ । આદિત્યેષ્વેવાસ્યાગ્નિહોત્રꣳ હુતં
ભવતિ । સર્વ એવ સર્વશ ઇધ્મ આદીપ્તો ભવતિ । વિશ્વે દેવાસ્તર્હ્યગ્નિઃ ।
તસ્મિન્ યસ્ય તથાવિધે જુહ્વતિ । વિશ્વેષ્વેવાસ્ય દેવેષ્વગ્નિહોત્રꣳ
હુતં ભવતિ । નિતરામર્ચિરુપાવૈતિ લોહિનીકેવ ભવતિ । ઇન્દ્રસ્તર્હ્યગ્નિઃ
। તસ્મિન્ યસ્ય તથાવિધે જુહ્વતિ । ઇન્દ્ર એવાસ્યાગ્નિહોત્રꣳ હુતં
ભવતિ ॥ ૨। ૧। ૧૦। ૨॥

૫૯ અઙ્ગારા ભવન્તિ । તેભ્યોઽઙ્ગારેભ્યોઽર્ચિરુદેતિ । પ્રજાપતિસ્તર્હ્યગ્નિઃ
। તસ્મિન્ યસ્ય તથાવિધે જુહ્વતિ । પ્રજાપતાવેવાસ્યાગ્નિહોત્રꣳ
હુતં ભવતિ । શરોઽઙ્ગારા અધ્યૂહન્તે । બ્રહ્મ તર્હ્યગ્નિઃ ।
તસ્મિન્ યસ્ય તથાવિધે જુહ્વતિ । બ્રહ્મન્નેવાસ્યાગ્નિહોત્રꣳ
હુતં ભવતિ । વસુષુ રુદ્રેષ્વાદિત્યેષુ વિશ્વેષુ દેવેષુ । ઇન્દ્રે
પ્રજાપતૌ બ્રહ્મન્ । અપરિવર્ગમેવાસ્યૈતાસુ દેવતાસુ હુતં ભવતિ
। યસ્યૈવં વિદુષોઽગ્નિહોત્રં જુહ્વતિ । ય ઉ ચૈનદેવં વેદ ॥ ૨। ૧। ૧૦। ૩॥ આદિત્યાસ્તર્હ્યગ્નિરિન્દ્ર
એવાસ્યાગ્નિહોત્રꣳ હુતં ભવતિ
દેવેષુ ચત્વારિ ચ ॥ ૧૦॥ યદગ્નિં નિહિતઃ પ્રથમꣳ સર્વ એવ
નિતરામઙ્ગારાઃ શરોઽઙ્ગારા બ્રહ્મ વસુષ્વષ્ટૌ ॥

૬૦ ઋતં ત્વા સત્યેન પરિષિઞ્ચામીતિ સાયં પરિષિઞ્ચતિ । સત્યં
ત્વર્તેન પરિષિઞ્ચામીતિ પ્રાતઃ । અગ્નિર્વા ઋતમ્ । અસાવાદિત્યઃ સત્યમ્
। અગ્નિમેવ તદાદિત્યેન સાયં પરિષિઞ્ચતિ । અગ્નિનાઽઽદિત્યં પ્રાતઃ
સઃ । યાવદહોરાત્રે ભવતઃ । તાવદસ્ય લોકસ્ય । નાર્તિર્ન રિષ્ટિઃ । નાન્તો
ન પર્યન્તોઽસ્તિ । યસ્યૈવં વિદુષોઽગ્નિહોત્રં જુહ્વતિ । ય ઉ ચૈનદેવં
વેદ ॥ ૨। ૧। ૧૧। ૧॥ અસ્તિ દ્વે ચ ॥ ૧૧॥

અંગિરસઃ પ્રજાપતિરગ્નિꣳ રુદ્ર ઉત્તરાવતીં
બ્રહ્મવાદિનોઽગ્નિહોત્રપ્રાયણા યજ્ઞાઃ પ્રજાપતિરકામયતાત્મન્વદ્ગૌદ્રં ગવિ
દક્ષિણતસ્ત્રયો વૈ યદગ્નિમૃતં ત્વા સત્યેનૈકાદશ ॥ ૧૧॥

અંગિરસઃ પ્રૈવ તેન પશૂનેવ યન્નિમાર્ષ્ટિ યો વા અગ્નિહોત્રસ્યોપસદો
દક્ષિણતષ્ષષ્ટિઃ ॥ ૬૦॥

અંગિરસો ય ઉચૈનદેવં વેદ ॥

## દ્વિતીયાષ્ટકે દ્વિતીયઃ પ્રપાઠકઃ ૨

૧ પ્રજાપતિરકામયત પ્રજાઃ સૃજેયેતિ । સ એતં દશહોતારમપશ્યત્ ।
તં મનસાઽનુદ્રુત્ય દર્ભસ્તમ્બેઽજુહોત્ । તતો વૈ સ પ્રજા અસૃજત ।
તા અસ્માથ્સૃષ્ટા અપાક્રામન્ । તા ગ્રહેણાગૃહ્ણાત્ । તદ્ગ્રહસ્ય ગ્રહત્વમ્ । યઃ
કામયેત પ્રજાયેયેતિ । સ દશહોતારં મનસાઽનુદ્રુત્ય દર્ભસ્તમ્બે
જુહુયાત્ । પ્રજાપતિર્વૈ દશહોતા ॥ ૨। ૨। ૧। ૧॥

૨ પ્રજાપતિરેવ ભૂત્વા પ્રજાયતે । મનસા જુહોતિ । મન ઇવ હિ પ્રજાપતિઃ
। પ્રજાપતેરાપ્ત્યૈ । પૂર્ણયા જુહોતિ । પૂર્ણ ઇવ હિ પ્રજાપતિઃ ।
પ્રજાપતેરાપ્ત્યૈ । ન્યૂનયા જુહોતિ । ન્યૂનાદ્ધિ પ્રજાપતિઃ પ્રજા અસૃજત
। પ્રજાનાꣳ સૃષ્ટ્યૈ ॥ ૨। ૨। ૧। ૨॥

૩ દર્ભસ્તમ્બે જુહોતિ । એતસ્માદ્વૈ યોનેઃ પ્રજાપતિઃ પ્રજા અસૃજત ।
યસ્માદેવ યોનેઃ પ્રજાપતિઃ પ્રજા અસૃજત । તસ્માદેવ યોનેઃ પ્રજાયતે
। બ્રાહ્મણો દક્ષિણત ઉપાસ્તે । બ્રાહ્મણો વૈ પ્રજાનામુપદ્રષ્ટા ।
ઉપદ્રષ્ટુમત્યેવ પ્રજાયતે । ગ્રહો ભવતિ । પ્રજાનાꣳસૃષ્ટાનાં
ધૃત્યૈ । યં બ્રાહ્મણં વિદ્યાં વિદ્વાꣳસં યશો નર્છેત્ ॥ ૨। ૨। ૧। ૩॥

૪ સોઽરણ્યં પરેત્ય । દર્ભસ્તમ્બમુદ્ગ્રથ્ય । બ્રાહ્મણં દક્ષિણતો
નિષાદ્ય । ચતુર્હોતૄન્વ્યાચક્ષીત । એતદ્વૈ દેવાનાં પરમં ગુહ્યં
બ્રહ્મ । યચ્ચતુર્હોતારઃ । તદેવ પ્રકાશં ગમયતિ । તદેનં પ્રકાશં
ગતમ્ । પ્રકાશં પ્રજાનાં ગમયતિ । દર્ભસ્તમ્બમુદ્ગ્રથ્ય વ્યાચષ્ટે
॥ ૨। ૨। ૧। ૪॥

૫ અગ્નિવાન્, વૈ દર્ભસ્તમ્બઃ । અગ્નિવત્યેવ વ્યાચષ્ટે ।
બ્રાહ્મણો દક્ષિણત ઉપાસ્તે । બ્રાહ્મણો વૈ પ્રજાનામુપદ્રષ્ટા ।
ઉપદ્રષ્ટુમત્યેવૈનં યશ ઋચ્છતિ । ઈશ્વરં તં યશોઽર્તોરિત્યાહુઃ ।
યસ્યાન્તે વ્યાચષ્ટ ઇતિ । વરસ્તસ્મૈ દેયઃ । યદેવૈનં તત્રોપનમતિ

। તદેવાવરુન્ધે ॥ ૨। ૨। ૧। ૫॥

૬ અગ્નિમાદધાનો દશહોત્રાઽરણિમવદધ્યાત્ । પ્રજાતમેવૈનમાધત્તે
। તેનૈવોદ્દ્રુત્યાગ્નિહોત્રં જુહુયાત્ । પ્રજાતમેવૈનજ્જુહોતિ ।
હવિર્નિર્વપ્સ્યન્દશહોતારં વ્યાચક્ષીત । પ્રજાતમેવૈનં નિર્વપતિ ।
સામિધેનીરનુવક્ષ્યન્દશહોતારં વ્યાચક્ષીત । સામિધેનીરેવ
સૃષ્ટ્વાઽઽરભ્ય પ્રતનુતે । અથો યજ્ઞો વૈ દશહોતા । યજ્ઞમેવ
તનુતે ॥ ૨। ૨। ૧। ૬॥

૭ અભિચરન્દશહોતારં જુહુયાત્ । નવ વૈ પુરુષે પ્રાણાઃ । નાભિર્દશમી ।
સપ્રાણમેવૈનમભિચરતિ । એતાવદ્વૈ પુરુષસ્ય સ્વમ્ । યાવત્પ્રાણાઃ ।
યાવદેવાસ્યાસ્તિ । તદભિચરતિ । સ્વકૃત ઇરિણે જુહોતિ પ્રદરે વા ।
એતદ્વા અસ્યૈ નિરૃતિગૃહીતમ્ । નિરૃતિગૃહીત એવૈનં નિરૃત્યા ગ્રાહયતિ ।
યદ્વાચઃ ક્રૂરમ્ । તેન વષટ્કરોતિ । વાચ એવૈનં ક્રૂરેણ પ્રવૃશ્ચતિ
। તાજગાર્તિમાર્ચ્છતિ ॥ ૨। ૨। ૧। ૭॥ દશહોતા સૃષ્ટ્યા ઋચ્છેદ્વ્યાચષ્ટે
રુન્ધ એવ તનુતે નિરૃતિગૃહીતં પઞ્ચ ચ ॥ ૧॥

૮ પ્રજાપતિરકામયત દર્શપૂર્ણમાસૌ સૃજેયેતિ । સ એતં ચતુર્હોતારમપશ્યત્
। તં મનસાઽનુદ્રુત્યાહવનીયેઽજુહોત્ । તતો વૈ સ દર્શપૂર્ણમાસાવસૃજત
। તાવસ્માથ્સૃષ્ટાવપાક્રામતામ્ । તૌ ગ્રહેણાગૃહ્ણાત્ । તદ્ગ્રહસ્ય ગ્રહત્વમ્ ।
દર્શપૂર્ણમાસાવાલભમાનઃ । ચતુર્હોતારં મનસાઽનુદ્રુત્યાહવનીયે
જુહુયાત્ । દર્શપૂર્ણમાસાવેવ સૃષ્ટ્વાઽઽરભ્ય પ્રતનુતે ॥ ૨। ૨। ૨। ૧॥

૯ ગ્રહો ભવતિ । દર્શપૂર્ણમાસયોઃ સૃષ્ટયોર્ધૃત્યૈ ।
સોઽકામયત ચાતુર્માસ્યાનિ સૃજેયેતિ । સ એતં પઞ્ચહોતારમપશ્યત્ । તં
મનસાઽનુદ્રુત્યાહવનીયેઽજુહોત્ । તતો વૈ સ ચાતુર્માસ્યાન્યસૃજત ।
તાન્યસ્માથ્સૃષ્ટાન્યપાક્રામન્ । તાનિ ગ્રહેણાગૃહ્ણાત્ । તદ્ગ્રહસ્ય ગ્રહત્વમ્ ।
ચાતુર્માસ્યાન્યાલભમાનઃ ॥ ૨। ૨। ૨। ૨॥

૧૦ પઞ્ચહોતારં મનસાઽનુદ્રુત્યાહવનીયે જુહુયાત્ । ચાતુર્માસ્યાન્યેવ
સૃષ્ટ્વાઽઽરભ્ય પ્રતનુતે । ગ્રહો ભવતિ । ચાતુર્માસ્યાનાꣳ
સૃષ્ટાનાં ધૃત્યૈ । સોઽકામયત પશુબન્ધꣳ સૃજેયેતિ । સ

એતꣳ ષડ્ઢોતારમપશ્યત્ । તં મનસાઽનુદ્રુત્યાહવનીયેઽજુહોત્ । તતો વૈ સ પશુબન્ધમસૃજત । સોઽસ્માથ્સૃષ્ટોઽપાક્રામત્ । તં ગ્રહેણાગૃહ્ણાત્ ॥

૨। ૨। ૨। ૩॥

૧૧ તદ્ગ્રહસ્ય ગ્રહત્વમ્ । પશુબન્ધેન યક્ષ્યમાણઃ । ષડ્ઢોતારં મનસાઽનુદ્રુત્યાહવનીયે જુહુયાત્ । પશુબન્ધમેવ સૃષ્ટ્વાઽઽરભ્ય પ્રતનુતે । ગ્રહો ભવતિ । પશુબન્ધસ્ય સૃષ્ટસ્ય ધૃત્યૈ । સોઽકામયત સૌમ્યમધ્વરꣳ સૃજેયેતિ । સ એતꣳ સપ્તહોતારમપશ્યત્ । તં મનસાઽનુદ્રુત્યાહવનીયેઽજુહોત્ । તતો વૈ સ સૌમ્યમધ્વરમસૃજત ॥ ૨। ૨। ૨। ૪॥

૧૨ સોઽસ્માથ્સૃષ્ટોઽપાક્રામત્ । તં ગ્રહેણાગૃહ્ણાત્ । તદ્ગ્રહસ્ય ગ્રહત્વમ् । દીક્ષિષ્યમાણઃ । સપ્તહોતારં મનસાઽનુદ્રુત્યાહવનીયે જુહુયાત્ । સૌમ્યમેવાધ્વરꣳ સૃષ્ટ્વાઽઽરભ્ય પ્રતનુતે । ગ્રહો ભવતિ । સૌમ્યસ્યાધ્વરસ્ય સૃષ્ટસ્ય ધૃત્યૈ । દેવેભ્યો વૈ યજ્ઞો ન પ્રાભવત્ । તમેતાવચ્છઃ સમભરન્ ॥ ૨। ૨। ૨। ૫॥

૧૩ યથ્સંભારાઃ । તતો વૈ તેભ્યો યજ્ઞઃ પ્રાભવત્ । યથ્સંભારા ભવન્તિ । યજ્ઞસ્ય પ્રભૂત્યૈ । આતિથ્યમાસાદ્ય વ્યાચષ્ટે । યજ્ઞમુખં વા આતિથ્યમ્ । મુખત એવ યજ્ઞꣳ સંભૃત્ય પ્રતનુતે । અયજ્ઞો વા એષઃ । યોઽપત્નીકઃ । ન પ્રજાઃ પ્રજાયેરન્ । પત્નીર્વ્યાચષ્ટે । યજ્ઞમેવાકઃ । પ્રજાનાં પ્રજનનાય । ઉપસથ્સુ વ્યાચષ્ટે । એતદ્વૈ પત્નીનામાયતનમ્ । સ્વ એવૈના આયતનેઽવકલ્પયતિ ॥ ૨। ૨। ૨। ૬॥ તનુત આલભમાનોઽગૃહ્ણાદસૃજતાભરઞ્જાયેરન્ષટ્ચ ॥ ૨॥

૧૪ પ્રજાપતિરકામયત પ્રજાયેયેતિ । સ તપોઽતપ્યત । સ ત્રિવૃતꣳ સ્તોમમસૃજત । તં પઞ્ચદશસ્તોમો મધ્યત ઉદતૃણત્ । તૌ પૂર્વપક્ષશ્ચાપરપક્ષશ્ચાભવતામ્ । પૂર્વપક્ષં દેવા અન્વસૃજ્યન્ત । અપરપક્ષમન્વસુરાઃ । તતો દેવા અભવન્ । પરાઽસુરાઃ । યં કામયેત વસીયાન્થ્સ્યાદિતિ ॥ ૨। ૨। ૩। ૧॥

૧૫ તં પૂર્વપક્ષે યાજયેત્ । વસીયાનેવ ભવતિ । યં કામયેત

પાપીયાન્થ્સ્યાદિતિ । તમપરપક્ષે યાજયેત્ । પાપીયાનેવ ભવતિ । તસ્માત્
પૂર્વપક્ષોઽપરપક્ષાત્ કરુણ્યતરઃ । પ્રજાપતિર્વૈ દશહોતા ।
ચતુર્હોતા પઞ્ચહોતા । ષડ્ઢોતા સપ્તહોતા । ઋતવઃ સંવથ્સરઃ ॥ ૨। ૨। ૩। ૨॥

૧૬ પ્રજાઃ પશવ ઇમે લોકાઃ । ય એવં પ્રજાપતિં બહોર્ભૂયાꣳસં
વેદ । બહોરેવ ભૂયાન્ભવતિ ॥

પ્રજાપતિર્દેવાસુરાનસૃજત । સ ઇન્દ્રમપિ નાસૃજત । તં દેવા અબ્રુવન્
। ઇન્દ્રં નો જનયેતિ । સોઽબ્રવીત્ । યથાઽહં યુષ્માગ્સ્તપસાઽસૃક્ષિ ।
એવમિન્દ્રં જનયધ્વમિતિ ॥ ૨। ૨। ૩। ૩॥

૧૭ તે તપોઽતપ્યન્ત । ત આત્મન્નિન્દ્રમપશ્યન્ । તમબ્રુવન્ । જાયસ્વેતિ । સોઽબ્રવીત્
। કિં ભાગધેયમભિ જનિષ્ય ઇતિ । ઋતૂન્થ્સંવથ્સરમ્ । પ્રજાઃ પશૂન્
। ઇમાન્ લોકાનિત્યબ્રુવન્ । તં વૈ માઽઽહુત્યા પ્રજનયતેત્યબ્રવીત્ ॥ ૨। ૨। ૩। ૪॥

૧૮ તં ચતુર્હોત્રા પ્રાજનયન્ । યઃ કામયેત વીરો મ આજાયેતેતિ । સ
ચતુર્હોતારં જુહુયાત્ । પ્રજાપતિર્વૈ ચતુર્હોતા । પ્રજાપતિરેવ ભૂત્વા
પ્રજાયતે । જજનદિન્દ્રમિન્દ્રિયાય સ્વાહેતિ ગ્રહેણ જુહોતિ । આઽસ્ય વીરો
જાયતે । વીરꣳ હિ દેવા એતયાઽઽહુત્યા પ્રાજનયન્ । આદિત્યાશ્ચાંગિરસશ્ચ
સુવર્ગે લોકેઽસ્પર્ધન્ત । વયં પૂર્વે સુવર્ગં લોકમિયામ વયં પૂર્વ
ઇતિ ॥ ૨। ૨। ૩। ૫॥

૧૯ ત આદિત્યા એતં પઞ્ચહોતારમપશ્યન્ । તં પુરા
પ્રાતરનુવાકાદાગ્નીધ્રેઽજુહવુઃ । તતો વૈ તે પૂર્વે સુવર્ગં લોકમાયન્ । યઃ
સુવર્ગકામઃ સ્યાત્ । સ પઞ્ચહોતારં પુરા પ્રાતરનુવાકાદાગ્નીધ્રે જુહુયાત્ ।
સંવથ્સરો વૈ પઞ્ચહોતા । સંવથ્સરઃ સુવર્ગો લોકઃ । સંવથ્સર
એવર્તુષુ પ્રતિષ્ઠાય । સુવર્ગં લોકમેતિ । તેઽબ્રુવન્નંગિરસ આદિત્યાન્
॥ ૨। ૨। ૩। ૬॥

૨૦ ક્વ સ્થ । ક્વ વઃ સદ્ભ્યો હવ્યં વક્ષ્યામ ઇતિ । છન્દઃસ્વિત્યબ્રુવન્
। ગાયત્રિયાં ત્રિષ્ટુભિ જગત્યામિતિ । તસ્માચ્છન્દઃસુ સદ્ભ્ય
આદિત્યેભ્યઃ । આંગીરસીઃ પ્રજા હવ્યં વહન્તિ । વહન્ત્યસ્મૈ પ્રજા બલિમ્ ।
ઐનમપ્રતિખ્યાતં ગચ્છતિ । ય એવં વેદ । દ્વાદશ માસાઃ પઞ્ચર્તવઃ ।

ત્રય ઇમે લોકાઃ । અસાવાદિત્ય એકવિꣳશઃ । એતસ્મિન્વા એષ શ્રિતઃ ।
એતસ્મિન્પ્રતિષ્ઠિતઃ । ય એવમેતરꣳ શ્રિતં પ્રતિષ્ઠિતં વેદ । પ્રત્યેવ
તિષ્ઠતિ ॥ ૨। ૨। ૩। ૭॥ સ્યાદિતિ સંવત્સરો જનયધ્વમિતીત્યબ્રવીત્પૂર્વ
ઇત્યાદિત્યાનૃતવષ્ષટ્ચ ॥ ૩॥

૨૧ પ્રજાપતિરકામયત પ્રજાયેયેતિ । સ એતં દશહોતારમપશ્યત્ । તેન
દશધાઽઽત્માનં વિધાય । દશહોત્રાઽતપ્યત । તસ્ય ચિત્તિઃ સ્રુગાસીત્
। ચિત્તમાજ્યમ્ । તસ્યૈતાવત્યેવ વાગાસીત્ । એતાવાન્ યજ્ઞક્રતુઃ । સ
ચતુર્હોતારમસૃજત । સોઽનન્દત્ ॥ ૨। ૨। ૪। ૧॥

૨૨ અસૃક્ષિ વા ઇમમિતિ । તસ્ય સોમો હવિરાસીત્ । સ ચતુર્હોત્રાઽતપ્યત
। સોઽતામ્યત્ । સ ભૂરિતિ વ્યાહરત્ । સ ભૂમિમસૃજત । અગ્નિહોત્રં
દર્શપૂર્ણમાસૌ યજૂꣳષિ । સ દ્વિતીયમતપ્યત । સોઽતામ્યત્ । સ ભુવ
ઇતિ વ્યાહરત્ ॥ ૨। ૨। ૪। ૨॥

૨૩ સોઽન્તરિક્ષમસૃજત । ચાતુર્માસ્યાનિ સામાનિ । સ
તૃતીયમતપ્યત । સોઽતામ્યત્ । સ સુવરિતિ વ્યાહરત્ । સ દિવમસૃજત ।
અગ્નિષ્ટોમમુક્થ્યમતિરાત્રમૃચઃ । એતા વૈ વ્યાહૃતય ઇમે લોકાઃ ।
ઇમાન્ખલુ વૈ લોકાનનુ પ્રજાઃ પશવશ્છન્દાꣳસિ પ્રાજાયન્ત । ય
એવમેતાઃ પ્રજાપતેઃ પ્રથમા વ્યાહૃતીઃ પ્રજાતા વેદ ॥ ૨। ૨। ૪। ૩॥

૨૪ પ્ર પ્રજયા પશુભિર્મિથુનૈર્જાયતે । સ પઞ્ચહોતારમસૃજત । સ
હવિર્નાવિન્દત । તસ્મૈ સોમસ્તનુવં પ્રાયચ્છત્ । એતત્તે હવિરિતિ ।
સ પઞ્ચહોત્રાઽતપ્યત । સોઽતામ્યત્ । સ પ્રત્યઙ્ઙબાધત । સોઽસુરાનસૃજત ।
તદસ્યાપ્રિયમાસીત્ ॥ ૨। ૨। ૪। ૪॥

૨૫ તદ્દુર્વર્ણꣳ હિરણ્યમભવત્ । તદ્દુર્વર્ણસ્ય હિરણ્યસ્ય જન્મ ।
સ દ્વિતીયમતપ્યત । સોઽતામ્યત્ । સ પ્રાઙબાધત । સ દેવાનસૃજત । તદસ્ય
પ્રિયમાસીત્ । તથ્સુવર્ણꣳ હિરણ્યમભવત્ । તથ્સુવર્ણસ્ય હિરણ્યસ્ય
જન્મ । ય એવꣳ સુવર્ણસ્ય હિરણ્યસ્ય જન્મ વેદ ॥ ૨। ૨। ૪। ૫॥

૨૬ સુવર્ણ આત્મના ભવતિ । દુર્વર્ણોઽસ્ય ભ્રાતૃવ્યઃ ।
તસ્માથ્સુવર્ણꣳ હિરણ્યં ભાર્યમ્ । સુવર્ણ એવ ભવતિ । ઐનં

પ્રિયં ગચ્છતિ નાપ્રિયમ્ । સ સપ્તહોતારમસૃજત । સ સપ્તહોત્રૈવ સુવર્ગં લોકમૈત્ । ત્રિણવેન સ્તોમેનૈભ્યો લોકેભ્યોઽસુરાન્પ્રાણુદત । ત્રયસ્ત્રિँશેન પ્રત્યતિષ્ઠત્ । એકવિँશેન રુચમધત્ત ॥
૨। ૨। ૪। ૬॥

૨૭ સપ્તદશેન પ્રાજાયત । ય એવં વિદ્વાન્થ્સોમેન યજતે । સપ્તહોત્રૈવ સુવર્ગં લોકમેતિ । ત્રિણવેન સ્તોમેનૈભ્યો લોકેભ્યો ભ્રાતૃવ્યાન્પ્રણુદતે । ત્રયસ્ત્રિँશેન પ્રતિતિષ્ઠતિ । એકવિँશેન રુચં ધત્તે । સપ્તદશેન પ્રજાયતે । તસ્માથ્સપ્તદશઃ સ્તોમો ન નિર્હૃત્યઃ । પ્રજાપતિર્વૈ સપ્તદશઃ । પ્રજાપતિમેવ મધ્યતો ધત્તે પ્રજાત્યૈ ॥ ૨। ૨। ૪। ૭॥ અનન્દદ્ભુવ ઇતિ વ્યાહરદ્વેદાસીદ્વેદાધત્ત પ્રજાત્યૈ ॥ ૪॥

૨૮ દેવા વૈ વરુણમયાજયન્ । સ યસ્યૈ યસ્યૈ દેવતાયૈ દક્ષિણામનયત્ । તામવ્લીનાત્ । તેઽબ્રુવન્ । વ્યાવૃત્ય પ્રતિગૃહ્ણામ । તથા નો દક્ષિણા ન વ્લેષ્યતીતિ । તે વ્યાવૃત્ય પ્રત્યગૃહ્ણન્ । તતો વૈ તાન્દક્ષિણાં નાવ્લીનાત્ । ય એવં વિદ્વાન્વ્યાવૃત્ય દક્ષિણાં પ્રતિગૃહ્ણાતિ । નૈનં દક્ષિણા વ્લીનાતિ ॥ ૨। ૨। ૫। ૧॥

૨૯ રાજા ત્વા વરુણો નયતુ દેવિ દક્ષિણેઽગ્નયે હિરણ્યમિત્યાહ । આગ્નેયં વૈ હિરણ્યમ્ । સ્વયૈવૈનદ્દેવતયા પ્રતિગૃહ્ણાતિ । સોમાય વાસ ઇત્યાહ । સૌમ્યં વૈ વાસઃ । સ્વયૈવૈનદ્દેવતયા પ્રતિગૃહ્ણાતિ । રુદ્રાય ગામિત્યાહ । રૌદ્રી વૈ ગૌઃ । સ્વયૈવૈનાં દેવતયા પ્રતિગૃહ્ણાતિ । વરુણાયાશ્વમિત્યાહ ॥ ૨। ૨। ૫। ૨॥

૩૦ વારુણો વા અશ્વઃ । સ્વયૈવૈનં દેવતયા પ્રતિગૃહ્ણાતિ । પ્રાજાપતયે પુરુષમિત્યાહ । પ્રાજાપત્યો વૈ પુરુષઃ । સ્વયૈવૈનં દેવતયા પ્રતિગૃહ્ણાતિ । મનવે તલ્પમિત્યાહ । માનવો વૈ તલ્પઃ । સ્વયૈવૈનં દેવતયા પ્રતિગૃહ્ણાતિ । ઉત્તાનાયાઙ્ગીરસાયાન ઇત્યાહ । ઇયં વા ઉત્તાન આઙ્ગીરસઃ ॥ ૨। ૨। ૫। ૩॥

૩૧ અનયૈવૈનત્પ્રતિ ગૃહ્ણાતિ । વૈશ્વાનર્યર્ચા રથં પ્રતિગૃહ્ણાતિ ।

વૈશ્વાનરો વૈ દેવતયા રથઃ । સ્વયૈવૈનં દેવતયા પ્રતિગૃહ્ણાતિ
। તેનામૃતત્વમશ્યામિત્યાહ । અમૃતમેવાઽઽત્મન્ધત્તે । વયો દાત્ર
ઇત્યાહ । વય એવૈનં કૃત્વા । સુવર્ગં લોકં ગમયતિ । મયો મહ્યમસ્તુ
પ્રતિગ્રહીત્ર ઇત્યાહ ॥ ૨। ૨। ૫। ૪॥

૩૨ યદ્વૈ શિવમ્ । તન્મયઃ । આત્મન એવૈષા પરીત્તિઃ । ક ઇદં કસ્મા
અદાદિત્યાહ । પ્રજાપતિર્વૈ કઃ । સ પ્રજાપતયે દદાતિ । કામઃ કામાયેત્યાહ ।
કામેન હિ દદાતિ । કામેન પ્રતિગૃહ્ણાતિ । કામો દાતા કામઃ પ્રતિગ્રહીતેત્યાહ
॥ ૨। ૨। ૫। ૫॥

૩૩ કામો હિ દાતા । કામઃ પ્રતિગ્રહીતા । કામꣳ સમુદ્રમાવિશેત્યાહ । સમુદ્ર
ઇવ હિ કામઃ । નેવ હિ કામસ્યાન્તોઽસ્તિ । ન સમુદ્રસ્ય । કામેન ત્વા
પ્રતિગૃહ્ણામીત્યાહ । યેન કામેન પ્રતિગૃહ્ણાતિ । સ એવૈનમમુષ્મિં
લ્લોકે કામ આગચ્છતિ । કામૈતત્તે એષા તે કામ દક્ષિણેત્યાહ । કામ એવ
તદ્યજમાનોઽમુષ્મિં લ્લોકે દક્ષિણામિચ્છતિ । ન પ્રતિગ્રહીતરિ । ય એવં
વિદ્વાન્દક્ષિણાં પ્રતિગૃહ્ણાતિ । અનૃણામેવૈનાં પ્રતિગૃહ્ણાતિ ॥ ૨। ૨। ૫। ૬॥ વ્લીનાત્યશ્વમિત્યાહાઙ્ગીરસઃ
પ્રતિગ્રહીત્ર ઇત્યાહ પ્રતિગ્રહીતેત્યાહ
દક્ષિણેત્યાહ ચત્વારિ ચ ॥ ૫॥

૩૪ અન્તો વા એષ યજ્ઞસ્ય । યદ્દશમમહઃ । દશમેઽહન્થ્સર્પરાજ્ઞિયા
ઋગ્ભિઃ સ્તુવન્તિ । યજ્ઞસ્યૈવાન્તં ગત્વા । અન્નાદ્યમવરુન્ધતે
। તિસૃભિઃ સ્તુવન્તિ । ત્રય ઇમે લોકાઃ । એભ્ય એવ
લોકેભ્યોઽન્નાદ્યમવરુન્ધતે । પૃશ્નિવતીર્ભવન્તિ । અન્નં વૈ પૃશ્નિ ॥ ૨। ૨। ૬। ૧॥

૩૫ અન્નમેવાવરુન્ધતે । મનસા પ્રસ્તૌતિ । મનસોદ્ગાયતિ । મનસા
પ્રતિહરતિ । મન ઇવ હિ પ્રજાપતિઃ । પ્રજાપતેરાપ્ત્યૈ । દેવા વૈ સર્પાઃ
। તેષામિયꣳ રાજ્ઞી । યથ્સર્પરાજ્ઞિયા ઋગ્ભિઃ સ્તુવન્તિ । અસ્યામેવ
પ્રતિતિષ્ઠન્તિ ॥ ૨। ૨। ૬। ૨॥

૩૬ ચતુર્હોતૄન્ હોતા વ્યાચષ્ટે । સ્તુતમનુશꣳસતિ શાન્ત્યૈ । અન્તો
વા એષ યજ્ઞસ્ય । યદ્દશમમહઃ । એતત્ખલુ વૈ દેવાનાં પરમં
ગુહ્યં બ્રહ્મ । યચ્ચતુર્હોતારઃ । દશમેઽહગ્ગ્શ્ચતુર્હોતૄન્વ્યાચષ્ટે ।

યજ્ઞસ્યૈવાન્તં ગત્વા । પરમં દેવાનાં ગુહ્યં બ્રહ્માવરુન્ધે । તદેવ
પ્રકાશં ગમયતિ ॥ ૨। ૨। ૬। ૩॥
૩૭ તદેનં પ્રકાશં ગતમ્ । પ્રકાશં પ્રજાનાં ગમયતિ ।
વાચં યચ્છતિ । યજ્ઞસ્ય ધૃત્યૈ । યજમાનદેવત્યં
વા અહઃ । ભ્રાતૃવ્યદેવત્યા રાત્રિઃ । અહ્ના રાત્રિં ધ્યાયેત્ ।
ભ્રાતૃવ્યસ્યૈવ તલ્લોકં વૃઙ્ક્તે । યદ્દિવા વાચં વિસૃજેત્
। અહર્ભ્રાતૃવ્યાયોચ્છિꣳષેત્ । યન્નક્તં વિસૃજેત્ । રાત્રિં
ભ્રાતૃવ્યાયોચ્છિꣳષેત્ । અધિવૃક્ષસૂર્યે વાચં વિસૃજતિ ।
એતાવન્તમેવાસ્મૈ લોકમુચ્છિꣳષતિ । યાવદાદિત્યોઽસ્તમેતિ ॥ ૨। ૨। ૬। ૪॥ પૃશ્નિ તિષ્ઠન્તિ ગમયતિ
શિꣳષેત્પઞ્ચ ચ ॥ ૬॥
૩૮ પ્રજાપતિઃ પ્રજા અસૃજત । તાઃ સૃષ્ટાઃ સમશ્લિષ્યન્ । તા
રૂપેણાનુપ્રાવિશત્ । તસ્માદાહુઃ । રૂપં વૈ પ્રજાપતિરિતિ ।
તા નામ્નાઽનુપ્રાવિશત્ । તસ્માદાહુઃ । નામ વૈ પ્રજાપતિરિતિ ।
તસ્માદપ્યાઽમિત્રૌ સંગત્ય । નામ્ના ચેદ્ધ્વયેતે ॥ ૨। ૨। ૭। ૧॥
૩૯ મિત્રમેવ ભવતઃ । પ્રજાપતિર્દેવાસુરાનસૃજત । સ ઇન્દ્રમપિ નાસૃજત
। તં દેવા અબ્રુવન્ । ઇન્દ્રં નો જનયેતિ । સ આત્મન્નિન્દ્રમપશ્યત્ । તમસૃજત
। તં ત્રિષ્ટુગ્વીર્યં ભૂત્વાઽનુપ્રાવિશત્ । તસ્ય વજ્રઃ પઞ્ચદશો હસ્ત
આપદ્યત । તેનોદય્યાસુરાનભ્યભવત્ ॥ ૨। ૨। ૭। ૨॥
૪૦ ય એવં વેદ । અભિ ભ્રાતૃવ્યાન્ભવતિ । તે દેવા અસુરૈર્વિજિત્ય । સુવર્ગં
લોકમાયન્ । તેઽમુષ્મિં લ્લોકે વ્યક્ષુધ્યન્ । તેઽબ્રુવન્ । અમુતઃ પ્રદાનં
વા ઉપજિજીવિમેતિ । તે સપ્તહોતારં યજ્ઞં વિધાયાયાસ્યમ્ । આંગીરસં
પ્રાહિણ્વન્ । એતેનામુત્ર કલ્પયેતિ ॥ ૨। ૨। ૭। ૩॥
૪૧ તસ્ય વા ઇયં ક્લૃપ્તિઃ । યદિદં કિંચ । ય એવં વેદ । કલ્પતેઽસ્મૈ ।
સ વા અયં મનુષ્યેષુ યજ્ઞઃ સપ્તહોતા । અમુત્ર સદ્ભ્યો દેવેભ્યો
હવ્યં વહતિ । ય એવં વેદ । ઉપૈનં યજ્ઞો નમતિ । સોઽમન્યત । અભિ
વા ઇમેઽસ્માં લ્લોકાદમું લોકં કમિષ્યન્ત ઇતિ । સ વાચસ્પતે હૃદિતિ
વ્યાહરત્ । તસ્માત્પુત્રો હૃદયમ્ । તસ્માદસ્માલ્લોકાદમું લોકં નાભિકામયન્તે

। પુત્રો હિ હૃદયમ્ ॥ ૨। ૨। ૭। ૪॥ હ્યેતે અભવત્કલ્પયેતીતિ ચત્વારિ ચ ॥ ૭॥

૪૨ દેવા વૈ ચતુર્હોતૃભિર્યજ્ઞમતન્વત । તે વિ પાપ્મના ભ્રાતૃવ્યેણાજયન્ત
। અભિ સુવર્ગં લોકમજયન્ । ય એવં વિદ્વાગ્શ્ચતુર્હોતૃભિર્યજ્ઞં
તનુતે । વિ પાપ્મના ભ્રાતૃવ્યેણ જયતે । અભિ સુવર્ગં લોકં જયતિ ।
ષડ્ઢોત્રા પ્રાયણીયમા સાદયતિ । અમુષ્મૈ વૈ લોકાય ષડ્ઢોતા । ઘ્નન્તિ
ખલુ વા એતથ્સોમમ્ । યદભિષુણ્વન્તિ ॥ ૨। ૨। ૮। ૧॥

૪૩ ઋજુધૈવૈનમમું લોકં ગમયતિ । ચતુર્હોત્રાઽઽતિથ્યમ્ । યશો વૈ
ચતુર્હોતા । યશ એવાત્મન્ધત્તે । પઞ્ચહોત્રા પશુમુપસાદયતિ । સુવર્ગ્યો
વૈ પઞ્ચહોતા । યજમાનઃ પશુઃ । યજમાનમેવ સુવર્ગં લોકં ગમયતિ ।
ગ્રહાન્ગૃહીત્વા સપ્તહોતારં જુહોતિ । ઇન્દ્રિયં વૈ સપ્તહોતા ॥ ૨। ૨। ૮। ૨॥

૪૪ ઇન્દ્રિયમેવાત્મન્ધત્તે । યો વૈ ચતુર્હોતૄનનુસવનં તર્પયતિ । તૃપ્યતિ
પ્રજયા પશુભિઃ । ઉપૈનꣳ સોમપીથો નમતિ । બહિષ્પવમાને
દશહોતારં વ્યાચક્ષીત । માધ્યંદિને પવમાને ચતુર્હોતારમ્ । આર્ભવે
પવમાને પઞ્ચહોતારમ્ । પિતૃયજ્ઞે ષડ્ઢોતારમ્ । યજ્ઞાયજ્ઞિયસ્ય
સ્તોત્રે સપ્તહોતારમ્ । અનુસવનમેવૈનાગ્સ્તર્પયતિ ॥ ૨। ૨। ૮। ૩॥

૪૫ તૃપ્યતિ પ્રજયા પશુભિઃ । ઉપૈનꣳ સોમપીથો નમતિ । દેવા વૈ
ચતુર્હોતૃભિઃ સત્રમાસત । ઋદ્ધિપરિમિતં યશસ્કામાઃ । તેઽબ્રુવન્ । યન્નઃ
પ્રથમં યશ ઋચ્છાત્ । સર્વેષાં નસ્તથ્સહાસદિતિ । સોમશ્ચતુર્હોત્રા
। અગ્નિઃ પઞ્ચહોત્રા । ધાતા ષડ્ઢોત્રા ॥ ૨। ૨। ૮। ૪॥

૪૬ ઇન્દ્રઃ સપ્તહોત્રા । પ્રજાપતિર્દશહોત્રા । તેષાꣳ સોમꣳ
રાજાનં યશ આર્ચ્છત્ । તન્ન્યકામયત । તેનાપાક્રામત્ । તેન પ્રલાયમચરત્
। તં દેવાઃ પ્રૈષૈઃ પ્રૈષમૈચ્છન્ । તત્પ્રૈષાણાં પ્રૈષત્વમ્ ।
નિવિદ્ભિર્ન્યવેદયન્ । તન્નિવિદાં નિવિત્ત્વમ્ ॥ ૨। ૨। ૮। ૫॥

૪૭ આપ્રીભિરાપ્નુવન્ । તદાપ્રીણામાપ્રિત્વમ્ । તમઘ્નન્ । તસ્ય યશો વ્યગૃહ્ણત ।
તે ગ્રહા અભવન્ । તદ્ગ્રહાણાં ગ્રહત્વમ્ । યસ્યૈવં વિદુષો ગ્રહા ગૃહ્યન્તે
। તસ્ય ત્વેવ ગૃહીતાઃ । તેઽબ્રુવન્ । યો વૈ નઃ શ્રેષ્ઠોઽભૂત્ ॥ ૨। ૨। ૮। ૬॥

૪૮ તમવધિષ્મ । પુનરિમꣳ સુવામહા ઇતિ । તં છન્દોભિરસુવન્ત
। તચ્છન્દસાં છન્દસ્ત્વમ્ । સામ્ના સમાનયન્ । તથ્સામ્નઃ સામત્વમ્
। ઉક્થૈરુદસ્થાપયન્ । તદુક્થાનામુક્થત્વમ્ । ય એવં વેદ । પ્રત્યેવ
તિષ્ઠતિ ॥ ૨। ૨। ૮। ૭॥
૪૯ સર્વમાયુરેતિ । સોમો વૈ યશઃ । ય એવં વિદ્વાન્થ્સોમમાગચ્છતિ ।
યશ એવૈનમૃચ્છતિ । તસ્માદાહુઃ । યશ્ચૈવં વેદ યશ્ચ ન । તાવુભૌ
સોમમાગચ્છતઃ । સોમો હિ યશઃ । તં ત્વાવ યશ ઋચ્છતીત્યાહુઃ । યઃ સોમે
સોમં પ્રાહેતિ । તસ્માથ્સોમે સોમઃ પ્રોચ્યઃ । યશ એવૈનમૃચ્છતિ ॥ ૨। ૨। ૮। ૮॥ અભિષુણ્વન્તિ
સપ્તહોતા તર્પયતિ ષડ્ઢોત્રા નિવિત્ત્વમભૂત્તિષ્ઠતિ
પ્રાહેતિ દ્વે ચ ॥ ૮॥
૫૦ ઇદં વા અગ્રે નૈવ કિંચનાસીત્ । ન દ્યૌરાસીત્ । ન પૃથિવી । નાન્તરિક્ષમ્ ।
તદસદેવ સન્મનોઽકુરુત સ્યામિતિ । તદતપ્યત । તસ્માત્તેપાનાદ્ધૂમોઽજાયત
। તદ્ભૂયોઽતપ્યત । તસ્માત્તેપાનાદગ્નિરજાયત । તદ્ભૂયોઽતપ્યત ॥ ૨। ૨। ૯। ૧॥
૫૧ તસ્માત્તેપાનાજ્જ્યોતિરજાયત । તદ્ભૂયોઽતપ્યત । તસ્માત્તેપાનાદર્ચિરજાયત
। તદ્ભૂયોઽતપ્યત । તસ્માત્તેપાનાન્મરીચયોઽજાયન્ત । તદ્ભૂયોઽતપ્યત ।
તસ્માત્તેપાનાદુદારા અજાયન્ત । તદ્ભૂયોઽતપ્યત । તદભ્રમિવ સમહન્યત ।
તદ્વસ્તિમભિનત્ ॥ ૨। ૨। ૯। ૨॥
૫૨ સ સમુદ્રોઽભવત્ । તસ્માથ્સમુદ્રસ્ય ન પિબન્તિ । પ્રજનનમિવ
હિ મન્યન્તે । તસ્માત્પશોર્જાયમાનાદાપઃ પુરસ્તાદ્યન્તિ ।
તદ્દશહોતાઽન્વસૃજ્યત । પ્રજાપતિર્વૈ દશહોતા । ય એવં તપસો
વીર્યં વિદ્વાગ્સ્તપ્યતે । ભવત્યેવ । તદ્વા ઇદમાપઃ સલિલમાસીત્ ।
સોઽરોદીત્પ્રજાપતિઃ ॥ ૨। ૨। ૯। ૩॥
૫૩ સ કસ્મા અજ્ઞિ । યદ્યસ્યા અપ્રતિષ્ઠાયા ઇતિ । યદપ્સ્વવાપદ્યત
। સા પૃથિવ્યભવત્ । યદ્વ્યમૃષ્ટ । તદન્તરિક્ષમભવત્ ।
યદૂર્ધ્વમુદમૃષ્ટ । સા દ્યૌરભવત્ । યદરોદીત્ । તદનયો રોદસ્ત્વમ્ ॥
૨। ૨। ૯। ૪॥

૫૪ ય એવં વેદ । નાસ્ય ગૃહે રુદન્તિ । એતદ્વા એષાં લોકાનાં જન્મ ।
ય એવમેષાં લોકાનાં જન્મ વેદ । નૈષુ લોકેષ્વાર્તિમાર્ચ્છતિ । સ ઇમાં
પ્રતિષ્ઠામવિન્દત । સ ઇમાં પ્રતિષ્ઠાં વિત્ત્વાઽઽકામયત પ્રજાયેયેતિ
। સ તપોઽતપ્યત । સોઽન્તર્વાનભવત્ । સ જઘનાદસુરાનસૃજત ॥ ૨। ૨। ૯। ૫॥

૫૫ તેભ્યો મૃન્મયે પાત્રેઽન્નમદુહત્ । યાઽસ્ય સા તનૂરાસીત્ । તામપાહત
। સા તમિસ્રાઽભવત્ । સોઽકામયત પ્રજાયેયેતિ । સ તપોઽતપ્યત
। સોઽન્તર્વાનભવત્ । સ પ્રજનનાદેવ પ્રજા અસૃજત । તસ્માદિમા
ભૂયિષ્ઠાઃ । પ્રજનનાદ્ધ્યેના અસૃજત ॥ ૨। ૨। ૯। ૬॥

૫૬ તાભ્યો દારુમયે પાત્રે પયોઽદુહત્ । યાઽસ્ય સા તનૂરાસીત્ । તામપાહત
। સા જ્યોત્સ્નાઽભવત્ । સોઽકામયત પ્રજાયેયેતિ । સ તપોઽતપ્યત ।
સોઽન્તર્વાનભવત્ । સ ઉપપક્ષાભ્યામેવર્તૂનસૃજત । તેભ્યો રજતે પાત્રે
ઘૃતમદુહત્ । યાઽસ્ય સા તનૂરાસીત્ ।

૫૭ તામપાહત । સોઽહોરાત્રયોઃ સન્ધિરભવત્ । સોઽકામયત પ્રજાયેયેતિ ।
સ તપોઽતપ્યત । સોઽન્તર્વાનભવત્ । સ મુખાદ્દેવાનસૃજત । તેભ્યો હરિતે
પાત્રે સોમમદુહત્ । યાઽસ્ય સા તનૂરાસીત્ । તામપાહત । તદહરભવત્ ॥ ૨। ૨। ૯। ૮॥

૫૮ એતે વૈ પ્રજાપતેર્દોહાઃ । ય એવં વેદ । દુહ એવ પ્રજાઃ । દિવા
વૈ નોઽભૂદિતિ । તદ્દેવાનાં દેવત્વમ્ । ય એવં દેવાનાં દેવત્વં વેદ ।
દેવવાનેવ ભવતિ । એતદ્વા અહોરાત્રાણાં જન્મ । ય એવમહોરાત્રાણાં
જન્મ વેદ । નાહોરાત્રેષ્વાર્તિમાર્ચ્છતિ ॥ ૨। ૨। ૯। ૯॥

૫૯ અસતોઽધિ મનોઽસૃજ્યત । મનઃ પ્રજાપતિમસૃજત । પ્રજાપતિઃ
પ્રજા અસૃજત । તદ્વા ઇદં મનસ્યેવ પરમં પ્રતિષ્ઠિતમ્ । યદિદં
કિંચ । તદેતચ્છ્વોવસ્યસં નામ બ્રહ્મ । વ્યુચ્છન્તી વ્યુચ્છન્ત્યસ્મૈ
વસ્યસી વસ્યસી વ્યુચ્છતિ । પ્રજાયતે પ્રજયા પશુભિઃ । પ્ર
પરમેષ્ઠિનો માત્રામાપ્નોતિ । ય એવં વેદ ॥ ૨। ૨। ૯। ૧૦॥ અગ્નિરજાયત
તદ્ભૂયોઽતપ્યતાભિનદરોદીત્પ્રજાપતી રોદસ્ત્વમસૃજતાસૃજત
ઘૃતમદુહદ્યાઽસ્ય સા તનૂરાસીદહરભવદ્વ્યુચ્છતિ વેદ ॥ ૯॥ ઇદં
ધૂમોઽગ્નિર્જ્યોતિરર્ચિર્મરીચય ઉદારાસ્તદભ્રꣳ સ જઘનાથ્સા તમિસ્રા

સપ્રજનનાથ્સા જોથ્સ્ના સ ઉપપક્ષાભ્યા ँ સોઽહોરાત્રયોઃ સન્ધિઃ
સ મુખાત્તદહર્દેવવાન્મૃન્મયે દારુમયે રજતે હરિતે તેભ્યસ્તાભ્યો
દ્વે તેઽન્નં પયો ઘૃત ँ સોમમ્ ॥

૬૦ પ્રજાપતિરિન્દ્રમસૃજતાઽઽનુજાવરં દેવાનામ્ । તં પ્રાહિણોત્ । પરેહિ ।
એતેષાં દેવાનામધિપતિરેધીતિ । તં દેવા અબ્રુવન્ । કસ્ત્વમસિ । વયં વૈ
ત્વચ્છ્રેયા ँસઃ સ્મ ઇતિ । સોઽબ્રવીત્ । કસ્ત્વમસિ વયં વૈ ત્વચ્છ્રેયા ँસઃ
સ્મ ઇતિ મા દેવા અવોચન્નિતિ । અથ વા ઇદં તર્હિ પ્રજાપતૌ હર
આસીત્ ॥ ૨। ૨। ૧૦। ૧॥

૬૧ યદસ્મિન્નાદિત્યે । તદેનમબ્રવીત્ । એતન્મે પ્રયચ્છ । અથાહમેતેષાં
દેવાનામધિપતિર્ભવિષ્યામીતિ । કોઽહર ँ સ્યામિત્યબ્રવીત્ । એતત્પ્રદાયેતિ
। એતથ્સ્યા ઇત્યબ્રવીત્ । યદેતદ્બ્રવીષીતિ । કો હ વૈ નામ પ્રજાપતિઃ ।
ય એવં વેદ ॥ ૨। ૨। ૧૦। ૨॥

૬૨ વિદુરેનં નામ્ના । તદસ્મૈ રુક્મં કૃત્વા પ્રત્યમુઞ્ચત્ । તતો વા ઇન્દ્રો
દેવાનામધિપતિરભવત્ । ય એવં વેદ । અધિપતિરેવ સમાનાનાં ભવતિ ।
સોઽમન્યત । કિં કિં વા અકરમિતિ । સ ચન્દ્રં મ આહરેતિ પ્રાલપત્ ।
તચ્ચન્દ્રમસશ્ચન્દ્રમસ્ત્વમ્ । ય એવં વેદ ॥ ૨। ૨। ૧૦। ૩॥

૬૩ ચન્દ્રવાનેવ ભવતિ । તં દેવા અબ્રુવન્ । સુવીર્ ્યો મર્યા યથા
ગોપાયત ઇતિ । તથ્સૂર્યસ્ય સૂર્યત્વમ્ । ય એવં વેદ । નૈનં દભ્નોતિ ।
કશ્ચનાસ્મિન્વા ઇદમિન્દ્રિયં પ્રત્યસ્થાદિતિ । તદિન્દ્રસ્યેન્દ્રત્વમ્ । ય
એવં વેદ । ઇન્દ્રિયાવ્યેવ ભવતિ ॥ ૨। ૨। ૧૦। ૪॥

૬૪ અયં વા ઇદં પરમોઽભૂદિતિ । તત્પરમેષ્ઠિનઃ પરમેષ્ઠિત્વમ્ । ય
એવં વેદ । પરમામેવ કાષ્ઠાં ગચ્છતિ । તં દેવાઃ સમન્તં પર્યવિશન્
। વસવઃ પુરસ્તાત્ । રુદ્રા દક્ષિણતઃ । આદિત્યાઃ પશ્ચાત્ । વિશ્વે દેવા
ઉત્તરતઃ । અંગિરસઃ પ્રત્યઞ્ચમ્ ॥ ૨। ૨। ૧૦। ૫॥

૬૫ સાધ્યાઃ પરાઞ્ચમ્ । ય એવં વેદ । ઉપૈન ँ સમાનાઃ સંવિશન્તિ । સ
પ્રજાપતિરેવ ભૂત્વા પ્રજા આવયત્ । તા અસ્મૈ નાતિષ્ઠન્તાન્નાદ્યાય ।
તા મુખં પુરસ્તાત્પશ્યન્તીઃ । દક્ષિણતઃ પર્યાયન્ । સ દક્ષિણતઃ

પર્યવર્તયત । તા મુખં પુરસ્તાત્પશ્યન્તીઃ । મુખં દક્ષિણતઃ ॥ ૨। ૨। ૧૦। ૬॥

૬૬ પશ્ચાત્પર્યાયન્ । સ પશ્ચાત્પર્યવર્તયત । તા મુખં પુરસ્તાત્પશ્યન્તીઃ ।
મુખં દક્ષિણતઃ । મુખં પશ્ચાત્ । ઉત્તરતઃ પર્યાયન્ । સ ઉત્તરતઃ
પર્યવર્તયત । તા મુખં પુરસ્તાત્પશ્યન્તીઃ । મુખં દક્ષિણતઃ । મુખં
પશ્ચાત્ ।

૬૭ મુખમુત્તરતઃ । ઊર્ધ્વા ઉદાયન્ । સ ઉપરિષ્ટાન્ન્યવર્તયત । તાઃ
સર્વતોમુખો ભૂત્વાઽઽવયત્ । તતો વૈ તસ્મૈ પ્રજા અતિષ્ઠન્તાન્નાદ્યાય ।
ય એવં વિદ્વાન્પરિ ચ વર્તયતે નિ ચ । પ્રજાપતિરેવ ભૂત્વા પ્રજા
અત્તિ । તિષ્ઠન્તેઽસ્મૈ પ્રજા અન્નાદ્યાય । અન્નાદ એવ ભવતિ ॥ ૨। ૨। ૧૦। ૭॥ આસીદ્વેદ ચન્દ્રમસ્ત્વં ય એવં
વેદેન્દ્રિયાવ્યેવ ભવતિ પ્રત્યઞ્ચં
મુખં દક્ષિણતો મુખં પશ્ચાન્નવ ચ ॥ ૧૦॥

૬૮ પ્રજાપતિરકામયત બહોર્ભૂયાન્ત્સ્યામિતિ । સ એતં દશહોતારમપશ્યત્
। તં પ્રાયુઙ્ક્ત । તસ્ય પ્રયુક્તિ બહોર્ભૂયાનભવત્ । યઃ કામયેત
બહોર્ભૂયાન્ત્સ્યામિતિ । સ દશહોતારં પ્રયુઞ્જીત । બહોરેવ ભૂયાન્ભવતિ ।
સોઽકામયત વીરો મ આજાયેતેતિ । સ દશહોતુશ્ચતુર્હોતારં નિરમિમીત ।
તં પ્રાયુઙ્ક્ત ॥

૬૯ તસ્ય પ્રયુક્તીન્દ્રોઽજાયત । યઃ કામયેત વીરો મ આજાયેતેતિ
। સ ચતુર્હોતારં પ્રયુઞ્જીત । આઽસ્ય વીરો જાયતે । સોઽકામયત
પશુમાન્ત્સ્યામિતિ । સ ચતુર્હોતુઃ પઞ્ચહોતારં નિરમિમીત । તં પ્રાયુઙ્ક્ત
। તસ્ય પ્રયુક્તિ પશુમાનભવત્ । યઃ કામયેત પશુમાન્ત્સ્યામિતિ । સ
પઞ્ચહોતારં પ્રયુઞ્જીત ॥ ૨। ૨। ૧૧। ૨॥

૭૦ પશુમાનેવ ભવતિ । સોઽકામયતર્તવો મે કલ્પેરન્નિતિ । સ પઞ્ચહોતુઃ
ષડ્ઢોતારં નિરમિમીત । તં પ્રાયુઙ્ક્ત । તસ્ય પ્રયુક્ત્યૃતવોઽસ્મા
અકલ્પન્ત । યઃ કામયેતર્તવો મે કલ્પેરન્નિતિ । સ ષડ્ઢોતારં પ્રયુઞ્જીત ।
કલ્પન્તેઽસ્મા ઋતવઃ । સોઽકામયત સોમપઃ સોમયાજી સ્યામ્ । આ મે સોમપઃ
સોમયાજી જાયેતેતિ ॥ ૨। ૨। ૧૧। ૩॥

૭૧ સ ષડ્ઢોતુઃ સપ્તહોતારં નિરમિમીત । તં પ્રાયુઙ્ક્ત । તસ્ય

પ્રયુક્તિ સોમપઃ સોમયાજ્યભવત્ । આઽસ્ય સોમપઃ સોમયાજ્યજાયત । યઃ કામયેત સોમપઃ સોમયાજી સ્યામ્ । આ મે સોમપઃ સોમયાજી જાયેતેતિ । સ સપ્તહોતારં પ્રયુઞ્જીત । સોમપ એવ સોમયાજી ભવતિ । આઽસ્ય સોમપઃ સોમયાજી જાયતે । સ વા એષ પશુઃ પઞ્ચધા પ્રતિતિષ્ઠતિ ॥ ૨। ૨। ૧૧। ૪॥

૭૨ પદ્ભિર્મુખેન । તે દેવાઃ પશૂન્, વિત્ત્વા । સુવર્ગં લોકમાયન્ । તેઽમુષ્મિં લ્લોકે વ્યક્ષુધ્યન્ । તેઽબ્રુવન્ । અમુતઃ પ્રદાનં વા ઉપજિજીવિમેતિ । તે સપ્તહોતારં યજ્ઞં વિધાયાયાસ્યમ્ । આંગીરસં પ્રાહિણ્વન્ । એતેનામુત્ર કલ્પયેતિ । તસ્ય વા ઇયં ક્લૃપ્તિઃ ॥ ૨। ૨। ૧૧। ૫॥

૭૩ યદિદં કિંચ । ય એવં વેદ । કલ્પતેઽસ્મૈ । સ વા અયં મનુષ્યેષુ યજ્ઞઃ સપ્તહોતા । અમુત્ર સદ્ભ્યો દેવેભ્યો હવ્યં વહતિ । ય એવં વેદ । ઉપૈનં યજ્ઞો નમતિ । યો વૈ ચતુર્હોતૃણાં નિદાનં વેદ । નિદાનવાન્ભવતિ । અગ્નિહોત્રં વૈ દશહોતુર્નિદાનમ્ । દર્શપૂર્ણમાસૌ ચતુર્હોતુઃ । ચાતુર્માસ્યાનિ પઞ્ચહોતુઃ । પશુબન્ધઃ ષડ્ઢોતુઃ । સૌમ્યોઽધ્વરઃ સપ્તહોતુઃ । એતદ્વૈ ચતુર્હોતૃણાં નિદાનમ્ । ય એવં વેદ । નિદાનવાન્ભવતિ ॥ ૨। ૨। ૧૧। ૬॥ અમિમીત તં પ્રાયુઙ્ક્ત પઞ્ચહોતારં પ્રયુઞ્જીત જાયેતેતિ તિષ્ઠતિ ક્લૃપ્તિર્દશહોતુર્નિદાનꣳસપ્ત ચ ॥ ૧૧॥

પ્રજાપતિરકામયત પ્રજાઃ સૃજેયેતિ પ્રજાપતિરકામયત દર્શપૂર્ણમાસૌ સૃજેયેતિ પ્રજાપતિરકામયત પ્રજાયેયેતિ સ તપઃ સ ત્રિવૃતં પ્રજાપતિરકામયત દશહોતારં તેન દશધાઽઽત્માનં દેવા વૈ વરુણમન્તો વૈ પ્રજાપતિસ્તાઃ સૃષ્ટાઃ સમશ્લિષ્યન્દેવા વૈ ચતુર્હોતૃભિરિદં વા અગ્રે પ્રજાપતિરિન્દ્રં પ્રજાપતિરકામયત બહોર્ભૂયાનેકાદશ ॥ ૧૧॥

પ્રજાપતિસ્તદ્ગ્રહસ્ય ગ્રહત્વં પ્રજાપતિરકામયતાનયૈવૈનત્તસ્ય વા ઇયં ક્લૃપ્તિસ્તસ્માત્તેપાનાજ્જ્યોતિર્યદસ્મિન્નાદિત્યે સ ષડ્ઢોતુઃ સપ્તહોતારં ત્રિસપ્તતિઃ ॥ ૭૩॥

પ્રજાપતિરકામયત નિદાનવાન્ભવતિ ॥

## દ્વિતીયાષ્ટકે તૃતીયઃ પ્રપાઠકઃ ૩

૧ બ્રહ્મવાદિનો વદન્તિ । કિં ચતુર્હોતૃણાં ચતુર્હોતૃત્વમિતિ । યદેવૈષુ
ચતુર્ધા હોતારઃ । તેન ચતુર્હોતારઃ । તસ્માચ્ચતુર્હોતાર ઉચ્યન્તે ।
તચ્ચતુર્હોતૃણાં ચતુર્હોતૃત્વમ્ । સોમો વૈ ચતુર્હોતા । અગ્નિઃ પઞ્ચહોતા ।
ધાતા ષડ્ઢોતા । ઇન્દ્રઃ સપ્તહોતા ॥ ૨। ૩। ૧। ૧॥

૨ પ્રજાપતિર્દશહોતા । ય એવં ચતુર્હોતૃણામૃદ્ધિં વેદ । ઋધ્નોત્યેવ
। ય એષામેવં બન્ધુતાં વેદ । બન્ધુમાન્ભવતિ । ય એષામેવં ક્લૃપ્તિં
વેદ । કલ્પતેઽસ્મૈ । ય એષામેવમાયતનં વેદ । આયતનવાન્ભવતિ ।
ય એષામેવં પ્રતિષ્ઠાં વેદ ॥ ૨। ૩। ૧। ૨॥

૩ પ્રત્યેવ તિષ્ઠતિ । બ્રહ્મવાદિનો વદન્તિ । દશહોતા ચતુર્હોતા ।
પઞ્ચહોતા ષડ્ઢોતા સપ્તહોતા । અથ કસ્માચ્ચતુર્હોતાર ઉચ્યન્ત ઇતિ ।
ઇન્દ્રો વૈ ચતુર્હોતા । ઇન્દ્રઃ ખલુ વૈ શ્રેષ્ઠો દેવતાનામુપદેશનાત્ । ય
એવમિન્દ્રગ્ગ્ં શ્રેષ્ઠં દેવતાનામુપદેશનાદ્વેદ । વસિષ્ઠઃ સમાનાનાં
ભવતિ । તસ્માચ્છ્રેષ્ઠમાયન્તં પ્રથમેનૈવાનુબુધ્યન્તે । અયમાગન્ ।
અયમવાસાદિતિ । કીર્તિરસ્ય પૂર્વાઽઽગચ્છતિ જનતામાયતઃ । અથો
એનં પ્રથમેનૈવાનુ બુધ્યન્તે । અયમાગન્ । અયમવાસાદિતિ ॥ ૨। ૩। ૧। ૩॥

સપ્તહોતા પ્રતિષ્ઠાં વેદ બુધ્યન્તે ષટ્ચ ॥ ૧॥

૪ દક્ષિણાં પ્રતિગ્રહીષ્યન્થ્સપ્તદશકૃત્વોઽપાન્યાત્ । આત્માનમેવ
સમિન્ધે । તેજસે વીર્યાય । અથો પ્રજાપતિરેવૈનાં ભૂત્વા પ્રતિગૃહ્ણાતિ ।
આત્મનોઽનાર્ત્યૈ । યદ્યેનમાર્ત્વિજ્યાદ્વૃતꣳ સન્તં નિરૂહરેન્ । આગ્નીધ્રે
જુહુયાદ્દશહોતારમ્ । ચતુર્ગૃહીતેનાજ્યેન । પુરસ્તાત્પ્રત્યઙ્તિષ્ઠન્
। પ્રતિલોમં વિગ્રાહમ્ ॥ ૨। ૩। ૨। ૧॥

૫ પ્રાણાનેવાસ્યોપદાસયતિ । યદ્યેનં પુનરુપશિક્ષેયુઃ । આગ્નીધ્ર એવ
જુહુયાદ્દશહોતારમ્ । ચતુર્ગૃહીતેનાજ્યેન । પશ્ચાત્પ્રાઙાસીનઃ
। અનુલોમમવિગ્રાહમ્ । પ્રાણાનેવાસ્મૈ કલ્પયતિ । પ્રાયશ્ચિત્તી
વાગ્ઘોતેત્યૃતુમુખ ઋતુમુખે જુહોતિ । ઋતૂનેવાસ્મૈ કલ્પયતિ । કલ્પન્તેઽસ્મા

ઋતવઃ ॥ ૨। ૩। ૨। ૨॥

૬ ક્લૃપ્તા અસ્મા ઋતવ આયન્તિ । ષડ્ઢોતા વૈ ભૂત્વા પ્રજાપતિરિદꣳ
સર્વમસૃજત । સ મનોઽસૃજત । મનસોઽધિ ગાયત્રીમસૃજત । તદ્ગાયત્રીં
યશ આર્ચ્છત્ । તામાઽલભત । ગાયત્રિયા અધિ છન્દાગ્સ્યસૃજત ।
છન્દોભ્યોઽધિ સામ । તથ્સામ યશ આર્ચ્છત્ । તદાઽલભત ॥ ૨। ૩। ૨। ૩॥

૭ સામ્નોઽધિ યજૂગ્ષ્યસૃજત । યજુર્ભ્યોઽધિ વિષ્ણુમ્ । તદ્વિષ્ણું યશ
આર્ચ્છત્ । તમાઽલભત । વિષ્ણોરધ્યોષધીરસૃજત । ઓષધીભ્યોઽધિ
સોમમ્ । તથ્સોમં યશ આર્ચ્છત્ । તમાઽલભત । સોમાદધિ પશૂનસૃજત ।
પશુભ્યોઽધીન્દ્રમ્ ॥ ૨। ૩। ૨। ૪॥

૮ તદિન્દ્રં યશ આર્ચ્છત્ । તદેનં નાતિપ્રાચ્યવત । ઇન્દ્ર ઇવ યશસ્વી
ભવતિ । ય એવં વેદ । નૈનં યશોઽતિ પ્રચ્યવતે । યદ્વા ઇદં કિંચ
। તથ્સર્વમુત્તાન એવાંગીરસઃ પ્રત્યગૃહ્ણાત્ । તદેનં પ્રતિગૃહીતં
નાહિનત્ । યત્કિંચ પ્રતિગૃહ્ણીયાત્ । તથ્સર્વમુત્તાનસ્ત્વાઽઽઙ્ગીરસઃ
પ્રતિગૃહ્ણાત્વિત્યેવ પ્રતિગૃહ્ણીયાત્ । ઇયં વા ઉત્તાન આઙ્ગીરસઃ ।
અનયૈવૈનત્પ્રતિગૃહ્ણાતિ । નૈનꣳહિનસ્તિ । બર્હિષા પ્રતીયાદ્ગાં
વાઽશ્વં વા । એતદ્વૈ પશૂનાં પ્રિયં ધામ । પ્રિયેણૈવૈનં ધામ્ના
પ્રત્યેતિ ॥ ૨। ૩। ૨। ૫॥ વિગ્રાહમૃતવસ્તદાઽલભતેન્દ્રં ગૃહ્ણીયાત્ષટ્ચ
॥ ૨॥

૯ યો વા અવિદ્વાન્નિવર્તયતે । વિશીર્ષા સ પાપ્માઽમુષ્મિં લ્લોકે ભવતિ ।
અથ યો વિદ્વાન્નિવર્તયતે । સશીર્ષા વિપાપ્માઽમુષ્મિં લ્લોકે ભવતિ
। દેવતા વૈ સપ્ત પુષ્ટિકામા ન્યવર્તયન્ત । અગ્નિશ્ચ પૃથિવી
ચ । વાયુશ્ચાન્તરિક્ષં ચ । આદિત્યશ્ચ દ્યૌશ્ચ ચન્દ્રમાઃ ।
અગ્નિર્ન્યવર્તયત । સ સાહસ્રમપુષ્યત્ ॥ ૨। ૩। ૩। ૧॥

૧૦ પૃથિવી ન્યવર્તયત । સૌષધીભિર્વનસ્પતિભિરપુષ્યત્ ।
વાયુર્ન્યવર્તયત । સ મરીચીભિરપુષ્યત્ । અન્તરિક્ષં ન્યવર્તયત
। તદ્વયોભિરપુષ્યત્ । આદિત્યો ન્યવર્તયત । સ રશ્મિભિરપુષ્યત્ ।
દ્યૌર્ન્યવર્તયત । સા નક્ષત્રૈરપુષ્યત્ । ચન્દ્રમા ન્યવર્તયત ।

સોઽહોરાત્રૈરર્ધમાસૈર્માસૈરૃતુભિઃ સંવત્સરેણાપુષ્યત્ ।
તાન્પોષાન્પુષ્યતિ । યાꣳસ્તેઽપુષ્યન્ । ય એવં વિદ્વાન્નિ ચ વર્તયતે પરિ
ચ ॥ ૨। ૩। ૩। ૨॥ અપુષ્યન્નક્ષત્રૈરપુષ્યત્પઞ્ચ ચ ॥ ૩॥

૧૧ તસ્ય વા અગ્નેર્હિરણ્યં પ્રતિજગ્રહુષઃ । અર્ધમિન્દ્રિયસ્યાપાક્રામત્ ।
તદેતેનૈવ પ્રત્યગૃહ્ણાત્ । તેન વૈ સોઽર્ધમિન્દ્રિયસ્યાત્મન્નુપાધત્ત ।
અર્ધમિન્દ્રિયસ્યાત્મન્નુપા ધત્તે । ય એવં વિદ્વાન્ હિરણ્યં પ્રતિગૃહ્ણાતિ
। અથ યોઽવિદ્વાન્પ્રતિગૃહ્ણાતિ । અર્ધમસ્યેન્દ્રિયસ્યાપક્રામતિ । તસ્ય
વૈ સોમસ્ય વાસઃ પ્રતિજગ્રહુષઃ । તૃતીયમિન્દ્રિયસ્યાપાક્રામત્ ॥ ૨। ૩। ૪। ૧॥

૧૨ તદેતેનૈવ પ્રત્યગૃહ્ણાત્ । તેન વૈ સ તૃતીયમિન્દ્રિયસ્યાત્મન્નુપાધત્ત ।
તૃતીયમિન્દ્રિયસ્યાત્મન્નુપા ધત્તે । ય એવં વિદ્વાન્, વાસઃ પ્રતિગૃહ્ણાતિ
। અથ યોઽવિદ્વાન્પ્રતિગૃહ્ણાતિ । તૃતીયમસ્યેન્દ્રિયસ્યાપક્રામતિ । તસ્ય વૈ
રુદ્રસ્ય ગાં પ્રતિજગ્રહુષઃ । ચતુર્થમિન્દ્રિયસ્યાપાક્રામત્ । તામેતેનૈવ
પ્રત્યગૃહ્ણાત્ । તેન વૈ સ ચતુર્થમિન્દ્રિયસ્યાત્મન્નુપાધત્ત ॥ ૨। ૩। ૪। ૨॥

૧૩ ચતુર્થમિન્દ્રિયસ્યાત્મન્નુપાધત્તે । ય એવં વિદ્વાન્ગાં પ્રતિગૃહ્ણાતિ
। અથ યોઽવિદ્વાન્પ્રતિગૃહ્ણાતિ । ચતુર્થમસ્યેન્દ્રિયસ્યાપક્રામતિ । તસ્ય
વૈ વરુણસ્યાશ્વં પ્રતિજગ્રહુષઃ । પઞ્ચમમિન્દ્રિયસ્યાપાક્રામત્ ।
તમેતેનૈવ પ્રત્યગૃહ્ણાત્ । તેન વૈ સ પઞ્ચમમિન્દ્રિયસ્યાત્મન્નુપાધત્ત
। પઞ્ચમમિન્દ્રિયસ્યાત્મન્નુપાધત્તે । ય એવં વિદ્વાનશ્વં પ્રતિગૃહ્ણાતિ
॥ ૨। ૩। ૪। ૩॥

૧૪ અથ યોઽવિદ્વાન્પ્રતિગૃહ્ણાતિ । પઞ્ચમમસ્યેન્દ્રિયસ્યાપ ક્રામતિ । તસ્ય
વૈ પ્રજાપતેઃ પુરુષં પ્રતિજગ્રહુષઃ । ષષ્ઠમિન્દ્રિયસ્યાપાક્રામત્ ।
તમેતેનૈવ પ્રત્યગૃહ્ણાત્ । તેન વૈ સ ષષ્ઠમિન્દ્રિયસ્યાત્મન્નુપાધત્ત ।
ષષ્ઠમિન્દ્રિયસ્યાત્મન્નુપાધત્તે । ય એવં વિદ્વાન્પુરુષં પ્રતિગૃહ્ણાતિ
। અથ યોઽવિદ્વાન્પ્રતિગૃહ્ણાતિ । ષષ્ઠમસ્યેન્દ્રિયસ્યાપક્રામતિ ॥ ૨। ૩। ૪। ૪॥

૧૫ તસ્ય વૈ મનોસ્તલ્પં પ્રતિજગ્રહુષઃ । સપ્તમમિન્દ્રિયસ્યાપાક્રામત્ ।
તમેતેનૈવ પ્રત્યગૃહ્ણાત્ । તેન વૈ સ સપ્તમમિન્દ્રિયસ્યાત્મન્નુપાધત્ત ।
સપ્તમમિન્દ્રિયસ્યાત્મન્નુપા ધત્તે । ય એવં વિદ્વાꣳસ્તલ્પં પ્રતિગૃહ્ણાતિ

। અથ યોઽવિદ્વાન્પ્રતિગૃહ્ણાતિ । સપ્તમમસ્યેન્દ્રિયસ્યાપક્રામતિ । તસ્ય વા
ઉત્તાનસ્યાઙ્ગીરસસ્યાપ્રાણત્ પ્રતિજગ્રહુષઃ । અષ્ટમમિન્દ્રિયસ્યાપાક્રામત્
॥ ૨। ૩। ૪। ૫॥

૧૬ તદેતેનૈવ પ્રત્યગૃહ્ણાત્ । તેન વૈ સોઽષ્ટમ
મિન્દ્રિયસ્યાત્મન્નુપાધત્ત । અષ્ટમમિન્દ્રિયસ્યાત્મન્નુપાધત્તે ।
ય એવં વિદ્વાનપ્રાણત્પ્રતિગૃહ્ણાતિ । અથ યોઽવિદ્વાન્પ્રતિગૃહ્ણાતિ ।
અષ્ટમમસ્યેન્દ્રિયસ્યાપક્રામતિ । યદ્વા ઇદં કિંચ । તથ્સર્વમુત્તાન
એવાંગીરસઃ પ્રત્યગૃહ્ણાત્ । તદેનં પ્રતિગૃહીતં નાહિનત્
। યત્કિંચ પ્રતિગૃહ્ણીયાત્ । તથ્સર્વમુત્તાનસ્ત્વાઽઽઙ્ગીરસઃ
પ્રતિગૃહ્ણાત્વિત્યેવ પ્રતિગૃહ્ણીયાત્ । ઇયં વા ઉત્તાન આઙ્ગીરસઃ
। અનયૈવૈનત્પ્રતિગૃહ્ણાતિ । નૈનꣳહિનસ્તિ ॥ ૨। ૩। ૪। ૬॥
તૃતીયમિન્દ્રિયસ્યાપાક્રામચ્ચતુર્થમિન્દ્રિયસ્યાત્મ ન્નુપાધત્તાશ્વં
પ્રતિગૃહ્ણાતિ ષષ્ઠમસ્યેન્દ્રિયસ્યાપ ક્રામત્યષ્ટમમિન્દ્રિયસ્યાપાક્રામત્
પ્રતિગૃહ્ણીયાચ્ચત્વારિ ચ ॥ ૪॥ તસ્ય વા અગ્નેર્ હિરણ્યꣳ સોમસ્ય
વાસસ્તદેતેન રુદ્રસ્ય ગાં તામેતેન વરુણસ્યાશ્વં પ્રજાપતેઃ
પુરુષં મનોસ્તલ્પં તમેતેનોત્તાનસ્ય તદેતેનાપ્રાણદ્યદ્વૈ । અર્ધં
તૃતીયમષ્ટમં તચ્ચતુર્થં તાં પઞ્ચમꣳ ષષ્ઠꣳ સપ્તમં
તમ્ । તદેતેન દ્વે તામેતેનૈકં તમેતેન ત્રીણિ તદેતેનૈકમ્ ॥

૧૭ બ્રહ્મવાદિનો વદન્તિ । યદ્દશહોતારઃ સત્રમાસત । કેન તે
ગૃહપતિનાઽઽર્ધ્નુવન્ । કેન પ્રજા અસૃજન્તેતિ । પ્રજાપતિના વૈ તે
ગૃહપતિનાઽઽર્ધ્નુવન્ । તેન પ્રજા અસૃજન્ત । યચ્ચતુર્હોતારઃ સત્રમાસત
। કેન તે ગૃહપતિનાઽઽર્ધ્નુવન્ । કેનૌષધીરસૃજન્તેતિ । સોમેન વૈ તે
ગૃહપતિનાઽઽર્ધ્નુવન્ ॥ ૨। ૩। ૫। ૧॥

૧૮ તેનૌષધીરસૃજન્ત । યત્પઞ્ચહોતારઃ સત્રમાસત । કેન તે
ગૃહપતિનાઽઽર્ધ્નુવન્ । કેનૈભ્યો લોકેભ્યોઽસુરાન્પ્રાણુદન્ત । કેનૈષાં
પશૂનવૃઞ્જતેતિ । અગ્નિના વૈ તે ગૃહપતિનાઽઽર્ધ્નુવન્ । તેનૈભ્યો
લોકેભ્યોઽસુરાન્પ્રાણુદન્ત । તેનૈષાં પશૂનવૃઞ્જત । યત્ષડ્ઢોતારઃ

સત્રમાસત । કેન તે ગૃહપતિનાઽઽર્ધ્નુવન્ ॥ ૨। ૩। ૫। ૨॥

૧૯ કેનર્તૂનકલ્પયન્તેતિ । ધાત્રા વૈ તે ગૃહપતિનાઽઽર્ધ્નુવન્
। તેનર્તૂનકલ્પયન્ત । યથ્સપ્તહોતારઃ સત્રમાસત । કેન તે
ગૃહપતિનાઽઽર્ધ્નુવન્ । કેન સુવરાયન્ । કેનેમાન્ લોકાન્થ્સમતન્વન્નિતિ
। અર્યમ્ણા વૈ તે ગૃહપતિનાઽઽર્ધ્નુવન્ । તેન સુવરાયન્ । તેનેમાન્
લોકાન્થ્સમતન્વન્નિતિ ॥ ૨। ૩। ૫। ૩॥

૨૦ એતે વૈ દેવા ગૃહપતયઃ । તાન્, ય એવં વિદ્વાન્ । અપ્યન્યસ્ય ગાર્હપતે
દીક્ષતે । અવાન્તરમેવ સત્રિણામૃધ્નોતિ ॥
યો વા અર્યમણં વેદ । દાનકામા અસ્મૈ પ્રજા ભવન્તિ । યજ્ઞો વા અર્યમા ।
આર્યા વસતિરિતિ વૈ તમાહુર્યં પ્રશꣳસન્તિ । આર્યાવસતિર્ભવતિ ।
ય એવં વેદ ॥

૨૧ યદ્વા ઇદં કિંચ । તથ્સર્વં ચતુર્હોતારઃ । ચતુર્હોતૃભ્યોઽધિ
યજ્ઞો નિર્મિતઃ । સ ય એવં વિદ્વાન્, વિવદેત । અહમેવ ભૂયો વેદ ।
યશ્ચતુર્હોતૄન્ વેદેતિ । સ હ્યેવ ભૂયો વેદ । યશ્ચતુર્હોતૄન્ વેદ
। યો વૈ ચતુર્હોતૃણાꣳ હોતૄન્ વેદ । સર્વાસુ પ્રજાસ્વન્નમત્તિ ॥ ૨। ૩। ૫। ૫॥

૨૨ સર્વા દિશોઽભિજયતિ । પ્રજાપતિર્વૈ દશહોતૃણાꣳ હોતા ।
સોમશ્ચતુર્હોતૃણાꣳ હોતા । અગ્નિઃ પઞ્ચહોતૃણાꣳ હોતા । ધાતા
ષડ્ઢોતૃણાꣳ હોતા । અર્યમા સપ્તહોતૃણાꣳ હોતા । એતે વૈ
ચતુર્હોતૃણાꣳ હોતારઃ । તાન્, ય એવં વેદ । સર્વાસુ પ્રજાસ્વન્નમત્તિ ।
સર્વા દિશોઽભિજયતિ ॥ ૨। ૩। ૫। ૬॥ આર્ધ્નુવન્નાર્ધ્નુવન્નિત્યેવં વેદાત્તિ
સર્વા દિશોભિ જયતિ ॥ ૫॥ વૈ તેન સત્રં કેન ॥

૨૩ પ્રજાપતિઃ પ્રજાઃ સૃષ્ટ્વા વ્યસ્રꣳસત । સ હૃદયં
ભૂતોઽશયત્ । આત્મન્ હા ૩ ઇત્યહ્વયત્ । આપઃ પ્રત્યશꣳૃણ્વન્ । તા
અગ્નિહોત્રેણૈવ યજ્ઞક્રતુનોપપર્યાવર્તન્ત । તાઃ કુસિન્ધમુપૌહન્ ।
તસ્માદગ્નિહોત્રસ્ય યજ્ઞક્રતોઃ । એક ઋત્વિક્ । ચતુષ્કૃત્વોઽહ્વયત્ ।
અગ્નિર્વાયુરાદિત્યશ્ચન્દ્રમાઃ ॥ ૨। ૩। ૬। ૧॥

૨૪ તે પ્રત્યશૃણ્વન્ । તે દર્શપૂર્ણમાસાભ્યામેવ
યજ્ઞક્રતુનોપપર્યાવર્તન્ત । ત ઉપૌહર ँ શ્ચત્વાર્યઙ્ગાનિ
। તસ્માદ્દર્શપૂર્ણમાસયોર્યજ્ઞક્રતોઃ । ચત્વાર ઋત્વિજઃ ।
પઞ્ચકૃત્વોઽહ્વયત્ । પશવઃ પ્રત્યશૃણ્વન્ । તે ચાતુર્માસ્યૈરેવ
યજ્ઞક્રતુનોપપર્યાવર્તન્ત । ત ઉપૌહં લ્લોમ છવીં મા ँ સમસ્થિ
મજ્જાનમ્ । તસ્માચ્ચાતુર્માસ્યાનાં યજ્ઞક્રતોઃ ॥ ૨। ૩। ૬। ૨॥

૨૫ પઞ્ચર્ત્વિજઃ । ષટ્કૃત્વોઽહ્વયત્ । ઋતવઃ પ્રત્યશૃણ્વન્ । તે
પશુબન્ધેનૈવ યજ્ઞક્રતુનોપ પર્યાવર્તન્ત । ત ઉપૌહન્થ્સ્તનાવાણ્ડૌ
શિશ્નમવાઞ્ચં પ્રાણમ્ । તસ્માત્પશુબન્ધસ્ય યજ્ઞક્રતોઃ । ષડૃત્વિજઃ
। સપ્તકૃત્વોઽહ્વયત્ । હોત્રાઃ પ્રત્યશૃણ્વન્ । તાઃ સૌમ્યેનૈવાધ્વરેણ
યજ્ઞક્રતુનોપપર્યાવર્તન્ત ॥ ૨। ૩। ૬। ૩॥

૨૬ તા ઉપૌહન્થ્સપ્તશીર્ષણ્યાન્પ્રાણાન્ । તસ્માથ્સૌમ્યસ્યાધ્વરસ્ય
યજ્ઞક્રતોઃ । સપ્ત હોત્રાઃ પ્રાચીર્વષટ્કુર્વન્તિ । દશકૃત્વોઽહ્વયત્ । તપઃ
પ્રત્યશૃણોત્ । તત્કર્મણૈવ સંવથ્સરેણ સર્વૈર્યજ્ઞક્રતુભિરુપ
પર્યાવર્તત । તથ્સર્વમાત્માનમપરિવર્ગમુપૌહત્ । તસ્માથ્સંવથ્સરે
સર્વે યજ્ઞક્રતવોઽવરુધ્યન્તે । તસ્માદ્દશહોતા ચતુર્હોતા
। પઞ્ચહોતા ષડ્ઢોતા સપ્તહોતા । એકહોત્રે બલિ ँ હરન્તિ ।
હરન્ત્યસ્મૈ પ્રજા બલિમ્ । ઐનમપ્રતિખ્યાતં ગચ્છતિ । ય એવં વેદ ॥ ૨। ૩। ૬। ૪॥ ચન્દ્રમાશ્ચાતુર્માસ્યાનાં
યજ્ઞક્રતોરધ્વરેણ યજ્ઞક્રતુનોપ
પર્યાવર્તન્ત સપ્તહોતા ચત્વારિ ચ ॥ ૬॥

૨૭ પ્રજાપતિઃ પુરુષમસૃજત । સોઽગ્નિરબ્રવીત્ ।
મમાયમન્નમસ્ત્વિતિ । સોઽબિભેત્ । સર્વં વૈ માઽયં પ્રધક્ષ્યતીતિ । સ
એતાઞ્શ્ચતુર્હોતૄનાત્મસ્પરણાનપશ્યત્ । તાનજુહોત્ । તૈર્વૈ સ આત્માનમસ્પૃણોત્
। યદગ્નિહોત્રં જુહોતિ । એકહોતારમેવ તદ્યજ્ઞક્રતુમાપ્નોત્યગ્નિહોત્રમ્ ॥
૧॥

૨૮ કુસિન્ધં ચાઽઽત્મનઃ સ્પૃણોતિ । આદિત્યસ્ય ચ સાયુજ્યં ગચ્છતિ ।
ચતુરુન્નયતિ । ચતુર્હોતારમેવ તદ્યજ્ઞક્રતુમાપ્નોતિ દર્શપૂર્ણમાસૌ ।

ચત્વારિ ચાત્મનોઽઙ્ગાનિ સ્પૃણોતિ । આદિત્યસ્ય ચ સાયુજ્યં ગચ્છતિ ।
ચતુરુન્નયતિ । સમિત્પઞ્ચમી । પઞ્ચહોતારમેવ તદ્યજ્ઞક્રતુમાપ્નોતિ
ચાતુર્માસ્યાનિ । લોમ છવીં માꣳ સમસ્થિ મજ્જાનમ્ ॥ ૨। ૩। ૭। ૨॥

૨૯ તાનિ ચાત્મનઃ સ્પૃણોતિ । આદિત્યસ્ય ચ સાયુજ્યં ગચ્છતિ ।
ચતુરુન્નયતિ । દ્વિર્જુહોતિ । ષડ્ઢોતારમેવ તદ્યજ્ઞક્રતુમાપ્નોતિ પશુબન્ધમ્
। સ્તનાવાણ્ડૌ શિશ્નમવાઞ્ચં પ્રાણમ્ । તાનિ ચાત્મનઃ સ્પૃણોતિ ।
આદિત્યસ્ય ચ સાયુજ્યં ગચ્છતિ । ચતુરુન્નયતિ । દ્વિર્જુહોતિ ॥ ૨। ૩। ૭। ૩॥

૩૦ સમિથ્સપ્તમી । સપ્તહોતારમેવ તદ્યજ્ઞક્રતુમાપ્નોતિ સૌમ્યમધ્વરમ્
। સપ્ત ચાત્મનઃ શીર્ષણ્યાન્પ્રાણાન્થ્સ્પૃણોતિ । આદિત્યસ્ય ચ
સાયુજ્યં ગચ્છતિ । ચતુરુન્નયતિ । દ્વિર્જુહોતિ । દ્વિર્નિમાર્ષ્ટિ । દ્વિઃ
પ્રાશ્નાતિ । દશહોતારમેવ તદ્યજ્ઞક્રતુમાપ્નોતિ સંવથ્સરમ્ । સર્વં
ચાત્માનમપરિવર્ગꣳ સ્પૃણોતિ । આદિત્યસ્ય ચ સાયુજ્યં ગચ્છતિ ॥
૨। ૩। ૭। ૪॥ અગ્નિહોત્રં મજ્જાનં દ્વિર્જુહોત્યપરિવર્ગꣳ સ્પૃણોત્યેકં
ચ ॥ ૭॥

૩૧ પ્રજાપતિરકામયત પ્રજાયેયેતિ । સ તપોઽતપ્યત । સોઽન્તર્વાનભવત્
। સ હરિતઃ શ્યાવોઽભવત્ । તસ્માથ્સ્ત્ર્યન્તર્વત્ની । હરિણી સતી શ્યાવા
ભવતિ । સ વિજાયમાનો ગર્ભેણાતામ્યત્ । સ તાન્તઃ કૃષ્ણઃ શ્યાવોઽભવત્ ।
તસ્માત્તાન્તઃ કૃષ્ણઃ શ્યાવો ભવતિ । તસ્યાસુરેવાજીવત્ ॥ ૨। ૩। ૮। ૧॥

૩૨ તેનાસુનાઽસુરાનસૃજત । તદસુરાણામસુરત્વમ્ । ય એવમસુરાણામસુરત્વં વેદ
। અસુમાનેવ ભવતિ । નૈનમસુર્જહાતિ । સોઽસુરાન્થ્સૃષ્ટ્વા પિતેવામન્યત
। તદનુ પિતૄનસૃજત । તત્પિતૄણાં પિતૃત્વમ્ । ય એવં પિતૄણાં
પિતૃત્વં વેદ । પિતેવૈવ સ્વાનાં ભવતિ ॥ ૨। ૩। ૮। ૨॥

૩૩ યન્ત્યસ્ય પિતરો હવમ્ । સ પિતૄન્થ્સૃષ્ટ્વાઽમનસ્યત્ । તદનુ
મનુષ્યાનસૃજત । તન્મનુષ્યાણાં મનુષ્યત્વમ્ । ય એવં મનુષ્યાણાં
મનુષ્યત્વં વેદ । મનસ્વ્યેવ ભવતિ । નૈનં મનુર્જહાતિ । તસ્મૈ
મનુષ્યાન્થ્સસૃજાનાય । દિવા દેવત્રાઽભવત્ । તદનુ દેવાનસૃજત ।
તદ્દેવાનાં દેવત્વમ્ । ય એવં દેવાનાં દેવત્વં વેદ । દિવા હૈવાસ્ય

દેવત્રા ભવતિ । તાનિ વા એતાનિ ચત્વાર્યમ્ભાꣳસિ । દેવા મનુષ્યાઃ
પિતરોઽસુરાઃ । તેષુ સર્વેષ્વમ્ભો નભ ઇવ ભવતિ । ય એવં વેદ ॥ ૨। ૩। ૮। ૩॥ અજીવથ્સ્વાનાં ભવતિ
દેવાનસૃજત સપ્ત ચ ॥ ૮॥

૩૪ બ્રહ્મવાદિનો વદન્તિ । યો વા ઇમં વિદ્યાત્ । યતોઽયં પવતે । યદભિ
પવતે । યદભિ સંપવતે । સર્વમાયુરિયાત્ । ન પુરાઽઽયુષઃ પ્રમીયેત ।
પશુમાન્થ્સ્યાત્ । વિન્દેત પ્રજામ્ । યો વા ઇમં વેદ ॥ ૨। ૩। ૯। ૧॥

૩૫ યતોઽયં પવતે । યદભિપવતે । યદભિસંપવતે । સર્વમાયુરેતિ ।
ન પુરાઽઽયુષઃ પ્રમીયતે । પશુમાન્ભવતિ । વિન્દતે પ્રજામ્ । અદ્ભ્યઃ
પવતે । અપોઽભિ પવતે । અપોઽભિ સંપવતે ॥ ૨। ૩। ૯। ૨॥

૩૬ અસ્યાઃ પવતે । ઇમામભિ પવતે । ઇમામભિ સંપવતે । અગ્નેઃ પવતે ।
અગ્નિમભિ પવતે । અગ્નિમભિ સંપવતે । અન્તરિક્ષાત્પવતે । અન્તરિક્ષમભિ
પવતે । અન્તરિક્ષમભિ સંપવતે । આદિત્યાત્પવતે ॥ ૨। ૩। ૯। ૩॥

૩૭ આદિત્યમભિ પવતે । આદિત્યમભિ સંપવતે । દ્યોઃ પવતે । દિવમભિ
પવતે । દિવમભિ સંપવતે । દિગ્ભ્યઃ પવતે । દિશોઽભિ પવતે । દિશોઽભિ
સંપવતે । સ યત્પુરસ્તાદ્વાતિ । પ્રાણ એવ ભૂત્વા પુરસ્તાદ્વાતિ ॥ ૨। ૩। ૯। ૪॥

૩૮ તસ્માત્પુરસ્તાદ્વાન્તમ્ । સર્વાઃ પ્રજાઃ પ્રતિનન્દન્તિ । પ્રાણો હિ પ્રિયઃ
પ્રજાનામ્ । પ્રાણ ઇવ પ્રિયઃ પ્રજાનાં ભવતિ । ય એવં વેદ । સ વા એષ
પ્રાણ એવ । અથ યદ્દક્ષિણતો વાતિ । માતરિશ્વૈવ ભૂત્વા દક્ષિણતો
વાતિ । તસ્માદ્દક્ષિણતો વાન્તં વિદ્યાત્ । સર્વા દિશ આવાતિ ॥ ૨। ૩। ૯। ૫॥

૩૯ સર્વા દિશોઽનુવિવાતિ । સર્વા દિશોઽનુ સંવાતીતિ । સ વા એષ
માતરિશ્વૈવ । અથ યત્પશ્ચાદ્વાતિ । પવમાન એવ ભૂત્વા પશ્ચાદ્વાતિ
। પૂતમસ્મા આહરન્તિ । પૂતમુપહરન્તિ । પૂતમશ્નાતિ । ય એવં વેદ ।
સ વા એષ પવમાન એવ ॥ ૨। ૩। ૯। ૬॥

૪૦ અથ યદુત્તરતો વાતિ । સવિતૈવ ભૂત્વોત્તરતો વાતિ ।
સવિતેવ સ્વાનાં ભવતિ । ય એવં વેદ । સ વા એષ સવિતૈવ । તે ય
એનં પુરસ્તાદાયન્તમુપવદન્તિ । ય એવાસ્ય પુરસ્તાત્પાપ્માનઃ ।

તાગ્સ્તેઽપઘ્નન્તિ । પુરસ્તાદિતરાન્પાપ્મનઃ સચન્તે । અથ ય એનં દક્ષિણત
આયન્તમુપવદન્તિ ॥ ૨। ૩। ૯। ૭॥

૪૧ ય એવાસ્ય દક્ષિણતઃ પાપ્માનઃ । તાગ્સ્તેઽપઘ્નન્તિ । દક્ષિણત
ઇતરાન્પાપ્મનઃ સચન્તે । અથ ય એનં પશ્ચાદાયન્તમુપ વદન્તિ ।
ય એવાસ્ય પશ્ચાત્પાપ્માનઃ । તાગ્સ્તેઽપઘ્નન્તિ । પશ્ચાદિતરાન્પાપ્મનઃ
સચન્તે । અથ ય એનમુત્તરત આયન્તમુપ વદન્તિ । ય એવાસ્યોત્તરતઃ
પાપ્માનઃ । તાગ્સ્તેઽપઘ્નન્તિ ॥ ૨। ૩। ૯। ૮॥

૪૨ ઉત્તરત ઇતરાન્પાપ્મનઃ સચન્તે । તસ્માદેવં વિદ્વાન્ । વીવ નૃત્યેત્
। પ્રેવ ચલેત્ । વ્યસ્યેવાક્ષ્યૌ ભાષેત । મણ્ટયેદિવ । ક્રાથયેદિવ ।
શૃઙ્ગાયેતેવ । ઉત મોપ વદેયુઃ । ઉત મે પાપ્માનમપહન્યુરિતિ । સ
યાં દિશઁ સનિમેષ્યન્થ્સ્યાત્ । યદા તાં દિશં વાતો વાયાત્ । અથ પ્રવેયાત્ ।
પ્ર વા ધાવયેત્ । સાતમેવ રદિતં વ્યૂઢં ગન્ધમભિ પ્રચ્યવતે । આઽસ્ય
તં જનપદં પૂર્વા કીર્તિર્ગચ્છતિ । દાનકામા અસ્મૈ પ્રજા ભવન્તિ । ય એવં
વેદ ॥ ૨। ૩। ૯। ૯॥ વેદ સંપવત આદિત્યાત્પવતે વાત્યા વાત્યેષ પવમાન એવ
દક્ષિણત આયન્તમુપ વદન્ત્યુત્તરતઃ પાપ્માનસ્તાગ્સ્તેઽપઘ્નન્તીત્યષ્ટૌ
ચ ॥ ૯॥

૪૩ પ્રજાપતિઃ સોમઁ રાજાનમસૃજત । તં ત્રયો વેદા અન્વસૃજ્યન્ત । તાન્
હસ્તેઽકુરુત । અથ હ સીતા સાવિત્રી । સોમઁ રાજાનં ચકમે । શ્રદ્ધામુ
સ ચકમે । સા હ પિતરં પ્રજાપતિમુપસસાર । તઁ હોવાચ । નમસ્તે
અસ્તુ ભગવઃ । ઉપ ત્વાઽયાનિ ॥ ૨। ૩। ૧૦। ૧॥

૪૪ પ્ર ત્વા પદ્યે । સોમં વૈ રાજાનં કામયે । શ્રદ્ધામુ સ કામયત ઇતિ । તસ્યા
ઉ હ સ્થાગરમલઙ્કારં કલ્પયિત્વા । દશહોતારં પુરસ્તાદ્વ્યાખ્યાય
। ચતુર્હોતારં દક્ષિણતઃ । પઞ્ચહોતારં પશ્ચાત્ । ષડ્ઢોતારમુત્તરતઃ ।
સપ્તહોતારમુપરિષ્ટાત્ । સંભારૈશ્ચ પત્નિભિશ્ચ મુખેઽલંકૃત્ય
॥ ૨। ૩। ૧૦। ૨॥

૪૫ આઽસ્યાર્ધં વવ્રાજ । તાઁ હોદીક્ષ્યોવાચ । ઉપ માઽઽવર્તસ્વેતિ । તઁ
હોવાચ । ભોગં તુ મ આચક્ષ્વ । એતન્મ આચક્ષ્વ । યત્તે પાણાવિતિ ।

તસ્યા ઉ હ ત્રીન્, વેદાન્પ્રદદૌ । તસ્માદુ હ સ્ત્રિયો ભોગમેવ હારયન્તે ।
સ યઃ કામયેત પ્રિયઃ સ્યામિતિ ॥ ૨। ૩। ૧૦। ૩॥

૪૬ યં વા કામયેત પ્રિયઃ સ્યાદિતિ । તસ્મા એતરꣳ સ્થાગરમલંકારં
કલ્પયિત્વા । દશહોતારં પુરસ્તાદ્વ્યાખ્યાય । ચતુર્હોતારં દક્ષિણતઃ ।
પઞ્ચહોતારં પશ્ચાત્ । ષડ્ઢોતારમુત્તરતઃ । સપ્તહોતારમુપરિષ્ટાત્ ।
સંભારૈશ્ચ પત્નિભિશ્ચ મુખેઽલંકૃત્ય । આઽસ્યાર્ધં વ્રજેત્ ।
પ્રિયો હૈવ ભવતિ ॥ ૨। ૩। ૧૦। ૪॥ અયાન્ચલંકૃત્ય સ્યામિતિ ભવતિ ॥ ૧૦॥

૪૭ બ્રહ્માત્મન્વદસૃજત । તદકામયત । સમાત્મના પદ્યેયેતિ ।
આત્મન્નાત્મન્નિત્યામન્ત્રયત । તસ્મૈ દશમꣳ હૂતઃ પ્રત્યશૃણોત્ । સ
દશહૂતોઽભવત્ । દશહૂતો હ વૈ નામૈષઃ । તં વા એતં દશહૂતꣳ
સન્તમ્ । દશહોતેત્યાચક્ષતે પરોક્ષેણ । પરોક્ષપ્રિયા ઇવ હિ દેવાઃ ॥
૨। ૩। ૧૧। ૧॥

૪૮ આત્મન્નાત્મન્નિત્યામન્ત્રયત । તસ્મૈ સપ્તમꣳ હૂતઃ પ્રત્યશૃણોત્
। સ સપ્તહૂતોઽભવત્ । સપ્તહૂતો હ વૈ નામૈષઃ । તં વા એતꣳ
સપ્તહૂતꣳ સન્તમ્ । સપ્તહોતેત્યાચક્ષતે પરોક્ષેણ । પરોક્ષપ્રિયા
ઇવ હિ દેવાઃ । આત્મન્નાત્મન્નિત્યામન્ત્રયત । તસ્મૈ ષષ્ઠꣳ હૂતઃ
પ્રત્યશૃણોત્ । સ ષડ્ઢૂતોઽભવત્ ।

૪૯ ષડ્ઢૂતો હ વૈ નામૈષઃ । તં વા એતꣳ ષડ્ઢૂતꣳ સન્તમ્
। ષડ્ઢોતેત્યાચક્ષતે પરોક્ષેણ । પરોક્ષપ્રિયા ઇવ હિ દેવાઃ ।
આત્મન્નાત્મન્નિત્યામન્ત્રયત । તસ્મૈ પઞ્ચમꣳ હૂતઃ પ્રત્યશૃણોત્ । સ
પઞ્ચહૂતોઽભવત્ । પઞ્ચહૂતો હ વૈ નામૈષઃ । તં વા એતં પઞ્ચહૂતꣳ
સન્તમ્ । પઞ્ચહોતેત્યાચક્ષતે પરોક્ષેણ ॥ ૨। ૩। ૧૧। ૩॥

૫૦ પરોક્ષપ્રિયા ઇવ હિ દેવાઃ । આત્મન્નાત્મન્નિત્યામન્ત્રયત । તસ્મૈ
ચતુર્થꣳ હૂતઃ પ્રત્યશૃણોત્ । સ ચતુર્હૂતોઽભવત્ । ચતુર્હૂતો હ વૈ
નામૈષઃ । તં વા એતં ચતુર્હૂતꣳ સન્તમ્ । ચતુર્હોતેત્યાચક્ષતે
પરોક્ષેણ । પરોક્ષપ્રિયા ઇવ હિ દેવાઃ । તમબ્રવીત્ । ત્વં વૈ મે
નેદિષ્ઠꣳ હૂતઃ પ્રત્યશ્રૌષીઃ । ત્વયૈનાનાખ્યાતાર ઇતિ । તસ્માન્નુ

હૈનાગ્શ્ચતુર્હોતાર ઇત્યાચક્ષતે । તસ્માચ્છુશ્રૂષુઃ પુત્રાણા ૅ
હૃદ્યતમઃ । નેદિષ્ઠો હૃદ્યતમઃ । નેદિષ્ઠો બ્રહ્મણો ભવતિ । ય
એવં વેદ ॥ ૨। ૩। ૧૧। ૪॥ દેવાઃ ષડ્ઢૂતોઽભવત્પઞ્ચહોતેત્યાચક્ષતે
પરોક્ષેણાશ્રૌષીઃ ષટ્ચ ॥ ૧૧॥

બ્રહ્મવાદિનઃ કિં દક્ષિણાં યો વા અવિદ્વાન્તસ્ય વૈ બ્રહ્મવાદિનો
યદ્દશહોતારઃ પ્રજાપતિર્વ્યસ્રં પ્રજાપતિઃ પુરુષં પ્રજાપતિરકામયત
સ તપઃ સોઽન્તર્વાન્બ્રહ્મવાદિનો યો વા ઇમં વિદ્યાત્પ્રજાપતિઃ સોમ ૅ
રાજાનં બ્રહ્માત્મન્વદેકાદશ ॥ ૧૧॥

બ્રહ્મવાદિનસ્તસ્ય વા અગ્નેર્યદ્વા ઇદં કિંચ પ્રજાપતિરકામયત ય
એવાસ્ય દક્ષિણતઃ પઞ્ચાશત્ ॥ ૫૦॥

બ્રહ્મવાદિનો ય એવં વેદ ॥

## દ્વિતીયાષ્ટકે ચતુર્થઃ પ્રપાઠકઃ ૪

૧ જુષ્ટો દમૂના અતિથિર્દુરોણે । ઇમં નો યજ્ઞમુપયાહિ વિદ્વાન્ । વિશ્વા
અગ્નેઽભિયુજો વિહત્ય । શત્રૂયતામાભરા ભોજનાનિ । અગ્ને શર્ધ
મહતે સૌભગાય । તવ દ્યુમ્નાન્યુત્તમાનિ સન્તુ । સં જાસ્પત્ય ૅ
સુયમમાકૃણુષ્વ । શત્રૂયતામભિતિષ્ઠા મહાઁસિ । અગ્ને યો
નોઽભિતો જનઃ । વૃકો વારો જિઘાઁસતિ ॥ ૨। ૪। ૧। ૧॥

૨ તાઙ્સ્ત્વં વૃત્રહઞ્જહિ । વસ્વસ્મભ્યમાભર । અગ્ને યો નોઽભિદાસતિ ।
સમાનો યશ્ચ નિષ્ટ્યઃ । ઇધ્મસ્યેવ પ્રક્ષાયતઃ । મા તસ્યોચ્છેષિ
કિઞ્ચન । ત્વમિન્દ્રાભિભૂરસિ । દેવો વિજ્ઞાતવીર્યઃ । વૃત્રહા
પુરુચેતનઃ । અપ પ્રાચ ઇન્દ્ર વિશ્વાઁ અમિત્રાન્ ॥ ૨। ૪। ૧। ૨॥

૩ અપાપાચો અભિભૂતે નુદસ્વ । અપોદીચો અપશૂરાધરાચ ઊરૌ । યથા તવ
શર્મન્મદેમ । તમિન્દ્રં વાજયામસિ । મહે વૃત્રાય હન્તવે । સ વૃષા
વૃષભો ભુવત્ । યુજે રથં ગવેષણ ૅ હરિભ્યામ્ । ઉપ બ્રહ્માણિ
જુજુષાણમસ્થુઃ । વિબાધિષ્ટાસ્ય રોદસી મહિત્વા । ઇન્દ્રો વૃત્રાણ્યપ્રતી

જઘન્વાન્ ॥ ૨। ૪। ૧। ૩॥

૪ હવ્યવાહમભિમાતિષાહમ્ । રક્ષોહણં પૃતનાસુ જિષ્ણુમ્ ।
જ્યોતિષ્મન્તં દીદ્યતં પુરન્ધિમ્ । અગ્નિરઁ સ્વિષ્ટકૃતમાહુવેમ ।
સ્વિષ્ટમગ્ને અભિ તત્પૃણાહિ । વિશ્વા દેવ પૃતના અભિષ્ય । ઉરું નઃ
પન્થાં પ્રદિશન્વિભાહિ । જ્યોતિષ્મદ્ધેહ્યજરં ન આયુઃ । ત્વામગ્ને
હવિષ્મન્તઃ । દેવં મર્તાસ ઈડતે ॥ ૨। ૪। ૧। ૪॥

૫ મન્યે ત્વા જાતવેદસમ્ । સ હવ્યા વક્ષ્યાનુષક્ । વિશ્વાનિ નો દુર્ગહા
જાતવેદઃ । સિન્ધું ન નાવા દુરિતાઽતિ પર્ષિ । અગ્ને અત્રિવન્મનસા ગૃણાનઃ ।
અસ્માકં બોધ્યવિતા તનૂનામ્ । પૂષા ગા અન્વેતુ નઃ । પૂષા રક્ષત્વર્વતઃ
। પૂષા વાજઁસનોતુ નઃ । પૂષેમા આશા અનુવેદ સર્વાઃ ॥ ૨। ૪। ૧। ૫॥

૬ સો અસ્માઁ અભયતમેન નેષત્ । સ્વસ્તિદા અઘૃણિઃ સર્વવીરઃ ।
અપ્રયુચ્છન્પુર એતુ પ્રજાનન્ । ત્વમગ્ને સપ્રથા અસિ । જુષ્ટો
હોતા વરેણ્યઃ । ત્વયા યજ્ઞં વિતન્વતે । અગ્ની રક્ષાઁસિ સેધતિ
। શુક્રશોચિરમર્ત્યઃ । શુચિઃ પાવક ઈડ્યઃ । અગ્ને રક્ષા ણો
અઁહસઃ ॥ ૨। ૪। ૧। ૬॥

૭ પ્રતિષ્મ દેવ રીષતઃ । તપિષ્ઠૈરજરો દહ । અગ્ને હઁસિ ન્યત્રિણમ્ ।
દીદ્યન્મર્ત્યેષ્વા । સ્વે ક્ષયે શુચિવ્રત । આ વાત વાહિ ભેષજમ્ । વિ વાત વાહિ
યદ્રપઃ । ત્વઁ હિ વિશ્વભેષજઃ । દેવાનાં દૂત ઈયસે । દ્વાવિમૌ વાતૌ
વાતઃ ॥ ૨। ૪। ૧। ૭॥

૮ આ સિન્ધોરા પરાવતઃ । દક્ષં મે અન્ય આવાતુ । પરાઽન્યો વાતુ યદ્રપઃ
। યદદો વાત તે ગૃહે । અમૃતસ્ય નિધિર્હિતઃ । તતો નો દેહિ જીવસે
। તતો નો ધેહિ ભેષજમ્ । તતો નો મહ આવહ । વાત આવાતુ ભેષજમ્ ।
શમ્ભૂર્મયોભૂર્નો હૃદે ॥ ૨। ૪। ૧। ૮॥

૯ પ્ર ણ આયૂઁષિ તારિષત્ । ત્વમગ્ને અયાઽસિ । અયા સન્મનસા હિતઃ ।
અયા સન્ હવ્યમૂહિષે । અયા નો ધેહિ ભેષજમ્ । ઇષ્ટો અગ્નિરાહુતઃ ।
સ્વાહાકૃતઃ પિપર્તુ નઃ । સ્વગા દેવેભ્ય ઇદં નમઃ । કામો ભૂતસ્ય
ભવ્યસ્ય । સમ્રાડેકો વિરાજતિ ॥ ૨। ૪। ૧। ૯॥

૧૦ સ ઇદં પ્રતિપપ્રથે । ઋતૂનુત્સૃજતે વશી । કામસ્તદગ્રે
સમવર્તતાધિ । મનસો રેતઃ પ્રથમં યદાસીત્ । સતો
બન્ધુમસતિ નિરવિન્દન્ । હૃદિ પ્રતીષ્યા કવયો મનીષા । ત્વયા
મન્યો સરથમારુજન્તઃ । હર્ષમાણાસો ધૃષતા મરુત્વઃ । તિગ્મેષવ
આયુધા સઁ શિશાનાઃ । ઉપપ્રયન્તિ નરો અગ્નિરૂપાઃ ॥ ૨। ૪। ૧। ૧૦॥
૧૧ મન્યુર્ભગો મન્યુરેવાસ દેવઃ । મન્યુર્હોતા વરુણો વિશ્વવેદાઃ ।
મન્યું વિશ ઈડતે દેવયન્તીઃ । પાહિ નો મન્યો તપસા શ્રમેણ । ત્વમગ્ને
વ્રતભૃચ્છુચિઃ । દેવાઁ આસાદયા ઇહ । અગ્ને હવ્યાય વોઢવે ।
વ્રતા નુ બિભ્રદ્વ્રતપા અદાભ્યઃ । યજાનો દેવાઁ અજરઃ સુવીરઃ
। દધદ્રત્નાનિ સુવિદાનો અગ્ને । ગોપાય નો જીવસે જાતવેદઃ ॥ ૨। ૪। ૧। ૧૧॥
જિઘ્રાઁ સત્યમિત્રાગ્જઘન્વાનીડતે સર્વા અઁ હસો વાતો હૃદે
રાજત્યગ્નિરૂપાઃ સુવિદાનો અગ્ન એકં ચ ॥ ૧॥
૧૨ ચક્ષુષો હેતે મનસો હેતે । વાચો હેતે બ્રહ્મણો હેતે । યો
માઽઘાયુરભિદાસતિ । તમગ્ને મેન્યાઽમેનિં કૃણુ । યો મા ચક્ષુષા
યો મનસા । યો વાચા બ્રહ્મણાઽઘાયુરભિદાસતિ । તયાઽગ્ને ત્વં મેન્યા ।
અમુમમેનિં કૃણુ । યત્કિંચાસૌ મનસા યચ્ચ વાચા । યજ્ઞૈર્જુહોતિ
યજુષા હવિર્ભિઃ ॥ ૨। ૪। ૨। ૧॥
૧૩ તન્મૃત્યુર્નિરૃત્યા સંવિદાનઃ । પુરા દિષ્ટાદાહુતીરસ્ય હન્તુ । યાતુધાના
નિરૃતિરાદુ રક્ષઃ । તે અસ્ય ઘ્નન્ત્વનૃતેન સત્યમ્ । ઇન્દ્રેષિતા
આજ્યમસ્ય મથ્નન્તુ । મા તથ્સમૃદ્ધિ યદસૌ કરોતિ । હન્મિ તેઽહં
કૃતઁ હવિઃ । યો મે ઘોરમચીકૃતઃ । અપાઞ્ચૌ ત ઉભૌ બાહૂ ।
અપનહ્યામ્યાસ્યમ્ ॥ ૨। ૪। ૨। ૨॥
૧૪ અપનહ્યામિ તે બાહૂ । અપનહ્યામ્યાસ્યમ્ । અગ્નેર્દેવસ્ય બ્રહ્મણા । સર્વં
તેઽવધિષં કૃતમ્ । પુરાઽમુષ્ય વષટ્કારાત્ । યજ્ઞં દેવેષુ નસ્કૃધિ ।
સ્વિષ્ટમસ્માકં ભૂયાત્ । માઽસ્માન્પ્રાપન્નરાતયઃ । અન્તિ દૂરે સતો અગ્ને ।
ભ્રાતૃવ્યસ્યાભિદાસતઃ ॥ ૨। ૪। ૨। ૩॥

૧૫ વષટ્કારેણ વજ્રેણ । કૃત્યાꣳ હન્મિ કૃતામહમ્ । યો મા નક્તં
દિવા સાયમ્ । પ્રાતશ્ચાહ્નો નિપીયતિ । અદ્યા તમિન્દ્ર વજ્રેણ । ભ્રાતૃવ્યં
પાદયામસિ । ઇન્દ્રસ્ય ગૃહોઽસિ તં ત્વા । પ્રપદ્યે સગુઃ સાશ્વઃ । સહ
યન્મે અસ્તિ તેન । ઇડે અગ્નિં વિપશ્ચિતમ્ ॥ ૨। ૪। ૨। ૪॥

૧૬ ગિરા યજ્ઞસ્ય સાધનમ્ । શ્રુષ્ટીવાનં ધિતાવાનમ્ । અગ્ને શકેમ
તે વયમ્ । યમં દેવસ્ય વાજિનઃ । અતિ દ્વેષાꣳસિ તરેમ । અવતં મા
સમનસૌ સમોકસૌ । સચેતસૌ સરેતસૌ । ઉભૌ મામવતં જાતવેદસૌ ।
શિવૌ ભવતમદ્ય નઃ । સ્વયં કૃણ્વાનઃ સુગમપ્રયાવમ્ ॥ ૨। ૪। ૨। ૫॥

૧૭ તિગ્મશૃઙ્ગો વૃષભઃ શોશુચાનઃ । પ્રત્નꣳ
સધસ્થમનુપશ્યમાનઃ । આ તન્તુમગ્નિર્દિવ્યં તતાન । ત્વં નસ્તન્તુરુત
સેતુરગ્ને । ત્વં પન્થા ભવસિ દેવયાનઃ । ત્વયાઽગ્ને પૃષ્ઠં વયમારુહેમ ।
અથા દેવૈઃ સધમાદં મદેમ । ઉદુત્તમં મુમુગ્ધિ નઃ । વિ પાશં મધ્યમં
ચૃત । અવાધમાનિ જીવસે ॥

૧૮ વયꣳ સોમ વ્રતે તવ । મનસ્તનૂષુ બિભ્રતઃ । પ્રજાવન્તો
અશીમહિ । ઇન્દ્રાણી દેવી સુભગા સુપત્ની । ઉદꣳશેન પતિવિદ્યે જિગાય ।
ત્રિꣳશદસ્યા જઘનં યોજનાનિ । ઉપસ્થ ઇન્દ્રગ્ગ્ સ્થવિરં બિભર્તિ ।
સેના હ નામ પૃથિવી ધનઞ્જયા । વિશ્વવ્યચા અદિતિઃ સૂર્યત્વક્ ।
ઇન્દ્રાણી દેવી પ્રાસહા દદાના ॥ ૨। ૪। ૨। ૭॥

૧૯ સા નો દેવી સુહવા શર્મ યચ્છતુ । આ ત્વાઽહાર્ષમન્તરભૂઃ
। ધ્રુવસ્તિષ્ઠાવિચાચલિઃ । વિશસ્ત્વા સર્વા વાઞ્છન્તુ । મા
ત્વદ્રાષ્ટ્રમધિભ્રશત્ । ધ્રુવા દ્યૌર્ધ્રુવા પૃથિવી । ધ્રુવં વિશ્વમિદં
જગત્ । ધ્રુવા હ પર્વતા ઇમે । ધ્રુવો રાજા વિશામયમ્ । ઇહૈવૈધિ
મા વ્યથિષ્ઠાઃ ॥ ૨। ૪। ૨। ૮॥

૨૦ પર્વત ઇવાવિચાચલિઃ । ઇન્દ્ર ઇવેહ ધ્રુવસ્તિષ્ઠ । ઇહ રાષ્ટ્રમુ
ધારય । અભિતિષ્ઠ પૃતન્યતઃ । અધરે સન્તુ શત્રવઃ । ઇન્દ્ર ઇવ
વૃત્રહા તિષ્ઠ । અપઃ, ક્ષેત્રાણિ સંજયન્ । ઇન્દ્ર એણમદીધરત્ । ધ્રુવં
ધ્રુવેણ હવિષા । તસ્મૈ દેવા અધિબ્રવન્ । અયં ચ બ્રાહ્મણસ્પતિઃ

॥ હવિર્ભિરાસ્યમભિ દાસતો વિપશ્ચિતમપ્રયાવં જીવસે દદાના
વ્યથિષ્ઠા બ્રવન્નેકં ચ ॥ ૨। ૪। ૨। ૨॥

૨૧ જુષ્ટી નરો બ્રહ્મણા વઃ પિતૃણામ્ । અક્ષમવ્યયં ન કિલા રિષાથ
। યચ્છક્વરીષુ બૃહતા રવેણ । ઇન્દ્રે શુષ્મમદધાથા વસિષ્ઠાઃ ।
પાવકા નઃ સરસ્વતી । વાજેભિર્વાજિનીવતી । યજ્ઞં વષ્ટુ ધિયા વસુઃ
। સરસ્વત્યભિ નો નેષિ વસ્યઃ । મા પસ્ફરીઃ પયસા મા ન આધક્ ।
જુષસ્વ નઃ સખ્યા વેશ્યા ચ ॥ ૨। ૪। ૩। ૧॥

૨૨ મા ત્વત્ક્ષેત્રાણ્યરણાનિ ગન્મ । વૃઞ્જે હવિર્નમસા બર્હિરગ્નૌ ।
અયામિ સ્રુગ્ઘૃતવતી સુવૃક્તિઃ । અમ્યક્ષિ સદ્મ સદને પૃથિવ્યાઃ ।
અશ્રાયિ યજ્ઞઃ સૂર્યે ન ચક્ષુઃ । ઇહાર્વાઞ્ચમતિહ્વયે । ઇન્દ્રં જૈત્રાય
જેતવે । અસ્માકમસ્તુ કેવલઃ । અર્વાઞ્ચમિન્દ્રમમુતો હવામહે । યો
ગોજિદ્ધનજિદશ્વજિદ્યઃ ॥ ૨। ૪। ૩। ૨॥

૨૩ ઇમં નો યજ્ઞં વિહવે જુષસ્વ । અસ્ય કુર્મો હરિવો મેદિનં ત્વા ।
અસંમૃષ્ટો જાયસે માતૃવોઃ શુચિઃ । મન્દ્રઃ કવિરુદતિષ્ઠો વિવસ્વતઃ ।
ઘૃતેન ત્વાઽવર્ધયન્નગ્ન આહુત । ધૂમસ્તે કેતુરભવદ્દિવિ શ્રિતઃ ।
અગ્નિરગ્રે પ્રથમો દેવતાનામ્ । સંયાતાનામુત્તમો વિષ્ણુરાસીત્ । યજમાનાય
પરિગૃહ્ય દેવાન્ । દીક્ષયેદꣳ હવિરાગચ્છતં નઃ ॥ ૨। ૪। ૩। ૩॥

૨૪ અગ્નિશ્ચ વિષ્ણો તપ ઉત્તમં મહઃ । દીક્ષાપાલેભ્યો વનતꣳ
હિ શક્રા । વિશ્વૈર્દેવૈર્યજ્ઞિયૈઃ સંવિદાનૌ । દીક્ષામસ્મૈ યજમાનાય
ધત્તમ્ । પ્ર તદ્વિષ્ણુઃ સ્તવતે વીર્યાય । મૃગો ન ભીમઃ કુચરો ગિરિષ્ઠાઃ
। યસ્યોરુષુ ત્રિષુ વિક્રમણેષુ । અધિક્ષિયન્તિ ભુવનાનિ વિશ્વા ।
નૂ મર્તો દયતે સનિષ્યન્, યઃ । વિષ્ણવ ઉરુગાયાય દાશત્ ॥ ૨। ૪। ૩। ૪॥

૨૫ પ્ર યઃ સત્રાચા મનસા યજાતૈ । એતાવન્તં નર્યમાવિવાસાત્ ।
વિચક્રમે પૃથિવીમેષ એતામ્ । ક્ષેત્રાય વિષ્ણુર્મનુષે દશસ્યન્ ।
ધ્રુવાસો અસ્ય કીરયો જનાસઃ । ઉરુક્ષિતિꣳ સુજનિમાચકાર । ત્રિર્દેવઃ
પૃથિવીમેષ એતામ્ । વિચક્રમે શતર્ચસં મહિત્વા । પ્ર વિષ્ણુરસ્તુ
તવસસ્તવીયાન્ । ત્વેષꣳ હ્યસ્ય સ્થવિરસ્ય નામ ॥ ૨। ૪। ૩। ૫॥

૨૬ હોતારં ચિત્રરથમધ્વરસ્ય । યજ્ઞસ્ય યજ્ઞસ્ય કેતુઁ
રુશન્તમ્ । પ્રત્યર્ધિં દેવસ્ય દેવસ્ય મહ્ના । શ્રિયા ત્વગ્નિમતિથિં
જનાનામ્ । આ નો વિશ્વાભિરૂતિભિઃ સજોષાઃ । બ્રહ્મ જુષાણો હર્યશ્વ યાહિ ।
વરીવૃજથ્સ્થવિરેભિઃ સુશિપ્ર । અસ્મે દધદ્વૃષણઁ શુષ્મમિન્દ્ર ।
ઇન્દ્રઃ સુવર્ષા જનયન્નહાનિ । જિગાયોશિગ્ભિઃ પૃતના અભિશ્રીઃ ॥ ૨। ૪। ૩। ૬॥

૨૭ પ્રારોચયન્મનવે કેતુમહ્નામ્ । અવિન્દજ્જ્યોતિર્બૃહતે રણાય ।
અશ્વિનાવવસે નિહ્વયે વામ્ । આ નૂનં યાતઁ સુકૃતાય વિપ્રા ।
પ્રાતર્યુક્તેન સુવૃતા રથેન । ઉપાગચ્છતમવસાઽઽગતં નઃ ।
અવિષ્ટં ધીષ્વશ્વિના ન આસુ । પ્રજાવદ્રેતો અહ્રયં નો અસ્તુ । આવાં તોકે
તનયે તૂતુજાનાઃ । સુરત્નાસો દેવવીતિં ગમેમ ॥ ૨। ૪। ૩। ૭॥

૨૮ ત્વઁ સોમ ક્રતુભિઃ સુક્રતુર્ભૂઃ । ત્વં દક્ષૈઃ સુદક્ષો વિશ્વવેદાઃ
। ત્વં વૃષા વૃષત્વેભિર્મહિત્વા । દ્યુમ્નેભિર્દ્યુમ્ન્યભવો નૃચક્ષાઃ ।
અષાઢં યુથ્સુ પૃતનાસુ પપ્રિમ્ । સુવર્ષામપ્સ્વાં વૃજનસ્ય ગોપામ્ ।
ભરેષુજાઁ સુક્ષિતિઁ સુશ્રવસમ્ । જયન્તં ત્વામનુ મદેમ સોમ ।
ભવા મિત્રો ન શેવ્યો ઘૃતાસુતિઃ । વિભૂતદ્યુમ્ન એવયા ઉ સપ્રથાઃ ॥
૨। ૪। ૩। ૮॥

૨૯ અધા તે વિષ્ણો વિદુષાચિદૃધ્યઃ । સ્તોમો યજ્ઞસ્ય રાધ્યો હવિષ્મતઃ
। યઃ પૂર્વ્યાય વેધસે નવીયસે । સુમજ્જાનયે વિષ્ણવે દદાશતિ । યો
જાતમસ્ય મહતો મહિ બ્રવાત્ । સેદુઃ શ્રવોભિર્યુજ્યંચિદભ્યસત્ ।
તમુ સ્તોતારઃ પૂર્વ્યં યથા વિદ ઋતસ્ય । ગર્ભઁહવિષા પિપર્તન ।
આઽસ્ય જાનન્તો નામ ચિદ્વિવક્તન । બૃહત્તે વિષ્ણો સુમતિં ભજામહે ॥ ૨। ૪। ૩। ૯॥

૩૦ ઇમા ધાના ઘૃતસ્નુવઃ । હરી ઇહોપવક્ષતઃ । ઇન્દ્રઁસુખતમે
રથે । એષ બ્રહ્મા પ્ર તે મહે । વિદથે શઁ સિષઁ હરી । ય
ઋત્વિયઃ પ્ર તે વન્વે । વનુષો હર્યતં મદમ્ । ઇન્દ્રો નામ ઘૃતં ન
યઃ । હરિભિશ્ચારુ સેચતે । શ્રુતો ગણ આ ત્વા વિશન્તુ ॥ ૨। ૪। ૩। ૧૦॥

૩૧ હરિવર્પસં ગિરઃ । આ ચર્ષણિપ્રા વૃષભો જનાનામ્ । રાજા

કૃષ્ટીનાં પુરુહૂત ઇન્દ્રઃ । સ્તુતઃ શ્રવસ્યન્નવસોપમદ્રિક્ । યુક્ત્વા
હરી વૃષણાઽઽયાહ્યર્વાઙ્ । પ્ર યત્સિન્ધવઃ પ્રસવં યદાયન્ । આપઃ
સમુદ્રꣳ રથ્યેવ જગ્મુઃ । અતશ્ચિદિન્દ્રઃ સદસો વરીયાન્ । યદીꣳ
સોમઃ પૃણતિ દુગ્ધો અꣳશુઃ । હ્વયામસિ ત્વેન્દ્ર યાહ્યર્વાઙ્ ॥ ૨। ૪। ૩। ૧૧॥

૩૨ અરં તે સોમસ્તનુવે ભવાતિ । શતક્રતો માદયસ્વા સુતેષુ ।
પ્રાસ્માꣳ અવ પૃતનાસુ પ્ર યુત્સુ । ઇન્દ્રાય સોમાઃ પ્રદિવો વિદાનાઃ ।
ઋભુર્યેભિર્વૃષપર્વા વિહાયાઃ । પ્રયમ્યમાણાન્પ્રતિ ષૂ ગૃભાય ।
ઇન્દ્ર પિબ વૃષધૂતસ્ય વૃષ્ણઃ । અહેડમાન ઉપયાહિ યજ્ઞમ્ । તુભ્યં
પવન્ત ઇન્દવઃ સુતાસઃ । ગાવો ન વજિન્થ્સ્વમોકો અચ્છ ॥ ૨। ૪। ૩। ૧૨॥

૩૩ ઇન્દ્રાગહિ પ્રથમો યજ્ઞિયાનામ્ । યા તે કાકુથ્સુકૃતા યા વરિષ્ઠા ।
યયા શશ્વત્પિબસિ મધ્વ ઊર્મિમ્ । તયા પાહિ પ્ર તે અધ્વર્યુરસ્થાત્ ।
સં તે વજ્રો વર્તતામિન્દ્ર ગવ્યુઃ । પ્રાતર્યુજા વિબોધય । અશ્વિના વેહ
ગચ્છતમ્ । અસ્ય સોમસ્ય પીતયે । પ્રાતર્યાવાણા પ્રથમા યજધ્વમ્ । પુરા
ગૃધ્રાદરરુષઃ પિબાથઃ । પ્રાતર્હિ યજ્ઞમશ્વિના દધાતે । પ્રશꣳસન્તિ
કવયઃ પૂર્વભાજઃ । પ્રાતર્યજધ્વમશ્વિના હિનોત । ન સાયમસ્તિ દેવયા
અજુષ્ટમ્ । ઉતાન્યો અસ્મદ્યજતે વિચાયઃ । પૂર્વઃ પૂર્વો યજમાનો વનીયાન્ ॥
૨। ૪। ૩। ૧૩॥ ચાશ્વજિઘો ગચ્છતં નો દાશન્નામાભિશ્રીર્ગમેમ સપ્રથા
ભજામહે વિશન્તુ યાહ્યર્વાઽચ્છ પિબાથઃ ષટ્ચ ॥ ૩॥

૩૪ નક્તં જાતાઽસ્યોષધે । રામે કૃષ્ણે અસિક્નિ ચ । ઇદꣳ રજનિ રજય
। કિલાસં પલિતં ચ યત્ । કિલાસં ચ પલિતં ચ । નિરિતો નાશયા
પૃષત્ । આ નઃ સ્વો અશ્નુતાં વર્ણઃ । પરા શ્વેતાનિ પાતય । અસિતં તે
નિલયનમ્ । આસ્થાનમસિતં તવ ॥ ૨। ૪। ૪। ૧॥

૩૫ અસિક્નિયસ્યોષધે । નિરિતો નાશયા પૃષત્ । અસ્થિજસ્ય કિલાસસ્ય ।
તનૂજસ્ય ચ યત્ત્વચિ । કૃત્યયા કૃતસ્ય બ્રહ્મણા । લક્ષ્મ
શ્વેતમનીનશમ્ । સરૂપા નામ તે માતા । સરૂપો નામ તે પિતા ।
સરૂપાઽસ્યોષધે સા । સરૂપમિદં કૃધિ ॥ ૨। ૪। ૪। ૨॥

૩૬ શુનꣳ હુવેમ મઘવાનમિન્દ્રમ્ । અસ્મિન્ભરે નૃતમં વાજસાતૌ ।

શ઼ૃણ્વન્તમુગ્રમૂતયે સમત્સુ । ઘ્નન્તં વૃત્રાણિ સંજિતં ધનાનામ્
। ધૂનુથ દ્યાં પર્વતાન્દાશુષે વસુ । નિ વો વના જિહતે યામનો ભિયા ।
કોપયથ પૃથિવીં પૃશ્નિમાતરઃ । યુધે યદુગ્રાઃ પૃષતીરયુગ્ધ્વમ્ ।
પ્રવેપયન્તિ પર્વતાન્ । વિવિઞ્ચન્તિ વનસ્પતીન્ ॥ ૨। ૪। ૪। ૩॥

૩૭ પ્રોઽવારત મરુતો દુર્મદા ઇવ । દેવાસઃ સર્વયા વિશા । પુરુત્રા
હિ સદૃઙ્ઙસિ । વિશો વિશ્વા અનુ પ્રભુ । સમત્સુ ત્વા હવામહે ।
સમત્સ્વગ્નિમવસે । વાજયન્તો હવામહે । વાજેષુ ચિત્રરાધસમ્ ।
સંગચ્છધ્વ ँ સંવદધ્વમ્ । સં વો મના ँસિ જાનતામ્ ॥ ૨। ૪। ૪। ૪॥

૩૮ દેવા ભાગં યથા પૂર્વે । સંજાનાના ઉપાસત । સમાનો મન્ત્રઃ
સમિતિઃ સમાની । સમાનં મનઃ સહ ચિત્તમેષામ્ । સમાનં કેતો અભિ
સ ँરભધ્વમ્ । સંજ્ઞાનેન વો હવિષા યજામઃ । સમાની વ આકૂતિઃ ।
સમાના હૃદયાનિ વઃ । સમાનમસ્તુ વો મનઃ । યથા વઃ સુસહાસતિ ॥
૨। ૪। ૪। ૫॥

૩૯ સંજ્ઞાનં નઃ સ્વૈઃ । સંજ્ઞાનમરણૈઃ । સંજ્ઞાનમશ્વિના યુવમ્ ।
ઇહાસ્માસુ નિયચ્છતમ્ । સંજ્ઞાનં મે બૃહસ્પતિઃ । સંજ્ઞાન ँ
સવિતા કરત્ । સંજ્ઞાનમશ્વિના યુવમ્ । ઇહ મહ્યં નિયચ્છતમ્ । ઉપ
ચ્છાયામિવ ઘૃણેઃ । અગન્મ શર્મ તે વયમ્ ॥ ૨। ૪। ૪। ૬॥

૪૦ અગ્ને હિરણ્યસંદૃશઃ । અદબ્ધેભિઃ સવિતઃ પાયુભિષ્ટ્વમ્ । શિવેભિરદ્ય
પરિપાહિ નો ગયમ્ । હિરણ્યજિહ્વઃ સુવિતાય નવ્યસે । રક્ષા માકિર્નો
અઘશ ँસ ઈશત । મદે મદે હિ નો દદુઃ । યૂથા ગવામૃજુક્રતુઃ ।
સંગૃભાય પુરૂશતા । ઉભયા હસ્ત્યા વસુ । શિશીહિ રાય આભર ॥
૨। ૪। ૪। ૭॥

૪૧ શિપ્રિન્વાજાનાં પતે । શચીવસ્તવ દ ँસના । આ તૂ ન ઇન્દ્ર ભાજય
। ગોષ્વશ્વેષુ શુભ્રુષુ । સહસ્રેષુ તુવીમઘ । યદ્દેવા દેવ હેડનમ્ ।
દેવાસશ્ચકૃમા વયમ્ । આદિત્યાસ્તસ્માન્મા યૂયમ્ । ઋતસ્યર્તેન મુઞ્ચત ।
ઋતસ્યર્તેનાદિત્યાઃ ॥ ૨। ૪। ૪। ૮॥

૪૨ યજત્રા મુઞ્ચતેહ મા । યજ્ઞૈર્વો યજ્ઞવાહસઃ । આશિક્ષન્તો ન શેકિમ
। મેદસ્વતા યજમાનાઃ । સ્રુચાઽઽજ્યેન જુહ્વતઃ । અકામા વો વિશ્વે દેવાઃ
। શિક્ષન્તો નોપશેકિમ । યદિ દિવા યદિ નક્તમ્ । એન એનસ્યોઽકરત્ ।
ભૂતં મા તસ્માદ્ભવ્યં ચ ॥ ૨। ૪। ૪। ૯॥

૪૩ દ્રુપદાદિવ મુઞ્ચતુ । દ્રુપદાદિવેન્મુમુચાનઃ । સ્વિન્નઃ સ્નાત્વી મલાદિવ
। પૂતં પવિત્રેણેવાજ્યમ્ । વિશ્વે મુઞ્ચન્તુ મૈનસઃ । ઉદ્વયં તમસસ્પરિ
। પશ્યન્તો જ્યોતિરુત્તરમ્ । દેવં દેવત્રા સૂર્યમ્ । અગન્મ જ્યોતિરુત્તમમ્
॥ ૨। ૪। ૪। ૧૦॥ તવ કૃધિ વનસ્પતીઞ્જાનતામસતિ વયં ભરાદિત્યાશ્ચ
નવ ચ ॥ ૪॥

૪૪ વૃષા સો અઁશુઃ પવતે હવિષ્માન્ત્સોમઃ । ઇન્દ્રસ્ય ભાગ
ઋતયુઃ શતાયુઃ । સમા વૃષાણં વૃષભં કૃણોતુ । પ્રિયં વિશાઁ
સર્વવીરઁ સુવીરમ્ । કસ્ય વૃષા સુતે સચા । નિયુત્વાન્વૃષભો રણત્
। વૃત્રહા સોમપીતયે । યસ્તે શૃઙ્ગ વૃષો નપાત્ । પ્રણપાત્કુણ્ડપાય્યઃ ।
ન્યસ્મિન્દધ્ર આ મનઃ ॥ ૨। ૪। ૫। ૧॥

૪૫ તઁ સધ્રીચીરૂતયો વૃષ્ણિયાનિ । પૌઁસ્યાનિ નિયુતઃ સશ્ચુરિન્દ્રમ્
। સમુદ્રં ન સિન્ધવ ઉક્થશુષ્માઃ । ઉરુવ્યચસં ગિર આવિશન્તિ
। ઇન્દ્રાય ગિરો અનિશિતસર્ગાઃ । અપઃ પ્રૈરયન્ત્સગરસ્ય બુધ્નાત્ । યો
અક્ષેણેવ ચક્રિયા શચીભિઃ । વિષ્વક્તસ્તમ્ભ પૃથિવીમુત દ્યામ્ ।
અક્ષોદયચ્છવસા ક્ષામ બુધ્નમ્ । વાર્ણવાતસ્તવિષીભિરિન્દ્રઃ ॥ ૨। ૪। ૫। ૨॥

૪૬ દૃઢાન્યૌધ્નાદુશમાન ઓજઃ । અવાભિનત્કકુભઃ પર્વતાનામ્ । આ નો
અગ્ને સુકેતુના । રયિં વિશ્વાયુપોષસમ્ । માર્ડીકં ધેહિ જીવસે । ત્વઁ
સોમ મહે ભગમ્ । ત્વં યૂન ઋતાયતે । દક્ષં દધાસિ જીવસે । રથં
યુઞ્જતે મરુતઃ શુભે સુગમ્ । સૂરો ન મિત્રાવરુણા ગવિષ્ટિષુ ॥ ૨। ૪। ૫। ૩॥

૪૭ રજાઁસિ ચિત્રા વિચરન્તિ તન્યવઃ । દિવઃ સમ્રાજા પયસા ન ઉક્ષતમ્ ।
વાચઁ સુ મિત્રાવરુણાવિરાવતીમ્ । પર્જન્યશ્ચિત્રાં વદતિ ત્વિષીમતીમ્
। અભ્રા વસત મરુતઃ સુ માયયા । દ્યાં વર્ષયતમરુણામરેપસમ્ । અયુક્ત
સપ્ત શુન્ધ્યુવઃ । સૂરો રથસ્ય નપ્ત્રિયઃ । તાભિર્યાતિ સ્વયુક્તિભિઃ ।

વહિષ્ઠેભિર્વિહરન્, યાસિ તન્તુમ્ ॥ ૨। ૪। ૫। ૪॥

૪૮ અવવ્યયન્નસિતં દેવ વસ્વઃ । દવિધ્વતો રશ્મયઃ સૂર્યસ્ય ।
ચર્મેવાવાધુસ્તમો અપ્સ્વન્તઃ । પર્જન્યાય પ્રગાયત । દિવસ્પુત્રાય
મીઢુષે । સ નો યવસમિચ્છતુ । અચ્છા વદ તવસં ગીર્ભિરાભિઃ ।
સ્તુહિ પર્જન્યં નમસા વિવાસ । કનિક્રદદ્વૃષભો જીરદાનુઃ । રેતો
દધાત્વોષધીષુ ગર્ભમ્ ॥ ૨। ૪। ૫। ૫॥

૪૯ યો ગર્ભમોષધીનામ્ । ગવાં કૃણોત્યર્વતામ્ । પર્જન્યઃ પુરુષીણામ્ ।
તસ્મા ઇદાસ્યે હવિઃ । જુહોતા મધુમત્તમમ્ । ઇડાં નઃ સંયતં કરત્ ।
તિસ્રો યદગ્ને શરદસ્ત્વામિત્ । શુચિં ઘૃતેન શુચયઃ સપર્યન્ ।
નામાનિ ચિદ્ધિરે યજ્ઞિયાનિ । અસૂદયન્ત તનુવઃ સુજાતાઃ ॥ ૨। ૪। ૫। ૬॥

૫૦ ઇન્દ્રશ્ચ નઃ શુનાસીરૌ । ઇમં યજ્ઞં મિમિક્ષતમ્ । ગર્ભં ધત્તꣳ
સ્વસ્તયે । યયોરિદં વિશ્વં ભુવનમાવિવેશ । યયોરાનન્દો નિહિતો
મહશ્ચ । શુનાસીરાવૃતુભિઃ સંવિદાનૌ । ઇન્દ્રવન્તૌ હવિરિદં જુષેથામ્
। આ ઘા યે અગ્નિમિન્ધતે । સ્તૃણન્તિ બર્હિરાનુષક્ । યેષામિન્દ્રો
યુવા સખા । અગ્ન ઇન્દ્રશ્ચ મેદિના । હથો વૃત્રાણ્યપ્રતિ ।
યુવꣳ હિ વૃત્રહન્તમા । યાભ્યાꣳ સુવરજયન્નગ્ર એવ ।
યાવાતસ્થતુર્ભુવનસ્ય મધ્યે । પ્રચર્ષણી વૃષણા વજ્રબાહૂ । અગ્ની
ઇન્દ્રા વૃત્રહણા હુવે વામ્ ॥ ૨। ૪। ૫। ૭॥ મન ઇન્દ્રો ગવિષ્ટિષુ તન્તું
ગર્ભꣳ સુજાતાઃ સખા સપ્ત ચ ॥ ૫॥

૫૧ ઉત નઃ પ્રિયા પ્રિયાસુ । સપ્તસ્વસા સુજુષ્ટા । સરસ્વતી સ્તોમ્યાઽભૂત્
। ઇમા જુહ્વાના યુષ્મદા નમોભિઃ । પ્રતિ સ્તોમꣳસરસ્વતિ જુષસ્વ । તવ
શર્મન્પ્રિયતમે દધાનાઃ । ઉપસ્થેયામ શરણં ન વૃક્ષમ્ । ત્રીણિ પદા
વિચક્રમે । વિષ્ણુર્ગોપા અદાભ્યઃ । તતો ધર્માણિ ધારયન્ ॥ ૨। ૪। ૬। ૧॥

૫૨ તદસ્ય પ્રિયમભિ પાથો અશ્યામ્ । નરો યત્ર દેવયવો મદન્તિ ।
ઉરુક્રમસ્ય સ હિ બન્ધુરિત્થા । વિષ્ણોઃ પદે પરમે મધ્વ ઉત્સઃ ।
ક્રત્વા દા અસ્તુ શ્રેષ્ઠઃ । અદ્ય ત્વા વન્વન્ત્સુરેક્ણાઃ । મર્ત આનાશ
સુવૃક્તિમ્ । ઇમા બ્રહ્મ બ્રહ્મવાહ । પ્રિયા ત આ બર્હિઃ સીદ । વીહિ સૂર

પુરોડાશમ્ ॥ ૨। ૪। ૬। ૨॥

૫૩ ઉપ નઃ સૂનવો ગિરઃ । શૃણ્વન્ત્વમૃતસ્ય યે । સુમૃડીકા ભવન્તુ
નઃ । અદ્યા નો દેવ સવિતઃ । પ્રજાવથ્સાવીઃ સૌભગમ્ । પરા દુષ્ષ્વપ્રિયꣳ
સુવ । વિશ્વાનિ દેવ સવિતઃ । દુરિતાનિ પરાસુવ । યદ્ભદ્રં તન્મ આસુવ ।
શુચિમર્કૈર્બૃહસ્પતિમ્ ॥ ૨। ૪। ૬। ૩॥

૫૪ અધ્વરેષુ નમસ્યત । અનામ્યોજ આચકે । યાઽધારયન્ત દેવા સુદક્ષા
દક્ષપિતારા । અસુર્યાય પ્રમહસા । સ ઇત્ક્ષેતિ સુધિત ઓકસિ સ્વે । તસ્મા
ઇડા પિન્વતે વિશ્વદાની । તસ્મૈ વિશઃ સ્વયમેવાનમન્તિ । યસ્મિન્બ્રહ્મા
રાજનિ પૂર્વ એતિ । સકૂતિમિન્દ્ર સચ્યુતિમ્ । સચ્યુતિં જઘનચ્યુતિમ્ ॥
૨। ૪। ૬। ૪॥

૫૫ કનાત્કાભાં ન આભર । પ્રયપ્સ્યન્નિવ સક્થ્યૌ । વિ ન ઇન્દ્ર મૃધો
જહિ । કનીખુનદિવ સાપયન્ । અભિ નઃ સુષ્ટુતિં નય । પ્રજાપતિઃ સ્ત્રિયાં
યશઃ । મુષ્કયોરદધાથ્સપમ્ । કામસ્ય તૃપ્તિમાનન્દમ્ । તસ્યાગ્ને
ભાજયેહ મા । મોદઃ પ્રમોદ આનન્દઃ ॥ ૨। ૪। ૬। ૫॥

૫૬ મુષ્કયોર્નિહિતઃ સપઃ । સૃત્વેવ કામસ્ય તૃપ્યાણિ । દક્ષિણાનાં
પ્રતિગ્રહે । મનસશ્ચિત્તમાકૂતિમ્ । વાચઃ સત્યમશીમહિ । પશૂનાꣳ
રૂપમન્નસ્ય । યશઃ શ્રીઃ શ્રયતાં મયિ । યથાઽહમસ્યા અતૃપરꣳ
સ્ત્રિયૈ પુમાન્ । યથા સ્ત્રી તૃપ્યતિ પુꣳ સિ પ્રિયે પ્રિયા । એવં ભગસ્ય
તૃપ્યાણિ ॥ ૨। ૪। ૬। ૬॥

૫૭ યજ્ઞસ્ય કામ્યઃ પ્રિયઃ । દદામીત્યગ્નિર્વદતિ । તથેતિ વાયુરાહ તત્ ।
હન્તેતિ સત્યં ચન્દ્રમાઃ । આદિત્યઃ સત્યમોમિતિ । આપસ્તથ્સત્યમાભરન્
। યશો યજ્ઞસ્ય દક્ષિણામ્ । અસૌ મે કામઃ સમૃદ્ધ્યતામ્ । ન હિ
સ્પશમવિદન્નન્યમસ્માત્ । વૈશ્વાનરાત્પુર એતારમગ્નેઃ ॥ ૨। ૪। ૬। ૭॥

૫૮ અથેમમન્થન્નમૃતમમૂરાઃ । વૈશ્વાનરં ક્ષેત્રજિત્યાય દેવાઃ
। યેષામિમે પૂર્વે અર્માસ આસન્ । અયૂપાઃ સદ્મ વિભૃતા પુરૂણિ ।
વૈશ્વાનર ત્વયા તે નુત્તાઃ । પૃથિવીમન્યામભિતસ્થુર્જનાસઃ ।
પૃથિવીં માતરં મહીમ્ । અન્તરિક્ષમુપ બ્રુવે । બૃહતીમૂતયે

દિવમ્ । વિશ્વં બિભર્તિ પૃથિવી ॥ ૨। ૪। ૬। ૮॥

૫૯ અન્તરિક્ષં વિપપ્રથે । દુહે દ્યૌર્બૃહતી પયઃ । ન તા નશન્તિ
ન દભાતિ તસ્કરઃ । નૈના અમિત્રો વ્યથિરાદધર્ષતિ । દેવાગ્શ્ચ
યાભિર્યજતે દદાતિ ચ । જ્યોગિત્તાભિઃ સચતે ગોપતિઃ સહ । ન તા અર્વા
રેણુકકાટો અશ્નુતે । ન સગ્ગ્સ્કૃતત્રમુપયન્તિ તા અભિ । ઉરુગાયમભયં
તસ્ય તા અનુ । ગાવો મર્ત્યસ્ય વિચરન્તિ યજ્વનઃ ॥ ૨। ૪। ૬। ૯॥

૬૦ રાત્રી વ્યખ્યદાયતી । પુરુત્રા દેવ્યક્ષભિઃ । વિશ્વા અધિ શ્રિયોઽધિત ।
ઉપ તે ગા ઇવાકરમ્ । વૃણીષ્વ દુહિતર્દિવઃ । રાત્રી સ્તોમં ન જિગ્યુષી
। દેવીં વાચમજનયન્ત દેવાઃ । તાં વિશ્વરૂપાઃ પશવો વદન્તિ । સા નો
મન્દ્રેષમૂર્જં દુહાના । ધેનુર્વાગસ્માનુપ સુષ્ટુતૈતુ ॥ ૨। ૪। ૬। ૧૦॥

૬૧ યદ્વાગ્વદન્ત્યવિચેતનાનિ । રાષ્ટ્રી દેવાનાં નિષસાદ મન્દ્રા ।
ચતસ્ર ઊર્જં દુદુહે પયાꣳસિ । ક્વ સ્વિદસ્યાઃ પરમં જગામ । ગૌરી
મિમાય સલિલાનિ તક્ષતી । એકપદી દ્વિપદી સા ચતુષ્પદી । અષ્ટાપદી
નવપદી બભૂવુષી । સહસ્રાક્ષરા પરમે વ્યોમન્ । તસ્યાꣳ સમુદ્રા અધિ
વિક્ષરન્તિ । તેન જીવન્તિ પ્રદિશશ્ચતસ્રઃ ॥ ૨। ૪। ૬। ૧૧॥

૬૨ તતઃ, ક્ષરત્યક્ષરમ્ । તદ્વિશ્વમુપ જીવતિ । ઇન્દ્રા સૂરા
જનયન્વિશ્વકર્મા । મરુત્વાꣳ અસ્તુ ગણવાન્થ્સજાતવાન્ । અસ્ય
સ્નુષા શ્વશુરસ્ય પ્રશિષ્ટિમ્ । સપત્ના વાચં મનસા ઉપાસતામ્ ।
ઇન્દ્રઃ સૂરો અતરદ્રજાꣳસિ । સ્નુષા સપત્નાઃ શ્વશુરોઽયમસ્તુ
। અયꣳ શત્રૂઞ્જયતુ જર્હૃષાણઃ । અયં વાજં જયતુ વાજસાતૌ ।
અગ્નિઃ, ક્ષત્રભૃદનિભૃષ્ટમોજઃ । સહસ્રિયો દીપ્યતામપ્રયુચ્છન્
। વિભ્રાજમાનઃ સમિધાન ઉગ્રઃ । આઽન્તરિક્ષમરુહદગન્દ્યામ્ ॥ ૨। ૪। ૬। ૧૨॥
ધારયન્પુરોડાશં બૃહસ્પતિં જઘનચ્યુતિમાનન્દો ભગસ્ય તૃપ્યાણ્યગ્નેઃ
પૃથિવી યજ્વન એતુ પ્રદિશશ્ચતસ્રો વાજસાતૌ ચત્વારિ ચ ॥ ૬॥

૬૩ વૃષાઽસ્યꣳ શુર્વૃષભાય ગૃહ્યસે । વૃષાઽયમુગ્રો
નૃચક્ષસે । દિવ્યઃ કર્મણ્યો હિતો બૃહન્નામ । વૃષભસ્ય યા
કકુત્ । વિષૂવાન્, વિષ્ણો ભવતુ । અયં યો મામકો વૃષા । અથો ઇન્દ્ર

ઇવ દેવેભ્યઃ । વિબ્રવીતુ જનેભ્યઃ । આયુષ્મન્તં વર્ચસ્વન્તમ્ । અથો
અધિપતિં વિશામ્ ॥ ૨। ૪। ૭। ૧॥

૬૪ અસ્યાઃ પૃથિવ્યા અધ્યક્ષમ્ । ઇમમિન્દ્ર વૃષભં કૃણુ । યઃ
સુશૃઙ્ગઃ સુવૃષભઃ । કલ્યાણો દ્રોણ આહિતઃ । કાર્ષીવલ પ્રગાણેન ।
વૃષભેણ યજામહે । વૃષભેણ યજમાનાઃ । અક્રૂરેણેવ સર્પિષા ।
મૃધશ્ચ સર્વા ઇન્દ્રેણ । પૃતનાશ્ચ જયામસિ ॥ ૨। ૪। ૭। ૨॥

૬૫ યસ્યાયમૃષભો હવિઃ । ઇન્દ્રાય પરિણીયતે । જયાતિ શત્રુમાયન્તમ્
। અથો હન્તિ પૃતન્યતઃ । નૃણામહ પ્રણીરસત્ । અગ્ર ઉદ્ભિન્દતામસત્ ।
ઇન્દ્ર શુષ્મં તનુવા મેરયસ્વ । નીચા વિશ્વા અભિતિષ્ઠાભિમાતીઃ ।
નિશૃણીહ્યાબાધં યો નો અસ્તિ । ઉરું નો લોકં કૃણુહિ જીરદાનો ॥ ૨। ૪। ૭। ૩॥

૬૬ પ્રેહ્યભિ પ્રેહિ પ્રભરા સહસ્વ । મા વિવેનો વિશૃણુષ્વા જનેષુ ।
ઉદીડિતો વૃષભ તિષ્ઠ શુષ્મૈઃ । ઇન્દ્ર શત્રૂન્પુરો અસ્માક યુધ્ય
। અગ્રે જેતા ત્વં જય । શત્રૂન્થ્સહસ ઓજસા । વિ શત્રૂન્ વિમૃધો નુદ ।
એતં તે સ્તોમં તુવિજાત વિપ્રઃ । રથં ન ધીરઃ સ્વપા અતક્ષમ્ । યદીદગ્ને
પ્રતિ ત્વં દેવ હર્યાઃ ॥ ૨। ૪। ૭। ૪॥

૬૭ સુવર્વતીરપ એના જયેમ । યો ઘૃતેનાભિમાનિતઃ । ઇન્દ્ર જૈત્રાય જજ્ઞિષે
। સ નઃ સંકાસુ પારય । પૃતનાસાહ્યેષુ ચ । ઇન્દ્રો જિગાય પૃથિવીમ્ ।
અન્તરિક્ષꣳ સુવર્મહત્ । વૃત્રહા પુરુચેતનઃ । ઇન્દ્રો જિગાય
સહસા સહાꣳસિ । ઇન્દ્રો જિગાય પૃતનાનિ વિશ્વા ॥ ૨। ૪। ૭। ૫॥

૬૮ ઇન્દ્રો જાતો વિ પુરો રુરોજ । સ નઃ પરસ્પા વરિવઃ કૃણાતુ । અયં
કૃત્નુરગૃભીતઃ । વિશ્વજિદુદ્ભિદિત્થ્સોમઃ । ઋષિર્વિપ્રઃ કાવ્યેન ।
વાયુરગ્રેગા યજ્ઞપ્રીઃ । સાકં ગન્મનસા યજ્ઞમ્ । શિવો નિયુદ્ભિઃ
શિવાભિઃ । વાયો શુક્રો અયામિ તે । મધ્વો અગ્રં દિવિષ્ટિષુ ॥ ૨। ૪। ૭। ૬॥

૬૯ આયાહિ સોમપીતયે । સ્વારુહો દેવ નિયુત્વતા । ઇમમિન્દ્ર વર્ધય
ક્ષત્રિયાણામ્ । અયં વિશાં વિશ્પતિરસ્તુ રાજા । અસ્મા ઇન્દ્ર
મહિવર્ચાꣳસિ ધેહિ । અવર્ચસં કૃણુહિ શત્રુમસ્ય । ઇમમાભજ
ગ્રામે અશ્વેષુ ગોષુ । નિરમું ભજ યોઽમિત્રો અસ્ય । વર્ષ્મન્ ક્ષત્રસ્ય

કકુભિ શ્રયસ્વ । તતો ન ઉગ્રો વિભજા વસૂનિ ॥ ૨। ૪। ૭। ૭॥

૭૦ અસ્મે દ્યાવાપૃથિવી ભૂરિ વામમ્ । સંદુહાથાં ઘર્મદુઘેવ ધેનુઃ
। અય રાજા પ્રિય ઇન્દ્રસ્ય ભૂયાત્ । પ્રિયો ગવામોષધીનામુતાપામ્ ।
યુનજ્મિ ત ઉત્તરાવન્તમિન્દ્રમ્ । યેન જયાસિ ન પરાજયાસૈ ।
સ ત્વાઽકરેકવૃષભર સ્વાનામ્ । અથો રાજન્નુત્તમં માનવાનામ્ ।
ઉત્તરસ્ત્વમધરે તે સપત્નાઃ । એકવૃષા ઇન્દ્રસખા જિગીવાન્ ॥ ૨। ૪। ૭। ૮॥

૭૧ વિશ્વા આશાઃ પૃતનાઃ સં જયં જયન્ । અભિતિષ્ઠ શત્રૂયતઃ સહસ્વ
। તુભ્યં ભરન્તિ ક્ષિતયો યવિષ્ઠ । બલિમગ્ને અન્તિ ત ઓત દૂરાત્ ।
આ ભન્દિષ્ઠસ્ય સુમતિં ચિકિદ્ધિ । બૃહત્તે અગ્ને મહિ શર્મ ભદ્રમ્ ।
યો દેહ્યો અનમયદ્વધસ્નૈઃ । યો અર્યપત્નીરુષસશ્ચકાર । સ નિરુધ્યા
નહુષો યહ્વો અગ્નિઃ । વિશશ્ચક્રે બલિહૃતઃ સહોભિઃ ॥ ૨। ૪। ૭। ૯॥

૭૨ પ્ર સદ્યો અગ્ને અત્યેષ્યન્યાન્ । આવિર્યસ્મૈ ચારુતરો બભૂથ । ઈડેન્યો
વપુષ્યો વિભાવા । પ્રિયો વિશામતિથિર્માનુષીણામ્ । બ્રહ્મ જ્યેષ્ઠા વીર્યા
સંભૃતાનિ । બ્રહ્માગ્રે જ્યેષ્ઠં દિવમાતતાન । ઋતસ્ય બ્રહ્મ પ્રથમોત
જજ્ઞે । તેનાર્હતિ બ્રહ્મણા સ્પર્ધિતું કઃ । બ્રહ્મ સ્રુચો ઘૃતવતીઃ ।
બ્રહ્મણા સ્વરવો મિતાઃ ॥ ૨। ૪। ૭। ૧૦॥

૭૩ બ્રહ્મ યજ્ઞસ્ય તન્તવઃ । ઋત્વિજો યે હવિષ્કૃતઃ
। શઙ્ગાણીવેચ્છૃઙ્ગિણા સંદદૃશ્રિરે । ચષાલવન્તઃ
સ્વરવઃ પૃથિવ્યામ્ । તે દેવાસઃ સ્વરવસ્તસ્થિવા સઃ । નમઃ સખિભ્યઃ
સન્નાન્માઽવગાત । અભિભૂરગ્નિરતરદ્રજા સિ । સ્પૃધો વિહત્ય
પૃતના અભિશ્રીઃ । જુષાણો મ આહુતિં મા મહિષ્ટ । હત્વા સપત્નાન્
વરિવસ્કરં નઃ । ઈશાનં ત્વા ભુવનાનામભિશ્રિયમ્ । સ્તૌમ્યગ્ન ઉરુ
કૃત સુવીરમ્ । હવિર્જુષાણઃ સપત્ના અભિભૂરસિ । જહિ
શત્રૂ રપ મૃધો નુદસ્વ ॥ ૨। ૪। ૭। ૧૧॥ વિશાં જયામસિ જીરદાનો હર્યા
વિશ્વા દિવિષ્ટિષુ વસૂનિ જિગીવાન્થ્સહોભિર્મિતા નશ્ચત્વારિ ચ ॥ ૭॥

૭૪ સ પ્રત્નવન્નવીયસા । અગ્ને દ્યુમ્નેન સંયતા । બૃહત્તતન્થ ભાનુના
। નવં નુ સ્તોમમગ્નયે । દિવઃ શ્યેનાય જીજનમ્ । વસોઃ કુવિદ્વનાતિ

નઃ । સ્વારુહા યસ્ય શ્રિયો દૃશે । રયિર્વીરવતો યથા । અગ્રે યજ્ઞસ્ય
ચેતતઃ । અદાભ્યઃ પુર એતા ॥ ૨। ૪। ૮। ૧॥

૭૫ અગ્નિર્વિશાં માનુષીણામ્ । તૂર્ણી રથઃ સદાનવઃ । નવ ँ સોમાય
વાજિને । આજ્યં પયસોઽજનિ । જુષ્ટ ँ શુચિતમં વસુ । નવ ँસોમ
જુષસ્વ નઃ । પીયૂષસ્યેહ તૃપ્ણુહિ । યસ્તે ભાગ ઋતા વયમ્ । નવસ્ય
સોમ તે વયમ્ । આ સુમતિં વૃણીમહે ॥ ૨। ૪। ૮। ૨॥

૭૬ સ નો રાસ્વ સહસ્રિણઃ । નવ ँહવિર્જુષસ્વ નઃ । ઋતુભિઃ સોમ
ભૂતમમ્ । તદઙ્ગ પ્રતિહર્ય નઃ । રાજન્થ્સોમ સ્વસ્તયે । નવગ્ગ્ સ્તોમં
નવ ँહવિઃ । ઇન્દ્રાગ્નિભ્યાં નિવેદય । તજ્જુષેતા ँ સચેતસા ।
શુચિં નુ સ્તોમં નવજાતમદ્ય । ઇન્દ્રાગ્ની વૃત્રહણા જુષેથામ્ ॥ ૨। ૪। ૮। ૩॥

૭૭ ઉભા હિ વા ँસુહવા જોહવીમિ । તા વાજ ँસદ્ય ઉશતે ધેષ્ઠા ।
અગ્નિરિન્દ્રો નવસ્ય નઃ । અસ્ય હવ્યસ્ય તૃપ્યતામ્ । ઇહ દેવૌ સહસ્રિણૌ
। યજ્ઞં ન આ હિ ગચ્છતામ્ । વસુમન્ત ँ સુવર્વિદમ્ । અસ્ય હવ્યસ્ય
તૃપ્યતામ્ । અગ્નિરિન્દ્રો નવસ્ય નઃ । વિશ્વાન્દેવાગ્સ્તર્પયત ॥ ૨। ૪। ૮। ૪॥

૭૮ હવિષોઽસ્ય નવસ્ય નઃ । સુવર્વિદો હિ જજ્ઞિરે । એદં બર્હિઃ
સુષ્ટરીમા નવેન । અયં યજ્ઞો યજમાનસ્ય ભાગઃ । અયં બભૂવ
ભુવનસ્ય ગર્ભઃ । વિશ્વે દેવા ઇદમદ્યાગમિષ્ઠાઃ । ઇમે નુ દ્યાવાપૃથિવી
સમીચી । તન્વાને યજ્ઞં પુરુપેશસં ધિયા । આઽસ્મૈ પૃણીતાં
ભુવનાનિ વિશ્વા । પ્રજાં પુષ્ટિમમૃતં નવેન ॥ ૨। ૪। ૮। ૫॥

૭૯ ઇમે ધેનૂ અમૃતં યે દુહાતે । પયસ્વત્યુત્તરામેતુ પુષ્ટિઃ । ઇમં
યજ્ઞં જુષમાણે નવેન । સમીચી દ્યાવાપૃથિવી ઘૃતાચી । યવિષ્ઠો
હવ્યવાહનઃ । ચિત્રભાનુર્ઘૃતાસુતિઃ । નવજાતો વિરોચસે । અગ્ને તત્તે
મહિત્વનમ્ । ત્વમગ્ને દેવતાભ્યઃ । ભાગે દેવ ન મીયસે ॥ ૨। ૪। ૮। ૬॥

૮૦ સ એના વિદ્વાન્, યક્ષ્યસિ । નવગ્ગ્ સ્તોમં જુષસ્વ નઃ । અગ્નિઃ પ્રથમઃ
પ્રાશ્નાતુ । સ હિ વેદ યથા હવિઃ । શિવા અસ્મભ્યમોષધીઃ । કૃણોતુ
વિશ્વચર્ષણિઃ । ભદ્રાન્નઃ શ્રેયઃ સમનૈષ્ટ દેવાઃ । ત્વયાઽવસેન
સમશીમહિ ત્વા । સ નો મયોભૂઃ પિતો આવિશસ્વ । શં તોકાય તનુવે સ્યોનઃ

। એતમુ ત્યં મધુના સંયુતં યવમ્ । સરસ્વત્યા અધિમનાવચર્કૃષુઃ
। ઇન્દ્ર આસીથ્સીરપતિઃ શતક્રતુઃ । કીનાશા આસન્મરુતઃ સુદાનવઃ ॥
૨। ૪। ૮। ૭॥ પુરએતા વૃણીમહે જુષેથાં તર્પયતામૃતં નવેન મીયસે
સ્યોનશ્ચત્વારિ ચ ॥ ૮॥

જુષ્ટશ્ચક્ષુષો જુષ્ટી નરો નક્તં જાતા વૃષાસ ઉત નો
વૃષાઽસ્ય ઁ શુઃ સ પ્રત્નવદષ્ટૌ ॥ ૮॥
જુષ્ટો મન્યુર્ભગો જુષ્ટી નરો હરિવર્પસં ગિરઃ શિપ્રિન્વાજાનામુત નો
યદ્વાગ્વદન્તી વિશ્વા આશા અશીતિઃ ॥ ૮૦॥
જુષ્ટઃ સુદાનવઃ ॥

## દ્વિતીયાષ્ટકે પઞ્ચમઃ પ્રપાઠકઃ ૫

૧ પ્રાણો રક્ષતિ વિશ્વમેજત્ । ઇર્યો ભૂત્વા બહુધા બહૂનિ ।
સ ઇથ્સર્વં વ્યાનશે । યો દેવો દેવેષુ વિભૂરન્તઃ । આવૃદૂદાત્
ક્ષેત્રિયધ્વગદ્વૃષા । તમિત્પ્રાણં મનસોપ શિક્ષત । અગ્રં
દેવાનામિદમત્તુ નો હવિઃ । મનસશ્ચિત્તેદમ્ । ભૂતં ભવ્યં ચ ગુપ્યતે
। તદ્ધિ દેવેષ્વગ્રિયમ્ ॥ ૨। ૫। ૧। ૧॥
૨ આ ન એતુ પુરશ્ચરમ્ । સહ દેવૈરિમ ઁ હવમ્ । મનઃ શ્રેયસિ શ્રેયસિ ।
કર્મન્, યજ્ઞપતિં દધત્ । જુષતાં મે વાગિદ ઁ હવિઃ । વિરાડ્દેવી
પુરોહિતા । હવ્યવાડનપાયિની । યયા રૂપાણિ બહુધા વદન્તિ । પેશા ઁસિ
દેવાઃ પરમે જનિત્રે । સા નો વિરાડનપસ્ફુરન્તી ॥ ૨। ૫। ૧। ૨॥
૩ વાગ્દેવી જુષતામિદ ઁ હવિઃ । ચક્ષુર્દેવાનાં જ્યોતિરમૃતે
ન્યક્તમ્ । અસ્ય વિજ્ઞાનાય બહુધા નિધીયતે । તસ્ય સુમ્નમશીમહિ । મા નો
હાસીદ્વિચક્ષણમ્ । આયુરિન્નઃ પ્રતીર્યતામ્ । અનન્ધાશ્ચક્ષુષા વયમ્ । જીવા
જ્યોતિરશીમહિ । સુવર્જ્યોતિરુતામૃતમ્ । શ્રોત્રેણ ભદ્રમુત શ઼ૃણ્વન્તિ
સત્યમ્ । શ્રોત્રેણ વાચં બહુધોદ્યમાનામ્ । શ્રોત્રેણ મોદશ્ચ મહશ્ચ
શ્રૂયતે । શ્રોત્રેણ સર્વા દિશ આ શ઼ૃણોમિ । યેન પ્રાચ્યા ઉત દક્ષિણા

। પ્રતીચ્યૈ દિશઃ શૃણ્વન્ત્યુત્તરાત્ । તદિચ્છ્રોત્રં બહુધોદ્યમાનમ્ ।
અરાન્ન નેમિઃ પરિ સર્વં બભૂવ ॥ ૨। ૫। ૧। ૩॥ અગ્નિયમનપસ્ફુરન્તી સત્યꣳ
સપ્ત ચ ॥ ૧॥

૪ ઉદેહિ વાજિન્યો અસ્યપ્સ્વન્તઃ । ઇદꣳ રાષ્ટ્રમાવિશ સૂનૃતાવત્ । યો
રોહિતો વિશ્વમિદં જજાન । સ નો રાષ્ટ્રેષુ સુધિતાં દધાતુ । રોહꣳ
રોહꣳ રોહિત આરુરોહ । પ્રજાભિર્વૃદ્ધિં જનુષામુપસ્થમ્ ।
તાભિઃ સꣳરબ્ધો અવિદથ્ષડુર્વીઃ । ગાતું પ્રપશ્યન્નિહ રાષ્ટ્રમાહાઃ ।
આહાર્ષીદ્રાષ્ટ્રમિહ રોહિતઃ । મૃધો વ્યાસ્થદભયં નો અસ્તુ ॥ ૨। ૫। ૨। ૧॥

૫ અસ્મભ્યં દ્યાવાપૃથિવી શક્વરીભિઃ । રાષ્ટ્રં દુહાથામિહ રેવતીભિઃ
। વિમમર્શ રોહિતો વિશ્વરૂપઃ । સમાચક્રાણઃ પ્રરુહો રુહશ્ચ ।
દિવં ગત્વાય મહતા મહિમ્ના । વિ નો રાષ્ટ્રમુનત્તુ પયસા સ્વેન ।
યાસ્તે વિશસ્તપસા સંબભૂવુઃ । ગાયત્રં વથ્સમનુ તાસ્ત આગુઃ । તાસ્ત્વા
વિશન્તુ મહસા સ્વેન । સં માતા પુત્રો અભ્યેતુ રોહિતઃ ॥ ૨। ૫। ૨। ૨॥

૬ યૂયમુગ્રા મરુતઃ પૃશ્નિમાતરઃ । ઇન્દ્રેણ સયુજા પ્રમૃણીથ શત્રૂન્ । આ વો
રોહિતો અશૃણોદભિદ્યવઃ । ત્રિસપ્તાસો મરુતઃ સ્વાદુસંમુદઃ । રોહિતો દ્યાવાપૃથિવી
જજાન । તસ્મિગ્ગ્સ્તન્તું પરમેષ્ઠી તતાન । તસ્મિઞ્છિશ્રિયે અજ એકપાત્ ।
અદૃꣳહદ્દ્યાવાપૃથિવી બલેન । રોહિતો દ્યાવાપૃથિવી અદૃꣳહત્ ।
તેન સુવઃ સ્તભિતં તેન નાકઃ ॥ ૨। ૫। ૨। ૩॥

૭ સો અન્તરિક્ષે રજસો વિમાનઃ । તેન દેવાઃ સુવરન્વવિન્દન્ । સુશેવં
ત્વા ભાનવો દીદિવાꣳસમ્ । સમગ્રાસો જુહ્વો જાતવેદઃ । ઉક્ષન્તિ ત્વા
વાજિનમાઘૃતેન । સꣳસમગ્રે યુવસે ભોજનાનિ । અગ્ને શર્ધ
મહતે સૌભગાય । તવ દ્યુમ્નાન્યુત્તમાનિ સન્તુ । સં જાસ્પત્યꣳ
સુયમમાકૃણુષ્વ । શત્રૂયતામભિતિષ્ઠા મહાꣳસિ ॥ ૨। ૫। ૨। ૪॥

અસ્ત્વેતુ રોહિતો નાકો મહાꣳસિ ॥ ૨॥

૮ પુનર્ન ઇન્દ્રો મઘવા દદાતુ । ધનાનિ શક્રો ધન્યઃ સુરાધાઃ ।
અર્વાચીનં કૃણુતાં યાચિતો મનઃ । શ્રુષ્ટી નો અસ્ય હવિષો જુષાણઃ
। યાનિ નો જિનન્ધનાનિ । જહર્થ શૂર મન્યુના । ઇન્દ્રાનુવિન્દ નસ્તાનિ ।

અનેન હવિષા પુનઃ । ઇન્દ્ર આશાભ્યઃ પરિ । સર્વાભ્યોઽભયં કરત્ ॥
૨। ૫। ૩। ૧॥

૯ જેતા શત્રૂન્ વિચર્ષણિઃ । આકૂત્યૈ ત્વા કામાય ત્વા સમૃધે ત્વા । પુરો
દધે અમૃતત્વાય જીવસે । આકૂતિમસ્યાવસે । કામમસ્ય સમૃદ્ધ્યૈ ।
ઇન્દ્રસ્ય યુઞ્જતે ધિયઃ । આકૂતિં દેવીં મનસઃ પુરો દધે । યજ્ઞસ્ય
માતા સુહવા મે અસ્તુ । યદિચ્છામિ મનસા સકામઃ । વિદેયમેનદ્ધૃદયે
નિવિષ્ટમ્ ॥ ૨। ૫। ૩। ૨॥

૧૦ સેદગ્નિરગ્નીꣳ રત્યેત્યન્યાન્ । યત્ર વાજી તનયો વીડુપાણિઃ ।
સહસ્રપાથા અક્ષરા સમેતિ । આશાનાં ત્વાઽઽશાપાલેભ્યઃ । ચતુર્ભ્યો
અમૃતેભ્યઃ । ઇદં ભૂતસ્યાધ્યક્ષેભ્યઃ । વિધેમ હવિષા વયમ્ ।
વિશ્વા આશા મધુના સꣳ સૃજામિ । અનમીવા આપ ઓષધયો ભવન્તુ ।
અયં યજમાનો મૃધો વ્યસ્યતામ્ ।

૧૧ અગૃભીતાઃ પશવઃ સન્તુ સર્વે । અગ્નિઃ સોમો વરુણો મિત્ર ઇન્દ્રઃ
। બૃહસ્પતિઃ સવિતા યઃ સહસ્રી । પૂષા નો ગોભિરવસા સરસ્વતી ।
ત્વષ્ટા રૂપાણિ સમનક્તુ યજ્ઞૈઃ । ત્વષ્ટા રૂપાણિ દધતી સરસ્વતી ।
પૂષા ભગꣳ સવિતા નો દદાતુ । બૃહસ્પતિર્દદદિન્દ્રઃ સહસ્રમ્ ।
મિત્રો દાતા વરુણઃ સોમો અગ્નિઃ ॥ ૨। ૫। ૩। ૩॥ કરન્નિવિષ્ટમસ્યતાં નવ
ચ ॥ ૩॥

૧૨ આ નો ભર ભગમિન્દ્ર દ્યુમન્તમ્ । નિ તે દેષ્ણસ્ય ધીમહિ પ્રરેકે ।
ઉર્વ ઇવ પપ્રથે કામો અસ્મે । તમાપૃણા વસુપતે વસૂનામ્ । ઇમં કામં
મન્દયા ગોભિરશ્વૈઃ । ચન્દ્રવતા રાધસા પપ્રથશ્ચ । સુવર્યવો
મતિભિસ્તુભ્યં વિપ્રાઃ । ઇન્દ્રાય વાહઃ કુશિકાસો અક્રન્ । ઇન્દ્રસ્ય નુ
વીર્યાણિ પ્રવોચમ્ । યાનિ ચકાર પ્રથમાનિ વજ્રી ॥ ૨। ૫। ૪। ૧॥

૧૩ અહન્નહિમન્વપસ્તતર્દ । પ્ર વક્ષણા અભિનત્પર્વતાનામ્ ।
અહન્નહિં પર્વતે શિશ્રિયાણમ્ । ત્વષ્ટાઽસ્મૈ વજ્રꣳ સ્વર્યં તતક્ષ
। વાશ્રા ઇવ ધેનવઃ સ્યન્દમાનાઃ । અઞ્જઃ સમુદ્રમવ જગ્મુરાપઃ ।
વૃષાયમાણોઽવૃણીત સોમમ્ । ત્રિકદ્રુકેષ્વપિબત્સુતસ્ય । આ સાયકં

મઘવાઽઽદત્ત વજ્રમ્ । અહન્નેનં પ્રથમજા મહીનામ્ ॥ ૨। ૫। ૪। ૨॥

૧૪ યદિન્દ્રાહન્પ્રથમજા મહીનામ્ । આન્માયિનામમિનાઃ પ્રોત માયાઃ । આથ્સૂર્યં
જનયન્દ્યામુષાસમ્ । તાદીક્ના શત્રૂન્ન કિલાવિવિથ્સે । અહન્વૃત્રં
વૃત્રતરં વ્ય ँ સમ્ । ઇન્દ્રો વજ્રેણ મહતા વધેન । સ્કન્ધા ँસીવ
કુલિશેના વિવૃક્ણા । અહિઃ શયત ઉપપૃક્પૃથિવ્યામ્ । અયોધ્યેવ દુર્મદ
આ હિ જુહ્વે । મહાવીરં તુ વિબાધમૃજીષમ્ ॥ ૨। ૫। ૪। ૩॥

૧૫ નાતારીરસ્ય સમૃતિં વધાનામ્ । સ ँ રુજાનાઃ પિપિષ ઇન્દ્રશત્રુઃ ।
વિશ્વો વિહાયા અરતિઃ । વસુર્દધે હસ્તે દક્ષિણે । તરણિર્ન શિશ્રથત્
। શ્રવસ્યયા ન શિશ્રથત્ । વિશ્વસ્મા ઇદિષુધ્યસે । દેવત્રા
હવ્યમૂહિષે । વિશ્વસ્મા ઇથ્સુકૃતે વારમૃણ્વતિ । અગ્નિર્દ્વારા વ્યૃણ્વતિ
॥ ૨। ૫। ૪। ૪॥

૧૬ ઉદુજ્જિહાનો અભિ કામમીરયન્ । પ્રપૃઞ્ચન્વિશ્વા ભુવનાનિ પૂર્વથા
। આ કેતુના સુષમિદ્ધો યજિષ્ઠઃ । કામં નો અગ્ને અભિહર્ય દિગ્ભ્યઃ ।
જુષાણો હવ્યમમૃતેષુ દૂઢ્યઃ । આ નો રયિં બહુલાં ગોમતીમિષમ્ ।
નિધેહિ યક્ષદમૃતેષુ ભૂષન્ । અશ્વિના યજ્ઞમાગતમ્ । દાશુષઃ
પુરુદ ँ સસા । પૂષા રક્ષતુ નો રયિમ્ ॥ ૨। ૫। ૪। ૫॥

૧૭ ઇમં યજ્ઞમશ્વિના વર્ધયન્તા । ઇમૌ રયિં યજમાનાય ધત્તમ્ ।
ઇમૌ પશૂન્રક્ષતાં વિશ્વતો નઃ । પૂષા નઃ પાતુ સદમપ્રયુચ્છન્ ।
પ્ર તે મહે સરસ્વતિ । સુભગે વાજિનીવતિ । સત્યવાચે ભરે મતિમ્ ।
ઇદં તે હવ્યં ઘૃતવથ્સરસ્વતિ । સત્યવાચે પ્રભરેમા હવી ँ ષિ
। ઇમાનિ તે દુરિતા સૌભગાનિ । તેભિર્વય ँ સુભગાસઃ સ્યામ ॥ ૨। ૫। ૪। ૬॥

વજ્રયહીનામૃજીષં વ્યૃણ્વતિ રક્ષતુ નો રયિ ँ સૌભગાન્યેકં ચ ॥ ૪॥

૧૮ યજ્ઞો રાયો યજ્ઞ ઈશે વસૂનામ્ । યજ્ઞઃ સસ્યાનામુત સુક્ષિતીનામ્
। યજ્ઞ ઇષ્ટઃ પૂર્વચિત્તિં દધાતુ । યજ્ઞો બ્રહ્મણ્વા ँ અપ્યેતુ દેવાન્
। અયં યજ્ઞો વર્ધતાં ગોભિરશ્વૈઃ । ઇયં વેદિઃ સ્વપત્યા સુવીરા
। ઇદં બર્હિરતિ બર્હીગ્ષ્યન્યા । ઇમં યજ્ઞં વિશ્વે અવન્તુ દેવાઃ ।
ભગ એવ ભગવા ँ અસ્તુ દેવાઃ । તેન વયં ભગવન્તઃ સ્યામ ॥ ૨। ૫। ૫। ૧॥

૧૯ તં ત્વા ભગ સર્વ ઇજ્જોહવીમિ । સ નો ભગ પુર એતા ભવેહ । ભગ
પ્રણેતર્ભગ સત્યરાધઃ । ભગેમાં ધિયમુદવદદન્નઃ । ભગ પ્રણો
જનય ગોભિરશ્વૈઃ । ભગ પ્ર નૃભિર્નૃવન્તઃ સ્યામ । શશ્વતીઃ
સમા ઉપયન્તિ લોકાઃ । શશ્વતીઃ સમા ઉપયન્ત્યાપઃ । ઇષ્ટં પૂર્તꣳ
શશ્વતીનાꣳ સમાનાꣳ શાશ્વતેન । હવિષેષ્ટ્વાઽનન્તં લોકં
પરમારુરોહ ॥ ૨। ૫। ૫। ૨॥

૨૦ ઇયમેવ સા યા પ્રથમા વ્યૌચ્છત્ । સા રૂપાણિ કુરુતે પઞ્ચ દેવી ।
દ્વે સ્વસારૌ વયતસ્તન્ત્રમેતત્ । સનાતનં વિતતꣳ ષણ્મયૂખમ્ ।
અવાન્યાગ્સ્તન્તૂન્કિરતો ધત્તો અન્યાન્ । નાવપૃજ્યાતે ન ગમાતે અન્તમ્ ।
આ વો યન્તૂદવાહાસો અદ્ય । વૃષ્ટિં યે વિશ્વે મરુતો જુનન્તિ । અયં યો
અગ્નિર્મરુતઃ સમિદ્ધઃ । એતં જુષધ્વં કવયો યુવાનઃ ॥ ૨। ૫। ૫। ૩॥

૨૧ ધારાવરા મરુતો ધૃષ્ણુવોજસઃ । મૃગા ન
ભીમાસ્તવિષેભિરૂર્મિભિઃ । અગ્નયો ન શુશુચાના ઋજીષિણઃ ।
ભ્રુમિં ધમન્ત ઉપ ગા અવૃણ્વત । વિચક્રમે ત્રિર્દેવઃ । આવેધસં
નીલપૃષ્ઠં બૃહન્તમ્ । બૃહસ્પતિꣳ સદને સાદયધ્વમ્ । સાદદ્યોનિં
દમ આદીદિવાꣳસમ્ । હિરણ્યવર્ણમરુષꣳ સપેમ । સ હિ શુચિઃ
શતપત્રઃ સ શુન્ધ્યૂઃ ॥ ૨। ૫। ૫। ૪॥

૨૨ હિરણ્યવાશીરિષિરઃ સુવર્ષાઃ । બૃહસ્પતિઃ સ સ્વાવેશ ઋષ્વાઃ ।
પૂરૂ સખિભ્ય આ સુતિં કરિષ્ઠઃ । પૂષગ્ગ્સ્તવ વ્રતે વયમ્ । ન રિષ્યેમ
કદાચન । સ્તોતારસ્ત ઇહ સ્મસિ । યાસ્તે પૂષન્નાવો અન્તઃ સમુદ્રે ।
હિરણ્યયીરન્તરિક્ષે ચરન્તિ । યાભિર્યાસિ દૂત્યાꣳ સૂર્યસ્ય । કામેન
કૃતઃ શ્રવ ઇચ્છમાનઃ ॥ ૨। ૫। ૫। ૫॥

૨૩ અરણ્યાન્યરણ્યાન્યસૌ । યા પ્રેવ નશ્યસિ । કથા ગ્રામં ન પૃચ્છસિ ।
ન ત્વા ભીરિવ વિન્દતી૩। વૃષારવાય વદતે । યદુપાવતિ ચિચ્ચિકઃ ।
આઘાટીભિરિવ ધાવયન્ । અરણ્યાનિર્મહીયતે । ઉત ગાવ ઇવાદન્ । ઉતો
વેશ્મેવ દૃશ્યતે ॥ ૨। ૫। ૫। ૬॥

૨૪ ઉતો અરણ્યાનિઃ સાયમ્ । શકટીરિવ સર્જતિ । ગામઙ્ગૈષ આહ્વયતિ ।
દાર્વઙ્ગૈષ ઉપાવધીત્ । વસન્નરણ્યાન્યાꣳ સાયમ્ । અક્રુક્ષદિતિ મન્યતે ।
ન વા અરણ્યાનિર્હન્તિ । અન્યશ્ચેન્નાભિગચ્છતિ । સ્વાદોઃ ફલસ્ય જગ્ધ્વા ।
યત્ર કામં નિપદ્યતે । આઞ્જનગન્ધીꣳ સુરભીમ્ । બહ્વન્નામ કૃષીવલામ્ ।
પ્રાહં મૃગાણાં માતરમ્ । અરણ્યાનીમશꣳસિષમ્ ॥ ૨। ૫। ૫। ૭॥ સ્યામ
રુરોહ યુવાનઃ શુન્ધ્યૂરિચ્છમાનો દૃશ્યતે નિપદ્યતે ચત્વારિ
ચ ॥ ૫॥

૨૫ વાર્ત્રહત્યાય શવસે । પૃતનાસાહ્યાય ચ । ઇન્દ્ર ત્વાઽઽવર્તયામસિ ।
સુબ્રહ્માણં વીરવન્તં બૃહન્તમ્ । ઉરું ગભીરં પૃથુબુધ્નમિન્દ્ર ।
શ્રુતર્ષિમુગ્રમભિમાતિષાહમ્ । અસ્મભ્યં ચિત્રં વૃષણꣳ રયિં
દાઃ । ક્ષેત્રિયૈ ત્વા નિરૃત્યૈ ત્વા । દ્રુહો મુઞ્ચામિ વરુણસ્ય પાશાત્ ।
અનાગસં બ્રહ્મણે ત્વા કરોમિ ॥ ૨। ૫। ૬। ૧॥

૨૬ શિવે તે દ્યાવાપૃથિવી ઉભે ઇમે । શં તે અગ્નિઃ સહાદ્ભિરસ્તુ । શં
દ્યાવાપૃથિવી સહૌષધીભિઃ । શમન્તરિક્ષꣳ સહ વાતેન તે । શં તે
ચતસ્રઃ પ્રદિશો ભવન્તુ । યા દૈવીશ્ચતસ્રઃ પ્રદિશઃ । વાતપત્નીરભિ
સૂર◌્યો વિચષ્ટે । તાસાં ત્વા જરસ આદધામિ । પ્ર યક્ષ્મ એતુ નિરૃતિં
પરાચૈઃ । અમોચિ યક્ષ્માદ્દુરિતાદવર્ત્યૈ ॥ ૨। ૫। ૬। ૨॥

૨૭ દ્રુહઃ પાશાં નિરૃત્યૈ ચોદમોચિ । અહા અવર્તિમવિદથ્સ્યોનમ્ ।
અપ્યભૂદ્ભદ્રે સુકૃતસ્ય લોકે । સૂર્યમૃતં તમસો ગ્રાહ્યા યત્ । દેવા
અમુઞ્ચન્નસૃજન્વ્યેનસઃ । એવમહમિમં ક્ષેત્રિયાજ્જામિશꣳસાત્ ।
દ્રુહો મુઞ્ચામિ વરુણસ્ય પાશાત્ । બૃહસ્પતે યુવમિન્દ્રશ્ચ વસ્વઃ ।
દિવ્યસ્યેશાથે ઉત પાર્થિવસ્ય । ધત્તꣳ રયિરꣳ સ્તુવતે કીરયેચિત્
॥ ૨। ૫। ૬। ૩॥

૨૮ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ । દેવાયુધમિન્દ્રમા જોહુવાનાઃ ।
વિશ્વાવૃધમભિ યે રક્ષમાણાઃ । યેન હતા દીર્ઘમધ્વાનમાયન્
। અનન્તમર્થમનિવર્થ્સ્યમાનાઃ । યત્તે સુજાતે હિમવથ્સુ ભેષજમ્ ।
મયોભૂઃ શંતમા યદ્દૃદોઽસિ । તતો નો દેહિ સીબલે । અદો ગિરિભ્યો

અધિ યત્પ્રધાવસિ । સ ँ શોભમાના કન્યેવ શુભ્રે ॥ ૨। ૫। ૬। ૪॥

૨૯ તાં ત્વા મુદ્ગલા હવિષા વર્ધયન્તિ । સા નઃ સીબલે રયિમાભાજયેહ । પૂર્વં દેવા અપરેણાનુપશ્યઞ્જન્મભિઃ । જન્માન્યવરૈઃ પરાણિ । વેદાનિ દેવા અયમસ્મીતિ મામ્ । અહ ँ હિત્વા શરીરં જરસઃ પરસ્તાત્ । પ્રાણાપાનૌ ચક્ષુઃ શ્રોત્રમ્ । વાચં મનસિ સંભૃતામ્ । હિત્વા શરીરં જરસઃ પરસ્તાત્ । આ ભૂતિં ભૂતિં વયમશ્નવામહૈ । ઇમા એવ તા ઉષસો યાઃ પ્રથમા વ્યૌચ્છન્ । તા દેવ્યઃ કુર્વતે પઞ્ચ રૂપા । શશ્વતીર્નાવપૃજ્યન્તિ । ન ગમન્ત્યન્તમ્ ॥ ૨। ૫। ૬। ૫॥ કરોમ્યવર્ત્યૈ ચિચ્છભ્રેઽશ્નવામહૈ ચત્વારિ ચ ॥ ૬॥

૩૦ વસૂનાં ત્વાઽધીતેન । રુદ્રાણામૂર્મ્યા । આદિત્યાનાં તેજસા । વિશ્વેષાં દેવાનાં ક્રતુના । મરુતામેમ્ના જુહોમિ સ્વાહા । અભિભૂતિરહમાગમમ્ । ઇન્દ્રસખા સ્વાયુધઃ । આસ્વાશાસુ દુષ્ષહઃ । ઇદં વર્ચો અગ્નિના દત્તમાગાત્ । યશો ભર્ગઃ સહ ઓજો બલં ચ ॥ ૨। ૫। ૭। ૧॥

૩૧ દીર્ઘાયુત્વાય શતશારદાય । પ્રતિગૃભ્ણામિ મહતે વીર્યાય । આયુરસિ વિશ્વાયુરસિ । સર્વાયુરસિ સર્વમાયુરસિ । સર્વં મ આયુર્ભૂયાત્ । સર્વમાયુર્ગેષમ્ । ભૂર્ભુવઃ સુવઃ । અગ્નિર્ધર્મેણાન્નાદઃ । મૃત્યુર્ધર્મેણાન્નપતિઃ । બ્રહ્મ ક્ષત્ર ँ સ્વાહા ॥ ૨। ૫। ૭। ૨॥

૩૨ પ્રજાપતિઃ પ્રણેતા । બૃહસ્પતિઃ પુર એતા । યમઃ પન્થાઃ । ચન્દ્રમાઃ પુનરસુઃ સ્વાહા । અગ્નિરન્નાદોઽન્નપતિઃ । અન્નાદ્યમસ્મિન્, યજ્ઞે યજમાનાય દદાતુ સ્વાહા । સોમો રાજા રાજપતિઃ । રાજ્યમસ્મિન્, યજ્ઞે યજમાનાય દદાતુ સ્વાહા । વરુણઃ સમ્રાટ્થ્સમ્રાટ્પતિઃ । સામ્રાજ્યમસ્મિન્, યજ્ઞે યજમાનાય દદાતુ સ્વાહા ॥ ૨। ૫। ૭। ૩॥

૩૩ મિત્રઃ, ક્ષત્રં ક્ષત્રપતિઃ । ક્ષત્રમસ્મિન્, યજ્ઞે યજમાનાય દદાતુ સ્વાહા । ઇન્દ્રો બલં બલપતિઃ । બલમસ્મિન્, યજ્ઞે યજમાનાય દદાતુ સ્વાહા । બૃહસ્પતિર્બ્રહ્મ બ્રહ્મપતિઃ । બ્રહ્માસ્મિન્, યજ્ઞે યજમાનાય દદાતુ સ્વાહા । સવિતા રાષ્ટ્ર ँ રાષ્ટ્રપતિઃ । રાષ્ટ્રમસ્મિન્, યજ્ઞે યજમાનાય દદાતુ સ્વાહા । પૂષા વિશાં વિટ્પતિઃ । વિશમસ્મિન્, યજ્ઞે યજમાનાય દદાતુ સ્વાહા

। સરસ્વતી પુષ્ટિઃ પુષ્ટિપત્ની । પુષ્ટિમસ્મિન્, યજ્ઞે યજમાનાય દદાતુ
સ્વાહા । ત્વષ્ટા પશૂનાં મિથુનાનાꣳ રૂપકૃદ્રૂપપતિઃ । રૂપેણાસ્મિન્,
યજ્ઞે યજમાનાય પશૂન્દદાતુ સ્વાહા ॥ ૨। ૫। ૭। ૪॥ ચ સ્વાહા સામ્રાજ્યમસ્મિન્,
યજ્ઞે યજમાનાય દદાતુ સ્વાહા વિશમસ્મિન્, યજ્ઞે યજમાનાય દદાતુ સ્વાહા
ચત્વારિ ચ ॥ ૭॥ અગ્નિઃ સોમો વરુણો મિત્ર ઇન્દ્રો બૃહસ્પતિઃ સવિતા
પૂષા સરસ્વતી ત્વષ્ટા દશ ॥

૩૪ સ ઈં પાહિ ય ઋજીષી તરુત્રઃ । યઃ શિપ્રવાન્વૃષભો યો મતીનામ્ ।
યો ગોત્રભિદ્વજ્રભૃદ્યો હરિષ્ઠાઃ । સ ઇન્દ્ર ચિત્રાꣳ અભિતૃન્ધિ
વાજાન્ । આ તે શુષ્મો વૃષભ એતુ પશ્ચાત્ । ઓત્તરાદધરાગા પુરસ્તાત્
। આ વિશ્વતો અભિ સમેત્વર્વાઙ્ । ઇન્દ્ર દ્યુમ્નꣳ સુવર્વદ્ધેહ્યસ્મે ।
પ્રોષ્વસ્મૈ પુરો રથમ્ । ઇન્દ્રાય શૂષમર્ચત ॥ ૨। ૫। ૮। ૧॥

૩૫ અભી કેચિદુ લોકકૃત્ । સઙ્ગે સમત્સુ વૃત્રહા । અસ્માકં બોધિ
ચોદિતા । નભન્તામન્ય કેષામ્ । જ્યાકા અધિ ધન્વસુ । ઇન્દ્રં વયꣳ
શુનાસીરમ્ । અસ્મિન્, યજ્ઞે હવામહે । આ વાજૈરુપ નો ગમત્ । ઇન્દ્રાય
શુનાસીરાય । સ્રુચા જુહુત નો હવિઃ ॥ ૨। ૫। ૮। ૨॥

૩૬ જુષતાં પ્રતિ મેધિરઃ । પ્ર હવ્યાનિ ઘૃતવન્ત્યસ્મૈ । હર્યશ્વાય
ભરતા સજોષાઃ । ઇન્દ્રર્તુભિર્બ્રહ્મણા વાવૃધાનઃ । શુનાસીરી હવિરિદં
જુષસ્વ । વયઃ સુપર્ણા ઉપસેદુરિન્દ્રમ્ । પ્રિયમેધા ઋષયો નાધમાનાઃ
। અપ ધ્વાન્તમૂર્ણુહિ પૂર્ધિ ચક્ષુઃ । મુમુગ્ધ્યસ્માન્નિધયેવ બદ્ધાન્ ।
બૃહદિન્દ્રાય ગાયત ॥ ૨। ૫। ૮। ૩॥

૩૭ મરુતો વૃત્રહન્તમમ્ । યેન જ્યોતિરજનયન્નૃતાવૃધઃ । દેવં
દેવાય જાગૃવિ । કા મિહૈકાઃ ક ઇમે પતઙ્ગાઃ । માન્થાલાઃ કુલિ પરિ
મા પતન્તિ । અનાવૃતૈનાન્પ્રધમન્તુ દેવાઃ । સૌપર્ણં ચક્ષુસ્તનુવા વિદેય
। એવાવન્દસ્વ વરુણં બૃહન્તમ્ । નમસ્યા ધીરમમૃતસ્ય ગોપામ્ ।
સ નઃ શર્મ ત્રિવરૂથં વિયꣳસત્ ॥ ૨। ૫। ૮। ૪॥

૩૮ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ । નાકે સુપર્ણમુપ યત્પતન્તમ્ । હૃદા
વેનન્તો અભ્યચક્ષત ત્વા । હિરણ્યપક્ષં વરુણસ્ય દૂતમ્ । યમસ્ય યોનૌ

શકુનં ભુરણ્યુમ્ । શં નો દેવીરભિષ્ટયે । આપો ભવન્તુ પીતયે ।
શં યોરભિસ્રવન્તુ નઃ । ઈશાના વાર્યાણામ્ । ક્ષયન્તીશ્ચર્ષણીનામ્ ॥ ૨। ૫। ૮। ૫॥
૩૯ અપો યાચામિ ભેષજમ્ । અપ્સુ મે સોમો અબ્રવીત્ । અન્તર્વિશ્વાનિ ભેષજા ।
અગ્નિં ચ વિશ્વશંભુવમ્ । આપશ્ચ વિશ્વભેષજીઃ । યદપ્સુ તે સરસ્વતિ ।
ગોષ્વશ્વેષુ યન્મધુ । તેન મે વાજિનીવતિ । મુખમઙ્ગ્ધિ સરસ્વતિ । યા સરસ્વતી
વૈશમ્ભલ્યા ॥ ૨। ૫। ૮। ૬॥
૪૦ તસ્યાં મે રાસ્વ । તસ્યાસ્તે ભક્ષીય । તસ્યાસ્તે ભૂયિષ્ઠભાજો ભૂયાસ્મ । અહં
ત્વદસ્મિ મદસિ ત્વમેતત્ । મમાસિ યોનિસ્તવ યોનિરસ્મિ । મમૈવ સન્વહ
હવ્યાન્યગ્ને । પુત્રઃ પિત્રે લોકકૃજ્જાતવેદઃ । ઇહૈવ સન્તત્ર સન્તં
ત્વાઽગ્ને । પ્રાણેન વાચા મનસા બિભર્મિ । તિરો મા સન્તમાયુર્મા પ્રહાસીત્ ॥
૨। ૫। ૮। ૭॥
૪૧ જ્યોતિષા ત્વા વૈશ્વાનરેણોપતિષ્ઠે । અયં તે યોનિરૃત્વિયઃ । યતો
જાતો અરોચથાઃ । તં જાનન્નગ્ન આરોહ । અથા નો વર્ધયા રયિમ્ । યા તે
અગ્ને યજ્ઞિયા તનૂસ્તયેહ્યારોહાત્માઽઽત્માનમ્ । અચ્છા વસૂનિ કૃણ્વન્નસ્મે
નર્યા પુરૂણિ । યજ્ઞો ભૂત્વા યજ્ઞમાસીદ સ્વાં યોનિમ્ । જાતવેદો ભુવ
આજાયમાનઃ સક્ષય એહિ । ઉપાવરોહ જાતવેદઃ પુનસ્ત્વમ્ ॥ ૨। ૫। ૮। ૮॥
૪૨ દેવેભ્યો હવ્યં વહ નઃ પ્રજાનન્ । આયુઃ પ્રજાꣳ રયિમસ્માસુ
ધેહિ । અજસ્રો દીદિહિ નો દુરોણે । તમિન્દ્રં જોહવીમિ મઘવાનમુગ્રમ્ ।
સત્રાદધાનમપ્રતિષ્કુતꣳ શવાꣳસિ । મꣳહિષ્ઠો ગીર્ભિરા ચ
યજ્ઞિયોઽવવર્તત્ । રાયે નો વિશ્વા સુપથા કૃણોતુ વજ્રી । ત્રિકદ્રુકેષુ
મહિષો યવાશિરં તુવિશુષ્મસ્તૃપત્ । સોમમપિબદ્વિષ્ણુના સુતં યથાવશત્
। સ ઈં મમાદ મહિ કર્મ કર્તવે મહામુરુમ્ ॥ ૨। ૫। ૮। ૯॥
૪૩ સૈનꣳ સશ્ચદ્દેવં દેવઃ સત્યમિન્દુꣳ સત્ય ઇન્દ્રઃ । વિદદ્યતી
સરમા રુગ્ણમદ્રેઃ । મહિ પાથઃ પૂર્વ્યꣳ સધ્રિયક્કઃ । અગ્રં
નયત્સુપદ્યક્ષરાણામ્ । અચ્છા રવં પ્રથમા જાનતી ગાત્ । વિદદ્ગવ્યꣳ
સરમા દૃઢમૂર્વમ્ । યેના નુકં માનુષી ભોજતે વિટ્ । આ યે વિશ્વા
સ્વપત્યાનિ ચક્રુઃ । કૃણ્વાનાસો અમૃતત્વાય ગાતુમ્ । ત્વં નૃભિર્નૃપતે

દેવહૂતૌ ॥ ૨। ૫। ૮। ૧૦॥

૪૪ ભૂરીણિ વૃત્વા હર્યશ્વ હꣳસિ । ત્વં નિદસ્યું ચુમુરિમ્ । ધુનિં ચાસ્વાપયો દભીતયે સુહન્તુ । એવા પાહિ પ્રત્નથા મન્દતુ ત્વા । શ્રુધિ બ્રહ્મ વાવૃધસ્વોત ગીર્ભિઃ । આવિઃ સૂર્યં કૃણુહિ પીપિહીષઃ । જહિ શત્રૂꣳરભિ ગા ઇન્દ્ર તૃન્ધિ । અગ્ને બાધસ્વ વિ મૃધો નુદસ્વ । અપામીવા અપ રક્ષાꣳસિ સેધ । અસ્માથ્સમુદ્રાદ્બૃહતો દિવો નઃ ॥ ૨। ૫। ૮। ૧૧॥

૪૫ અપાં ભૂમાનમુપ નઃ સૃજેહ । યજ્ઞ પ્રતિતિષ્ઠ સુમતૌ સુશેવા આ ત્વા । વસૂનિ પુરુધા વિશન્તુ । દીર્ઘમાયુર્યજમાનાય કૃણ્વન્ । અધામૃતેન જરિતારમઙ્ગ્ધિ । ઇન્દ્રઃ શુનાવદ્વિતનોતિ સીરમ્ । સંવથ્સરસ્ય પ્રતિમાણમેતત્ । અર્કસ્ય જ્યોતિસ્તદિદાસ જ્યેષ્ઠમ્ । સંવથ્સરꣳ શુનવથ્સીરમેતત્ । ઇન્દ્રસ્ય રાધઃ પ્રયતં પુરુ ત્મના । તદર્કરૂપં વિમિમાનમેતિ । દ્વાદશારે પ્રતિતિષ્ઠતીદ્વૃષા । અશ્વાયન્તો ગવ્યન્તો વાજયન્તઃ । હવામહે ત્વોપગન્ત વા ઉ । આભૂષન્તસ્ત્વા સુમતૌ નવાયામ્ । વયમિન્દ્ર ત્વા શુનꣳ હુવેમ ॥ ૨। ૫। ૮। ૧૨॥

અર્ચત હવિર્ગાયત યꣳ સચ્ચર્ષણીનાં વૈશમ્ભલ્યા હાસીત્ત્વમુરું દેવહૂતૌ નસ્ત્મના ષટ્ચ ॥ ૮॥

પ્રાણ ઉદેહિ પુનરા નો ભર યજ્ઞો રાયો વાર્ત્રહત્યાય વસૂનાꣳ સ ઈં પાહ્યષ્ટૌ ॥ ૮॥

પ્રાણો રક્ષત્યગૃભીતા ધારાવરા મરુતો દીર્ઘાયુત્વાય જ્યોતિષા ત્વા પઞ્ચચત્વારિꣳશત્ ॥ ૪૫॥

પ્રાણઃ શુનꣳ હુવેમ ॥

## દ્વિતીયાષ્ટકે ષષ્ઠઃ પ્રપાઠકઃ ૬

૧ સ્વાદ્વીં ત્વા સ્વાદુના । તીવ્રાં તીવ્રેણ । અમૃતામમૃતેન । મધુમતીં મધુમતા । સૃજામિ સꣳ સોમેન । સોમોઽસ્યશ્વિભ્યાં પચ્યસ્વ । સરસ્વત્યૈ પચ્યસ્વ । ઇન્દ્રાય સુત્રામ્ણે પચ્યસ્વ । પરીતો ષિઞ્ચતા સુતમ્ । સોમો ય

ઉત્તમઁ હવિઃ ॥ ૨। ૬। ૧। ૧॥

૨ દધન્વા યો નર્યો અપ્સ્વન્તરા । સુષાવ સોમમદ્રિભિઃ । પુનાતુ તે
પરિસ્રુતમ્ । સોમઁ સૂર્યસ્ય દુહિતા । વારેણ શશ્વતા તના ।
વાયુઃ પૂતઃ પવિત્રેણ । પ્રાઙ્ખ્સોમો અતિદ્રુતઃ । ઇન્દ્રસ્ય યુજ્યઃ સખા
। વાયુઃ પૂતઃ પવિત્રેણ । પ્રત્યઙ્ખ્સોમો અતિદ્રુતઃ ॥ ૨। ૬। ૧। ૨॥

૩ ઇન્દ્રસ્ય યુજ્યઃ સખા । બ્રહ્મ ક્ષત્રં પવતે તેજ ઇન્દ્રિયમ્ । સુરયા
સોમઃ સુત આસુતો મદાય । શુક્રેણ દેવ દેવતાઃ પિપૃગ્ધિ । રસેનાન્નં
યજમાનાય ધેહિ । કુવિદઙ્ગ યવમન્તો યવં ચિત્ । યથા દાન્ત્યનુપૂર્વં
વિયૂય । ઇહેહૈષાં કૃણુત ભોજનાનિ । યે બર્હિષો નમોવૃક્તિં ન
જગ્મુઃ । ઉપયામગૃહીતોઽસ્યશ્વિભ્યાં ત્વા જુષ્ટં ગૃહ્ણામિ ॥ ૨। ૬। ૧। ૩॥

૪ સરસ્વત્યા ઇન્દ્રાય સુત્રામ્ણે । એષ તે યોનિસ્તેજસે ત્વા । વીર્યાય ત્વા
બલાય ત્વા । તેજોઽસિ તેજો મયિ ધેહિ । વીર્યમસિ વીર્યં મયિ ધેહિ ।
બલમસિ બલં મયિ ધેહિ । નાના હિ વાં દેવહિતઁ સદઃ કૃતમ્ ।
મા સઁસૃક્ષાથાં પરમે વ્યોમન્ । સુરા ત્વમસિ શુષ્મિણી સોમ એષઃ ।
મા મા હિઁસીઃ સ્વાં યોનિમાવિશન્ ॥ ૨। ૬। ૧। ૪॥

૫ ઉપયામગૃહીતોઽસ્યાશ્વિનં તેજઃ । સારસ્વતં વીર્યમ્ । ઐન્દ્રં બલમ્
। એષ તે યોનિર્મોદાય ત્વા । આનન્દાય ત્વા મહસે ત્વા । ઓજોઽસ્યોજો મયિ
ધેહિ । મન્યુરસિ મન્યું મયિ ધેહિ । મહોઽસિ મહો મયિ ધેહિ । સહોઽસિ
સહો મયિ ધેહિ । યા વ્યાઘ્રં વિષૂચિકા । ઉભૌ વૃકં ચ રક્ષતિ । શ્યેનં
પતત્રિણઁસિઁહમ્ । સેમં પાત્વઁહસઃ । સંપૃચઃ સ્થ સં
મા ભદ્રેણ પૃઙ્ક્ત । વિપૃચઃ સ્થ વિ મા પાપ્મના પૃઙ્ક્ત ॥ ૨। ૬। ૧। ૫॥ હવિઃ પ્રત્યઙ્ખ્સોમો અતિદ્રુતો
ગૃહ્ણામ્યાવિશન્વિષૂચિકા પઞ્ચ ચ ॥ ૧॥

૬ સોમો રાજાઽમૃતઁસુતઃ । ઋજીષેણાજહાન્મૃત્યુમ્ । ઋતેન
સત્યમિન્દ્રિયમ્ । વિપાનઁશુક્રમન્ધસઃ । ઇન્દ્રસ્યેન્દ્રિયમ્ । ઇદં
પયોઽમૃતં મધુ । સોમમદ્ભ્યો વ્યપિબત્ । છન્દસા હઁસઃ શુચિષત્
। ઋતેન સત્યમિન્દ્રિયમ્ । અદ્ભ્યઃ, ક્ષીરં વ્યપિબત્ ॥ ૨। ૬। ૨। ૧॥

૭ કુઙ્ઙાઙ્ગિરસો ધિયા । ઋતેન સત્યમિન્દ્રિયમ્ । અન્નાત્પરિસ્રુતો

રસમ્ । બ્રહ્મણા વ્યપિબત્ક્ષત્રમ્ । ઋતેન સત્યમિન્દ્રિયમ્ । રેતો
મૂત્રં વિજહાતિ । યોનિં પ્રવિશદિન્દ્રિયમ્ । ગર્ભો જરાયુણાઽઽવૃતઃ ।
ઉલ્બં જહાતિ જન્મના । ઋતેન સત્યમિન્દ્રિયમ્ ॥ ૨। ૬। ૨। ૨॥

૮ વેદેન રૂપે વ્યકરોત્ । સતાસતી પ્રજાપતિઃ । ઋતેન
સત્યમિન્દ્રિયમ્ । સોમેન સોમૌ વ્યપિબત્ । સુતાસુતૌ પ્રજાપતિઃ
। ઋતેન સત્યમિન્દ્રિયમ્ । દૃષ્ટ્વા રૂપે વ્યાકરોત્ । સત્યાનૃતે
પ્રજાપતિઃ । અશ્રદ્ધામનૃતેઽદધાત્ । શ્રદ્ધાꣳ સત્યે પ્રજાપતિઃ
। ઋતેન સત્યમિન્દ્રિયમ્ । દૃષ્ટ્વા પરિસ્રુતો રસમ્ । શુક્રેણ
શુક્રં વ્યપિબત્ । પયઃ સોમં પ્રજાપતિઃ । ઋતેન સત્યમિન્દ્રિયમ્ ।
વિપાનꣳશુક્રમન્ધસઃ । ઇન્દ્રસ્યેન્દ્રિયમ્ । ઇદં પયોઽમૃતં મધુ ॥
૨। ૬। ૨। ૩॥ અદ્ભ્યઃ, ક્ષીરં વ્યપિબજ્જન્મનર્તેન સત્યમિન્દ્રિયરꣳ
શ્રદ્ધાꣳ સત્યે પ્રજાપતિરષ્ટૌ ચ ॥ ૨॥ સોમો રાજા વિપાનꣳ
સોમમદ્ભ્યોઽન્નાદ્રેતો મૂત્રં વેદેન સતાસતી સોમેન સુતાસુતૌ દૃષ્ટ્વા
રૂપે દૃષ્ટ્વા પરિસ્રુતા રસં વિપાનં દશ ॥

૯ સુરાવન્તં બર્હિષદꣳસુવીરમ્ । યજ્ઞꣳ હિન્વન્તિ મહિષા નમોભિઃ
। દધાનાઃ સોમં દિવિ દેવતાસુ । મદેમેન્દ્રં યજમાનાઃ સ્વર્કાઃ । યસ્તે
રસઃ સંભૃત ઓષધીષુ । સોમસ્ય શુષ્મઃ સુરયા સુતસ્ય । તેન
જિન્વ યજમાનં મદેન । સરસ્વતીમશ્વિનાવિન્દ્રમગ્નિમ્ । યમશ્વિના
નમુચેરાસુરાદધિ । સરસ્વત્યસનોદિન્દ્રિયાય ॥ ૨। ૬। ૩। ૧॥

૧૦ ઇમં તꣳ શુક્રં મધુમન્તમિન્દુમ્ । સોમꣳ રાજાનમિહ ભક્ષયામિ
। યદત્ર રિપ્તꣳ રસિનઃ સુતસ્ય । યદિન્દ્રો અપિબચ્છચીભિઃ । અહં
તદસ્ય મનસા શિવેન । સોમꣳ રાજાનમિહ ભક્ષયામિ । પિતૃભ્યઃ
સ્વધાવિભ્યઃ સ્વધા નમઃ । પિતામહેભ્યઃ સ્વધાવિભ્યઃ સ્વધા નમઃ
। પ્રપિતામહેભ્યઃ સ્વધાવિભ્યઃ સ્વધા નમઃ । અક્ષન્પિતરઃ ॥ ૨। ૬। ૩। ૨॥

૧૧ અમીમદન્ત પિતરઃ । અતીતૃપન્ત પિતરઃ । અમીમૃજન્ત પિતરઃ
। પિતરઃ શુન્ધધ્વમ્ । પુનન્તુ મા પિતરઃ સોમ્યાસઃ । પુનન્તુ મા
પિતામહાઃ । પુનન્તુ પ્રપિતામહાઃ । પવિત્રેણ શતાયુષા । પુનન્તુ મા

પિતામહાઃ । પુનન્તુ પ્રપિતામહાઃ ॥ ૨। ૬। ૩। ૩॥

૧૨ પવિત્રેણ શતાયુષા । વિશ્વમાયુર્વ્યશ્નવૈ । અગ્ન આયૂꣳષિ

પવસેઽગ્ને પવસ્વ । પવમાનઃ સુવર્જનઃ પુનન્તુ મા દેવજનાઃ । જાતવેદઃ

પવિત્રવદ્યત્તે પવિત્રમર્ચિષિ । ઉભાભ્યાં દેવ સવિતર્વૈશ્વદેવી

પુનતી । યે સમાનાઃ સમનસઃ । પિતરો યમરાજ્યે । તેષાં લોકઃ સ્વધા

નમઃ । યજ્ઞો દેવેષુ કલ્પતામ્ ॥ ૨। ૬। ૩। ૪॥

૧૩ યે સજાતાઃ સમનસઃ । જીવા જીવેષુ મામકાઃ । તેષાગ્ શ્રીર્મયિ

કલ્પતામ્ । અસ્મિં લ્લોકે શતꣳ સમાઃ । દ્વે સ્રુતી અશૃણવં પિતૄણામ્ ।

અહં દેવાનામુત મર્ત્યાનામ્ । યાભ્યામિદં વિશ્વમેજત્સમેતિ । યદન્તરા

પિતરં માતરં ચ । ઇદꣳ હવિઃ પ્રજનનં મે અસ્તુ । દશવીરꣳ

સર્વગણરꣳ સ્વસ્તયે । આત્મસનિ પ્રજાસનિ । પશુસન્યભયસનિ

લોકસનિ । અગ્નિઃ પ્રજાં બહુલાં મે કરોતુ । અન્નં પયો રેતો અસ્માસુ ધત્ત

। રાયસ્પોષમિષમૂર્જમસ્માસુ દીધરથ્સ્વાહા ॥ ૨। ૬। ૩। ૫॥ ઇન્દ્રિયાય

પિતરઃ શતાયુષા પુનન્તુ મા પિતામહાઃ પુનન્તુ પ્રપિતામહાઃ કલ્પતાગ્

સ્વસ્તયે પઞ્ચ ચ ॥ ૩॥

૧૪ સીસેન તન્ત્રં મનસા મનીષિણઃ । ઊર્ણાસૂત્રેણ કવયો વયન્તિ ।

અશ્વિના યજ્ઞꣳ સવિતા સરસ્વતી । ઇન્દ્રસ્ય રૂપં વરુણો ભિષજ્યન્ ।

તદસ્ય રૂપમમૃતꣳ શચીભિઃ । તિસ્રો દધુર્દેવતાઃ સꣳરરાણાઃ ।

લોમાનિ શષ્પૈર્બહુધા ન તોક્મભિઃ । ત્વગસ્ય માꣳસમભવન્ન લાજાઃ

। તદશ્વિના ભિષજા રુદ્રવર્તની । સરસ્વતી વયતિ પેશો અન્તરઃ ॥ ૨। ૬। ૪। ૧॥

૧૫ અસ્થિ મજ્જાનં માસરૈઃ । કારોતરેણ દધતો ગવાં ત્વચિ ।

સરસ્વતી મનસા પેશલં વસુ । નાસત્યાભ્યાં વયતિ દર્શતં વપુઃ ।

રસં પરિસ્રુતા ન રોહિતમ્ । નગ્નહુર્ધીરસ્તસરં ન વેમ । પયસા

શુક્રમમૃતં જનિત્રમ્ । સુરયા મૂત્રાજ્જનયન્તિ રેતઃ । અપામતિં

દુર્મતિં બાધમાનાઃ । ઊવધ્યં વાતꣳ સબ્વં તદારાત્ ॥ ૨। ૬। ૪। ૨॥

૧૬ ઇન્દ્રઃ સુત્રામા હૃદયેન સત્યમ્ । પુરોડાશેન સવિતા જજાન ।

યકૃત્ક્લોમાનં વરુણો ભિષજ્યન્ । મતસ્ને વાયવ્યૈર્ન મિનાતિ પિત્તમ્

। આન્ત્રાણિ સ્થાલી મધુ પિન્વમાના । ગુદા પાત્રાણિ સુદુઘા ન ધેનુઃ ।
શ્યેનસ્ય પત્રં ન પ્લીહા શચીભિઃ । આસન્દી નાભિરુદરં ન માતા ।
કુમ્ભો વનિષ્ઠુર્જનિતા શચીભિઃ । યસ્મિન્નગ્રે યોન્યાં ગર્ભો અન્તઃ ॥
૨। ૬। ૪। ૩॥

૧૭ પ્લાશીર્વ્યક્તઃ શતધાર ઉત્સઃ । દુહે ન કુમ્ભીગ્ સ્વધાં પિતૃભ્યઃ
। મુખઁ સદસ્ય શિર ઇત્સદેન । જિહ્વા પવિત્રમશ્વિના સઁ
સરસ્વતી । ચપ્પં ન પાયુર્ભિષગસ્ય વાલઃ । વસ્તિર્ન શેપો હરસા
તરસ્વી । અશ્વિભ્યાં ચક્ષુરમૃતં ગ્રહાભ્યામ્ । છાગેન તેજો હવિષા
શૃતેન । પક્ષ્માણિ ગોધૂમૈઃ કુવલૈરુતાનિ । પેશો ન શુક્લમસિતં
વસાતે ॥ ૨। ૬। ૪। ૪॥

૧૮ અવિર્ન મેષો નસિ વીર્યાય । પ્રાણસ્ય પન્થા અમૃતો ગ્રહાભ્યામ્
। સરસ્વત્યુપવાકૈર્વ્યાનમ્ । નસ્યાનિ બર્હિર્બદરૈર્જજાન । ઇન્દ્રસ્ય
રૂપમૃષભો બલાય । કર્ણાભ્યાગ્ શ્રોત્રમમૃતં ગ્રહાભ્યામ્ । યવા
ન બર્હિર્ભ્રુવિ કેસરાણિ । કર્કન્ધુ જજ્ઞે મધુ સારઘં મુખાત્ ।
આત્મન્નુપસ્થે ન વૃકસ્ય લોમ । મુખે શ્મશ્રૂણિ ન વ્યાઘ્રલોમમ્ ॥
૨। ૬। ૪। ૫॥

૧૯ કેશા ન શીર્ષન્, યશસે શ્રિયૈ શિખા । સિઁહસ્ય લોમ
ત્વિષિરિન્દ્રિયાણિ । અઙ્ગાન્યાત્મન્ભિષજા તદશ્વિના । આત્માનમઙ્ગૈઃ
સમધાત્સરસ્વતી । ઇન્દ્રસ્ય રૂપઁ શતમાનમાયુઃ । ચન્દ્રેણ
જ્યોતિરમૃતં દધાના । સરસ્વતી યોન્યાં ગર્ભમન્તઃ । અશ્વિભ્યાં
પત્ની સુકૃતં બિભર્તિ । અપાઁ રસેન વરુણો ન સામ્ના । ઇન્દ્રગ્ગ્ શ્રિયૈ
જનયન્નપ્સુ રાજા । તેજઃ પશૂનાઁ હવિરિન્દ્રિયાવત્ । પરિસ્રુતા
પયસા સારઘં મધુ । અશ્વિભ્યાં દુગ્ધં ભિષજા સરસ્વત્યા સુતાસુતાભ્યામ્
। અમૃતઃ સોમ ઇન્દુઃ ॥ ૨। ૬। ૪। ૬॥ અન્તર આરાદન્તર્વસાતે વ્યાઘ્રલોમઁ
રાજા ચત્વારિ ચ ॥ ૪॥

૨૦ મિત્રોઽસિ વરુણોઽસિ । સમહં વિશ્વૈર્દેવૈઃ । ક્ષત્રસ્ય નાભિરસિ ।
ક્ષત્રસ્ય યોનિરસિ । સ્યોના મા સીદ । સુષદા મા સીદ । મા ત્વા હિઁસીત્ ।

મા મા હિꣳસીત્ । નિષસાદ ધૃતવ્રતો વરુણઃ । પસ્ત્યાસ્વા ॥ ૨। ૬। ૫। ૧॥

૨૧ સામ્રાજ્યાય સુક્રતુઃ । દેવસ્ય ત્વા સવિતુઃ પ્રસવે । અશ્વિનોર્બાહુભ્યામ્ ।
પૂષ્ણો હસ્તાભ્યામ્ । અશ્વિનોર્ભૈષજ્યેન । તેજસે બ્રહ્મવર્ચસાયાભિષિઞ્ચામિ
। દેવસ્ય ત્વા સવિતુઃ પ્રસવે । અશ્વિનોર્બાહુભ્યામ્ । પૂષ્ણો હસ્તાભ્યામ્ ।
સરસ્વત્યૈ ભૈષજ્યેન ॥ ૨। ૬। ૫। ૨॥

૨૨ વીર્યાયાન્નાદ્યાયાભિષિઞ્ચામિ । દેવસ્ય ત્વા સવિતુઃ પ્રસવે
। અશ્વિનોર્બાહુભ્યામ્ । પૂષ્ણો હસ્તાભ્યામ્ । ઇન્દ્રસ્યેન્દ્રિયેણ । શ્રિયૈ
યશસે બલાયાભિષિઞ્ચામિ । કોઽસિ કતમોઽસિ । કસ્મૈ ત્વા કાય ત્વા ।
સુશ્લોકા ૪ ં સુમઙ્ગલા ૪ ં સત્યરાજા ૩ ન્ । શિરો મે શ્રીઃ ॥ ૨। ૬। ૫। ૩॥

૨૩ યશો મુખમ્ । ત્વિષિઃ કેશાશ્ચ શ્મશ્રૂણિ । રાજા મે પ્રાણોઽમૃતમ્ ।
સમ્રાટ્ચક્ષુઃ । વિરાટ્છ્રોત્રમ્ । જિહ્વા મે ભદ્રમ્ । વાઙ્મહઃ । મનો મન્યુઃ
। સ્વરાડ્ભામઃ । મોદાઃ પ્રમોદા અઙ્ગુલીરઙ્ગાનિ ॥ ૨। ૬। ૫। ૪॥

૨૪ ચિત્તં મે સહઃ । બાહૂ મે બલમિન્દ્રિયમ્ । હસ્તૌ મે કર્મ વીર્યમ્ ।
આત્મા ક્ષત્રમુરો મમ । પૃષ્ટીર્મે રાષ્ટ્રમુદરમꣳસૌ । ગ્રીવાશ્ચ
શ્રોણ્યૌ । ઊરૂ અરત્ની જાનુની । વિશો મેઽઙ્ગાનિ સર્વતઃ । નાભિર્મે
ચિત્તં વિજ્ઞાનમ્ । પાયુર્મેઽપચિતિર્ભસત્ ॥ ૨। ૬। ૫। ૫॥

૨૫ આનન્દનન્દાવાણ્ડૌ મે । ભગઃ સૌભાગ્યં પસઃ । જઙ્ઘાભ્યાં પદ્ભ્યાં
ધર્મોઽસ્મિ । વિશિ રાજા પ્રતિષ્ઠિતઃ । પ્રતિક્ષત્રે પ્રતિતિષ્ઠામિ રાષ્ટ્રે
। પ્રત્યશ્વેષુ પ્રતિતિષ્ઠામિ ગોષુ । પ્રત્યઙ્ગેષુ પ્રતિતિષ્ઠામ્યાત્મન્ ।
પ્રતિપ્રાણેષુ પ્રતિતિષ્ઠામિ પુષ્ટે । પ્રતિ દ્યાવાપૃથિવ્યોઃ । પ્રતિતિષ્ઠામિ
યજ્ઞે ॥ ૨। ૬। ૫। ૬॥

૨૬ ત્રયા દેવા એકાદશ । ત્રયસ્ત્રિꣳશાઃ સુરાધસઃ ।
બૃહસ્પતિપુરોહિતાઃ । દેવસ્ય સવિતુઃ સવે । દેવા દેવૈરવન્તુ મા ।
પ્રથમા દ્વિતીયૈઃ । દ્વિતીયાસ્તૃતીયૈઃ । તૃતીયાઃ સત્યેન । સત્યં
યજ્ઞેન । યજ્ઞો યજુર્ભિઃ ॥ ૨। ૬। ૫। ૭॥

૨૭ યજૂꣳષિ સામભિઃ । સામાન્યૃગ્ભિઃ । ઋચો યાજ્યાભિઃ । યાજ્યા
વષટ્કારૈઃ । વષટ્કારા આહુતિભિઃ । આહુતયો મે કામાન્થ્સમર્ધયન્તુ । ભૂઃ

સ્વાહા । લોમાનિ પ્રયતિર્મમ । ત્વઙ્મ આનતિરાગતિઃ । મા ઁ સં મ
ઉપનતિઃ । વસ્વસ્થિ । મજ્જા મ આનતિઃ ॥ ૨। ૬। ૫। ૮॥ પસ્ત્યાસ્વા સરસ્વત્યૈ
ભૈષજ્યેન શ્રીરઙ્ગાનિ ભસદ્ધઙ્ક્ષે યજ્ઞો યજુર્ભિરુપનતિર્દ્વે ચ
॥ ૫॥

૨૮ યદ્દેવા દેવહેડનમ્ । દેવાસશ્ચકૃમા વયમ્ । અગ્નિર્મા તસ્માદેનસઃ ।
વિશ્વાન્મુઞ્ચત્વ ઁ હસઃ । યદિ દિવા યદિ નક્તમ્ । એના ઁસિ ચકૃમા
વયમ્ । વાયુર્મા તસ્માદેનસઃ । વિશ્વાન્મુઞ્ચત્વ ઁ હસઃ । યદિ જાગ્રદ્યદિ
સ્વપ્ને । એના ઁસિ ચકૃમા વયમ્ ॥ ૨। ૬। ૬। ૧॥

૨૯ સૂર્યો મા તસ્માદેનસઃ । વિશ્વાન્મુઞ્ચત્વ ઁ હસઃ । યદ્ગ્રામે યદરણ્યે
। યથ્સભાયાં યદિન્દ્રિયે । યચ્છૂદ્રે યદર્યે । એનશ્ચકૃમા વયમ્ ।
યદેકસ્યાધિ ધર્મણિ । તસ્યાવયજનમસિ । યદાપો અઘ્નિયા વરુણેતિ
શપામહે । તતો વરુણ નો મુઞ્ચ ॥ ૨। ૬। ૬। ૨॥

૩૦ અવભૃથ નિચઙ્કુણ નિચેરુરસિ નિચઙ્કુણ । અવ
દેવૈર્દેવકૃતમેનોઽયાટ્ । અવ મર્ત્યૈર્મર્ત્યકૃતમ્ । ઉરોરા નો દેવ
રિષસ્પાહિ । સુમિત્રા ન આપ ઓષધયઃ સન્તુ । દુર્મિત્રાસ્તસ્મૈ ભુયાસુઃ
। યોઽસ્માન્દ્વેષ્ટિ । યં ચ વયં દ્વિષ્મઃ । દ્રુપદાદિવેન્મુમુચાનઃ ।
સ્વિન્નઃ સ્નાત્વી મલાદિવ ॥ ૨। ૬। ૬। ૩॥

૩૧ પૂતં પવિત્રેણેવાજ્યમ્ । આપઃ શુન્ધન્તુ મૈનસઃ । ઉદ્વયં
તમસસ્પરિ । પશ્યન્તો જ્યોતિરુત્તરમ્ । દેવં દેવત્રા સૂર્યમ્ । અગન્મ
જ્યોતિરુત્તમમ્ । પ્રતિયુતો વરુણસ્ય પાશઃ । પ્રત્યસ્તો વરુણસ્ય પાશઃ
। એધોઽસ્યેધિષીમહિ । સમિદસિ ॥ ૨। ૬। ૬। ૪॥

૩૨ તેજોઽસિ તેજો મયિ ધેહિ । અપો અન્વચારિષમ્ । રસેન સમસૃક્ષ્મહિ
। પયસ્વા ઁ અગ્ન આગમમ્ । તં મા સ ઁ સૃજ વર્ચસા । પ્રજયા
ચ ધનેન ચ । સમાવવર્તિ પૃથિવી । સમુષાઃ । સમુ સૂર્યઃ । સમુ
વિશ્વમિદં જગત્ । વૈશ્વાનર જ્યોતિર્ભૂયાસમ્ । વિભું કામં વ્યશ્નવૈ ।
ભૂઃ સ્વાહા ॥ ૨। ૬। ૬। ૫॥ સ્વપ્ન એના ઁસિ ચકૃમા વયં મુઞ્ચ મલાદિવ
સમિદસિ જગત્રીણિ ચ ॥ ૬॥

૩૩ હોતા યક્ષથ્સમિધેન્દ્રમિડસ્પદે । નાભા પૃથિવ્યા અધિ । દિવો
વર્ષ્મન્થ્સમિધ્યતે । ઓજિષ્ઠશ્ચર્ષણીસહાન્ । વેત્વાજ્યસ્ય હોતર્યજ ।
હોતા યક્ષત્તનૂનપાતમ્ । ઊતિભિર્જેતારમપરાજિતમ્ । ઇન્દ્રં દેવꣳ
સુવર્વિદમ્ । પથિભિર્મધુમત્તમૈઃ । નરાશꣳસેન તેજસા ॥ ૨। ૬। ૭। ૧॥

૩૪ વેત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષદિડાભિરિન્દ્રમીડિતમ્ ।
આજુહ્વાનમમર્ત્યમ્ । દેવો દેવૈઃ સવીર્યઃ । વજ્રહસ્તઃ પુરંદરઃ ।
વેત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષદ્બર્હિષીન્દ્રં નિષદ્વરમ્ । વૃષભં
નર્યાપસમ્ । વસુભી રુદ્રૈરાદિત્યૈઃ । સયુગ્ભિર્બર્હિરાસદત્ ॥ ૨। ૬। ૭। ૨॥

૩૫ વેત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષદોજો ન વીર્યમ્ । સહો દ્વાર
ઇન્દ્રમવર્ધયન્ । સુપ્રાયણા વિશ્રયન્તામૃતાવૃધઃ । દ્વાર ઇન્દ્રાય
મીઢુષે । વિયન્ત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષદુષે ઇન્દ્રસ્ય ધેનૂ ।
સુદુઘે માતરૌ મહી । સવાતરૌ ન તેજસી । વથ્સમિન્દ્રમવર્ધતામ્ ॥
૨। ૬। ૭। ૩॥

૩૬ વીતામાજ્યસ્ય હોતર્યજ । હોતા યક્ષદ્દૈવ્યા હોતારા । ભિષજા
સખાયા । હવિષેન્દ્રં ભિષજ્યતઃ । કવી દેવૌ પ્રચેતસૌ । ઇન્દ્રાય
ધત્ત ઇન્દ્રિયમ્ । વીતામાજ્યસ્ય હોતર્યજ । હોતા યક્ષત્તિસ્રો દેવીઃ ।
ત્રયસ્ત્રિધાતવોઽપસઃ । ઇડા સરસ્વતી ભારતી ॥ ૨। ૬। ૭। ૪॥

૩૭ મહીન્દ્રપત્નીર્હવિષ્મતીઃ । વિયન્ત્વાજ્યસ્ય હોતર્યજ । હોતા
યક્ષત્ત્વષ્ટારમિન્દ્રં દેવમ્ । ભિષજꣳસુયજં ઘૃતશ્રિયમ્ ।
પુરુરૂપꣳસુરેતસં મઘોનિમ્ । ઇન્દ્રાય ત્વષ્ટા દધદિન્દ્રિયાણિ
। વેત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષદ્વનસ્પતિમ્ । શમિતારꣳ
શતક્રતુમ્ । ધિયો જોષ્ટારમિન્દ્રિયમ્ ॥ ૨। ૬। ૭। ૫॥

૩૮ મધ્વા સમઞ્જન્પથિભિઃ સુગેભિઃ । સ્વદાતિ હવ્યં મધુના ઘૃતેન
। વેત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષદિન્દ્રગ્ગ્ સ્વાહાઽઽજ્યસ્ય । સ્વાહા
મેદસઃ । સ્વાહા સ્તોકાનામ્ । સ્વાહા સ્વાહાકૃતીનામ્ । સ્વાહા હવ્યસૂક્તીનામ્ । સ્વાહા
દેવાꣳ આજ્યપાન્ । સ્વાહેન્દ્રꣳહોત્રાજ્જુષાણાઃ । ઇન્દ્ર આજ્યસ્ય વિયન્તુ ।

હોતર્યજ ॥ ૨। ૬। ૭। ૬॥ તેજસાઽઽસદદવર્ધતાં ભારતીન્દ્રિયં જુષાણા
દ્વે ચ ॥ ૭॥ સમિધેન્દ્રં તનૂનપાતમિડાભિર્બર્‌હિષ્યોજ ઉષે દૈવ્યા
તિસ્રસ્ત્વષ્ટારં વનસ્પતિમિન્દ્રમ્ । સમિધેન્દ્રં ચતુર્વેત્વેકો વિયન્તુ
દ્વિર્વીતામેકો વિયન્તુ દ્વિર્વેત્વેકો વિયન્તુ હોતર્યજ ॥

૩૯ સમિદ્ધ ઇન્દ્ર ઉષસામનીકે । પુરોરુચા પૂર્વકૃદ્વાવૃધાનઃ ।
ત્રિભિર્દેવૈસ્ત્રિꣳશતા વજ્રબાહુઃ । જઘાન વૃત્રં વિ દુરો વવાર ।
નરાશꣳસઃ પ્રતિ શૂરો મિમાનઃ । તનૂનપાત્પ્રતિ યજ્ઞસ્ય ધામ
। ગોભિર્વપાવાન્મધુના સમઞ્જન્ । હિરણ્યૈશ્ચન્દ્રી યજતિ પ્રચેતાઃ ।
ઇડિતો દેવૈર્હરિવાꣳ અભિષ્ટિઃ । આજુહ્વાનો હવિષા શર્ધમાનઃ ॥ ૨। ૬। ૮। ૧॥

૪૦ પુરંદરો મઘવાન્ વજ્રબાહુઃ । આયાતુ યજ્ઞમુપ નો જુષાણઃ ।
જુષાણો બર્‌હિર્હરિવાન્ન ઇન્દ્રઃ । પ્રાચીનꣳસીદત્પ્રદિશા પૃથિવ્યાઃ
। ઉરુવ્યચાઃ પ્રથમાનરꣳ સ્યોનમ્ । આદિત્યૈરક્તં વસુભિઃ સજોષાઃ ।
ઇન્દ્રં દુરઃ કવષ્યો ધાવમાનાઃ । વૃષાણં યન્તુ જનયઃ સુપત્નીઃ । દ્વારો
દેવીરભિતો વિશ્રયન્તામ્ । સુવીરા વીરં પ્રથમાના મહોભિઃ ॥ ૨। ૬। ૮। ૨॥

૪૧ ઉષાસા નક્તા બૃહતી બૃહન્તમ્ । પયસ્વતી સુદુઘે શૂરમિન્દ્રમ્ ।
પેશસ્વતી તન્તુના સંવ્યયન્તી । દેવાનાં દેવં યજતઃ સુરુક્મે । દૈવ્યા
મિમાના મનસા પુરુત્રા । હોતારાવિન્દ્રં પ્રથમા સુવાચા । મૂર્ધન્,
યજ્ઞસ્ય મધુના દધાના । પ્રાચીનં જ્યોતિર્હવિષા વૃધાતઃ । તિસ્રો
દેવીર્હવિષા વર્ધમાનાઃ । ઇન્દ્રં જુષાણા વૃષણં ન પત્નીઃ ॥ ૨। ૬। ૮। ૩॥

૪૨ અચ્છિન્નં તન્તું પયસા સરસ્વતી । ઇડા દેવી ભારતી વિશ્વતૂર્તિઃ
। ત્વષ્ટા દધદિન્દ્રાય શુષ્મમ્ । અપાકોઽચિષ્ટુર્યશસે પુરૂણિ ।
વૃષા યજન્વૃષણં ભૂરિરેતાઃ । મૂર્ધન્, યજ્ઞસ્ય સમનક્તુ દેવાન્ ।
વનસ્પતિરવસૃષ્ટો ન પાશૈઃ । ત્મન્યા સમઞ્જઞ્છમિતા ન દેવઃ ।
ઇન્દ્રસ્ય હવ્યૈર્જઠરં પૃણાનઃ । સ્વદાતિ હવ્યં મધુના ઘૃતેન ।
સ્તોકાનામિન્દું પ્રતિ શૂર ઇન્દ્રઃ । વૃષાયમાણો વૃષભસ્તુરાષાટ્ ।
ઘૃતપ્રુષા મધુના હવ્યમુન્દન્ । મૂર્ધન્, યજ્ઞસ્ય જુષતાગ્ સ્વાહા
॥ ૨। ૬। ૮। ૪॥ શર્ધમાનો મહોભિઃ પત્નીર્ઘૃતેન ચત્વારિ ચ ॥ ૮॥

૪૩ આચર્ષણિ પ્રા વિવેષ યન્મા । તઁ સધ્રીચીઃ । સત્યમિત્તન્ન ત્વાવાઁ
અન્યો અસ્તિ । ઇન્દ્ર દેવો ન મર્ત્યો જ્યાયાન્ । અહન્નહિં પરિશયાનમર્ણઃ
। અવાસૃજોઽપો અચ્છા સમુદ્રમ્ । પ્રસસાહિષે પુરુહૂત શત્રૂન્ ।
જ્યેષ્ઠસ્તે શુષ્મ ઇહ રાતિરસ્તુ । ઇન્દ્રાભર દક્ષિણેના વસૂનિ ।
પતિઃ સિન્ધૂનામસિ રેવતીનામ્ । સ શેવૃધમધિધા દ્યુમ્નમસ્મે । મહિ
ક્ષત્રં જનાષાડિન્દ્ર તવ્યમ્ । રક્ષા ચ નો મઘોનઃ પાહિ સૂરીન્ ।
રાયે ચ નઃ સ્વપત્યા ઇષે ધાઃ ॥ ૨। ૬। ૯। ૧॥ રેવતીનાં ચત્વારિ ચ ॥ ૯॥

૪૪ દેવં બર્હિરિન્દ્રઁસુદેવં દેવૈઃ । વીરવથ્સ્તીર્ણં વેદ્યામવર્ધયત્
। વસ્તોર્વૃતં પ્રાક્તોર્ભૃતમ્ । રાયા બર્હિષ્મતોઽત્યગાત્ ।
વસુવને વસુધેયસ્ય વેતુ યજ । દેવીર્દ્વાર ઇન્દ્રઁસંઘાતે ।
વિડ્વીર્યામન્નવર્ધયન્ । આ વથ્સેન તરુણેન કુમારેણ ચ મીવિતા અપાર્વાણમ્ ।
રેણુકકાટં નુદન્તામ્ । વસુવને વસુધેયસ્ય વિયન્તુ યજ ॥ ૨। ૬। ૧૦। ૧॥

૪૫ દેવી ઉષાસા નક્તા । ઇન્દ્રં યજ્ઞે પ્રયત્યહ્વેતામ્ । દૈવીર્વિશઃ
પ્રાયાસિષ્ટામ્ । સુપ્રીતે સુધિતે અભૂતામ્ । વસુવને વસુધેયસ્ય વીતાં યજ
। દેવી જોષ્ટ્રી વસુધિતી । દેવમિન્દ્રમવર્ધતામ્ । અયાવ્યન્યાઽઘા દ્વેષાઁસિ
। આઽન્યાઽવાક્ષીદ્વસુ વાર્યાણિ । યજમાનાય શિક્ષિતે ॥ ૨। ૬। ૧૦। ૨॥

૪૬ વસુવને વસુધેયસ્ય વીતાં યજ । દેવી ઊર્જાહુતી દુઘે સુદુઘે ।
પયસેન્દ્રમવર્ધતામ્ । ઇષમૂર્જમન્યાઽવાક્ષીત્ । સગ્ધિઁ સપીતિમન્યા
। નવેન પૂર્વં દયમાને । પુરાણેન નવમ્ । અધાતામૂર્જમૂર્જાહુતી
વસુ વાર્યાણિ । યજમાનાય શિક્ષિતે । વસુવને વસુધેયસ્ય વીતાં યજ
॥ ૨। ૬। ૧૦। ૩॥

૪૭ દેવા દૈવ્યા હોતારા । દેવમિન્દ્રમવર્ધતામ્ । હતાઘશઁસાવાભાર્ષ્ટાં
વસુ વાર્યાણિ । યજમાનાય શિક્ષિતૌ । વસુવને વસુધેયસ્ય વીતાં યજ
। દેવીસ્તિસ્રસ્તિસ્રો દેવીઃ । પતિમિન્દ્રમવર્ધયન્ । અસ્પૃક્ષદ્ભારતી
દિવમ્ । રુદ્રૈર્યજ્ઞઁ સરસ્વતી । ઇડા વસુમતી ગૃહાન્ ॥ ૨। ૬। ૧૦। ૪॥

૪૮ વસુવને વસુધેયસ્ય વિયન્તુ યજ । દેવ ઇન્દ્રો નરાશઁસઃ
। ત્રિવરૂથસ્ત્રિવન્ધુરઃ । દેવમિન્દ્રમવર્ધયત્ । શતેન

શિતિપૃષ્ઠાનામાહિતઃ । સહસ્રેણ પ્રવર્તતે । મિત્રાવરુણેદસ્ય
હોત્રમર્હતઃ । બૃહસ્પતિઃ સ્તોત્રમ્ । અશ્વિનાઽઽધ્વર્યવમ્ । વસુવને
વસુધેયસ્ય વેતુ યજ ॥ ૨। ૬। ૧૦। ૫॥

૪૯ દેવ ઇન્દ્રો વનસ્પતિઃ । હિરણ્યપર્ણો મધુશાખઃ
સુપિપ્પલઃ । દેવમિન્દ્રમવર્ધયત્ । દિવમગ્રેણાપ્રાત્ । આઽન્તરિક્ષં
પૃથિવીમદૃꣳહીત્ । વસુવને વસુધેયસ્ય વેતુ યજ । દેવં
બર્હિર્વારિતીનામ્ । દેવમિન્દ્રમવર્ધયત્ । સ્વાસસ્થમિન્દ્રેણાસન્નમ્ । અન્યા
બર્હીગ્ષ્યભ્યભૂત્ । વસુવને વસુધેયસ્ય વેતુ યજ । દેવો અગ્નિઃ
સ્વિષ્ટકૃત્ । દેવમિન્દ્રમવર્ધયત્ । સ્વિષ્ટં કુર્વન્ત્સ્વિષ્ટકૃત્
। સ્વિષ્ટમદ્ય કરોતુ નઃ । વસુવને વસુધેયસ્ય વેતુ યજ
॥ ૨। ૬। ૧૦। ૬॥ વિયન્તુ યજ શિક્ષિતે શિક્ષિતે વસુવને
વસુધેયસ્ય વીતાં યજ ગૃહાન્, વેતુ યજાભૂત્ષટ્ચ ॥ ૧૦॥ દેવં
બર્હિર્દેવીર્દ્વારો દેવી ઉષાસા નક્તા દેવી જોષ્ટ્રી દેવી ઊર્જાહુતી
દેવા દૈવ્યા હોતારા શિક્ષિતૌ દેવીસ્તિસ્રસ્તિસ્રો દેવીર્દેવ ઇન્દ્રો
નરાશꣳસો દેવ ઇન્દ્રો વનસ્પતિર્દેવં બર્હિર્વારિતીનાં દેવો અગ્નિઃ
સ્વિષ્ટકૃદ્દેવમ્ ॥ વેતુ વિયન્તુ ચતુર્વીતામેકો વિયન્તુ ચતુર્વેતુ ।
અવર્ધયદવર્ધયન્નિરવર્ધતામેકોઽવર્ધય ૨ꣳશ્ચતુરવર્ધયત્
। વસ્તોરા વથ્સેન દૈવીરયાવીષꣳહતાસ્પૃક્ષચ્છતેન દિવમિન્દ્રગ્ગ્
સ્વાસસ્થર ꣳ સ્વિષ્ટમ્ । સ્વિષ્ટꣳ શિક્ષિતે શિક્ષિતે શિક્ષિતૌ ॥

૫૦ હોતા યક્ષથ્સમિધાઽગ્નિમિડસ્પદે । અશ્વિનેન્દ્રꣳ સરસ્વતીમ્ । અજો
ધૂમ્રો ન ગોધૂમૈઃ ક્વલૈર્ભેષજમ્ । મધુ શષ્પૈર્ન તેજ ઇન્દ્રિયમ્
। પયઃ સોમઃ પરિસ્રુતા ઘૃતં મધુ । વિયન્ત્વાજ્યસ્ય હોતર્યજ
। હોતા યક્ષત્તનૂનપાથ્સરસ્વતી । અવિર્મેષો ન ભેષજમ્ । પથા
મધુમતાઽઽભરન્ । અશ્વિનેન્દ્રાય વીર્યમ્ ॥ ૨। ૬। ૧૧। ૧॥

૫૧ બદરૈરુપવાકાભિર્ભેષજં તોક્મભિઃ । પયઃ સોમઃ પરિસ્રુતા ઘૃતં
મધુ । વિયન્ત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષન્નરાશꣳસં ન
નગ્નહુમ્ । પતિꣳ સુરાયૈ ભેષજમ્ । મેષઃ સરસ્વતી ભિષક્ । રથો

ન ચન્દ્યશ્વિનોર્વપા ઇન્દ્રસ્ય વીર્યમ્ । બદરૈરુપવાકાભિર્ભેષજં
તોક્મભિઃ । પયઃ સોમઃ પરિસ્રુતા ઘૃતં મધુ । વિયન્ત્વાજ્યસ્ય
હોતર્યજ ॥ ૨। ૬। ૧૧। ૨॥

પર હોતા યક્ષદિડેડિત આજુહ્વાનઃ સરસ્વતીમ્ । ઇન્દ્રં બલેન વર્ધયન્ન્ ।
ઋષભેણ ગવેન્દ્રિયમ્ । અશ્વિનેન્દ્રાય વીર્યમ્ । યવૈઃ કર્કન્ધુભિઃ
। મધુ લાજૈર્ન માસરમ્ । પયઃ સોમઃ પરિસ્રુતા ઘૃતં મધુ ।
વિયન્ત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષદ્બર્હિઃ સુષ્ટરીમોર્ણમ્રદાઃ ।
ભિષઙ્નાસત્યા ॥ ૨। ૬। ૧૧। ૩॥

પ૩ ભિષજાઽશ્વિનાઽશ્વા શિશુમતી । ભિષગ્ધેનુઃ સરસ્વતી । ભિષગ્દુહ
ઇન્દ્રાય ભેષજમ્ । પયઃ સોમઃ પરિસ્રુતા ઘૃતં મધુ । વિયન્ત્વાજ્યસ્ય
હોતર્યજ । હોતા યક્ષદ્દુરો દિશઃ । કવષ્યો ન વ્યચસ્વતીઃ ।
અશ્વિભ્યાં ન દુરો દિશઃ । ઇન્દ્રો ન રોદસી દુઘે । દુહે કામાન્થ્સરસ્વતી
॥ ૨। ૬। ૧૧। ૪॥

પ૪ અશ્વિનેન્દ્રાય ભેષજમ્ । શુક્રં ન જ્યોતિરિન્દ્રિયમ્ । પયઃ સોમઃ પરિસ્રુતા
ઘૃતં મધુ । વિયન્ત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષથ્સુપેશસોષે
નક્તં દિવા । અશ્વિના સંજાનાને । સમઞ્જાતે સરસ્વત્યા । ત્વિષિમિન્દ્રે
ન ભેષજમ્ । શ્યેનો ન રજસા હૃદા । પયઃ સોમઃ પરિસ્રુતા ઘૃતં
મધુ ॥ ૨। ૬। ૧૧। ૫॥

પપ વિયન્ત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષદ્દૈવ્યા હોતારા ભિષજાઽશ્વિના
। ઇન્દ્રં ન જાગૃવી દિવા નક્તં ન ભેષજૈઃ । શૂષꣳ સરસ્વતી
ભિષક્ । સીસેન દુહ ઇન્દ્રિયમ્ । પયઃ સોમઃ પરિસ્રુતા ઘૃતં મધુ
। વિયન્ત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષત્તિસ્રો દેવીર્ન ભેષજમ્ ।
ત્રયસ્ત્રિધાતવોઽપસઃ । રૂપમિન્દ્રે હિરણ્યયમ્ ॥

પ૬ અશ્વિનેડા ન ભારતી । વાચા સરસ્વતી । મહ ઇન્દ્રાય દધુરિન્દ્રિયમ્ ।
પયઃ સોમઃ પરિસ્રુતા ઘૃતં મધુ । વિયન્ત્વાજ્યસ્ય હોતર્યજ ।
હોતા યક્ષત્ત્વષ્ટારમિન્દ્રમશ્વિના । ભિષજં ન સરસ્વતીમ્ । ઓજો ન
જૂતિરિન્દ્રિયમ્ । વૃકો ન રભસો ભિષક્ । યશઃ સુરયા ભેષજમ્ ॥ ૨। ૬। ૧૧। ૭॥

૫૭ શ્રિયા ન માસરમ્ । પયઃ સોમઃ પરિસ્રુતા ઘૃતં મધુ । વિયન્ત્વાજ્યસ્ય
હોતર્યજ । હોતા યક્ષદ્વનસ્પતિમ્ । શમિતાર ꣳ શતક્રતુમ્ ।
ભીમં ન મન્યુ ꣳ રાજાનં વ્યાઘ્રં નમસાઽશ્વિના ભામમ્ । સરસ્વતી
ભિષક્ । ઇન્દ્રાય દુહ ઇન્દ્રિયમ્ । પયઃ સોમઃ પરિસ્રુતા ઘૃતં મધુ ।
વિયન્ત્વાજ્યસ્ય હોતર્યજ ॥ ૨। ૬। ૧૧। ૮॥

૫૮ હોતા યક્ષદગ્નિર ꣳ સ્વાહાઽઽજ્યસ્ય સ્તોકાનામ્ । સ્વાહા મેદસાં પૃથક્ ।
સ્વાહા છાગમશ્વિભ્યામ્ । સ્વાહા મેષ ꣳ સરસ્વત્યૈ । સ્વાહર્ષભમિન્દ્રાય
સિ ꣳ હાય સહસેન્દ્રિયમ્ । સ્વાહાઽગ્નિં ન ભેષજમ્ । સ્વાહા સોમમિન્દ્રિયમ્
। સ્વાહેન્દ્ર ꣳ સુત્રામાણ ꣳ સવિતારં વરુણં ભિષજાં પતિમ્ । સ્વાહા
વનસ્પતિં પ્રિયં પાથો ન ભેષજમ્ । સ્વહા દેવા ꣳ આજ્યપાન્ ॥ ૨। ૬। ૧૧। ૯॥

૫૯ સ્વાહાઽગ્નિ ꣳ હોત્રાજ્જુષાણો અગ્નિર્ભેષજમ્ । પયઃ સોમઃ પરિસ્રુતા
ઘૃતં મધુ । વિયન્ત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષદશ્વિના
સરસ્વતીમિન્દ્ર ꣳ સુત્રામાણમ્ । ઇમે સોમાઃ સુરામાણઃ । છાગૈર્ન
મેષૈરૃષભૈઃ સુતાઃ । શષ્પૈર્ન તોક્મભિઃ । લાજૈર્મહસ્વન્તઃ ।
મદા માસરેણ પરિષ્કૃતાઃ । શુક્રાઃ પયસ્વન્તોઽમૃતાઃ । પ્રસ્થિતા
વો મધુશ્ચુતઃ । તાનશ્વિના સરસ્વતીન્દ્રઃ સુત્રામા વૃત્રહા ।
જુષન્તા ꣳ સૌમ્યં મધુ । પિબન્તુ મદન્તુ વિયન્તુ સોમમ્ । હોતર્યજ
॥ ૨। ૬। ૧૧। ૧૦॥ વીર્યં વિયન્ત્વાજ્યસ્ય હોતર્યજ નાસત્યા સરસ્વતી
મધુ હિરણ્યયં ભેષજં વિયન્ત્વાજ્યસ્ય હોતર્યજાજ્યપાનમૃતા
પઞ્ચ ચ ॥ ૧૧॥ સમિધાઽગ્નિ ꣳ ષટ્ । તનૂનપાથ્સપ્ત ।
નરાશ ꣳ સમૃષિઃ । ઇડેડિતો યવૈરષ્ટૌ । બર્હિઃ સપ્ત ।
દુરોઽશ્વિના શુક્રં નવ । સુપેશસ ઋષિઃ । દૈવ્યા હોતારા સીસેન
રસઃ । તિસ્રસ્ત્વષ્ટારમષ્ટાવષ્ટૌ । વનસ્પતિમૃષિ । અગ્નિં ત્રયોદશ ।
અશ્વિના દ્વાદશ ત્રયોદશ । સમિધાઽગ્નિં બદરૈર્બદરૈર્યવૈરશ્વિના
ત્વિષિમશ્વિના ન ભેષજ ꣳ રૂપમશ્વિના ભીમં ભામમ્ ॥

૬૦ સમિદ્ધો અગ્નિરશ્વિના । તપ્તો ઘર્મો વિરાટ્થ્સુતઃ । દુહે ધેનુઃ સરસ્વતી ।
સોમ ꣳ શુક્રમિહેન્દ્રિયમ્ । તનૂપા ભિષજા સુતે । અશ્વિનોભા સરસ્વતી

। મધ્વા રજાꣳસીન્દ્રિયમ્ । ઇન્દ્રાય પથિભિર્વહાન્ । ઇન્દ્રાયેન્દુꣳ સરસ્વતી । નરાશꣳસેન નગ્નહુઃ ॥ ૨। ૬। ૧૨। ૧॥

૬૧ અધાતામશ્વિના મધુ । ભેષજં ભિષજા સુતે । આજુહ્વાના સરસ્વતી । ઇન્દ્રાયેન્દ્રિયાણિ વીર્યમ્ । ઇડાભિરશ્વિનાવિષમ્ । સમૂર્જꣳ સꣳરયિં દધુઃ । અશ્વિના નમુચેઃ સુતમ્ । સોમꣳશુક્રં પરિસ્રુતા । સરસ્વતી તમાભરત્ । બર્હિષેન્દ્રાય પાતવે ॥ ૨। ૬। ૧૨। ૨॥

૬૨ કવષ્યો ન વ્યચસ્વતીઃ । અશ્વિભ્યાં ન દુરો દિશઃ । ઇન્દ્રો ન રોદસી દુઘે । દુહે કામાન્થ્સરસ્વતી । ઉષાસા નક્તમશ્વિના । દિવેન્દ્રꣳસાયમિન્દ્રિયૈઃ । સંજાનાને સુપેશસા । સમઞ્જાતે સરસ્વત્યા । પાતં નો અશ્વિના દિવા । પાહિ નક્તꣳસરસ્વતિ ॥ ૨। ૬। ૧૨। ૩॥

૬૩ દૈવ્યા હોતારા ભિષજા । પાતમિન્દ્રꣳ સચા સુતે । તિસ્રસ્ત્રેધા સરસ્વતી । અશ્વિના ભારતીડા । તીવ્રં પરિસ્રુતા સોમમ્ । ઇન્દ્રાય સુષવુર્મદમ્ । અશ્વિના ભેષજં મધુ । ભેષજં નઃ સરસ્વતી । ઇન્દ્રે ત્વષ્ટા યશઃ શ્રિયમ્ । રૂપꣳ રૂપમધુઃ સુતે । ઋતુથેન્દ્રો વનસ્પતિઃ । શશમાનઃ પરિસ્રુતા । કીલાલમશ્વિભ્યાં મધુ । દુહે ધેનુઃ સરસ્વતી । ગોભિર્ન સોમમશ્વિના । માસરેણ પરિષ્કૃતા । સમધાતાꣳ સરસ્વત્યા । સ્વાહેન્દ્રે સુતં મધુ ॥ ૨। ૬। ૧૨। ૪॥ નગ્નહુઃ પાતવે સરસ્વત્યધુઃ સુતેઽષ્ટૌ ચ ॥ ૧૨॥

૬૪ અશ્વિના હવિરિન્દ્રિયમ્ । નમુચેર્ધિયા સરસ્વતી । આ શુક્રમાસુરાદ્વસુ । મઘમિન્દ્રાય જભ્રિરે । યમશ્વિના સરસ્વતી । હવિષેન્દ્રમવર્ધયન્ । સ બિભેદ વલં મઘમ્ । નમુચાવાસુરે સચા । તમિન્દ્રં પશવઃ સચા । અશ્વિનોભા સરસ્વતી ॥ ૨। ૬। ૧૩। ૧॥

૬૫ દધાના અભ્યનૂષત । હવિષા યજ્ઞમિન્દ્રિયમ્ । ય ઇન્દ્ર ઇન્દ્રિયં દધુઃ । સવિતા વરુણો ભગઃ । સ સુત્રામા હવિષ્પતિઃ । યજમાનાય સશ્ચત । સવિતા વરુણો દધત્ । યજમાનાય દાશુષે । આદત્ત નમુચેર્વસુ । સુત્રામા બલમિન્દ્રિયમ્ ॥ ૨। ૬। ૧૩। ૨॥

૬૬ વરુણઃ, ક્ષત્રમિન્દ્રિયમ્ । ભગેન સવિતા શ્રિયમ્ । સુત્રામા યશસા

બલમ્ । દધાના યજ્ઞમાશત । અશ્વિના ગોભિરિન્દ્રિયમ્ । અશ્વેભિર્વીર્યં
બલમ્ । હવિષેન્દ્ર ँ સરસ્વતી । યજમાનમવર્ધયન્ । તા નાસત્યા સુપેશસા
। હિરણ્યવર્તની નરા । સરસ્વતી હવિષ્મતી । ઇન્દ્ર કર્મસુ નોઽવત । તા
ભિષજા સુકર્મણા । સા સુદુઘા સરસ્વતી । સ વૃત્રહા શતક્રતુઃ ।
ઇન્દ્રાય દધુરિન્દ્રિયમ્ ॥ ૨। ૬। ૧૩। ૩॥ ઉભા સરસ્વતી બલમિન્દ્રિયં નરા
ષટ્ચ ॥ ૧૩॥

૬૭ દેવં બર્હિઃ સરસ્વતી । સુદેવમિન્દ્રે અશ્વિના । તેજો ન ચક્ષુરક્ષ્યોઃ
। બર્હિષા દધુરિન્દ્રિયમ્ । વસુવને વસુધેયસ્ય વિયન્તુ યજ ।
દેવીર્દ્વારો અશ્વિના । ભિષજેન્દ્રે સરસ્વતી । પ્રાણં ન વીર્યં નસિ ।
દ્વારો દધુરિન્દ્રિયમ્ । વસુવને વસુધેયસ્ય વિયન્તુ યજ ॥ ૨। ૬। ૧૪। ૧॥

૬૮ દેવી ઉષાસાવશ્વિના । ભિષજેન્દ્રે સરસ્વતી । બલં ન વાચમાસ્યે
। ઉષાભ્યાં દધુરિન્દ્રિયમ્ । વસુવને વસુધેયસ્ય વિયન્તુ યજ । દેવી
જોષ્ટ્રી અશ્વિના । સુત્રામેન્દ્રે સરસ્વતી । શ્રોત્રં ન કર્ણયોર્યશઃ ।
જોષ્ટ્રીભ્યાં દધુરિન્દ્રિયમ્ । વસુવને વસુધેયસ્ય વિયન્તુ યજ ॥ ૨। ૬। ૧૪। ૨॥

૬૯ દેવી ઊર્જાહુતી દુઘે સુદુઘે । પયસેન્દ્ર ँ સરસ્વત્યશ્વિના
ભિષજાઽવત । શુક્રં ન જ્યોતિઃ સ્તનયોરાહુતી ધત્ત ઇન્દ્રિયમ્ ।
વસુવને વસુધેયસ્ય વિયન્તુ યજ । દેવા દેવાનાં ભિષજા ।
હોતારાવિન્દ્રમશ્વિના । વષટ્કારૈઃ સરસ્વતી । ત્વિષિં ન હૃદયે
મતિમ્ । હોતૃભ્યાં દધુરિન્દ્રિયમ્ । વસુવને વસુધેયસ્ય વિયન્તુ યજ
॥ ૨। ૬। ૧૪। ૩॥

૭૦ દેવીસ્તિસ્રસ્તિસ્રો દેવીઃ । સરસ્વત્યશ્વિના ભારતીડા । શૂષં ન મધ્યે
નાભ્યામ્ । ઇન્દ્રાય દધુરિન્દ્રિયમ્ । વસુવને વસુધેયસ્ય વિયન્તુ યજ । દેવ
ઇન્દ્રો નરાશ ँ સઃ । ત્રિવરૂથઃ સરસ્વત્યાઽશ્વિભ્યામીયતે રથઃ
। રેતો ન રૂપમમૃતં જનિત્રમ્ । ઇન્દ્રાય ત્વષ્ટા દધદિન્દ્રિયાણિ ।
વસુવને વસુધેયસ્ય વિયન્તુ યજ ॥ ૨। ૬। ૧૪। ૪॥

૭૧ દેવ ઇન્દ્રો વનસ્પતિઃ । હિરણ્યપર્ણો અશ્વિભ્યામ્ । સરસ્વત્યાઃ સુપિપ્પલઃ ।
ઇન્દ્રાય પચ્યતે મધુ । ઓજો ન જૂતિમૃષભો ન ભામમ્ । વનસ્પતિર્નો

દધદિન્દ્રિયાણિ । વસુવને વસુધેયસ્ય વિયન્તુ યજ । દેવં
બર્હિર્વારિતીનામ્ । અધ્વરે સ્તીર્ણમશ્વિભ્યામ્ । ઊર્ણમ્રદાઃ સરસ્વત્યાઃ ॥
૨। ૬। ૧૪। ૫॥

૭૨ સ્યોનમિન્દ્ર તે સદઃ । ઇશાયૈ મન્યુꣳ રાજાનં બર્હિષા
દધુરિન્દ્રિયમ્ । વસુવને વસુધેયસ્ય વિયન્તુ યજ । દેવો અગ્નિઃ
સ્વિષ્ટકૃત્ । દેવાન્, યક્ષદ્યથાયથમ્ । હોતારાવિન્દ્રમશ્વિના ।
વાચા વાચꣳ સરસ્વતીમ્ । અગ્નિꣳ સોમꣳ સ્વિષ્ટકૃત્ । સ્વિષ્ટ
ઇન્દ્રઃ સુત્રામા સવિતા વરુણો ભિષક્ । ઇષ્ટો દેવો વનસ્પતિઃ । સ્વિષ્ટા
દેવા આજ્યપાઃ । ઇષ્ટો અગ્નિરગ્નિના । હોતા હોત્રે સ્વિષ્ટકૃત્ । યશો ન
દધદિન્દ્રિયમ્ । ઊર્જમપચિતિꣳ સ્વધામ્ । વસુવને વસુધેયસ્ય વિયન્તુ
યજ ॥ ૨। ૬। ૧૪। ૬॥ દ્વારો દધુરિન્દ્રિયં વસુવને વસુધેયસ્ય વિયન્તુ યજ
જોષ્ટ્રીભ્યાં દધુરિન્દ્રિયં વસુવને વસુધેયસ્ય વિયન્તુ યજ હોતૃભ્યાં
દધુરિન્દ્રિયં વસુવને વસુધેયસ્ય વિયન્તુ યજેન્દ્રિયાણિ વસુવને
વસુધેયસ્ય વિયન્તુ યજ સરસ્વત્યા વનસ્પતિઃ ષટ્ચ ॥ ૧૪॥ દેવં
બર્હિર્દેવીર્દ્વારો દેવી ઉષાસાવશ્વિના દેવી જોષ્ટ્રી દેવી ઊર્જાહુતી
દેવા દેવાનાં ભિષજા વષટ્કારૈર્દેવીસ્તિસ્રસ્તિસ્રો દેવીર્દેવ ઇન્દ્રો
નરાશꣳસો દેવ ઇન્દ્રો વનસ્પતિર્દેવં બર્હિર્વારિતીનાં દેવો અગ્નિઃ
સ્વિષ્ટકૃદ્દેવાન્ ॥ સમિધાઽગ્નિં દેવં બર્હિઃ સરસ્વત્યશ્વિના સર્વં
વિયન્તુ । દ્વારસ્તિસ્રઃ સર્વં વિયન્તુ । અજ ઇન્દ્રમોજોઽગ્નિંપરઃ સરસ્વતીમ્ ।
નક્તંપૂર્વઃ સરસ્વતિ । અન્યત્ર સરસ્વતી । ભિષક્પૂર્વં દુહ ઇન્દ્રિયમ્
। અન્યત્ર દધુરિન્દ્રિયમ્ । સૌત્રામણ્યાꣳ સુતાસુતી । અઞ્જન્ત્યયં
યજમાનઃ ॥

૭૩ અગ્નિમદ્ય હોતારમવૃણીત । અયꣳ સુતાસુતી યજમાનઃ । પચન્પક્તીઃ
। પચન્પુરોડાશાન્ । ગૃહ્ણન્ગ્રહાન્ । બધ્નન્નશ્વિભ્યાં છાગꣳ
સરસ્વત્યા ઇન્દ્રાય । બધ્નન્થ્સરસ્વત્યૈ મેષમિન્દ્રાયાશ્વિભ્યામ્ ।
બધ્નન્નિન્દ્રાયર્ષભમશ્વિભ્યાꣳ સરસ્વત્યૈ । સૂપસ્થા અદ્ય દેવો
વનસ્પતિરભવત્ । અશ્વિભ્યાં છાગેન સરસ્વત્યા ઇન્દ્રાય ॥ ૨। ૬। ૧૫। ૧॥

૭૪ સરસ્વત્યૈ મેષેણેન્દ્રાયાશ્વિભ્યામ્ । ઇન્દ્રાયર્ષભેણાશ્વિભ્યા ँ
સરસ્વત્યૈ । અક્ષગ્ગ્સ્તાન્મેદસ્તઃ પ્રતિ પચતાઽગ્રભીષુઃ ।
અવીવૃધન્ત ગ્રહૈઃ । અપાતામશ્વિના સરસ્વતીન્દ્રઃ સુત્રામા વૃત્રહા ।
સોમાન્થ્સુરામણઃ । ઉપો ઉક્થામદાઃ શ્રૌદ્ધિમદા અદન્ । અવીવૃધન્તાઙ્ગૂષૈઃ
। ત્વામદ્યર્ષ આર્ષેયર્ષીણાં નપાદવૃણીત । અય ँ સુતાસુતી યજમાનઃ ।
બહુભ્ય આસંગતેભ્યઃ । એષ મે દેવેષુ વસુવાર્યા યક્ષ્યત ઇતિ
। તા યા દેવા દેવદાનાન્યદુઃ । તાન્યસ્મા આ ચ શાસ્સ્વ । આ ચ ગુરસ્વ ।
ઇષિતશ્ચ હોતરસિ ભદ્રવાચ્યાય પ્રેષિતો માનુષઃ । સૂક્તવાકાય
સૂક્તા બ્રૂહિ ॥ ૨। ૬। ૧૫। ૨॥ ઇન્દ્રાય યજમાનઃ સપ્ત ચ ॥ ૧૫॥

૭૫ ઉશન્તસ્ત્વા હવામહ આ નો અગ્ને સુકેતુના । ત્વ ँ સોમ મહે ભગં
ત્વ ँ સોમ પ્રચિકિતો મનીષા । ત્વયા હિ નઃ પિતરઃ સોમ પૂર્વે
ત્વ ँ સોમ પિતૃભિઃ સંવિદાનઃ । બર્હિષદઃ પિતર આઽહં પિતૄન્ ।
ઉપહૂતાઃ પિતરોઽગ્નિષ્વાત્તાઃ પિતરઃ । અગ્નિષ્વાત્તાનૃતુમતો હવામહે ।
નરાશ ँ સે સોમપીથં ય આશુઃ । તે નો અર્વન્તઃ સુહવા ભવન્તુ । શં નો
ભવન્તુ દ્વિપદે શં ચતુષ્પદે । યે અગ્નિષ્વાત્તા યેઽનગ્નિષ્વાત્તાઃ ॥ ૨। ૬। ૧૬। ૧॥

૭૬ અ ँ હોમુચઃ પિતરઃ સોમ્યાસઃ । પરેઽવરેઽમૃતાસો ભવન્તઃ
। અધિબ્રુવન્તુ તે અવન્ત્વસ્માન્ । વાન્યાયૈ દુગ્ધે જુષમાણાઃ કરમ્ભમ્ ।
ઉદીરાણા અવરે પરે ચ । અગ્નિષ્વાત્તા ઋતુભિઃ સંવિદાનાઃ । ઇન્દ્રવન્તો
હવિરિદં જુષન્તામ્ । યદગ્ને કવ્યવાહન ત્વમગ્ન ઈડિતો જાતવેદઃ । માતલી
કવ્યૈઃ । યે તાતૃપુર્દેવત્રા જેહમાનાઃ । હોત્રાવૃધઃ સ્તોમતષ્ટાસો અર્કૈઃ
। આઽગ્ને યાહિ સુવિદત્રેભિરર્વાઙ્ । સત્યૈઃ કવ્યૈઃ પિતૃભિર્ઘર્મસદ્ભિઃ
। હવ્યવાહમજરં પુરુપ્રિયમ્ । અગ્નિં ઘૃતેન હવિષા સપર્યન્ ।
ઉપાસદં કવ્યવાહં પિતૃણામ્ । સ નઃ પ્રજાં વીરવતી ँ સમૃણ્વતુ ॥
૨। ૬। ૧૬। ૨॥ અનગ્નિષ્વાત્તા જેહમાનાઃ સપ્ત ચ ॥ ૧૬॥

૭૭ હોતા યક્ષદિડસ્પદે । સમિધાનં મહદ્યશઃ । સુષમિદ્ધં વરેણ્યમ્ ।
અગ્નિમિન્દ્રં વયોધસમ્ । ગાયત્રીં છન્દ ઇન્દ્રિયમ્ । ત્ર્યવિં ગાં વયો દધત્
। વેત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષચ્છુચિવ્રતમ્ । તનૂનપાતમુદ્ભિદમ્

। યં ગર્ભમદિતિર્દધે ॥ ૨। ૬। ૧૭। ૧॥

૭૮ શુચિમિન્દ્રં વયોધસમ્ । ઉષ્ણિહં છન્દ ઇન્દ્રિયમ્ । દિત્યવાહં
ગાં વયો દધત્ । વેત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષદીડેન્યમ્ । ઈડિતં
વૃત્રહન્તમમ્ । ઇડાભિરીડ્ય ૐ સહઃ । સોમમિન્દ્રં વયોધસમ્ ।
અનુષ્ટુભં છન્દ ઇન્દ્રિયમ્ । ત્રિવથ્સં ગાં વયો દધત્ ॥

૭૯ વેત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષથ્સુબર્હિષદમ્ । પૂષણ્વન્તમમર્ત્યમ્
। સીદન્તં બર્હિષિ પ્રિયે । અમૃતેન્દ્રં વયોધસમ્ । બૃહતીં છન્દ
ઇન્દ્રિયમ્ । પઞ્ચાવિં ગાં વયો દધત્ । વેત્વાજ્યસ્ય હોતર્યજ । હોતા
યક્ષદ્વ્યચસ્વતીઃ । સુપ્રાયણા ઋતાવૃધઃ ॥ ૨। ૬। ૧૭। ૩॥

૮૦ દ્વારો દેવીર્હિરણ્યયીઃ । બ્રહ્માણ ઇન્દ્રં વયોધસમ્ । પઙ્ક્તિં છન્દ
ઇહેન્દ્રિયમ્ । તુર્યવાહં ગાં વયો દધત્ । વેત્વાજ્યસ્ય હોતર્યજ । હોતા
યક્ષથ્સુપેશસે । સુશિલ્પે બૃહતી ઉભે । નક્તોષાસા ન દર્શતે ।
વિશ્વમિન્દ્રં વયોધસમ્ । ત્રિષ્ટુભં છન્દ ઇન્દ્રિયમ્ ॥ ૨। ૬। ૧૭। ૪॥

૮૧ પષ્ઠવાહં ગાં વયો દધત્ । વેત્વાજ્યસ્ય હોતર્યજ । હોતા
યક્ષત્પ્રચેતસા । દેવાનામુત્તમં યશઃ । હોતારા દૈવ્યા કવી ।
સયુજેન્દ્રં વયોધસમ્ । જગતીં છન્દ ઇહેન્દ્રિયમ્ । અનડ્વાહં ગાં
વયો દધત્ । વેત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષત્પેશસ્વતીઃ ॥ ૨। ૬। ૧૭। ૫॥

૮૨ તિસ્રો દેવીર્હિરણ્યયીઃ । ભારતીર્બૃહતીર્મહીઃ । પતિમિન્દ્રં વયોધસમ્
। વિરાજં છન્દ ઇહેન્દ્રિયમ્ । ધેનું ગાં ન વયો દધત્ । વેત્વાજ્યસ્ય
હોતર્યજ । હોતા યક્ષથ્સુરેતસમ્ । ત્વષ્ટારં પુષ્ટિવર્ધનમ્ । રૂપાણિ
બિભ્રતં પૃથક્ । પુષ્ટિમિન્દ્રં વયોધસમ્ ॥ ૨। ૬। ૧૭। ૬॥

૮૩ દ્વિપદં છન્દ ઇહેન્દ્રિયમ્ । ઉક્ષાણં ગાં ન વયો દધત્ । વેત્વાજ્યસ્ય
હોતર્યજ । હોતા યક્ષચ્છતક્રતુમ્ । હિરણ્યપર્ણમુક્થિનમ્ । રશનાં
બિભ્રતં વશિમ્ । ભગમિન્દ્રં વયોધસમ્ । કકુભં છન્દ ઇહેન્દ્રિયમ્
। વશાં વેહતં ગાં ન વયો દધત્ । વેત્વાજ્યસ્ય હોતર્યજ । હોતા
યક્ષથ્સ્વાહાકૃતીઃ । અગ્નિં ગૃહપતિં પૃથક્ । વરુણં ભેષજં
કવિમ્ । ક્ષત્રમિન્દ્રં વયોધસમ્ । અતિચ્છન્દસં છન્દ ઇન્દ્રિયમ્

। બૃહદૃષભં ગાં વયો દધત્ । વેત્વાજ્યસ્ય હોતર્યજ ॥ ૨। ૬। ૧૭। ૭॥ દધે દધદૃતાવૃધ ઇન્દ્રિયં પેશસ્વતીર્વયોધસં
વેત્વાજ્યસ્ય હોતર્યજ સપ્ત ચ ॥ ૧૭॥ ઇડસ્પદેઽગ્નિં ગાયત્રીં
ત્ર્યવિમ્ । શુચિવ્રત ઁ શુચિમુષ્ણિહં દિત્યવાહમ્ । ઈડેઽન્ય ઁ
સોમમનુષ્ટુભં ત્રિવત્સમ્ । સુબર્હિષદમમૃતેન્દ્રં બૃહતીં
પઞ્ચાવિમ્ । વ્યચસ્વતીઃ સુપ્રાયણા દ્વારો બ્રહ્માણઃ પઙ્ક્તિમિહ તુર્યવાહમ્ ।
સુપેશસે વિશ્વમિન્દ્રં ત્રિષ્ટુભં પષ્ઠવાહમ્ । પ્રચેતસા સયુજેન્દ્રં
જગતીમિહાનડ્વાહમ્ । પેશસ્વતીસ્તિસ્રો ભારતીઃ પતિં વિરાજમિહ
ધેનું ન । સુરેતસં ત્વષ્ટારં પુષ્ટિં દ્વિપદમિહોક્ષાણં ન ।
શતક્રતું ભગમિન્દ્રં કકુભમિહ વશાં વેહતં ગાં ન ।
સ્વાહાકૃતીઃ, ક્ષત્રમતિચ્છન્દસં બૃહદૃષભં ગાં વયઃ ।
ઇન્દ્રિયમૃષિવસુનવદશેહેન્દ્રિયમષ્ટ નવ દશ ગાં ન વયો
દધથ્સર્વવેતુ ॥

૮૪ સમિદ્ધો અગ્નિઃ સમિધા । સુષમિદ્ધો વરેણ્યઃ । ગાયત્રી છન્દ ઇન્દ્રિયમ્
। ત્ર્યવિર્ગૌર્વયો દધુઃ । તનૂનપાચ્છુચિવ્રતઃ । તનૂનપાચ્ચ સરસ્વતી ।
ઉષ્ણિક્છન્દ ઇન્દ્રિયમ્ । દિત્યવાડ્ગૌર્વયો દધુઃ । ઇડાભિરગ્નિરીડ્યઃ । સોમો
દેવો અમર્ત્યઃ ॥ ૨। ૬। ૧૮। ૧॥

૮૫ અનુષ્ટુપ્છન્દ ઇન્દ્રિયમ્ । ત્રિવથ્સો ગૌર્વયો દધુઃ । સુબર્હિરગ્નિઃ
પૂષણ્વાન્ । સ્તીર્ણબર્હિરમર્ત્યઃ । બૃહતી છન્દ ઇન્દ્રિયમ્ ।
પઞ્ચાવિર્ગૌર્વયો દધુઃ । દુરો દેવીર્દિશો મહીઃ । બ્રહ્મા દેવો બૃહસ્પતિઃ
। પઙ્ક્તિશ્છન્દ ઇહેન્દ્રિયમ્ । તુર્યવાડ્ગૌર્વયો દધુઃ ॥ ૨। ૬। ૧૮। ૨॥

૮૬ ઉષે યહ્વી સુપેશસા । વિશ્વે દેવા અમર્ત્યાઃ । ત્રિષ્ટુપ્છન્દ ઇન્દ્રિયમ્
। પષ્ઠવાડ્ગૌર્વયો દધુઃ । દૈવ્યા હોતારા ભિષજા । ઇન્દ્રેણ સયુજા યુજા ।
જગતી છન્દ ઇહેન્દ્રિયમ્ । અનડ્વાન્ગૌર્વયો દધુઃ । તિસ્ર ઇડા સરસ્વતી ।
ભારતી મરુતો વિશઃ ॥ ૨। ૬। ૧૮। ૩॥

૮૭ વિરાટ્ છન્દ ઇહેન્દ્રિયમ્ । ધેનુર્ગૌર્ન વયો દધુઃ । ત્વષ્ટા તુરીપો
અદ્ભુતઃ । ઇન્દ્રાગ્ની પુષ્ટિવર્ધના । દ્વિપાચ્છન્દ ઇહેન્દ્રિયમ્ । ઉક્ષા

ગૌર્ન વયો દધુઃ । શમિતા નો વનસ્પતિઃ । સવિતા પ્રસુવન્ભગમ્ ।
કકુચ્છન્દ ઇહેન્દ્રિયમ્ । વશા વેહદ્ગૌર્ન વયો દધુઃ । સ્વાહા યજ્ઞં
વરુણઃ । સુક્ષત્રો ભેષજં કરત્ । અતિચ્છન્દાશ્છન્દ ઇન્દ્રિયમ્ ।
બૃહદૃષભો ગૌર્વયો દધુઃ ॥ ૨। ૬। ૧૮। ૪॥ અમર્ત્યસ્તુર્યવાડ્ગૌર્વયો
દધુર્વિશો વશા વેહદ્ગૌર્ન વયો દધુશ્ચત્વારિ ચ ॥ ૧૮॥

૮૮ વસન્તેનર્તુના દેવાઃ । વસવસ્ત્રિવૃતા સ્તુતમ્ । રથન્તરેણ
તેજસા । હવિરિન્દ્રે વયો દધુઃ । ગ્રીષ્મેણ દેવા ઋતુના । રુદ્રાઃ
પઞ્ચદશે સ્તુતમ્ । બૃહતા યશસા બલમ્ । હવિરિન્દ્રે વયો દધુઃ ।
વર્ષાભિરૃતુનાઽઽદિત્યાઃ । સ્તોમે સપ્તદશે સ્તુતમ્ ॥ ૨। ૬। ૧૯। ૧॥

૮૯ વૈરૂપેણ વિશૌજસા । હવિરિન્દ્રે વયો દધુઃ । શારદેનર્તુના
દેવાઃ । એકવિꣳશ ઋભવઃ સ્તુતમ્ । વૈરાજેન શ્રિયા શ્રિયમ્ ।
હવિરિન્દ્રે વયો દધુઃ । હેમન્તેનર્તુના દેવાઃ । મરુતસ્ત્રિણવે સ્તુતમ્ ।
બલેન શક્વરીઃ સહઃ । હવિરિન્દ્રે વયો દધુઃ । શૈશિરેણર્તુના
દેવાઃ । ત્રયસ્ત્રિꣳશેઽમૃતꣳ સ્તુતમ્ । સત્યેન રેવતીઃ,
ક્ષત્રમ્ । હવિરિન્દ્રે વયો દધુઃ ॥ ૨। ૬। ૧૯। ૨॥ સ્તોમે સપ્તદશે સ્તુતꣳ
સહો હવિરિન્દ્રે વયો દધુશ્ચત્વારિ ચ ॥ ૧૯॥ વસન્તેન ગ્રિષ્મેણ
વર્ષાભિઃ શારદેન હેમન્તેન શૈશિરેણ ષટ્ ॥

૯૦ દેવં બર્હિરિન્દ્રં વયોધસમ્ । દેવં દેવમવર્ધયત્ । ગાયત્રિયા
છન્દસેન્દ્રિયમ્ । તેજ ઇન્દ્રે વયો દધત્ । વસુવને વસુધેયસ્ય વેતુ
યજ । દેવીર્દ્વારો દેવમિન્દ્રં વયોધસમ્ । દેવીર્દેવમવર્ધયન્ । ઉષ્ણિહા
છન્દસેન્દ્રિયમ્ । પ્રાણમિન્દ્રે વયો દધત્ । વસુવને વસુધેયસ્ય વિયન્તુ
યજ ॥ ૨। ૬। ૨૦। ૧॥

૯૧ દેવી દેવં વયોધસમ્ । ઉષે ઇન્દ્રમવર્ધતામ્ । અનુષ્ટુભા
છન્દસેન્દ્રિયમ્ । વાચમિન્દ્રે વયો દધત્ । વસુવને વસુધેયસ્ય વીતાં
યજ । દેવી જોષ્ટ્રી દેવમિન્દ્રં વયોધસમ્ । દેવી દેવમવર્ધતામ્ ।
બૃહત્યા છન્દસેન્દ્રિયમ્ । શ્રોત્રમિન્દ્રે વયો દધત્ । વસુવને
વસુધેયસ્ય વીતાં યજ ॥ ૨। ૬। ૨૦। ૨॥

૯૨ દેવી ઊર્જાહુતી દેવમિન્દ્રં વયોધસમ્ । દેવી દેવમવર્ધતામ્ । પઙ્ક્ત્યા છન્દસેન્દ્રિયમ્ । શુક્રમિન્દ્રે વયો દધત્ । વસુવને વસુધેયસ્ય વીતાં યજ । દેવા દૈવ્યા હોતારા દેવમિન્દ્રં વયોધસમ્ । દેવા દેવમવર્ધતામ્ । ત્રિષ્ટુભા છન્દસેન્દ્રિયમ્ । ત્વિષિમિન્દ્રે વયો દધત્ । વસુવને વસુધેયસ્ય વીતાં યજ ॥ ૨। ૬। ૨૦। ૩॥

૯૩ દેવીસ્તિસ્રસ્તિસ્રો દેવીર્વયોધસમ્ । પતિમિન્દ્રમવર્ધયન્ । જગત્યા છન્દસેન્દ્રિયમ્ । બલમિન્દ્રે વયો દધત્ । વસુવને વસુધેયસ્ય વિયન્તુ યજ । દેવો નરાશꣳસો દેવમિન્દ્રં વયોધસમ્ । દેવો દેવમવર્ધયત્ । વિરાજા છન્દસેન્દ્રિયમ્ । રેત ઇન્દ્રે વયો દધત્ । વસુવને વસુધેયસ્ય વેતુ યજ ॥ ૨। ૬। ૨૦। ૪॥

૯૪ દેવો વનસ્પતિર્દેવમિન્દ્રં વયોધસમ્ । દેવો દેવમવર્ધયત્ । દ્વિપદા છન્દસેન્દ્રિયમ્ । ભગમિન્દ્રે વયો દધત્ । વસુવને વસુધેયસ્ય વેતુ યજ । દેવં બર્હિર્વારિતીનાં દેવમિન્દ્રં વયોધસમ્ । દેવો દેવમવર્ધયત્ । કકુભા છન્દસેન્દ્રિયમ્ । યશ ઇન્દ્રે વયો દધત્ । વસુવને વસુધેયસ્ય વેતુ યજ । દેવો અગ્નિઃ સ્વિષ્ટકૃદ્દેવમિન્દ્રં વયોધસમ્ । દેવો દેવમવર્ધયત્ । અતિચ્છન્દસા છન્દસેન્દ્રિયમ્ । ક્ષત્રમિન્દ્રે વયો દધત્ । વસુવને વસુધેયસ્ય વેતુ યજ ॥ ૨। ૬। ૨૦। ૫॥ વિયન્તુ યજ વીતાં યજ વીતાં યજ વેતુ યજ વેતુ યજ પઞ્ચ ચ ॥ ૨૦॥

દેવં બર્હિર્ગાયત્રિયા તેજઃ । દેવીર્દ્વાર ઉષ્ણિહા પ્રાણમ્ । દેવી દેવમુષે અનુષ્ટુભા વાચમ્ । દેવી જોષ્ટ્રી બૃહત્યા શ્રોત્રમ્ । દેવી ઊર્જાહુતી પઙ્ક્ત્યા શુક્રમ્ । દેવા દૈવ્યા હોતારા ત્રિષ્ટુભા ત્વિષિમ્ । દેવીસ્તિસ્રસ્તિસ્રો દેવીઃ પતિં જગત્યા બલમ્ । દેવો નરાશꣳસો વિરાજા રેતઃ । દેવો વનસ્પતિર્દ્વિપદા ભગમ્ । દેવં બર્હિર્વારિતીનાં કકુભા યશઃ । દેવો અગ્નિઃ સ્વિષ્ટકૃદતિચ્છન્દસા ક્ષત્રમ્ । વેતુ વિયન્તુ ચતુર્વીતામેકો વિયન્તુ ચતુર્વેત્વવર્ધયદવર્ધયꣳ શ્ચતુરવર્ધતામેકોઽવર્ધયꣳ શ્ચતુરવર્ધયત્ ॥

સ્વાદ્વીં ત્વા સોમઃ સુરાવન્તꣳ સીસેન મિત્રોઽસિ યદ્દેવા હોતા

યક્ષથ્સમિધેન્દ્ર ꣳ સમિદ્ધ ઇન્દ્ર આચર્ષણિપ્રા દેવં બર્હિર્હોતા
યક્ષથ્સમિધાઽગ્નિꣳ સમિદ્ધો અગ્નિરશ્વિનાઽશ્વિના હવિરિન્દ્રિયં
દેવં બર્હિઃ સરસ્વત્યગ્નિમધોશન્તો હોતા યક્ષદિડસ્પદે સમિદ્ધો
અગ્નિઃ સમિધા વસન્તેન દેવં બર્હિરિન્દ્રં વયોધસં વિꣳશતિઃ ॥ ૨૦॥
સ્વાદ્વીં ત્વાઽમી મદન્ત પિતરઃ સામ્રાજ્યાય પૂતં
પવિત્રેણેવાજ્યમુષાસાનક્તા બદરૈરધાતામશ્વિના દેવ ઇન્દ્રો
વનસ્પતિઃ પષ્ઠવાહં ગાં દેવી દેવં વયોધસં ચતુર્નવતિઃ ॥ ૯૪॥
સ્વાદ્વીન્ત્વા વેતુ યજ ॥

## દ્વિતીયાષ્ટકે સપ્તમઃ પ્રપાઠકઃ ૭

૧ ત્રિવૃથ્સ્તોમો ભવતિ । બ્રહ્મવર્ચસં વૈ ત્રિવૃત્ ।
બ્રહ્મવર્ચસમેવાવરુન્ધે । અગ્નિષ્ટોમઃ સોમો ભવતિ ।
બ્રહ્મવર્ચસં વા અગ્નિષ્ટોમઃ । બ્રહ્મવર્ચસમેવાવરુન્ધે ।
રથંતરꣳ સામ ભવતિ । બ્રહ્મવર્ચસં વૈ રથંતરમ્ ।
બ્રહ્મવર્ચસમેવાવરુન્ધે । પરિસ્રજી હોતા ભવતિ ॥ ૨। ૭। ૧। ૧॥
૨ અરુણો મિર્મિરસ્ત્રિશુક્રઃ । એતદ્વૈ બ્રહ્મવર્ચસસ્ય રૂપમ્ ।
રૂપેણૈવ બ્રહ્મવર્ચસમવરુન્ધે । બૃહસ્પતિરકામયત દેવાનાં
પુરોધાં ગચ્છેયમિતિ । સ એતં બૃહસ્પતિસવમપશ્યત્ । તમાહરત્ ।
તેનાયજત । તતો વૈ સ દેવાનાં પુરોધામગચ્છત્ । યઃ પુરોધાકામઃ
સ્યાત્ । સ બૃહસ્પતિસવેન યજેત ॥ ૨। ૭। ૧। ૨॥
૩ પુરોધામેવ ગચ્છતિ । તસ્ય પ્રાતઃસવને સન્નેષુ નારાશꣳસેષુ
। એકાદશ દક્ષિણા નીયન્તે । એકાદશ માધ્યંદિને સવને સન્નેષુ
નારાશꣳસેષુ । એકાદશ તૃતીયસવને સન્નેષુ નારાશꣳસેષુ
। ત્રયસ્ત્રિꣳશથ્સંપદ્યન્તે । ત્રયસ્ત્રિꣳશદ્વૈ દેવતાઃ । દેવતા
એવાવરુન્ધે । અશ્વશ્ચતુસ્ત્રિꣳશઃ । પ્રાજાપત્યો વા અશ્વઃ ॥ ૨। ૭। ૧। ૩॥
૪ પ્રજાપતિશ્ચતુસ્ત્રિꣳશો દેવતાનામ્ । યાવતીરેવ દેવતાઃ । તા

એવાવરુન્ધે । કૃષ્ણાજિનેઽભિષિઞ્ચતિ । બ્રહ્મણો વા એતદ્રૂપમ્
। યત્કૃષ્ણાજિનમ્ । બ્રહ્મવર્ચસેનૈવૈનँ સમર્ધયતિ ।
આજ્યેનાભિષિઞ્ચતિ । તેજો વા આજ્યમ્ । તેજ એવાસ્મિન્દધાતિ ॥ ૨। ૭। ૧। ૪॥
હોતા ભવતિ યજત વા અશ્વો દધાતિ ॥ ૧॥

૫ યદાગ્નેયો ભવતિ । અગ્નિમુખા હ્યૃદ્ધિઃ । અથ યત્પૌષ્ણઃ । પુષ્ટિર્વૈ
પૂષા । પુષ્ટિર્વૈશ્યસ્ય । પુષ્ટિમેવાવરુન્ધે । પ્રસવાય સાવિત્રઃ । અથ
યત્ત્વાષ્ટ્રઃ । ત્વષ્ટા હિ રૂપાણિ વિકરોતિ । નિર્વરુણત્વાય વારુણઃ ॥
૨। ૭। ૨। ૧॥

૬ અથો ય એવ કશ્ચ સન્ત્સૂયતે । સ હિ વારુણઃ । અથ યદ્વૈશ્વદેવઃ
। વૈશ્વદેવો હિ વૈશ્યઃ । અથ યન્મારુતઃ । મારુતો હિ વૈશ્યઃ
। સપ્તૈતાનિ હવીँષિ ભવન્તિ । સપ્ત ગણા વૈ મરુતઃ
। પૃશ્નિઃ પષ્ઠૌહી મારુત્યાલભ્યતે । વિડ્વૈ મરુતઃ । વિશ
એવૈતન્મધ્યતોઽભિષિચ્યતે । તસ્માદ્વા એષ વિશઃ પ્રિયઃ । વિશો
હિ મધ્યતોઽભિષિચ્યતે । ઋષભચર્મેઽધ્યભિષિઞ્ચતિ
। સ હિ પ્રજનયિતા । દધ્નાઽભિષિઞ્ચતિ । ઊર્ગ્વા અન્નાદ્યં દધિ ।
ઊર્જૈવૈનમન્નાદ્યેન સમર્ધયતિ ॥ ૨। ૭। ૨। ૨॥ વારુણો વિડ્વૈ મરુતોઽષ્ટૌ
ચ ॥ ૨॥

૭ યદાગ્નેયો ભવતિ । આગ્નેયો વૈ બ્રાહ્મણઃ । અથ યત્સૌમ્યઃ । સૌમ્યો
હિ બ્રાહ્મણઃ । પ્રસવાયૈવ સાવિત્રઃ । અથ યદ્બાર્હસ્પત્યઃ । એતદ્વૈ
બ્રાહ્મણસ્ય વાક્પતીયમ્ । અથ યદગ્નીષોમીયઃ । આગ્નેયો વૈ બ્રાહ્મણઃ ।
તૌ યદા સંગચ્છેતે ॥ ૨। ૭। ૩। ૧॥

૮ અથ વીર્યાવત્તરો ભવતિ । અથ યત્સારસ્વતઃ । એતદ્ધિ પ્રત્યક્ષં
બ્રાહ્મણસ્ય વાક્પતીયમ્ । નિર્વરુણત્વાયૈવ વારુણઃ । અથો ય એવ
કશ્ચ સન્ત્સૂયતે । સ હિ વારુણઃ । અથ યદ્દ્યાવાપૃથિવ્યઃ । ઇન્દ્રો
વૃત્રાય વજ્રમુદયચ્છત્ । તં દ્યાવાપૃથિવી નાન્વમન્યેતામ્ । તમેતેનૈવ
ભાગધેયેનાન્વમન્યેતામ્ ॥ ૨। ૭। ૩। ૨॥

૯ વજ્રસ્ય વા એષોઽનુમાનાય । અનુમતવજ્રઃ સૂયાતા ઇતિ । અષ્ટાવેતાનિ હવીꣳષિ ભવન્તિ । અષ્ટાક્ષરા ગાયત્રી । ગાયત્રી બ્રહ્મવર્ચસમ્ । ગાયત્રિયૈવ બ્રહ્મવર્ચસમવરુન્ધે । હિરણ્યેન ઘૃતમુત્પુનાતિ । તેજસ એવ રુચે । કૃષ્ણાજિનેઽભિષિઞ્ચતિ । બ્રહ્મણો વા એતદૃખ્સામયો રૂપમ્ । યત્કૃષ્ણાજિનમ્ । બ્રહ્મન્નેવૈનમૃખ્સામયોરધ્યભિષિઞ્ચતિ । ઘૃતેનાભિષિઞ્ચતિ । તથા વીર્યાવત્તરો ભવતિ ॥ ૨। ૭। ૩। ૩॥ સંગચ્છેતે ભાગધેયેનાન્વમન્યેતાꣳ રૂપં ચત્વારિ ચ ॥ ૩॥

૧૦ ન વૈ સોમેન સોમસ્ય સવોઽસ્તિ । હતો હ્યેષઃ । અભિષુતો હ્યેષઃ । ન હિ હતઃ સૂયતે । સૌમીꣳ સૂતવશામાલભતે । સોમો વૈ રેતોધાઃ । રેત એવ તદ્દધાતિ । સૌમ્યર્ચાઽભિષિઞ્ચતિ । રેતોધા હ્યેષા । રેતઃ સોમઃ । રેત એવાસ્મિન્દધાતિ । યત્કિંચ રાજસૂયમૃતે સોમમ્ । તથ્સર્વં ભવતિ । અષાઢં યુથ્સુ પૃતનાસુ પપ્રિમ્ । સુવર્ષામપ્સ્વાં વૃજનસ્ય ગોપામ્ । ભરેષુજાꣳ સુક્ષિતિꣳ સુશ્રવસમ્ । જયન્તં ત્વામનુ મદેમ સોમ ॥ ૨। ૭। ૪। ૧॥ રેતઃ સોમઃ સપ્ત ચ ॥ ૪॥

૧૧ યો વૈ સોમેન સૂયતે । સ દેવસવઃ । યઃ પશુના સૂયતે । સ દેવસવઃ । ય ઇષ્ટ્યા સૂયતે । સ મનુષ્યસવઃ । એતં વૈ પૃથયે દેવાઃ પ્રાયચ્છન્ । તતો વૈ સોઽપ્યારણ્યાનાં પશૂનામસૂયત । યાવતીઃ કિયતીશ્ચ પ્રજા વાચં વદન્તિ । તાસાꣳ સર્વાસાꣳ સૂયતે ॥

૧૨ ય એતેન યજતે । ય ઉ ચૈનમેવં વેદ । નારાશꣳસ્યર્ચાઽભિષિઞ્ચતિ । મનુષ્યા વૈ નરાશꣳસઃ । નિહ્નુત્ય વાવૈ તત્ । અથાભિષિઞ્ચતિ । યત્કિંચ રાજસૂયમનુત્તર વેદીકમ્ । તથ્સર્વં ભવતિ । યે મે પઞ્ચાશતં દદુઃ । અશ્વાનાꣳ સધસ્તુતિઃ । દ્યુમદગ્ને મહિ શ્રવઃ । બૃહત્કૃધિ મઘોનામ્ । નૃવદમૃત નૃણામ્ ॥ ૨। ૭। ૫। ૨॥ સૂયતે સધસ્તુતિસ્ત્રીણિ ચ ॥ ૫॥

૧૩ એષ ગોસવઃ । ષટ્ત્રિꣳશ ઉક્થ્યો બૃહથ્સામા । પવમાને કણ્વરથન્તરં ભવતિ । યો વૈ વાજપેયઃ । સ સમ્રાટ્થ્સવઃ । યો રાજસૂયઃ । સ વરુણસવઃ । પ્રજાપતિઃ સ્વારાજ્યં પરમેષ્ઠી । સ્વારાજ્યં ગૌરેવ ।

ગૌરિવ ભવતિ ॥ ૨। ૭। ૬। ૧॥

૧૪ ય એતેન યજતે । ય ઉ ચૈનમેવં વેદ । ઉભે બૃહદ્રથંતરે
ભવતઃ । તદ્ધિ સ્વારાજ્યમ્ । અયુતં દક્ષિણાઃ । તદ્ધિ સ્વારાજ્યમ્ ।
પ્રતિધુષાઽભિષિઞ્ચતિ । તદ્ધિ સ્વારાજ્યમ્ । અનુદ્ધતે વેદ્યૈ દક્ષિણત
આહવનીયસ્ય બૃહતસ્તોત્રં પ્રત્યભિષિઞ્ચતિ । ઇયં વાવ રથંતરમ્ ।

૧૫ અસૌ બૃહત્ । અનયોરેવૈનમનન્તર્હિતમભિષિઞ્ચતિ । પશુસ્તોમો
વા એષઃ । તેન ગોસવઃ । ષટ્ત્રિꣳશઃ સર્વઃ । રેવજ્જાતઃ સહસા
વૃદ્ધઃ । ક્ષત્રાણાં ક્ષત્રભૃત્તમો વયોધાઃ । મહાન્મહિત્વે
તસ્તભાનઃ । ક્ષત્રે રાષ્ટ્રે ચ જાગૃહિ । પ્રજાપતેસ્ત્વા પરમેષ્ઠિનઃ
સ્વારાજ્યેનાભિષિઞ્ચામીત્યાહ । સ્વારાજ્યમેવૈનં ગમયતિ ॥ ૨। ૭। ૬। ૩॥

ઇવ ભવતિ રથંતરમાહૈકં ચ ॥ ૬॥

૧૬ સિꣳહે વ્યાઘ્ર ઉત યા પૃદાકૌ । ત્વિષિરગ્નૌ બ્રાહ્મણે સૂર્યે
યા । ઇન્દ્રં યા દેવી સુભગા જજાન । સા ન આગન્વર્ચસા સંવિદાના । યા
રાજન્યે દુન્દુભાવાયતાયામ્ । અશ્વસ્ય ક્રન્દ્યે પુરુષસ્ય માયૌ । ઇન્દ્રં
યા દેવી સુભગા જજાન । સા ન આગન્વર્ચસા સંવિદાના । યા હસ્તિનિ
દ્વીપિનિ યા હિરણ્યે । ત્વિષિરશ્વેષુ પુરુષેષુ ગોષુ ॥ ૨। ૭। ૭। ૧॥

૧૭ ઇન્દ્રં યા દેવી સુભગા જજાન । સા ન આગન્વર્ચસા સંવિદાના । રથે
અક્ષેષુ વૃષભસ્ય વાજે । વાતે પર્જન્યે વરુણસ્ય શુષ્મે । ઇન્દ્રં
યા દેવી સુભગા જજાન । સા ન આગન્વર્ચસા સંવિદાના । રાડસિ વિરાડસિ
। સમ્રાડસિ સ્વરાડસિ । ઇન્દ્રાય ત્વા તેજસ્વતે તેજસ્વન્તરꣳ શ્રીણામિ ।
ઇન્દ્રાય ત્વૌજસ્વત ઓજસ્વન્તરꣳ શ્રીણામિ ॥ ૨। ૭। ૭। ૨॥

૧૮ ઇન્દ્રાય ત્વા પયસ્વતે પયસ્વન્તરꣳ શ્રીણામિ । ઇન્દ્રાય ત્વાઽઽયુષ્મત
આયુષ્મન્તરꣳ શ્રીણામિ । તેજોઽસિ । તત્તે પ્રયચ્છામિ । તેજસ્વદસ્તુ મે
મુખમ્ । તેજસ્વચ્છિરો અસ્તુ મે । તેજસ્વાન્, વિશ્વતઃ પ્રત્યઙ્ । તેજસા
સંપિપૃગ્ધિ મા । ઓજોઽસિ । તત્તે પ્રયચ્છામિ ॥ ૨। ૭। ૭। ૩॥

૧૯ ઓજસ્વદસ્તુ મે મુખમ્ । ઓજસ્વચ્છિરો અસ્તુ મે । ઓજસ્વાન્, વિશ્વતઃ પ્રત્યઙ્

। ઓજસા સંપિપૃગ્ધિ મા । પયોઽસિ । તત્તે પ્રયચ્છામિ । પયસ્વદસ્તુ મે
મુખમ્ । પયસ્વચ્છિરો અસ્તુ મે । પયસ્વાન્, વિશ્વતઃ પ્રત્યઙ્ । પયસા
સંપિપૃગ્ધિ મા ॥ ૨। ૭। ૭। ૪॥

૨૦ આયુરસિ । તત્તે પ્રયચ્છામિ । આયુષ્મદસ્તુ મે મુખમ્ । આયુષ્મચ્છિરો
અસ્તુ મે । આયુષ્માન્, વિશ્વતઃ પ્રત્યઙ્ । આયુષા સંપિપૃગ્ધિ મા । ઇમમગ્ન
આયુષે વર્ચસે કૃધિ । પ્રિયઁ રેતો વરુણ સોમ રાજન્ । માતેવાસ્મા અદિતે
શર્મ યચ્છ । વિશ્વે દેવા જરદષ્ટિર્યથા સત્ ॥ ૨। ૭। ૭। ૫॥

૨૧ આયુરસિ વિશ્વાયુરસિ । સર્વાયુરસિ સર્વમાયુરસિ । યતો વાતો
મનોજવાઃ । યતઃ, ક્ષરન્તિ સિન્ધવઃ । તાસાં ત્વા સર્વાસાઁ રુચા ।
અભિષિઞ્ચામિ વર્ચસા । સમુદ્ર ઇવાસિ ગહ્મના । સોમ ઇવાસ્યદાભ્યઃ ।
અગ્નિરિવ વિશ્વતઃ પ્રત્યઙ્ । સૂર્ય ઇવ જ્યોતિષા વિભૂઃ ॥ ૨। ૭। ૭। ૬॥

૨૨ અપાં યો દ્રવણે રસઃ । તમહમસ્મા આમુષ્યાયણાય । તેજસે
બ્રહ્મવર્ચસાય ગૃહ્ણામિ । અપાં ય ઊર્મૌ રસઃ । તમહમસ્મા આમુષ્યાયણાય
। ઓજસે વીર્યાય ગૃહ્ણામિ । અપાં યો મધ્યતો રસઃ । તમહમસ્મા
આમુષ્યાયણાય । પુષ્ટ્યૈ પ્રજનનાય ગૃહ્ણામિ । અપાં યો યજ્ઞિયો રસઃ
। તમહમસ્મા આમુષ્યાયણાય । આયુષે દીર્ઘાયુત્વાય ગૃહ્ણામિ ॥ ૨। ૭। ૭। ૭॥

ગોષ્વોજસ્વન્તરઁ શ્રીણામ્યોજોઽસિ તત્તે પ્રયચ્છામિ પયસા સંપિપૃગ્ધિ
મા સદ્ભિર્ભૂર્યજ્ઞિયો રસો દ્વે ચ ॥ ૭॥

૨૩ અભિપ્રેહિ વીરયસ્વ । ઉગ્રશ્ચેત્તા સપત્નહા । આતિષ્ઠ મિત્રવર્ધનઃ ।
તુભ્યં દેવા અધિબ્રવન્ । અઙ્ગૌ ન્યઙ્ગાવભિત આતિષ્ઠ વૃત્રહન્રથમ્
। આતિષ્ઠન્તં પરિ વિશ્વે અભૂષન્ । શ્રિયં વસાનશ્ચરતિ સ્વરોચાઃ ।
મહત્તદસ્યાસુરસ્ય નામ । આ વિશ્વરૂપો અમૃતાનિ તસ્થૌ । અનુ ત્વેન્દ્રો
મદત્વનુ બૃહસ્પતિઃ ॥ ૨। ૭। ૮। ૧॥

૨૪ અનુ સોમો અન્વગ્નિરાવીત્ । અનુ ત્વા વિશ્વે દેવા અવન્તુ । અનુ સપ્ત રાજાનો
ય ઉતાભિષિક્તાઃ । અનુ ત્વા મિત્રાવરુણાવિહાવતમ્ । અનુદ્યાવાપૃથિવી
વિશ્વશંભૂ । સૂર્યો અહોભિરનુ ત્વાઽવતુ । ચન્દ્રમા નક્ષત્રૈરનુ
ત્વાઽવતુ । દ્યૌશ્ચ ત્વા પૃથિવી ચ પ્રચેતસા । શુક્રો બૃહદ્દક્ષિણા ત્વા

પિપર્તુ । અનુ સ્વધા ચિકિતા ँ સોમો અગ્નિઃ । આઽયં પૃણક્તુ રજસી
ઉપસ્થમ્ ॥ ૨। ૭। ૮। ૨॥ બૃહસ્પતિઃ સોમો અગ્નિરેકં ચ ॥ ૮॥

૨૫ પ્રજાપતિઃ પ્રજા અસૃજત । તા અસ્માત્સૃષ્ટાઃ પરાચીરાયન્ ।
સ એતં પ્રજાપતિરોદનમપશ્યત્ । સોઽન્નં ભૂતોઽતિષ્ઠત્ । તા
અન્યત્રાન્નાદ્યમવિત્ત્વા । પ્રજાપતિં પ્રજા ઉપાવર્તન્ત । અન્નમેવૈનં
ભૂતં પશ્યન્તીઃ પ્રજા ઉપાવર્તન્તે । ય એતેન યજતે । ય ઉ ચૈનમેવં
વેદ । સર્વાણ્યન્નાનિ ભવન્તિ ॥ ૨। ૭। ૯। ૧॥

૨૬ સર્વે પુરુષાઃ । સર્વાણ્યેવાન્નાન્યવરુન્ધે । સર્વાન્પુરુષાન્ । રાઽસિ
વિરાઽસીત્યાહ । સ્વારાજ્યમેવૈનં ગમયતિ । યદ્ધિરણ્યં દદાતિ ।
તેજસ્તેનાવરુન્ધે । યત્તિસૃધન્વમ્ । વીર્યં તેન । યદષ્ટ્રામ્ ॥ ૨। ૭। ૯। ૨॥

૨૭ પુષ્ટિં તેન । યત્કમણ્ડલુમ્ । આયુષ્ટેન । યદ્ધિરણ્યમાબધ્નાતિ ।
જ્યોતિર્વૈ હિરણ્યમ્ । જ્યોતિરેવાસ્મિન્દધાતિ । અથો તેજો વૈ હિરણ્યમ્ । તેજ
એવાત્મન્ધત્તે । યદોદનં પ્રાશ્નાતિ । એતદેવ સર્વમવરુધ્ય ॥ ૨। ૭। ૯। ૩॥

૨૮ તદસ્મિન્નેકધાઽધાત્ । રોહિણ્યાં કાર્યઃ । યદ્બ્રાહ્મણ એવ રોહિણી
। તસ્માદેવ । અથો વર્ષ્મૈવૈન ँસમાનાનાં કરોતિ । ઉદ્યતા સૂર્યેણ
કાર્યઃ । ઉદ્યન્તં વા એત ँ સર્વાઃ પ્રજાઃ પ્રતિનન્દન્તિ । દિદૃક્ષેણ્યો
દર્શનીયો ભવતિ । ય એવં વેદ । બ્રહ્મવાદિનો વદન્તિ ॥ ૨। ૭। ૯। ૪॥

૨૯ અવેત્યોઽવભૃથા૩ ના૩ ઇતિ । યદ્દર્ભપુંજીલૈઃ પવયતિ ।
તથ્સ્વિદેવાવૈતિ । તન્નાવૈતિ । ત્રિભિઃ પવયતિ । ત્રય ઇમે લોકાઃ ।
એભિરેવૈનં લોકૈઃ પવયતિ । અથો અપાં વા એતત્તેજો વર્ચઃ । યદ્દર્ભાઃ ।
યદ્દર્ભપુંજીલૈઃ પવયતિ । અપામેવૈનં તેજસા વર્ચસાઽભિષિઞ્ચતિ
॥ ૨। ૭। ૯। ૫॥ ભવન્ત્યષ્ટ્રામવરુધ્ય વદન્તિ દર્ભા યદ્દર્ભપુંજીલૈઃ
પવયત્યેકં ચ ॥ ૯॥

૩૦ પ્રજાપતિરકામયત બહોર્ભૂયાન્થ્સ્યામિતિ । સ એતં
પઞ્ચશારદીયમપશ્યત્ । તમાહરત્ । તેનાયજત । તતો વૈ સ
બહોર્ભૂયાનભવત્ । યઃ કામયેત બહોર્ભૂયાન્થ્સ્યામિતિ । સ પઞ્ચ
શારદીયેન યજેત । બહોરેવ ભૂયાન્ભવતિ । મરુથ્સ્તોમો વા એષઃ । મરુતો

હિ દેવાનાં ભૂયિષ્ઠાઃ ॥ ૨। ૭। ૧૦। ૧॥

૩૧ બહુર્ભવતિ । ય એતેન યજતે । ય ઉ ચૈનમેવં વેદ ।
પઞ્ચશારદીયો ભવતિ । પઞ્ચ વા ઋતવઃ સંવથ્સરઃ । ઋતુષ્વેવ
સંવથ્સરે પ્રતિતિષ્ઠતિ । અથો પઞ્ચાક્ષરા પઙ્ક્તિઃ । પાઙ્ક્તો યજ્ઞઃ ।
યજ્ઞમેવાવરુન્ધે । સપ્તદશર્ँ સ્તોમા નાતિયન્તિ । સપ્તદશઃ
પ્રજાપતિઃ । પ્રજાપતેરાપ્ત્યૈ ॥ ૨। ૭। ૧૦। ૨॥ ભૂયિષ્ઠા યન્તિ દ્વે ચ ॥ ૧૦॥

૩૨ અગસ્ત્યો મરુદ્ભ્ય ઉક્ષ્ણઃ પ્રૌક્ષત્ । તાનિન્દ્ર આદત્ત । ત એનં
વજ્રમુદ્યત્યાભ્યાયન્ત । તાનગસ્ત્યશ્ચૈવેન્દ્રશ્ચ કયાશુભીયેનાશમયતામ્
। તાઞ્છાન્તાનુપાહ્વયત । યત્કયાશુભીયં ભવતિ શાન્ત્યૈ । તસ્માદેત
ઐન્દ્રા મારુતા ઉક્ષાણઃ સવનીયા ભવન્તિ । ત્રયઃ પ્રથમેઽહન્નાલભ્યન્તે ।
એવં દ્વિતીયે । એવં તૃતીયે ॥ ૨। ૭। ૧૧। ૧॥

૩૩ એવં ચતુર્થે । પઞ્ચોત્તમેઽહન્નાલભ્યન્તે । વર્ષિષ્ઠમિવ
હ્યેતદહઃ । વર્ષિષ્ઠઃ સમાનાનાં ભવતિ । ય એતેન યજતે । ય ઉ
ચૈનમેવં વેદ । સ્વારાજ્યં વા એષ યજ્ઞઃ । એતેન વા એકયાવા કાન્દમઃ
સ્વારાજ્યમગચ્છત્ । સ્વારાજ્યં ગચ્છતિ । ય એતેન યજતે ॥ ૨। ૭। ૧૧। ૨॥

૩૪ ય ઉ ચૈનમેવં વેદ । મારુતો વા એષ સ્તોમઃ । એતેન વૈ મરુતો
દેવાનાં ભૂયિષ્ઠા અભવન્ । ભૂયિષ્ઠઃ સમાનાનાં ભવતિ । ય એતેન
યજતે । ય ઉ ચૈનમેવં વેદ । પઞ્ચશારદીયો વા એષ યજ્ઞઃ ।
આ પઞ્ચમાત્પુરુષાદન્નમત્તિ । ય એતેન યજતે । ય ઉ ચૈનમેવં
વેદ । સપ્તદશર્ँ સ્તોમા નાતિયન્તિ । સપ્તદશઃ પ્રજાપતિઃ
। પ્રજાપતેરેવ નૈતિ ॥ ૨। ૭। ૧૧। ૩॥ તૃતીયે ગચ્છતિ ય એતેન
યજતેઽત્તિ ય એતેન યજતે ય ઉ ચૈનમેવં વેદ ત્રીણિ ચ ॥ ૧૧॥
અગસ્ત્યઃ સ્વારાજ્યં મારુતઃ પઞ્ચશારદીયો વા એષ યજ્ઞઃ સપ્તદશઃ
પ્રજાપતેરેવ નૈતિ ॥

૩૫ અસ્યાજરાસો દમા મરિત્રાઃ । અર્ચદ્ધૂમાસો અગ્નયઃ પાવકાઃ ।
શ્વિચીચયઃ શ્વાત્રાસો ભુરણ્યવઃ । વનર્ષદો વાયવો ન સોમાઃ ।
યજા નો મિત્રાવરુણા । યજા દેવાર્ँ ઋતં બૃહત્ । અગ્ને યક્ષિ સ્વં દમમ્

। અશ્વિના પિબતꣳ સુતમ્ । દીદ્યગ્ની શુચિવ્રતા । ઋતુના યજ્ઞવાહસા ॥ ૨। ૭। ૧૨। ૧॥

૩૬ દ્વે વિરૂપે ચરતઃ સ્વર્થે । અન્યાઽન્યા વત્સમુપધાપયેતે । હરિરન્યસ્યાં
ભવતિ સ્વધાવાન્ । શુક્રો અન્યસ્યાં દદૃશે સુવર્ચાઃ । પૂર્વાપરં
ચરતો માયયૈતૌ । શિશૂ ક્રીડન્તૌ પરિયાતો અધ્વરમ્ । વિશ્વાન્યન્યો
ભુવનાઽભિચષ્ટે । ઋતૂનન્યો વિદધજ્જાયતે પુનઃ । ત્રીણિ શતા
ત્રીષહસ્રાણ્યગ્નિમ્ । ત્રિꣳશચ્ચ દેવા નવ ચાસપર્યન્ ॥ ૨। ૭। ૧૨। ૨॥

૩૭ ઔક્ષન્ઘૃતૈરાસ્તૃણન્બર્હિરસ્મૈ । આદિદ્ધોતારં ન્યષાદયન્ત ।
અગ્નિનાઽગ્નિઃ સમિધ્યતે । કવિર્ગૃહપતિર્યુવા । હવ્યવાડ્જુહ્વાસ્યઃ ।
અગ્નિર્દેવાનાં જઠરમ્ । પૂતદક્ષઃ કવિક્રતુઃ । દેવો દેવેભિરાગમત્
। અગ્નિશ્રિયો મરુતો વિશ્વકૃષ્ટયઃ । આ ત્વેષમુગ્રમવ ઈમહે વયમ્ ॥
૨। ૭। ૧૨। ૩॥

૩૮ તે સ્વાનિનો રુદ્રિયા વર્ષનિર્ણિજઃ । સિꣳહા ન હેષક્રતવઃ
સુદાનવઃ । યદુત્તમે મરુતો મધ્યમે વા । યદ્વાઽવમે સુભગાસો
દિવિષ્ઠ । તતો નો રુદ્રા ઉત વાઽન્વસ્ય । અગ્ને વિત્તાદ્ધવિષો યદ્યજામઃ
। ઈડે અગ્નિꣳ સ્વવસં નમોભિઃ । ઇહ પ્રસત્તો વિચયત્કૃતં નઃ ।
રથૈરિવ પ્રભરે વાજયદ્ભિઃ । પ્રદક્ષિણિન્મરુતાગ્ સ્તોમમૃધ્યામ્ ॥
૨। ૭। ૧૨। ૪॥

૩૯ શ્રુધિ શ્રુત્કર્ણ વહ્નિભિઃ । દેવૈરગ્ને સયાવભિઃ । આસીદન્તુ
બર્હિષિ । મિત્રો વરુણો અર્યમા । પ્રાતર્યાવાણો અધ્વરમ્ ।
વિશ્વેષામદિતિર્યજ્ઞિયાનામ્ । વિશ્વેષામતિથિર્માનુષાણામ્ ।
અગ્નિર્દેવાનામવ આવૃણાનઃ । સુમૃડીકો ભવતુ વિશ્વવેદાઃ । ત્વે અગ્ને
સુમતિં ભિક્ષમાણાઃ ॥ ૨। ૭। ૧૨। ૫॥

૪૦ દિવિ શ્રવો દધિરે યજ્ઞિયાસઃ । નક્તા ચ ચક્રુરુષસા વિરૂપે ।
કૃષ્ણં ચ વર્ણમરુણં ચ સંધુઃ । ત્વામગ્ન આદિત્યાસ આસ્યમ્ ।
ત્વાં જિહ્વાꣳ શુચયશ્ચક્રિરે કવે । ત્વાꣳ રાતિષાચો અધ્વરેષુ
સશ્ચિરે । ત્વે દેવા હવિરદન્ત્યાહુતમ્ । નિ ત્વા યજ્ઞસ્ય સાધનમ્ । અગ્ને

હોતારમૃત્વિજમ્ । વનુષ્વદ્દેવ ધીમહિ પ્રચેતસમ્ । જીરં દૂતમમર્ત્યમ્
॥ ૨। ૭। ૧૨। ૬॥ યજ્ઞવાહસા સપર્યન્વયમૃધ્યાં ભિક્ષમાણાઃ
પ્રચેતસમેકં ચ ॥ ૧૨॥

૪૧ તિષ્ઠા હરી રથ આ યુજ્યમાના યાહિ । વાયુર્ન નિયુતો નો અચ્છ ।
પિબાસ્યન્ધો અભિસૃષ્ટો અસ્મે । ઇન્દ્ર સ્વાહા રરિમા તે મદાય । કસ્ય
વૃષા સુતે સચા । નિયુત્વાન્વૃષભો રણત્ । વૃત્રહા સોમપીતયે ।
ઇન્દ્રં વયં મહાધને । ઇન્દ્રમર્ભે હવામહે । યુજં વૃત્રેષુ વજ્રિણમ્
॥ ૨। ૭। ૧૩। ૧॥

૪૨ દ્વિતાયો વૃત્રહન્તમઃ । વિદ ઇન્દ્રઃ શતક્રતુઃ । ઉપ નો હરિભિઃ
સુતમ્ । સ સૂર આ જનયઞ્જ્યોતિરિન્દ્રમ્ । અયા ધિયા તરણિરદ્રિબર્હાઃ
। ઋતેન શુષ્મીનવમાનો અર્કૈઃ । વ્યુસ્રિધો અસ્રો અદ્રિર્બિભેદ । ઉત
ત્યદાશ્વશ્વિયમ્ । યદિન્દ્ર નાહુષીષ્વા । અગ્રે વિક્ષુ પ્રતીદયત્ ॥ ૨। ૭। ૧૩। ૨॥

૪૩ ભરેષ્વિન્દ્રꣳ સુહવꣳ હવામહે । અꣳહોમુચꣳ
સુકૃતં દૈવ્યં જનમ્ । અગ્નિં મિત્રં વરુણꣳ સાતયે ભગમ્ ।
દ્યાવાપૃથિવી મરુતઃ સ્વસ્તયે । મહિ ક્ષેત્રં પુરુશ્ચન્દ્રં વિવિદ્વાન્
। આદિત્સખિભ્યશ્ચ રથꣳ સમૈરત્ । ઇન્દ્રો નૃભિરજનદ્દીદ્યાનઃ
સાકમ્ । સૂર્યમુષસં ગાતુમગ્નિમ્ । ઉરું નો લોકમનુનેષિ વિદ્વાન્ ।
સુવર્વજ્જ્યોતિરભયꣳ સ્વસ્તિ ॥ ૨। ૭। ૧૩। ૩॥

૪૪ ઋષ્વા ત ઇન્દ્ર સ્થવિરસ્ય બાહૂ । ઉપસ્થેયામ શરણા બૃહન્તા
। આ નો વિશ્વાભિરૂતિભિઃ સજોષાઃ । બ્રહ્મ જુષાણો હર્યશ્વ યાહિ ।
વરીવૃજત્સ્થવિરેભિઃ સુશિપ્ર । અસ્મે દધદ્વૃષણꣳ શુષ્મમિન્દ્ર ।
ઇન્દ્રાય ગાવ આશિરમ્ । દુદુહ્રે વજ્રિણે મધુ । યત્સીમુપહ્વરેઽવિદત્
। તાસ્તે વજ્રિન્ધેનવો જોજયુર્નઃ ॥ ૨। ૭। ૧૩। ૪॥

૪૫ ગભસ્તયો નિયુતો વિશ્વવારાઃ । અહરહર્ભૂય ઇજ્જોગુવાનાઃ । પૂર્ણા ઇન્દ્ર
ક્ષુમતો ભોજનસ્ય । ઇમાં તે ધિયં પ્રભરે મહો મહીમ્ । અસ્ય સ્તોત્રે
ધિષણા યત્ત આનજે । તમુત્સવે ચ પ્રસવે ચ સાસહિમ્ । ઇન્દ્રં
દેવાસઃ શવસા મદન્નનુ ॥ ૨। ૭। ૧૩। ૫॥ વજ્રિણમયત્સ્વસ્તિ જોજયુર્નઃ

સપ્ત ચ ॥ ૧૩॥

૪૬ પ્રજાપતિઃ પશૂન્સૃજત । તેઽસ્માથ્સૃષ્ટાઃ પરાઞ્ચ આયન્ ।
તાનગ્નિષ્ટોમેન નાપ્નોત્ । તાનુક્થ્યેન નાપ્નોત્ । તાન્થ્ષોડશિના નાપ્નોત્
। તાન્રાત્રિયા નાપ્નોત્ । તાન્થ્સંધિના નાપ્નોત્ । સોઽગ્નિમબ્રવીત્ । ઇમાન્મ
ઈપ્સેતિ । તાનગ્નિસ્ત્રિવૃતા સ્તોમેન નાપ્નોત્ ॥ ૨। ૭। ૧૪। ૧॥

૪૭ સ ઇન્દ્રમબ્રવીત્ । ઇમાન્મ ઈપ્સેતિ । તાનિન્દ્રઃ પઞ્ચદશેન સ્તોમેન
નાપ્નોત્ । સ વિશ્વાન્દેવાનબ્રવીત્ । ઇમાન્મ ઈપ્સતેતિ । તાન્, વિશ્વે દેવાઃ
સપ્તદશેન સ્તોમેન નાપ્નુવન્ । સ વિષ્ણુમબ્રવીત્ । ઇમાન્મ ઈપ્સેતિ । તાન્,
વિષ્ણુરેકવિꣳશેન સ્તોમેનાપ્નોત્ । વારવન્તીયેનાવારયત ॥ ૨। ૭। ૧૪। ૨॥

૪૮ ઇદં વિષ્ણુર્વિચક્રમ ઇતિ વ્યક્રમત । યસ્માત્પશવઃ પ્ર પ્રેવ
ભ્રꣳશેરન્ । સ એતેન યજેત । યદાપ્નોત્ । તદપ્તોર્યામસ્યાપ્તોર્યામત્વમ્ ।
એતેન વૈ દેવા જૈત્વાનિ જિત્વા । યં કામમકામયન્ત તમાપ્નુવન્ । યં કામં
કામયતે । તમેતેનાપ્નોતિ ॥ ૨। ૭। ૧૪। ૩॥ સ્તોમેન નાપ્નોદવારયત નવ
ચ ॥ ૧૪॥

૪૯ વ્યાઘ્રોઽયમગ્નૌ ચરતિ પ્રવિષ્ટઃ । ઋષીણાં પુત્રો અભિશસ્તિપા
અયમ્ । નમસ્કારેણ નમસા તે જુહોમિ । મા દેવાનાં મિથુયા કર્મ ભાગમ્
। સાવીરૂહિ દેવ પ્રસવાય પિત્રે । વર્ષ્માણમસ્મૈ વરિમાણમસ્મૈ ।
અથાસ્મભ્યꣳસવિતઃ સર્વતાતા । દિવે દિવ આસુવા ભૂરિપશ્વઃ ।
ભૂતો ભૂતેષુ ચરતિ પ્રવિષ્ટઃ । સ ભૂતાનામધિપતિર્બભૂવ ॥ ૨। ૭। ૧૫। ૧॥

૫૦ તસ્ય મૃત્યૌ ચરતિ રાજસૂયમ્ । સ રાજા રાજ્યમનુમન્યતામિદમ્ । યેભિઃ
શિલ્પૈઃ પપ્રથાનામદૃꣳહત્ । યેભિર્દ્યામભ્યપિꣳશત્પ્રજાપતિઃ ।
યેભિર્વાચં વિશ્વરૂપાꣳ સમવ્યયત્ । તેનેમમગ્ન ઇહ વર્ચસા
સમઙ્ગ્ધિ । યેભિરાદિત્યસ્તપતિ પ્રકેતુભિઃ । યેભિઃ સૂર્યો દદૃશે
ચિત્રભાનુઃ । યેભિર્વાચં પુષ્કલેભિરવ્યયત્ । તેનેમમગ્ન ઇહ વર્ચસા
સમઙ્ગ્ધિ ॥ ૨। ૭। ૧૫। ૨॥

૫૧ આઽયં ભાતુ શવસા પઞ્ચ કૃષ્ટીઃ । ઇન્દ્ર ઇવ જ્યેષ્ઠો
ભવતુ પ્રજાવાન્ । અસ્મા અસ્તુ પુષ્કલં ચિત્રભાનુ । આઽયં

પૃણક્તુ રજસી ઉપસ્થમ્ । યત્તે શિલ્પં કશ્યપ રોચનાવત્ ।
ઇન્દ્રિયાવત્પુષ્કલં ચિત્રભાનુ । યસ્મિન્ત્સૂર્યા અર્પિતાઃ સપ્ત સાકમ્
। તસ્મિન્રાજાનમધિવિશ્રયેમમ્ । દ્યૌરસિ પૃથિવ્યસિ । વ્યાઘ્રો
વૈયાઘ્રેઽધિ ॥ ૨। ૭। ૧૫। ૩॥

૫૨ વિશ્રયસ્વ દિશો મહીઃ । વિશસ્ત્વા સર્વા વાઞ્છન્તુ । મા
ત્વદ્રાષ્ટ્રમધિભ્રશત્ । યા દિવ્યા આપઃ પયસા સંબભૂવુઃ । યા અન્તરિક્ષ
ઉત પાર્થિવીર્યાઃ । તાસાં ત્વા સર્વાસાꣳ રુચા । અભિષિઞ્ચામિ વર્ચસા ।
અભિ ત્વા વર્ચસા સિચં દિવ્યેન । પયસા સહ । યથાઽઽસા રાષ્ટ્રવર્ધનઃ
॥ ૨। ૭। ૧૫। ૪॥

૫૩ તથા ત્વા સવિતા કરત્ । ઇન્દ્રં વિશ્વા અવીવૃધન્ । સમુદ્રવ્યચસં
ગિરઃ । રથીતમꣳ રથીનામ્ । વાજાનાꣳ સત્પતિં પતિમ્
। વસવસ્ત્વા પુરસ્તાદભિષિઞ્ચન્તુ ગાયત્રેણ છન્દસા ।
રુદ્રાસ્ત્વા દક્ષિણતોઽભિષિઞ્ચન્તુ ત્રૈષ્ટુભેન છન્દસા
। આદિત્યાસ્ત્વા પશ્ચાદભિષિઞ્ચન્તુ જાગતેન છન્દસા ।
વિશ્વે ત્વા દેવા ઉત્તરતોઽભિષિઞ્ચન્ત્વાનુષ્ટુભેન છન્દસા ।
બૃહસ્પતિસ્ત્વોપરિષ્ટાદભિષિઞ્ચતુ પાઙ્ક્તેન છન્દસા ॥ ૨। ૭। ૧૫। ૫॥

૫૪ અરુણં ત્વા વૃકમુગ્રં ખજંકરમ્ । રોચમાનં મરુતામગ્રે
અર્ચિષઃ । સૂર્યવન્તં મઘવાનં વિષાસહિમ્ । ઇન્દ્રમુક્થ્યેષુ
નામહૂતમꣳ હુવેમ । પ્ર બાહવા સિસૃતં જીવસે નઃ । આ નો
ગવ્યૂતિમુક્ષતં ઘૃતેન । આ નો જને શ્રવયતં યુવાના । શ્રુતં મે
મિત્રાવરુણા હવેમા । ઇન્દ્રસ્ય તે વીર્યકૃતઃ । બાહૂ ઉપાવહરામિ ॥ ૨। ૭। ૧૫। ૬॥ બભૂવાવ્યયત્તેનેમમગ્ન
ઇહ વર્ચસા સમંગ્ધિ વૈયાઘ્રેઽધિ
રાષ્ટ્રવર્ધનઃ પાઙ્ક્તેન છન્દસોપાવહરામિ ॥ ૧૫॥

૫૫ અભિ પ્રેહિ વીરયસ્વ । ઉગ્રશ્ચેત્તા સપત્નહા । આતિષ્ઠ વૃત્રહન્તમઃ
। તુભ્યં દેવા અધિબ્રવન્ । અઙ્ગૌ ન્યઙ્ગાવભિતો રથં યૌ । ધ્વાન્તં
વાતાગ્રમનુસંચરન્તૌ । દૂરે હેતિરિન્દ્રિયાવાન્પતત્રી । તે નોઽગ્નયઃ
પપ્રયઃ પારયન્તુ । નમસ્ત ઋષે ગદ । અવ્યથાયૈ ત્વા સ્વધાયૈ ત્વા ॥ ૨। ૭। ૧૬। ૧॥

૫૬ મા ન ઇન્દ્રાભિતસ્ત્વદૃષ્વારિષ્ટાસઃ । એવા બ્રહ્મન્તવેદસ્તુ । તિષ્ઠા
રથે અધિ યદ્વજ્રહસ્તઃ । આ રશ્મીન્દેવ યુવસે સ્વશ્વઃ । આતિષ્ઠ
વૃત્રહન્નાતિષ્ઠન્તં પરિ । અનુ ત્વેન્દ્રો મદત્વનુ ત્વા મિત્રાવરુણૌ ।
દ્યૌશ્ચ ત્વા પૃથિવી ચ પ્રચેતસા । શુક્રો બૃહદ્દક્ષિણા ત્વા પિપર્તુ । અનુ
સ્વધા ચિકિતા ઁ સોમો અગ્નિઃ । અનુ ત્વાઽવતુ સવિતા સવેન ॥ ૨। ૭। ૧૬। ૨॥
૫૭ ઇન્દ્રં વિશ્વા અવીવૃધન્ । સમુદ્રવ્યચસં ગિરઃ । રથીતમ ઁ
રથીનામ્ । વાજાના ઁ સત્પતિં પતિમ્ । પરિ મા સેન્યા ઘોષાઃ । જ્યાનાં
વૃઞ્જન્તુ ગૃધ્નવઃ । મેથિષ્ઠાઃ પિન્વમાના ઇહ । માં ગોપતિમભિસંવિશન્તુ
। તન્મેઽનુમતિરનુમન્યતામ્ । તન્માતા પૃથિવી તત્પિતા દ્યૌઃ ॥ ૨। ૭। ૧૬। ૩॥
૫૮ તદ્ગ્રાવાણઃ સોમસુતો મયોભુવઃ । તદશ્વિના શૃણુત ઁ સૌભગા યુવમ્ ।
અવતે હેઽ ઉદુત્તમમ્ । એના વ્યાઘ્રં પરિષસ્વજાનાઃ । સિ ઁ હ ઁ
હિન્વન્તિ મહતે સૌભગાય । સમુદ્રં ન સુહવં તસ્થિવા ઁ સમ્ ।
મર્મૃજ્યન્તે દ્વીપિનમપ્સ્વન્તઃ । ઉદસાવેતુ સૂર્યઃ । ઉદિદં મામકં
વચઃ । ઉદિહિ દેવ સૂર્ય । સહ વગ્નુના મમ । અહં વાચો વિવાચનમ્ ।
મયિ વાગસ્તુ ધર્ણસિઃ । યન્તુ નદયો વર્ષન્તુ પર્જન્યાઃ । સુપિપ્પલા
ઓષધયો ભવન્તુ । અન્નવતામોદનવતામામિક્ષવતામ્ । એષા ઁ રાજા ભૂયાસમ્
॥ ૨। ૭। ૧૬। ૪॥ સ્વધાયૈ ત્વા સવેન દ્યૌઃ સૂર્ય સપ્ત ચ ॥ ૧૬॥
૫૯ યે કેશિનઃ પ્રથમાઃ સત્રમાસત । યેભિરાભૃતં યદિદં વિરોચતે ।
તેભ્યો જુહોમિ બહુધા ઘૃતેન । રાયસ્પોષેણેમં વર્ચસા સ ઁ સૃજાથ ।
નર્તે બ્રહ્મણસ્તપસો વિમોકઃ । દ્વિનામ્ની દીક્ષા વશિની હ્યુગ્રા । પ્ર કેશાઃ
સુવતે કાણ્ડિનો ભવન્તિ । તેષાં બ્રહ્મેદીશે વપનસ્ય નાન્યઃ । આરોહ
પ્રોષ્ઠં વિષહસ્વ શત્રૂન્ । અવાસ્રાગ્દીક્ષા વશિની હ્યુગ્રા ॥ ૨। ૭। ૧૭। ૧॥
૬૦ દેહિ દક્ષિણાં પ્રતિરસ્વાયુઃ । અથા મુચ્યસ્વ વરુણસ્ય પાશાત્ ।
યેનાવપત્સવિતા ક્ષુરેણ । સોમસ્ય રાજ્ઞો વરુણસ્ય વિદ્વાન્ । તેન બ્રહ્માણો
વપતેદમસ્યોર્જેમમ્ । રય્યા વર્ચસા સ ઁ સૃજાથ । મા તે કેશાનનુ
ગાદ્વર્ચ એતત્ । તથા ધાતા કરોતુ તે । તુભ્યમિન્દ્રો બૃહસ્પતિઃ ।
સવિતા વર્ચ આદધાત્ ॥ ૨। ૭। ૧૭। ૨॥

૬૧ તેભ્યો નિધાનં બહુધા વ્યૈચ્છન્ । અન્તરા દ્યાવાપૃથિવી અપઃ સુવઃ ।
દર્ભસ્તમ્બે વીર્યકૃતે નિધાય । પૌગ્ંસ્યેનેમં વર્ચસા સꣳ સૃજાથ
। બલં તે બાહુવોઃ સવિતા દધાતુ । સોમસ્ત્વાઽનક્તુ પયસા ઘૃતેન ।
સ્ત્રીષુ રૂપમશ્વિનૈતન્નિધત્તમ્ । પૌગ્ંસ્યેનેમં વર્ચસા સꣳ સૃજાથ ।
યથ્સીમન્તં કઙ્કતસ્તે લિલેખ । યદ્વા ક્ષુરઃ પરિવવર્જ વપગ્ંસ્તે ।
સ્ત્રીષુ રૂપમશ્વિનૈતન્નિધત્તમ્ । પૌગ્ંસ્યેનેમꣳ સꣳ સૃજાથો વીર્યેણ
॥ ૨। ૭। ૧૭। ૩॥ અવાસ્રાગ્દીક્ષા વશિની હ્યુગ્રાઽઽદધાદ્વવર્જ વપગ્ંસ્તે દ્વે
ચ ॥ ૧૭॥ યે કેશિનો નર્તે મા તે બલં યથ્સીમન્તં પઞ્ચ ॥ / હેળિકોટિલ્લ /

૬૨ ઇન્દ્રં વૈ સ્વા વિશો મરુતો નાપાચાયન્ । સોઽનપચાય્યમાન એતં
વિઘનમપશ્યત્ । તમાહરત્ । તેનાયજત । તેનૈવાસાં તꣳ સગ્ંસ્તમ્ભં
વ્યહન્ । યદ્વ્યહન્ । તદ્વિઘનસ્ય વિઘનત્વમ્ । વિ પાપ્માનં ભ્રાતૃવ્યꣳ
હતે । ય એતેન યજતે । ય ઉ ચૈનમેવં વેદ ॥ ૨। ૭। ૧૮। ૧॥

૬૩ યꣳ રાજાનં વિશો નાપચાયેયુઃ । યો વા બ્રાહ્મણસ્તમસા પાપ્મના
પ્રાવૃતઃ સ્યાત્ । સ એતેન યજેત । વિઘનેનૈવૈનદ્વિહત્ય
। વિશામાધિપત્યં ગચ્છતિ । તસ્ય દ્વે દ્વાદશે સ્તોત્રે ભવતઃ ।
દ્વે ચતુર્વિꣳશે । ઔદ્ભિદ્યમેવ તત્ । એતદ્વૈ ક્ષત્રસ્યૌદ્ભિદ્યમ્ ।
યદસ્મૈ સ્વા વિશો બલિꣳ હરન્તિ ॥ ૨। ૭। ૧૮। ૨॥

૬૪ હરન્ત્યસ્મૈ વિશો બલિમ્ । ઐનમપ્રતિખ્યાતં ગચ્છતિ । ય એવં વેદ ।
પ્રબાહુગ્વા અગ્રે ક્ષત્રાણ્યાતેપુઃ । તેષામિન્દ્રઃ, ક્ષત્રાણ્યાદત્ત । ન વા
ઇમાનિ ક્ષત્રાણ્યભૂવન્નિતિ । તન્નક્ષત્રાણાં નક્ષત્રત્વમ્ । આ શ્રેયસો
ભ્રાતૃવ્યસ્ય તેજ ઇન્દ્રિયં ધત્તે । ય એતેન યજતે । ય ઉ ચૈનમેવં
વેદ ॥ ૨। ૭। ૧૮। ૩॥

૬૫ તદ્યથા હ વૈ સચક્રિણૌ કપ્લકાવુપાવહિતૌ સ્યાતામ્ । એવમેતૌ
યુગ્મન્તૌ સ્તોમૌ । અયુક્ષુ સ્તોમેષુ ક્રિયેતે । પાપ્મનોઽપહત્યૈ । અપ
પાપ્માનં ભ્રાતૃવ્યꣳ હતે । ય એતેન યજતે । ય ઉ ચૈનમેવં વેદ
। તદ્યથા હ વૈ સૂતગ્રામણ્યઃ । એવં છન્દાꣳસિ । તેષ્વસાવાદિત્યો
બૃહતીરભ્યૂઢઃ ॥ ૨। ૭। ૧૮। ૪॥

૬૬ સતોબૃહતીષુ સ્તુવતે સતો બૃહન્ । પ્રજયા પશુભિરસાનીત્યેવ
। વ્યતિષક્તાભિઃ સ્તુવતે । વ્યતિષક્તં વૈ ક્ષત્રં વિશા । વિશૈવૈનં
ક્ષત્રેણ વ્યતિષજતિ । વ્યતિષક્તાભિઃ સ્તુવતે । વ્યતિષક્તો વૈ ગ્રામણીઃ
સજાતૈઃ । સજાતૈરેવૈનં વ્યતિષજતિ । વ્યતિષક્તાભિઃ સ્તુવતે ।
વ્યતિષક્તો વૈ પુરુષઃ પાપ્મભિઃ । વ્યતિષક્તાભિરેવાસ્ય પાપ્મનો નુદતે ॥
૨। ૭। ૧૮। ૫॥ વેદ હરન્ત્યેનમેવં વેદાભ્યૂઢઃ પાપ્મભિરેકં ચ ॥ ૧૮॥

ત્રિવૃધદાગ્નેયોઽગ્નિમુખા હ્યૃદ્ધિર્યદાગ્નેય આગ્નેયો ન વૈ સોમેન યો
વૈ સોમેનૈષ ગોસવઃ સિ ँ હેઽભિ પ્રેહિ મિત્રવર્ધનઃ પ્રજાપતિસ્તા
ઓદનં પ્રજાપતિરકામયત બહોર્ભૂયાનગસ્ત્યોઽસ્યા જરાસાસ્તિષ્ઠા હરી
પ્રજાપતિઃ પશૂન્વ્યાઘ્રોઽયમભિપ્રેહિ વૃત્રહન્તમો યે કેશિન ઇન્દ્રં
વા અષ્ટાદશ ॥ ૧૮॥

ત્રિવૃધો વૈ સોમેનાયુરસિ બહુર્ભવતિ તિષ્ઠા હરીરથ આઽયં ભાતુ
તેભ્યો નિધાન ँ ષટ્પઞ્ચાશત્ ॥ ૬૬॥

ત્રિવૃત્પાપ્મનોનુદતે ॥

## દ્વિતીયાષ્ટકે અષ્ટમઃ પ્રપાઠકઃ ૮

૧ પીવોન્ના ँ રયિવૃધઃ સુમેધાઃ । શ્વેતઃ સિષક્તિ નિયુતામભિશ્રીઃ ।
તે વાયવે સમનસો વિતસ્થુઃ । વિશ્વેન્નરઃ સ્વપત્યાનિ ચક્રુઃ । રાયેઽનુ
યં જજ્ઞતૂ રોદસી ઉભે । રાયે દેવી ધિષણા ધાતિ દેવમ્ । અધા વાયું
નિયુતઃ સશ્ચત સ્વાઃ । ઉત શ્વેતં વસુધિતિં નિરેકે । આ વાયો પ્રયાભિઃ
। પ્ર વાયુમચ્છા બૃહતી મનીષા ॥ ૨। ૮। ૧। ૧॥

૨ બૃહદ્રયિં વિશ્વવારા ँ રથપ્રામ્ । દ્યુતદ્યામા નિયુતઃ પત્યમાનઃ
। કવિઃ કવિમિયક્ષસિ પ્રયજ્યો । આ નો નિયુદ્ભિઃ શતિનીભિરધ્વરમ્ ।
સહસ્રિણીભિરુપ યાહિ યજ્ઞમ્ । વાયો અસ્મિન્ હવિષિ માદયસ્વ । યૂયં
પાત સ્વસ્તિભિઃ સદા નઃ । પ્રજાપતે ન ત્વદેતાન્યન્યઃ । વિશ્વા જાતાનિ
પરિ તા બભૂવ । યત્કામાસ્તે જુહુમસ્તન્નો અસ્તુ ॥ ૨। ૮। ૧। ૨॥

૩ વયરઁ સ્યામ પતયો રયીણામ્ । રયીણાં પતિં યજતં બૃહન્તમ્
। અસ્મિન્ભરે નૃતમં વાજસાતૌ । પ્રજાપતિં પ્રથમજામૃતસ્ય ।
યજામ દેવમધિ નો બ્રવીતુ । પ્રજાપતે ત્વં નિધિપાઃ પુરાણઃ । દેવાનાં
પિતા જનિતા પ્રજાનામ્ । પતિર્વિશ્વસ્ય જગતઃ પરસ્પાઃ । હવિર્નો
દેવ વિહવે જુષસ્વ । તવેમે લોકાઃ પ્રદિશો દિશશ્ચ ॥ ૨। ૮। ૧। ૩॥

૪ પરાવતો નિવત ઉદ્વતશ્ચ । પ્રજાપતે વિશ્વસૃજ્જીવધન્ય ઇદં નો
દેવ । પ્રતિહર્ય હવ્યમ્ । પ્રજાપતિં પ્રથમં યજ્ઞિયાનામ્ । દેવાનામગ્રે
યજતં યજધ્વમ્ । સ નો દદાતુ દ્રવિણઁ સુવીર્યમ્ । રાયસ્પોષં
વિષ્યતુ નાભિમસ્મે । યો રાય ઈશે શતદાય ઉક્થ્યઃ । યઃ પશૂનાઁ
રક્ષિતા વિષ્ઠિતાનામ્ । પ્રજાપતિઃ પ્રથમજા ઋતસ્ય ॥ ૨। ૮। ૧। ૪॥

૫ સહસ્રધામા જુષતાઁ હવિર્નઃ । સોમાપૂષણેમૌ દેવૌ । સોમાપૂષણા
રજસો વિમાનમ્ । સપ્તચક્રઁ રથમવિશ્વમિન્વમ્ । વિષૂવૃતં
મનસા યુજ્યમાનમ્ । તં જિન્વથો વૃષણા પઞ્ચરશ્મિમ્ । દિવ્યન્યઃ
સદનં ચક્ર ઉચ્ચા । પૃથિવ્યામન્યો અધ્યન્તરિક્ષે । તાવસ્મભ્યં
પુરુવારં પુરુક્ષુમ્ । રાયસ્પોષં વિષ્યતાં નાભિમસ્મે ॥ ૨। ૮। ૧। ૫॥

૬ ધિયં પૂષા જિન્વતુ વિશ્વમિન્વઃ । રયિઁ સોમો રયિપતિર્દધાતુ । અવતુ
દેવ્યદિતિરનર્વા । બૃહદ્વદેમ વિદથે સુવીરાઃ । વિશ્વાન્યન્યો ભુવના
જજાન । વિશ્વમન્યો અભિચક્ષાણ એતિ । સોમાપૂષણાવવતં ધિયં
મે । યુવભ્યાં વિશ્વાઃ પૃતના જયેમ । ઉદુત્તમં વરુણાસ્તભ્નાદ્દ્યામ્ ।
યત્કિંચેદં કિતવાસઃ । અવ તે હેડસ્તત્ત્વા યામિ । આદિત્યાનામવસા ન
દક્ષિણા । ધારયન્ત આદિત્યાસસ્તિસ્રો ભૂમીર્ધારયન્ । યજ્ઞો દેવાનાઁ
શુચિરપઃ ॥ ૨। ૮। ૧। ૬॥ મનીષાઽસ્તુ ચર્તસ્યાસ્મે કિતવાસશ્ચત્વારિ
ચ ॥ ૧॥

૭ તે શુક્રાસઃ શુચયો રશ્મિવન્તઃ । સીદન્નાદિત્યા અધિ બર્હિષિ
પ્રિયે । કામેન દેવાઃ સરથં દિવો નઃ । આયાન્તુ યજ્ઞમુપ નો જુષાણાઃ
। તે સૂનવો અદિતેઃ પીવસામિષમ્ । ઘૃતં પિન્વત્પ્રતિહર્યન્નૃતેજાઃ ।
પ્ર યજ્ઞિયા યજમાનાય યેમુરે । આદિત્યાઃ કામં પિતુમન્તમસ્મે । આ નઃ

પુત્રા અદિતેર્યાન્તુ યજ્ઞમ્ । આદિત્યાસઃ પથિભિર્દેવયાનૈઃ ॥ ૨। ૮। ૨। ૧॥
૮ અસ્મે કામં દાશુષે સન્નમન્તઃ । પુરોડાશં ઘૃતવન્તં જુષન્તામ્ ।
સ્કભાયત નિરૃતિꣳ સેધતામતિમ્ । પ્ર રશ્મિભિર્યતમાના અમૃધ્રાઃ
। આદિત્યાઃ કામ પ્રયતાં વષટ્કૃતિમ્ । જુષધ્વં નો હવ્યદાતિં યજત્રાઃ
। આદિત્યાન્કામમવસે હુવેમ । યે ભૂતાનિ જનયન્તો વિચિખ્યુઃ । સીદન્તુ
પુત્રા અદિતેરુપસ્થમ્ । સ્તીર્ણં બર્હિર્હવિરદ્યાય દેવાઃ ॥ ૨। ૮। ૨। ૨॥
૯ સ્તીર્ણં બર્હિઃ સીદતા યજ્ઞે અસ્મિન્ । ધ્રાજાઃ સેધન્તો અમતિં દુરેવામ્
। અસ્મભ્યં પુત્રા અદિતેઃ પ્રયꣳસત । આદિત્યાઃ કામ હવિષો જુષાણાઃ
। અગ્ને નય સુપથા રાયે અસ્માન્ । વિશ્વાનિ દેવ વયુનાનિ વિદ્વાન્ ।
યુયોધ્યસ્મજ્જુહુરાણમેનઃ । ભૂયિષ્ઠાં તે નમઉક્તિં વિધેમ । પ્ર વઃ
શુક્રાય ભાનવે ભરધ્વમ્ । હવ્યં મતિં ચાગ્નયે સુપૂતમ્ ॥ ૨। ૮। ૨। ૩॥
૧૦ યો દૈવ્યાનિ માનુષા જનૂꣳષિ । અન્તર્વિશ્વાનિ વિદ્મના જિગાતિ ।
અચ્છા ગિરો મતયો દેવયન્તીઃ । અગ્નિં યન્તિ દ્રવિણં ભિક્ષમાણાઃ
। સુસંદૃશꣳસુપ્રતીકગ્ગ્ં સ્વઞ્ચમ્ । હવ્યવાહમરતિં
માનુષાણામ્ । અગ્ને ત્વમસ્મદ્યુયોધ્યમીવાઃ । અનગ્નિત્રા અભ્યમન્ત કૃષ્ટીઃ ।
પુનરસ્મભ્યꣳસુવિતાય દેવ । ક્ષાં વિશ્વેભિરજરેભિર્યજત્ર ॥ ૨। ૮। ૨। ૪॥
૧૧ અગ્ને ત્વં પારયા નવ્યો અસ્માન્ । સ્વસ્તિભિરતિ દુર્ગાણિ વિશ્વા । પૂશ્ચ
પૃથ્વી બહુલા ન ઉર્વી । ભવા તોકાય તનયાય શં યોઃ । પ્ર કારવો
મનના વચ્યમાનાઃ । દેવદ્રીચીં નયથ દેવયન્તઃ । દક્ષિણાવાડ્વાજિની
પ્રાચ્યેતિ । હવિર્ભરન્ત્યગ્નયે ઘૃતાચી । ઇન્દ્રં નરો યુજે રથમ્ ।
જગૃભ્ણા તે દક્ષિણમિન્દ્ર હસ્તમ્ ॥ ૨। ૮। ૨। ૫॥
૧૨ વસૂયવો વસુપતે વસૂનામ્ । વિદ્મા હિ ત્વા ગોપતિꣳ શૂર ગોનામ્ ।
અસ્મભ્યં ચિત્રં વૃષણꣳ રયિં દાઃ । તવેદં વિશ્વમભિતઃ
પશવ્યમ્ । યત્પશ્યસિ ચક્ષસા સૂર્યસ્ય । ગવામસિ ગોપતિરેક ઇન્દ્ર
। ભક્ષીમહિ તે પ્રયતસ્ય વસ્વઃ । સમિન્દ્ર ણો મનસા નેષિ ગોભિઃ ।
સꣳ સૂરિભિર્મઘવન્થ્સꣳ સ્વસ્ત્યા । સં બ્રહ્મણા દેવકૃતં યદસ્તિ
॥ ૨। ૮। ૨। ૬॥

૧૩ સં દેવાના ँ સુમત્યા યજ્ઞિયાનામ્ । આરાચ્છત્રુમપબાધસ્વ દૂરમ્ । ઉગ્રો
યઃ શમ્બઃ પુરુહૂત તેન । અસ્મે ધેહિ યવમદ્ગોમદિન્દ્ર । કૃધી ધિયં
જરિત્રે વાજરત્નામ્ । આવેધસ ँ સ હિ શુચિઃ । બૃહસ્પતિઃ પ્રથમં
જાયમાનઃ । મહોજ્યોતિષઃ પરમે વ્યોમન્ । સપ્તાસ્યસ્તુવિજાતો રવેણ । વિ
સપ્તરશ્મિરધમત્તમા ँસિ ॥ ૨। ૮। ૨। ૭॥
૧૪ બૃહસ્પતિઃ સમજયદ્વસૂનિ । મહો વ્રજાન્ગોમતો દેવ એષઃ ।
અપઃ સિષાસન્ત્સુવર પ્રતીત્તઃ । બૃહસ્પતિર્હન્ત્યમિત્રમર્કૈઃ ।
બૃહસ્પતે પર્યેવા પિત્રે । આ નો દિવઃ પાવીરવી । ઇમા જુહ્વાના યસ્તે
સ્તનઃ । સરસ્વત્યભિ નો નેષિ । ઇય ँ શુષ્મેભિર્બિસખા ઇવારુજત્ । સાનુ
ગિરીણાં તવિષેભિરૂર્મિભિઃ । પારાવદઘ્નીમવસે સુવૃક્તિભિઃ ।
સરસ્વતીમાવિવાસેમ ધીતિભિઃ ॥ ૨। ૮। ૨। ૮॥ દેવયાનૈર્દેવાઃ સુપૂતં
યજત્ર હસ્તમસ્તિ તમાગ્ સ્યૂર્મિભિર્દ્વે ચ ॥ ૨॥
૧૫ સોમો ધેનુ ँ સોમો અર્વન્તમાશુમ્ । સોમો વીરં કર્મણ્યં દદાતુ ।
સાદન્યં વિદથ્ય ँ સભેયમ્ । પિતુઃશ્રવણં યો દદાશદસ્મૈ
। અષાઢં યુત્સુ ત્વ ँ સોમ ક્રતુભિઃ । યા તે ધામાનિ હવિષા
યજન્તિ । ત્વમિમા ઓષધીઃ સોમ વિશ્વાઃ । ત્વમપો અજનયસ્ત્વં ગાઃ ।
ત્વમાતતન્થોર્વન્તરિક્ષમ્ । ત્વં જ્યોતિષા વિતમો વવર્થ ॥ ૨। ૮। ૩। ૧॥
૧૬ યા તે ધામાનિ દિવિ યા પૃથિવ્યામ્ । યા પર્વતેષ્વોષધીષ્વપ્સુ ।
તેભિર્નો વિશ્વૈઃ સુમના અહેડન્ । રાજન્ત્સોમ પ્રતિ હવ્યા ગૃભાય ।
વિષ્ણોર્નુ કં તદસ્ય પ્રિયમ્ । પ્ર તદ્વિષ્ણુઃ । પરો માત્રયા તનુવા વૃધાન ।
ન તે મહિત્વમન્વશ્નુવન્તિ । ઉભે તે વિદ્મ રજસી પૃથિવ્યા વિષ્ણો દેવ
ત્વમ્ । પરમસ્ય વિત્સે ॥ ૨। ૮। ૩। ૨॥
૧૭ વિચક્રમે ત્રિર્દેવઃ । આ તે મહો યો જાત એવ । અભિ ગોત્રાણિ । આભિઃ
સ્પૃધો મિથતીરરિષણ્યન્ । અમિત્રસ્ય વ્યથયા મન્યુમિન્દ્ર । આભિર્વિશ્વા
અભિયુજો વિષૂચીઃ । આર્યાય વિશોઽવતારીર્દાસીઃ । અય ँ શ ૃણ્વે અધ
જયન્નુત ઘ્નન્ । અયમુત પ્રકૃણુતે યુધા ગાઃ । યદા સત્યં કૃણુતે
મન્યુમિન્દ્રઃ ॥ ૨। ૮। ૩। ૩॥

૧૮ વિશ્વં દૃઢં ભયત એજદસ્માત્ । અનુ સ્વધામક્ષરન્નાપો અસ્ય
। અવર્ધત મધ્ય આ નાવ્યાનામ્ । સધ્રીચીનેન મનસા તમિન્દ્ર
ઓજિષ્ઠેન । હન્મનાઽહન્નભિદ્યૂન્ । મરુત્વન્તં વૃષભં વાવૃધાનમ્ ।
અકવારિં દિવ્યꣳ શાસમિન્દ્રમ્ । વિશ્વાસાહમવસે નૂતનાય । ઉગ્રꣳ
સહોદામિહ તꣳ હુવેમ । જનિષ્ઠા ઉગ્રઃ સહસે તુરાય ॥ ૨। ૮। ૩। ૪॥
૧૯ મન્દ્ર ઓજિષ્ઠો બહુલાભિમાનઃ । અવર્ધન્નિન્દ્રં મરુતશ્ચિદત્ર
। માતા યદ્વીરં દધનદ્ધનિષ્ઠા । ક્વ સ્યા વો મરુતઃ સ્વધાઽઽસીત્ ।
યન્મામેકꣳસમધત્તાહિહત્યે । અહરꣳ હ્યુગ્રસ્તવિષસ્તુવિષ્માન્ ।
વિશ્વસ્ય શત્રોરનમં વધસ્નૈઃ । વૃત્રસ્ય ત્વા શ્વસથાદીષમાણાઃ ।
વિશ્વે દેવા અજહુર્યે સખાયઃ । મરુદ્ભિરિન્દ્ર સખ્યં તે અસ્તુ ॥ ૨। ૮। ૩। ૫॥
૨૦ અથેમા વિશ્વાઃ પૃતના જયાસિ । વધીં વૃત્રં મરુત ઇન્દ્રિયેણ ।
સ્વેન ભામેન તવિષો બભૂવાન્ । અહમેતા મનવે વિશ્વશ્ચન્દ્રાઃ ।
સુગા અપશ્ચકર વજ્રબાહુઃ । સ યો વૃષા વૃષ્ણિયેભિઃ સમોકાઃ ।
મહો દિવઃ પૃથિવ્યાશ્ચ સમ્રાટ્ । સતીનસત્ત્વા હવ્યો ભરેષુ ।
મરુત્વાન્નો ભવત્વિન્દ્ર ઊતી । ઇન્દ્રો વૃત્રમતરદ્વૃત્રતૂર્યે ॥ ૨। ૮। ૩। ૬॥
૨૧ અનાધૃષ્યો મઘવા શૂર ઇન્દ્રઃ । અન્વેનં વિશો અમદન્ત પૂર્વીઃ
। અયꣳ રાજા જગતશ્ચર્ષણીનામ્ । સ એવ વીરઃ સ ઉ વીર્યાવાન્ ।
સ એકરાજો જગતઃ પરસ્પાઃ । યદા વૃત્રમતરચ્છૂર ઇન્દ્રઃ ।
અથાભવદ્દમિતાઽભિક્રતૂનામ્ । ઇન્દ્રો યજ્ઞં વર્ધયન્વિશ્વવેદાઃ ।
પુરોડાશસ્ય જુષતાꣳ હવિર્નઃ । વૃત્રં તીર્ત્વા દાનવં વજ્રબાહુઃ ॥
૨। ૮। ૩। ૭॥
૨૨ દિશોઽદૃꣳહદ્દૃꣳહિતા દૃꣳહણેન । ઇમં યજ્ઞં
વર્ધયન્વિશ્વવેદાઃ । પુરોડાશં પ્રતિગૃભ્ણાત્વિન્દ્રઃ । યદા
વૃત્રમતરચ્છૂર ઇન્દ્રઃ । અથૈકરાજો અભવજ્જનાનામ્ । ઇન્દ્રો
દેવાઞ્છમ્બરહત્ય આવત્ । ઇન્દ્રો દેવાનામભવત્પુરોગાઃ । ઇન્દ્રો યજ્ઞે
હવિષા વાવૃધાનઃ । વૃત્રતૂર્ણો અભયꣳ શર્મ યꣳસત્ । યઃ
સપ્ત સિન્ધૂꣳરદધાત્પૃથિવ્યામ્ । યઃ સપ્ત લોકાનકૃણોદ્દિશશ્ચ ।

ઇન્દ્રો હવિષ્માન્થ્સગણો મરુદ્ભિઃ । વૃત્રતૂર્ણો યજ્ઞમિહોપયાસત્ ॥
૨। ૮। ૩। ૮॥ વવર્થ વિથ્સ ઇન્દ્રસ્તુ રાયાસ્તુ વૃત્રતૂર્યે વજ્રબાહુઃ
પૃથિવ્યાં ત્રીણિ ચ ॥ ૩॥

૨૩ ઇન્દ્રસ્તરસ્વાનભિમાતિ હોગ્રઃ । હિરણ્યવાશીરિષિરઃ સુવર્ષાઃ । તસ્ય
વયꣳ સુમતૌ યજ્ઞિયસ્ય । અપિ ભદ્રે સૌમનસે સ્યામ । હિરણ્યવર્ણો
અભયં કૃણોતુ । અભિમાતિહેન્દ્રઃ પૃતનાસુ જિષ્ણુઃ । સ નઃ શર્મ
ત્રિવરૂથં વિયꣳસત્ । યૂયં પાત સ્વસ્તિભિઃ સદા નઃ । ઇન્દ્રગ્ગ્ં સ્તુહિ
વજ્રિણગ્ગ્ં સ્તોમપૃષ્ઠમ્ । પુરોડાશસ્ય જુષતાꣳ હવિર્નઃ ॥ ૨। ૮। ૪। ૧॥

૨૪ હત્વાઽભિમાતીઃ પૃતનાઃ સહસ્વાન્ । અથાભયં કૃણુહિ વિશ્વતો નઃ ।
સ્તુહિ શૂરં વજ્રિણમપ્રતીત્તમ્ । અભિમાતિહનં પુરુહૂતમિન્દ્રમ્ । ય એક
ઇચ્છતપતિર્જનેષુ । તસ્મા ઇન્દ્રાય હવિરાજુહોત । ઇન્દ્રો દેવાનામધિપાઃ
પુરોહિતઃ । દિશાં પતિરભવદ્વાજિનીવાન્ । અભિમાતિહા તવિષસ્તુવિષ્માન્
। અસ્મભ્યં ચિત્રં વૃષણꣳ રયિં દાત્ ॥ ૨। ૮। ૪। ૨॥

૨૫ ય ઇમે દ્યાવાપૃથિવી મહિત્વા । બલેનાદૃꣳહદભિમાતિહેન્દ્રઃ ।
સ નો હવિઃ પ્રતિગૃભ્ણાતુ રાતયે । દેવાનાં દેવો નિધિપા નો અવ્યાત્ ।
અનવસ્તે રથં વૃષ્ણે યત્તે । ઇન્દ્રસ્ય નુ વીર્યાણ્યહન્નહિમ્ । ઇન્દ્રો
યાતોઽવસિતસ્ય રાજા । શમસ્ય ચ શ૱ઙ્ગિણો વજ્રબાહુઃ । સેદુ રાજા
ક્ષેતિ ચર્ષણીનામ્ । અરાન્ન નેમિઃ પરિતા બભૂવ ॥ ૨। ૮। ૪। ૩॥

૨૬ અભિ સિધ્મો અજિગાદસ્ય શત્રૂન્ । વિ તિગ્મેન વૃષભેણા પુરોઽભેત્ । સં
વજ્રેણાસૃજદ્વૃત્રમિન્દ્રઃ । પ્ર સ્વાં મતિમતિરચ્છાશદાનઃ । વિષ્ણું દેવં
વરુણમૂતયે ભગમ્ । મેદસા દેવા વપયા યજધ્વમ્ । તા નો યજ્ઞમાગતં
વિશ્વધેના । પ્રજાવદસ્મે દ્રવિણેહ ધત્તમ્ । મેદસા દેવા વપયા
યજધ્વમ્ । વિષ્ણું ચ દેવં વરુણં ચ રાતિમ્ ॥ ૨। ૮। ૪। ૪॥

૨૭ તા નો અમીવા અપબાધમાનૌ । ઇમં યજ્ઞં જુષમાણાવુપેતમ્ । વિષ્ણૂવરુણા
યુવમધ્વરાય નઃ । વિશે જનાય મહિ શર્મ યચ્છતમ્ । દીર્ઘપ્રયજ્યૂ
હવિષા વૃધાના । જ્યોતિષાઽરાતીર્દહતં તમાꣳસિ । યયોરોજસા સ્કભિતા
રજાꣳસિ । વીર્યેભિર્વીરતમા શવિષ્ઠા । યાઽપત્યેતે અપ્રતીત્તા

સહોભિઃ । વિષ્ણૂ અગ્નાવરુણા પૂર્વહૂતૌ ॥ ૨। ૮। ૪। ૫॥

૨૮ વિષ્ણૂવરુણાવભિશસ્તિપા વામ્ । દેવા યજન્ત હવિષા ઘૃતેન ।
અપામીવાઁ સેધતઁ રક્ષસશ્ચ । અથા ધત્તં યજમાનાય શં યોઃ ।
અઁહોમુચા વૃષભા સુપ્રતૂર્તી । દેવાનાં દેવતમા શચિષ્ઠા ।
વિષ્ણૂવરુણા પ્રતિહર્યતં નઃ । ઇદં નરા પ્રયતમૂતયે હવિઃ । મહી નુ
દ્યાવાપૃથિવી ઇહ જ્યેષ્ઠે । રુચા ભવતાઁ શુચયદ્ભિરર્કૈઃ ॥ ૨। ૮। ૪। ૬॥

૨૯ યત્સીં વરિષ્ઠે બૃહતી વિમિન્વન્ । નૃવદ્ભ્યોઽક્ષા
પપ્રથાનેભિરેવૈઃ । પ્ર પૂર્વજે પિતરા નવ્યસીભિઃ । ગીર્ભિઃ
કૃણુધ્વઁ સદને ઋતસ્ય । આ નો દ્યાવાપૃથિવી દૈવ્યેન । જનેન
યાતં મહિ વાં વરૂથમ્ । સ ઇત્સ્વપા ભુવનેષ્વાસ । ય ઇમે દ્યાવાપૃથિવી
જજાન । ઉર્વી ગભીરે રજસી સુમેકે । અવઁશે ધીરઃ શચ્યા
સમૈરત્ ॥ ૨। ૮। ૪। ૭॥

૩૦ ભૂરિં દ્વે અચરન્તી ચરન્તમ્ । પદ્વન્તં ગર્ભમપદી દધાતે ।
નિત્યં ન સૂનું પિત્રોરુપસ્થે । તં પિપૃતઁ રોદસી સત્યવાચમ્
। ઇદં દ્યાવાપૃથિવી સત્યમસ્તુ । પિતર્માતર્યદિહોપબ્રુવે વામ્ ।
ભૂતં દેવાનામવમે અવોભિઃ । વિદ્યામેષં વૃજનં જીરદાનુમ્ । ઉર્વી
પૃથ્વી બહુલે દૂરે અન્તે । ઉપબ્રુવે નમસા યજ્ઞે અસ્મિન્ । દધાતે
યે સુભગે સુપ્રતૂર્તી । દ્યાવા રક્ષતં પૃથિવી નો અભ્વાત્ । યા જાતા
ઓષધયોઽતિવિશ્વાઃ પરિષ્ઠાઃ । યા ઓષધયઃ સોમ રાજ્ઞીરશ્વાવતીઁ
સોમવતીમ્ । ઓષધીરિતિ માતરોઽન્યા વો અન્યામવતુ ॥ ૨। ૮। ૪। ૮॥ હવિર્નો
દાદ્બભૂવ રાતિં પૂર્વહૂતાવર્કૈરદસ્મિન્પઞ્ચ ચ ॥ ૪॥

૩૧ શુચિં નુ સ્તોમઙ્ગ્ શ્નથદ્વૃત્રમ્ । ઉભા વામિન્દ્રાગ્ની પ્રચર્ષણિભ્યઃ
। આવૃત્રહણા ગીર્ભિર્વિપ્રઃ । બ્રહ્મણસ્પતે ત્વમસ્ય યન્તા । સૂક્તસ્ય
બોધિ તનયં ચ જિન્વ । વિશ્વં તદ્ભદ્રં યદવન્તિ દેવાઃ । બૃહદ્વદેમ
વિદથે સુવીરાઃ । સ ઈઁ સત્યેભિઃ સખિભિઃ શુચદ્ભિઃ । ગોધાયસં
વિ ધનસૈરતર્દત્ । બ્રહ્મણસ્પતિર્વૃષભિર્વરાહૈઃ ॥ ૨। ૮। ૫। ૧॥

૩૨ ઘર્મસ્વેદેભિર્દ્રવિણં વ્યાનટ્ । બ્રહ્મણસ્પતેરભવદ્યથા વશમ્ ।

સત્યો મન્યુર્મહિ કર્મા કરિષ્યતઃ । યો ગા ઉદાજથ્સ દિવે વિ ચાભજત્ ।
મહીવ રીતિઃ શવસા સરત્પૃથક્ । ઇન્ધાનો અગ્નિં વનવદ્વનુષ્યતઃ ।
કૃતબ્રહ્મા શૂશુવદ્રાતહવ્ય ઇત્ । જાતેન જાતમતિ સૃત્પ્રસૃ ँसते ।
યં યં યુજં કૃણુતે બ્રહ્મણસ્પતિઃ । બ્રહ્મણસ્પતે સુયમસ્ય વિશ્વહા
॥ ૨। ૮। ૫। ૨॥

૩૩ રાયઃ સ્યામ રથ્યો વિવસ્વતઃ । વીરેષુ વીરા ँ ઉપપૃઙ્ગ્ધિ નસ્ત્વમ્
। યદીશાનો બ્રહ્મણા વેષિ મે હવમ્ । સ ઇજ્જનેન સ વિશા સ જન્મના ।
સ પુત્રૈર્વાજં ભરતે ધના નૃભિઃ । દેવાનાં યઃ પિતરમાવિવાસતિ ।
શ્રદ્ધામના હવિષા બ્રહ્મણસ્પતિમ્ । યાસ્તે પૂષન્ના વો અન્તઃ । શુક્રં
તે અન્યત્પૂષેમા આશાઃ । પ્રપથે પથામજનિષ્ટ પૂષા ॥ ૨। ૮। ૫। ૩॥

૩૪ પ્રપથે દિવઃ પ્રપથે પૃથિવ્યાઃ । ઉભે અભિ પ્રિયતમે સધસ્થે
। આ ચ પરા ચ ચરતિ પ્રજાનન્ । પૂષા સુબન્ધુર્દિવ આપૃથિવ્યાઃ ।
ઇડસ્પતિર્મઘવા દસ્મવર્ચાઃ । તં દેવાસો અદદુઃ સૂર્યાયૈ । કામેન
કૃતં તવસઙ્ગ્ સ્વઞ્ચમ્ । અજાશ્વઃ પશુપા વાજબસ્ત્યઃ । ધિયંજિન્વો
વિશ્વે ભુવને અર્પિતઃ । અષ્ટ્રાં પૂષા શિથિરામુદ્વરીવૃજત્ ॥ ૨। ૮। ૫। ૪॥

૩૫ સંચક્ષાણો ભુવના દેવ ઈયતે । શુચી વો હવ્યા મરુતઃ શુચીનામ્ ।
શુચિ ँ હિનોમ્યધ્વર ँ શુચિભ્યઃ । ઋતેન સત્યમૃતસાપ આયન્ ।
શુચિજન્માનઃ શુચયઃ પાવકાઃ । પ્ર ચિત્રમર્કં ગૃણતે તુરાય ।
મારુતાય સ્વતવસે ભરધ્વમ્ । યે સહા ँસિ સહસા સહન્તે । રેજતે અગ્ને
પૃથિવી મખેભ્યઃ । અ ँ સેષ્વા મરુતઃ ખાદયો વઃ ॥ ૨। ૮। ૫। ૫॥

૩૬ વક્ષસ્સુ રુક્મા ઉપશિશ્રિયાણાઃ । વિ વિદ્યુતો ન વૃષ્ટિભી રુચાનાઃ
। અનુ સ્વધામાયુધૈર્યચ્છમાનાઃ । યા વઃ શર્મ શશમાનાય સન્તિ
। ત્રિધાતૂનિ દાશુષે યચ્છતાધિ । અસ્મભ્યં તાનિ મરુતો વિયન્ત ।
રયિં નો ધત્ત વૃષણઃ સુવીરમ્ । ઇમે તુરં મરુતો રામયન્તિ । ઇમે સહઃ
સહસ આનમન્તિ । ઇમે શ ँ સં વનુષ્યતો નિપાન્તિ ॥ ૨। ૮। ૫। ૬॥

૩૭ ગુરુદ્વેષો અરરુષે દધન્તિ । અરા ઇવેદચરમા અહેવ । પ્ર પ્રજાયન્તે
અકવા મહોભિઃ । પૃશ્નેઃ પુત્રા ઉપમાસો રભિષ્ઠાઃ । સ્વયા મત્યા

મરુતઃ સંમિમિક્ષુઃ । અનુ તે દાયિ મહ ઇન્દ્રિયાય । સત્રા તે વિશ્વમનુ વૃત્રહત્યે । અનુ ક્ષત્ત્રમનુ સહો યજત્ર । ઇન્દ્ર દેવેભિરનુ તે નૃષહ્યે । ય ઇન્દ્ર શુષ્મો મઘવન્તે અસ્તિ ॥ ૨। ૮। ૫। ૭॥

૩૮ શિક્ષા સખિભ્યઃ પુરુહૂત નૃભ્યઃ । ત્વꣳ હિ દૃઢા મઘવન્વિચેતાઃ । અપાવૃધિ પરિવૃતિં ન રાધઃ । ઇન્દ્રો રાજા જગતશ્ચર્ષણીનામ્ । અધિક્ષમિ વિષુરૂપં યદસ્તિ । તતો દદાતુ દાશુષે વસૂનિ । ચોદદ્રાધ ઉપસ્તુતશ્ચિદર્વાક્ । તમુ ષ્ટુહિ યો અભિભૂત્યોજાઃ । વન્વન્નવાતઃ પુરુહૂત ઇન્દ્રઃ । અષાઢમુગ્રꣳ સહમાનમાભિઃ ।

૩૯ ગીર્ભિર્વર્ધ વૃષભં ચર્ષણીનામ્ । સ્થૂરસ્ય રાયો બૃહતો ય ઈશે । તમુ ષ્ટવામ વિદથેષ્વિન્દ્રમ્ । યો વાયુના જયતિ ગોમતીષુ । પ્ર ધૃષ્ણુયા નયતિ વસ્યો અચ્છ । આ તે શુષ્મો વૃષભ એતુ પશ્ચાત્ । ઓત્તરાદધરાગા પુરસ્તાત્ । આ વિશ્વતો અભિ સમેત્વર્વાઙ્ । ઇન્દ્ર દ્યુમ્નꣳ સુવર્વદ્ધેહ્યસ્મે ॥ ૨। ૮। ૫। ૮॥ વરાહૈર્વિશ્વહાઽજનિષ્ટ પૂષોદ્ધરીવૃજત્ખાદયો વઃ પાન્ત્યસ્ત્યાભિર્નવ ચ ॥ ૫॥

૪૦ આ દેવો યાતુ સવિતા સુરત્નઃ । અન્તરિક્ષપ્રા વહમાનો અશ્વૈઃ । હસ્તે દધાનો નર્યા પુરૂણિ । નિવેશયન્ચ પ્રસુવઞ્ચ ભૂમ । અભીવૃતં કૃશનૈર્વિશ્વરૂપમ્ । હિરણ્યશમ્યં યજતો બૃહન્તમ્ । આસ્થાદ્રથꣳ સવિતા ચિત્રભાનુઃ । કૃષ્ણા રજાꣳસિ તવિષીં દધાનઃ । સદ્યા નો દેવઃ સવિતા સવાય । આસાવિષદ્વસુપતિર્વસૂનિ ॥ ૨। ૮। ૬। ૧॥

૪૧ વિશ્રયમાણો અમતિમુરૂચીમ્ । મર્તભોજનમધ રાસતે ન । વિ જનાઞ્છ્યાવાઃ શિતિપાદો અખ્યન્ । રથꣳ હિરણ્યપ્ર ઉગં વહન્તઃ । શશ્વદ્વિશઃ સવિતુર્દૈવ્યસ્ય । ઉપસ્થે વિશ્વા ભુવનાનિ તસ્થુઃ । વિ સુપર્ણો અન્તરિક્ષાણ્યખ્યત્ । ગભીરવેપા અસુરઃ સુનીથઃ । ક્વેદાનીꣳ સૂર્યઃ કશ્ચિકેત । કતમાં દ્યાꣳ રશ્મિરસ્યાતતાન ॥ ૨। ૮। ૬। ૨॥

૪૨ ભગં ધિયં વાજયન્તઃ પુરન્ધિમ્ । નરાશꣳસો ગ્નાસ્પતિર્નો અવ્યાત્ । આઽયે વામસ્ય સંગથે રયીણામ્ । પ્રિયા દેવસ્ય સવિતુઃ સ્યામ । આ નો વિશ્વે અસ્ક્રા ગમન્તુ દેવાઃ । મિત્રો અર્યમા વરુણઃ સજોષાઃ । ભુવન્

યથા નો વિશ્વે વૃધાસઃ । કરન્થ્સુષાહા વિથુરં ન શવઃ । શં નો
દેવા વિશ્વદેવા ભવન્તુ । શꣳ સરસ્વતી સહ ધીભિરસ્તુ ॥ ૨। ૮। ૬। ૩॥
૪૩ શમભિષાચઃ શમુ રાતિષાચઃ । શં નો દિવ્યાઃ પાર્થિવાઃ શં નો
અપ્યાઃ । યે સવિતુઃ સત્યસવસ્ય વિશ્વે । મિત્રસ્ય વ્રતે વરુણસ્ય દેવાઃ
। તે સૌભગં વીરવદ્ગોમદપ્નઃ । દધાતન દ્રવિણં ચિત્રમસ્મે । અગ્ને
યાહિ દૂત્યં વારિષેણ્યઃ । દેવાꣳ અચ્છા બ્રહ્મકૃતા ગણેન । સરસ્વતીં
મરુતો અશ્વિનાઽપઃ । યક્ષિ દેવાન્રત્નધેયાય વિશ્વાન્ ॥ ૨। ૮। ૬। ૪॥
૪૪ દ્યૌઃ પિતઃ પૃથિવિ માતરધ્રુક્ । અગ્ને ભ્રાતર્વસવો મૃડતા નઃ ।
વિશ્વ આદિત્યા અદિતે સજોષાઃ । અસ્મભ્યꣳ શર્મ બહુલં વિયન્ત ।
વિશ્વે દેવાઃ શꣳૃણુતેમꣳ હવં મે । યે અન્તરિક્ષે ય ઉપ દ્યવિ ષ્ઠ ।
યે અગ્નિજિહ્વા ઉત વા યજત્રાઃ । આસદ્યાસ્મિન્બર્હિષિ માદયધ્વમ્ । આ વાં
મિત્રાવરુણા હવ્યજુષ્ટિમ્ । નમસા દેવાવવસાઽઽવવૃત્યામ્ ॥ ૨। ૮। ૬। ૫॥
૪૫ અસ્માકં બ્રહ્મ પૃતનાસુ સહ્યા અસ્માકમ્ । વૃષ્ટિર્દિવ્યા સુપારા ।
યુવં વસ્ત્રાણિ પીવસા વસાથે । યુવોરચ્છિદ્રા મન્તવો હ સર્ગાઃ ।
અવાતિરતમનૃતાનિ વિશ્વા । ઋતેન મિત્રાવરુણા સચેથે । તથ્સુ વાં
મિત્રાવરુણા મહિત્વમ્ । ઈર્મા તસ્થુષીરહભિર્દુદુહ્રે । વિશ્વાઃ પિન્વથ
સ્વસરસ્ય ધેનાઃ । અનુ વામેકઃ પવિરાવવર્તિ ॥ ૨। ૮। ૬। ૬॥
૪૬ યદ્બꣳહિષ્ઠં નાતિવિદે સુદાનૂ । અચ્છિદ્રꣳ શર્મ ભુવનસ્ય ગોપા
। તતો નો મિત્રાવરુણાવવીષ્ટમ્ । સિષાસન્તો જીગિવાꣳસઃ સ્યામ । આ નો મિત્રાવરુણા
હવ્યદાતિમ્ । ઘૃતૈર્ગવ્યૂતિમુક્ષતમિડાભિઃ । પ્રતિવામત્ર વરમા જનાય
। પૃણીતમુદ્નો દિવ્યસ્ય ચારોઃ । પ્ર બાહવા સિસૃતં જીવસે નઃ । આ નો
ગવ્યૂતિમુક્ષતં ઘૃતેન ॥ ૨। ૮। ૬। ૭॥
૪૭ આ નો જને શ્રવયતં યુવાના । શ્રુતં મે મિત્રાવરુણા હવેમા । ઇમા રુદ્રાય
સ્થિરધન્વને ગિરઃ । ક્ષિપ્રેષવે દેવાય સ્વધામ્ને । અષાઢાય
સહમાનાય મીઢુષે । તિગ્માયુધાય ભરતા શꣳૃણોતન । ત્વા દત્તેભી રુદ્ર
શંતમેભિઃ । શતꣳ હિમા અશીય ભેષજેભિઃ । વ્યસ્મદ્દ્વેષો વિતરં
વ્યꣳહઃ । વ્યમીવાશ્ચાતયસ્વા વિષૂચીઃ ॥ ૨। ૮। ૬। ૮॥

૪૮ અર્હન્બિભર્ષિ મા નસ્તોકે । આ તે પિતર્મરુતાꣳ સુમ્નમેતુ । મા નઃ
સૂર્યસ્ય સંદૃશો યુયોથાઃ । અભિ નો વીરો અર્વતિ ક્ષમેત । પ્રજાયેમહિ
રુદ્ર પ્રજાભિઃ । એવા બભ્રો વૃષભ ચેકિતાન । યથા દેવ ન હૃણીષે
ન હꣳસિ । હાવનશ્રૂર્નો રુદ્રેહ બોધિ । બૃહદ્વદેમ વિદથે
સુવીરાઃ । પરિ ણો રુદ્રસ્ય હેતિઃ સ્તુહિ શ્રુતમ્ । મીઢુષ્ટમાર્હન્બિભર્ષિ
। ત્વમગ્ને રુદ્ર આ વો રાજાનમ્ ॥ ૨। ૮। ૬। ૯॥ વસૂનિ તતાનાસ્તુ વિશ્વાન્ વવૃત્યાં
વવર્તિ ઘૃતેન વિષૂચીઃ શ્રુતં દ્વે ચ ॥ ૬॥

૪૯ સૂર્યો દેવીમુષસꣳ રોચમાના મર્યઃ । ન યોષામભ્યેતિ પશ્ચાત્
। યત્રા નરો દેવયન્તો યુગાનિ । વિતન્વતે પ્રતિ ભદ્રાય ભદ્રમ્ ।
ભદ્રા અશ્વા હરિતઃ સૂર્યસ્ય । ચિત્રા એદગ્વા અનુમાદ્યાસઃ । નમસ્યન્તો
દિવ આ પૃષ્ઠમસ્થુઃ । પરિ દ્યાવાપૃથિવી યન્તિ સદ્યઃ । તથ્સૂર્યસ્ય
દેવત્વં તન્મહિત્વમ્ । મધ્યા કર્તોર્વિતતꣳ સંજભાર ॥ ૨। ૮। ૭। ૧॥

૫૦ યદેદયુક્ત હરિતઃ સધસ્થાત્ । આદ્રાત્રી વાસસ્તનુતે સિમસ્મૈ ।
તન્મિત્રસ્ય વરુણસ્યાભિચક્ષે । સૂર્યો રૂપં કૃણુતે દ્યોરુપસ્થે ।
અનન્તમન્યદ્રુશદસ્ય પાજઃ । કૃષ્ણમન્યદ્ધરિતઃ સંભરન્તિ ।
અદ્યા દેવા ઉદિતા સૂર્યસ્ય । નિરꣳહસઃ પિપૃતાન્નિરવદ્યાત્ । તન્નો
મિત્રો વરુણો મામહન્તામ્ । અદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૨। ૮। ૭। ૨॥

૫૧ દિવો રુક્મ ઉરુચક્ષા ઉદેતિ । દૂરેઅર્થસ્તરણિર્ભ્રાજમાનઃ । નૂનં
જનાઃ સૂર્યેણ પ્રસૂતાઃ । આયન્નર્થાનિ કૃણવન્નપાꣳસિ । શં નો ભવ
ચક્ષસા શં નો અહ્ના । શં ભાનુના શꣳ હિમાશં ઘૃણેન । યથા
શમસ્મૈ શમસદ્દુરોણે । તથ્સૂર્ય દ્રવિણં ધેહિ ચિત્રમ્ । ચિત્રં
દેવાનામુદગાદનીકમ્ । ચક્ષુર્મિત્રસ્ય વરુણસ્યાગ્નેઃ ॥ ૨। ૮। ૭। ૩॥

૫૨ આપ્રા દ્યાવાપૃથિવી અન્તરિક્ષમ્ । સૂર્ય આત્મા જગતસ્તસ્થુષશ્ચ ।
ત્વષ્ટા દધત્તન્નસ્તુરીપમ્ । ત્વષ્ટા વીરં પિશઙ્ગરૂપઃ । દશેમં
ત્વષ્ટુર્જનયન્ત ગર્ભમ્ । અતન્દ્રાસો યુવતયો બિભર્ત્રમ્ । તિગ્માનીકઙ્ગ્
સ્વયશસંજનેષુ । વિરોચમાનં પરિષીં નયન્તિ । આવિષ્ટ્યો વર્ધતે

ચારુરાસુ । જિહ્માનામૂર્ધ્વઃ સ્વયશા ઉપસ્થે ॥ ૨। ૮। ૭। ૪॥

૫૩ ઉભે ત્વષ્ટુર્બિભ્યતુર્જાયમાનાત્ । પ્રતીચી સિ ँ હં પ્રતિજોષયેતે
। મિત્રો જનાન્ પ્રસમિત્ર । અયં મિત્રો નમસ્યઃ સુશેવઃ । રાજા
સુક્ષત્રો અજનિષ્ટ વેધાઃ । તસ્ય વય ँ સુમતૌ યજ્ઞિયસ્ય । અપિ
ભદ્રે સૌમનસે સ્યામ । અનમીવાસ ઇડયા મદન્તઃ । મિતજ્ઞવો
વરિમન્ના પૃથિવ્યાઃ । આદિત્યસ્ય વ્રતમુપક્ષ્યન્તઃ ॥ ૨। ૮। ૭। ૫॥

૫૪ વયં મિત્રસ્ય સુમતૌ સ્યામ । મિત્રં ન ઈ ँ શિમ્યા ગોષુ ગવ્યવત્ ।
સ્વાધિયો વિદથે અપ્સ્વજીજનન્ । અરેજયતા ँ રોદસી પાજસા ગિરા ।
પ્રતિ પ્રિયં યજતં જનુષામવઃ । મહા ँ આદિત્યો નમસોપસદ્યઃ
। યાતયજ્જનો ગૃણતે સુશેવઃ । તસ્મા એતત્પન્યતમાય જુષ્ટમ્ । અગ્નૌ
મિત્રાય હવિરાજુહોત । આ વા ँ રથો રોદસી બદ્બધાનઃ ॥ ૨। ૮। ૭। ૬॥

૫૫ હિરણ્યયો વૃષભિર્યાત્વશ્વૈઃ । ઘૃતવર્તનિઃ પવિભી રુચાનઃ
। ઇષાં વોઢા નૃપતિર્વાજિનીવાન્ । સ પપ્રથાનો અભિ પઞ્ચભૂમ ।
ત્રિવન્ધુરો મનસાઽઽયાતુ યુક્તઃ । વિશો યેન ગચ્છથો દેવયન્તીઃ ।
કુત્રાચિદ્યામમશ્વિના દધાના । સ્વશ્વા યશસાઽઽયાતમર્વાક્ । દસ્રા
નિધિં મધુમન્તં પિબાથઃ । વિ વા ँ રથો વધ્વા યાદમાનઃ ॥ ૨। ૮। ૭। ૭॥

૫૬ અન્તાન્દિવો બાધતે વર્તનિભ્યામ્ । યુવોઃ શ્રિયં પરિ યોષા વૃણીત । સૂરો
દુહિતા પરિતક્મિયાયામ્ । યદ્દેવયન્તમવથઃ શચીભિઃ । પરિઘ્ર ँ
સવાં મનાવાં વયોગામ્ । યો હ સ્ય વા ँ રથિરા વસ્ત ઉસ્રાઃ । રથો
યુજાનઃ પરિયાતિ વર્તિઃ । તેન નઃ શં યોરુષસો વ્યુષ્ટૌ । ન્યશ્વિના
વહતં યજ્ઞે અસ્મિન્ । યુવં ભુજ્યુમવવિદ્ધ ँ સમુદ્રે ॥ ૨। ૮। ૭। ૮॥

૫૭ ઉદૂહથુરર્ણસો અસ્રિધાનૈઃ । પતત્રિભિરશ્રમૈરવ્યથિભિઃ ।
દ ँ સનાભિરશ્વિના પારયન્તા । અગ્નીષોમા યો અદ્ય વામ્ । ઇદં વચઃ
સપર્યતિ । તસ્મૈ ધત્ત ँ સુવીર્યમ્ । ગવાં પોષગ્ગ્ સ્વશ્વિયમ્ । યો
અગ્નીષોમા હવિષા સપર્યાત્ । દેવદ્રીચા મનસા યો ઘૃતેન । તસ્ય
વ્રત ँ રક્ષતં પાતમ ँ હસઃ ॥ ૨। ૮। ૭। ૯॥

૫૮ વિશે જનાય મહિ શર્મ યચ્છતમ્ । અગ્નીષોમા ય આહુતિમ્ । યો વાં

દાશાદ્ધુવિષ્કૃતિમ્ । સ પ્રજયા સુવીર્યમ્ । વિશ્વમાયુર્વ્યશ્નવત્
। અગ્નીષોમા ચેતિ તદ્વીર્યં વામ્ । યદમુષ્ણીતમવસં પણિં ગોઃ ।
અવાતિરતં પ્રથયસ્ય શેષઃ । અવિન્દતં જ્યોતિરેકં બહુભ્યઃ ।
અગ્નીષોમાવિમꣳ સુમેઽગ્નીષોમા હવિષઃ પ્રસ્થિતસ્ય ॥ ૨। ૮। ૭। ૧૦॥ જભાર
ધૌરગ્નેરુપસ્થ ઉપક્ષ્યન્તો બદ્ધધાનો યાદમાનઃ સમુદ્રેઽꣳ હસઃ
પ્રસ્થિતસ્ય ॥ ૭॥

૫૯ અહમસ્મિ પ્રથમજા ઋતસ્ય । પૂર્વં દેવેભ્યો અમૃતસ્ય
નાભિઃ । યો મા દદાતિ સ ઇદેવ માઽઽવાઃ । અહમન્નમન્નમદન્તમદ્મિ ।
પૂર્વમગ્નેરપિ દહત્યન્નમ્ । યત્તૌ હાઽઽસાતે અહમુત્તરેષુ । વ્યાત્તમસ્ય
પશવઃ સુજમ્ભમ્ । પશ્યન્તિ ધીરાઃ પ્રચરન્તિ પાકાઃ । જહામ્યન્યં
ન જહામ્યન્યમ્ । અહમન્નં વશમિચ્ચરામિ ॥ ૨। ૮। ૮। ૧॥

૬૦ સમાનમર્થં પર્યેમિ ભુઞ્જત્ । કો મામન્નં મનુષ્યો દયેત । પરાકે
અન્નં નિહિતં લોક એતત્ । વિશ્વૈર્દેવૈઃ પિતૃભિર્ગુપ્તમન્નમ્ ।
યદદ્યતે લુપ્યતે યત્પરોપ્યતે । શતતમી સા તનૂર્મે બભૂવ ।
મહાન્તૌ ચરૂ સકૃદ્દુગ્ધેન પપ્રૌ । દિવં ચ પૃશ્નિ પૃથિવીં
ચ સાકમ્ । તથ્સંપિબન્તો ન મિનન્તિ વેધસઃ । નૈતદ્ભૂયો ભવતિ
નો કનીયઃ ॥ ૨। ૮। ૮। ૨॥

૬૧ અન્નં પ્રાણમન્નમપાનમાહુઃ । અન્નં મૃત્યું તમુ જીવાતુમાહુઃ । અન્નં
બ્રહ્માણો જરસં વદન્તિ । અન્નમાહુઃ પ્રજનનં પ્રજાનામ્ । મોઘમન્નં
વિન્દતે અપ્રચેતાઃ । સત્યં બ્રવીમિ વધ ઇથ્સ તસ્ય । નાર્યમણં પુષ્યતિ
નો સખાયમ્ । કેવલાઘો ભવતિ કેવલાદી । અહં મેઘઃ સ્તનયન્વર્ષન્નસ્મિ ।
મામદન્ત્યહમદ્મ્યન્યાન્ ॥ ૨। ૮। ૮। ૩॥

૬૨ અહꣳ સદમૃતો ભવામિ । મદાદિત્યા અધિ સર્વે તપન્તિ । દેવીં
વાચમજનયન્ત યદ્વાગ્વદન્તી । અનન્તામન્તાદધિનિર્મિતાં મહીમ્ । યસ્યાં
દેવા અદધુર્ભોજનાનિ । એકાક્ષરાં દ્વિપદાꣳ ષટ્પદાં ચ । વાચં
દેવા ઉપજીવન્તિ વિશ્વે । વાચં દેવા ઉપજીવન્તિ વિશ્વે । વાચં ગન્ધર્વાઃ
પશવો મનુષ્યાઃ । વાચીમા વિશ્વા ભુવનાન્યર્પિતા ॥ ૨। ૮। ૮। ૪॥

૬૩ સા નો હવં જુષતામિન્દ્રપત્ની । વાગક્ષરં પ્રથમજા ઋતસ્ય । વેદાનાં માતાઽમૃતસ્ય નાભિઃ । સા નો જુષાણોપયજ્ઞમાગાત્ । અવન્તી દેવી સુહવા મે અસ્તુ । યામૃષયો મન્ત્રકૃતો મનીષિણઃ । અન્વૈચ્છન્દેવાસ્તપસા શ્રમેણ । તાં દેવીં વાચꣳહવિષા યજામહે । સા નો દધાતુ સુકૃતસ્ય લોકે । ચત્વારિ વાક્પરિમિતા પદાનિ ॥ ૨। ૮। ૮। ૫॥

૬૪ તાનિ વિદુર્બ્રાહ્મણા યે મનીષિણઃ । ગુહા ત્રીણિ નિહિતા નેઙ્ગયન્તિ । તુરીયં વાચો મનુષ્યા વદન્તિ । શ્રદ્ધયાઽગ્નિઃ સમિધ્યતે । શ્રદ્ધયા વિન્દતે હવિઃ । શ્રદ્ધાં ભગસ્ય મૂર્ધનિ । વચસાઽઽવેદયામસિ । પ્રિયꣳ શ્રદ્ધે દદતઃ । પ્રિયꣳ શ્રદ્ધે દિદાસતઃ । પ્રિયં ભોજેષુ યજ્વસુ ॥ ૨। ૮। ૮। ૬॥

૬૫ ઇદં મ ઉદિતં કૃધિ । યથા દેવા અસુરેષુ । શ્રદ્ધામુગ્રેષુ ચક્રિરે । એવં ભોજેષુ યજ્વસુ । અસ્માકમુદિતં કૃધિ । શ્રદ્ધાં દેવા યજમાનાઃ । વાયુગોપા ઉપાસતે । શ્રદ્ધાꣳ હૃદય્યયાઽઽકૂત્યા । શ્રદ્ધયા હૂયતે હવિઃ । શ્રદ્ધાં પ્રાતર્હવામહે ॥ ૨। ૮। ૮। ૭॥

૬૬ શ્રદ્ધાં મધ્યંદિનં પરિ । શ્રદ્ધાꣳ સૂર્યસ્ય નિમ્રુચિ । શ્રદ્ધે શ્રદ્ધાપયેહ મા । શ્રદ્ધા દેવાનધિવસ્તે । શ્રદ્ધા વિશ્વમિદં જગત્ । શ્રદ્ધાં કામસ્ય માતરમ્ । હવિષા વર્ધયામસિ । બ્રહ્મ જજ્ઞાનં પ્રથમં પુરસ્તાત્ । વિ સીમતઃ સુરુચો વેન આવઃ । સ બુધ્નિયા ઉપમા અસ્ય વિષ્ઠાઃ ॥ ૨। ૮। ૮। ૮॥

૬૭ સતશ્ચ યોનિમસતશ્ચ વિવઃ । પિતા વિરાજામૃષભો રયીણામ્ । અન્તરિક્ષં વિશ્વરૂપ આવિવેશ । તમર્કૈરભ્યર્ચન્તિ વત્સમ્ । બ્રહ્મ સન્તં બ્રહ્મણા વર્ધયન્તઃ । બ્રહ્મ દેવાનજનયત્ । બ્રહ્મ વિશ્વમિદં જગત્ । બ્રહ્મણઃ, ક્ષત્રં નિર્મિતમ્ । બ્રહ્મ બ્રાહ્મણ આત્મના । અન્તરસ્મિન્નિમે લોકાઃ ॥ ૨। ૮। ૮। ૯॥

૬૮ અન્તર્વિશ્વમિદં જગત્ । બ્રહ્મૈવ ભૂતાનાં જ્યેષ્ઠમ્ । તેન કોઽર્હતિ સ્પર્ધિતુમ્ । બ્રહ્મન્દેવાસ્ત્રયસ્ત્રિꣳશત્ । બ્રહ્મન્નિન્દ્રપ્રજાપતી । બ્રહ્મન્ હ વિશ્વા ભૂતાનિ । નાવીવાન્તઃ સમાહિતા । ચતસ્ર આશાઃ પ્રચરન્ત્વગ્નયઃ

। ઇમં નો યજ્ઞં નયતુ પ્રજાનન્ । ઘૃતં પિન્વન્નજરꣳ સુવીરમ્ ॥
૨। ૮। ૮। ૧૦॥

૬૯ બ્રહ્મ સમિદ્ભવત્યાહુતીનામ્ । આ ગાવો અગ્મન્નુત ભદ્રમક્રન્ ।
સીદન્તુ ગોષ્ઠે રણયન્ત્વસ્મે । પ્રજાવતીઃ પુરુરૂપા ઇહ સ્યુઃ । ઇન્દ્રાય
પૂર્વીરુષસો દુહાનાઃ । ઇન્દ્રો યજ્વને પૃણતે ચ શિક્ષતિ । ઉપેદ્દદાતિ ન
સ્વં મુષાયતિ । ભૂયો ભૂયો રયિમિદસ્ય વર્ધયન્ । અભિન્ને ખિલ્લે નિદધાતિ
દેવયુમ્ । ન તાનશન્તિ ન તા અર્વા ॥ ૨। ૮। ૮। ૧૧॥

૭૦ ગાવો ભગો ગાવ ઇન્દ્રો મે અચ્છાત્ । ગાવઃ સોમસ્ય પ્રથમસ્ય ભક્ષઃ
। ઇમા યા ગાવઃ સ જનાસ ઇન્દ્રઃ । ઇચ્છામીદ્ધૃદા મનસા ચિદિન્દ્રમ્ ।
યૂયં ગાવો મેદયથા કૃશં ચિત્ । અશ્રીલં ચિત્કૃણુથા સુપ્રતીકમ્ ।
ભદ્રં ગૃહં કૃણુથ ભદ્રવાચઃ । બૃહદ્વો વય ઉચ્યતે સભાસુ ।
પ્રજાવતીઃ સૂયવસꣳ રિશન્તીઃ । શુદ્ધા અપઃ સુપ્રપાણે પિબન્તીઃ ।
મા વઃ સ્તેન ઈશત માઽઘશꣳસઃ । પરિ વો હેતી રુદ્રસ્ય વૃઞ્જ્યાત્
। ઉપેદમુપ પર્ચનમ્ । આસુ ગોષૂપપૃચ્યતામ્ । ઉપર્ષભસ્ય રેતસિ ।
ઉપેન્દ્ર તવ વીર્યે ॥ ૨। ૮। ૮। ૧૨॥ ચરામિ કનીયોઽન્યાનર્પિતા પદાનિ
યજ્વસુ હવામહે વિષ્ઠા લોકાઃ સુવીરમર્વા પિબન્તીષ્ટ્ ચ ॥ ૮॥

૭૧ તા સૂર્યાચન્દ્રમસા વિશ્વભૃત્તમા મહત્ । તેજો વસુમદ્રાજતો દિવિ
। સામાત્માના ચરતઃ સામચારિણા । યયોર્વ્રતં ન મમે જાતુ દેવયોઃ ।
ઉભાવન્તૌ પરિયાત અર્મ્યા । દિવો ન રશ્મીꣳસ્તનુતો વ્યર્ણવે । ઉભા
ભુવન્તી ભુવના કવિક્રતૂ । સૂર્યા ન ચન્દ્રા ચરતો હતામતી । પતી
દ્યુમદ્વિશ્વવિદા ઉભા દિવઃ । સૂર્યા ઉભા ચન્દ્રમસા વિચક્ષણા ॥ ૨। ૮। ૯। ૧॥

૭૨ વિશ્વવારા વરિવોભા વરેણ્યા । તા નોઽવતં મતિમન્તા મહિવ્રતા ।
વિશ્વવપરી પ્રતરણા તરન્તા । સુવર્વિદા દૃશયે ભૂરિરશ્મી ।
સૂર્યા હિ ચન્દ્રા વસુ ત્વેષ દર્શતા । મનસ્વિનોભાઽનુચરતો નુ
સં દિવમ્ । અસ્ય શ્રવો નદ્યઃ સપ્ત બિભ્રતિ । દ્યાવા ક્ષામા પૃથિવી
દર્શતં વપુઃ । અસ્મે સૂર્યાચન્દ્રમસાઽભિચક્ષે । શ્રદ્ધે કમિન્દ્ર
ચરતો વિચર્તુરમ્ ॥ ૨। ૮। ૯। ૨॥

૭૩ પૂર્વાપરં ચરતો માયયૈતૌ । શિશૂ ક્રીડન્તૌ પરિયાતો અધ્વરમ્ ।
વિશ્વાન્યન્યો ભુવનાઽભિચષ્ટે । ઋતૂનન્યો વિદધજ્જાયતે પુનઃ ।
હિરણ્યવર્ણાઃ શુચયઃ પાવકા યાસા ँ રાજા । યાસાં દેવાઃ શિવેન મા
ચક્ષુષા પશ્યત । આપો ભદ્રા આદિત્પશ્યામિ । નાસદાસીન્નો સદાસીત્તદાનીમ્ ।
નાસીદ્રજો નો વ્યોમાપરો યત્ । કિમાવરીવઃ કુહ કસ્ય શર્મન્ ॥ ૨। ૮। ૯। ૩॥

૭૪ અમ્ભઃ કિમાસીદ્ગહનં ગભીરમ્ । ન મૃત્યુરમૃતં તર્હિ ન । રાત્રિયા
અહ્ન આસીત્પ્રકેતઃ । આનીદવાતર ँ સ્વધયા તદેકમ્ । તસ્માદ્ધાન્યં ન પરઃ
કિંચ નાસ । તમ આસીત્તમસા ગૂઢમગ્રે પ્રકેતમ્ । સલિલ ँ સર્વમા
ઇદમ્ । તુચ્છેનાભ્વપિહિતં યદાસીત્ । તમસસ્તન્મહિના જાયતૈકમ્ ।
કામસ્તદગ્રે સમવર્તતાધિ ॥ ૨। ૮। ૯। ૪॥

૭૫ મનસો રેતઃ પ્રથમં યદાસીત્ । સતો બન્ધુમસતિ નિરવિન્દન્ ।
હૃદિ પ્રતીષ્યા કવયો મનીષા । તિરશ્ચીનો વિતતો રશ્મિરેષામ્ ।
અધઃ સ્વિદાસી ૩ દુપરિ સ્વિદાસી ૩ ત્ । રેતોધા આસન્મહિમાન આસન્ । સ્વધા
અવસ્તાત્પ્રયતિઃ પરસ્તાત્ । કો અદ્ધા વેદ ક ઇહ પ્રવોચત્ । કુત આજાતા
કુત ઇયં વિસૃષ્ટિઃ । અર્વાગ્દેવા અસ્ય વિસર્જનાય ॥ ૨। ૮। ૯। ૫॥

૭૬ અથા કો વેદ યત આ બભૂવ । ઇયં વિસૃષ્ટિર્યત આબભૂવ ।
યદિ વા દધે યદિ વા ન । યો અસ્યાધ્યક્ષઃ પરમે વ્યોમન્ । સો અઙ્ગ
વેદ યદિ વા ન વેદ । કિર ँ સ્વિદ્વનં ક ઉ સ વૃક્ષ આસીત્ ।
યતો દ્યાવાપૃથિવી નિષ્ટતક્ષુઃ । મનીષિણો મનસા પૃચ્છતેદુ તત્ ।
યદધ્યતિષ્ઠદ્ભુવનાનિ ધારયન્ । બ્રહ્મ વનં બ્રહ્મ સ વૃક્ષ આસીત્
॥ ૨। ૮। ૯। ૬॥

૭૭ યતો દ્યાવાપૃથિવી નિષ્ટતક્ષુઃ । મનીષિણો મનસા વિબ્રવીમિ વઃ ।
બ્રહ્માધ્યતિષ્ઠદ્ભુવનાનિ ધારયન્ । પ્રાતરગ્નિં પ્રાતરિન્દ્ર ँહવામહે ।
પ્રાતર્મિત્રાવરુણા પ્રાતરશ્વિના । પ્રાતર્ભગં પૂષણં બ્રહ્મણસ્પતિમ્ ।
પ્રાતઃ સોમમુત રુદ્ર ँ હુવેમ । પ્રાતર્જિતં ભગમુગ્ર ँ હુવેમ ।
વયં પુત્રમદિતેર્યો વિધર્તા । આધ્રશ્ચિદ્યં મન્યમાનસ્તુરશ્ચિત્ ॥
૨। ૮। ૯। ૭॥

૭૮ રાજાચિદ્ધં ભગં ભક્ષીત્યાહ । ભગ પ્રણેતર્ભગ સત્યરાધઃ ।
ભગેમાં ધિયમુદવ દદન્નઃ । ભગ પ્ર ણો જનય ગોભિરશ્વૈઃ । ભગ
પ્ર નૃભિર્નૃવન્તઃ સ્યામ । ઉતેદાનીં ભગવન્તઃ સ્યામ । ઉત પ્રપિત્વ ઉત
મધ્યે અહ્નામ્ । ઉતોદિતા મઘવન્થ્સૂર્યસ્ય । વયં દેવાના સુમતૌ
સ્યામ । ભગ એવ ભગવા અસ્તુ દેવાઃ ॥ ૨। ૮। ૯। ૮॥

૭૯ તેન વયં ભગવન્તઃ સ્યામ । તં ત્વા ભગ સર્વ ઇજ્જોહવીમિ । સ નો ભગ
પુર એતા ભવેહ । સમધ્વરાયોષસો નમન્ત । દધિક્રાવેવ શુચયે
પદાય । અર્વાચીનં વસુવિદં ભગં નઃ । રથમિવાશ્વા વાજિન
આવહન્તુ । અશ્વાવતીર્ગોમતીર્ન ઉષાસઃ । વીરવતીઃ સદમુચ્છન્તુ ભદ્રાઃ
। ઘૃતં દુહાના વિશ્વતઃ પ્રપીનાઃ । યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥
૨। ૮। ૯। ૯॥

વિચક્ષણા વિચર્તુર શર્મન્નધિવિસર્જનાય બ્રહ્મ વનં
બ્રહ્મ સ વૃક્ષ આસીત્તુરશ્ચિદ્દેવાઃ પ્રપીના એકં ચ ॥ ૯॥
પીવોઽન્નાન્તે શુક્રાસઃ સોમો ધેનુમિન્દ્રસ્તરસ્વાઞ્છુચિમા દેવો યાતુ
સૂર્યો દેવીમહમસ્મિ તા સૂર્યાચન્દ્રમસા નવ ॥ ૯॥
પીવોઽન્નાનગ્ને ત્વં પારયાનાધૃષ્યઃ શુચિં નુ સ્તોમં વિશ્રયમાણો દિવો
રુક્મોઽન્નં પ્રાણમન્નં તા સૂર્યાચન્દ્રમસા નવસપ્તતિઃ ॥ ૭૯॥
પીવોઽન્નાન્, યૂયં પાતસ્વસ્તિભિઃ સદાનઃ ॥

ઇતિ દ્વિતીયં અષ્ટકં સંપૂર્ણમ્ ॥

॥ તૈત્તિરીય-બ્રાહ્મણમ્ ॥

# તૈત્તિરીય-બ્રાહ્મણમ્

## ॥ તૃતીયં અષ્ટકમ્ ॥

॥ શ્રી ગુરુભ્યો નમઃ ॥ હરિઃ ઓ(૪)મ્ ॥

## તૃતીયાષ્ટકે પ્રથમઃ પ્રપાઠકઃ ૧

### નક્ષત્રેષ્ટિ

૧ અગ્નિર્નઃ પાતુ કૃત્તિકાઃ । નક્ષત્રં દેવમિન્દ્રિયમ્ । ઇદમાસાં
વિચક્ષણમ્ । હવિરાસં જુહોતન । યસ્ય ભાન્તિ રશ્મયો યસ્ય કેતવઃ
। યસ્યેમા વિશ્વા ભુવનાનિ સર્વા । સ કૃત્તિકાભિરભિ સંવસાનઃ ।
અગ્નિર્નો દેવઃ સુવિતે દધાતુ । પ્રજાપતે રોહિણી વેતુ પત્ની ।
વિશ્વરૂપા બૃહતી ચિત્રભાનુઃ ॥ ૩। ૧। ૧। ૧॥

૨ સા નો યજ્ઞસ્ય સુવિતે દધાતુ । યથા જીવેમ શરદઃ સવીરાઃ
। રોહિણી દેવ્યુદગાત્પુરસ્તાત્ । વિશ્વા રૂપાણિ પ્રતિમોદમાના ।
પ્રજાપતિꣳ હવિષા વર્ધયન્તી । પ્રિયા દેવાનામુપયાતુ યજ્ઞમ્ ।
સોમો રાજા મૃગશીર્ષેણ આગન્ । શિવં નક્ષત્રં પ્રિયમસ્ય ધામ
। આપ્યાયમાનો બહુધા જનેષુ । રેતઃ પ્રજાં યજમાને દધાતુ ॥ ૩। ૧। ૧। ૨॥

૩ યત્તે નક્ષત્રં મૃગશીર્ષમસ્તિ । પ્રિયꣳ રાજન્પ્રિયતમં પ્રિયાણામ્
। તસ્મૈ તે સોમ હવિષા વિધેમ । શં ન એધિ દ્વિપદે શં ચતુષ્પદે ।
આર્દ્રયા રુદ્રઃ પ્રથમાન એતિ । શ્રેષ્ઠો દેવાનાં પતિરઘ્નિયાનામ્ ।
નક્ષત્રમસ્ય હવિષા વિધેમ । મા નઃ પ્રજાꣳ રીરિષન્મોત વીરાન્ ।
હેતી રુદ્રસ્ય પરિ ણો વૃણક્તુ । આર્દ્રા નક્ષત્રં જુષતાꣳ હવિર્નઃ ॥

૩। ૧। ૧। ૩॥

૪ પ્રમુઞ્ચમાનૌ દુરિતાનિ વિશ્વા । અપાઘશ ꣳ સં નુદતામરાતિમ્
। પુનર્નો દેવ્યદિતિઃ સ્પૃણોતુ । પુનર્વસૂ નઃ પુનરેતાં યજ્ઞમ્ ।
પુનર્નો દેવા અભિયન્તુ સર્વે । પુનઃ પુનર્વો હવિષા યજામઃ । એવા ન
દેવ્યદિતિરનર્વા । વિશ્વસ્ય ભર્ત્રી જગતઃ પ્રતિષ્ઠા । પુનર્વસૂ હવિષા
વર્ધયન્તી । પ્રિયં દેવાનામપ્યેતુ પાથઃ ॥ ૩। ૧। ૧। ૪॥

૫ બૃહસ્પતિઃ પ્રથમં જાયમાનઃ । તિષ્યં નક્ષત્રમભિ સંબભૂવ ।
શ્રેષ્ઠો દેવાનાં પૃતનાસુ જિષ્ણુઃ । દિશો નુ સર્વા અભયં નો અસ્તુ ।
તિષ્યઃ પુરસ્તાદુત મધ્યતો નઃ । બૃહસ્પતિર્નઃ પરિપાતુ પશ્ચાત્
। બાધેતાં દ્વેષો અભયં કૃણુતામ્ । સુવીર્યસ્ય પતયઃ સ્યામ । ઇદ ꣳ
સર્પેભ્યો હવિરસ્તુ જુષ્ટમ્ । આશ્રેષા યેષામનુયન્તિ ચેતઃ ॥ ૩। ૧। ૧। ૫॥

૬ યે અન્તરિક્ષં પૃથિવીં ક્ષિયન્તિ । તે નઃ સર્પાસો હવમાગમિષ્ઠાઃ
। યે રોચને સૂર્યસ્યાપિ સર્પાઃ । યે દિવં દેવીમનુ સંચરન્તિ ।
યેષામાશ્રેષા અનુયન્તિ કામમ્ । તેભ્યઃ સર્પેભ્યો મધુમજ્જુહોમિ ।
ઉપહૂતાઃ પિતરો યે મઘાસુ । મનોજવસઃ સુકૃતઃ સુકૃત્યાઃ । તે નો
નક્ષત્રે હવમાગમિષ્ઠાઃ । સ્વધાભિર્યજ્ઞં પ્રયતં જુષન્તામ્ ॥ ૩। ૧। ૧। ૬॥

૭ યે અગ્નિદગ્ધા યેઽનગ્નિદગ્ધાઃ । યેઽમું લોકં પિતરઃ, ક્ષિયન્તિ ।
યાꣳશ્ચ વિદ્મ યા ꣳ ઉ ચ ન પ્રવિદ્મ । મઘાસુ યજ્ઞ ꣳ સુકૃતં
જુષન્તામ્ । ગવાં પતિઃ ફલ્ગુનીનામસિ ત્વમ્ । તદર્યમન્વરુણ મિત્ર ચારુ ।
તં ત્વા વય ꣳ સનિતાર ꣳ સનીનામ્ । જીવા જીવન્તમુપ સંવિશેમ ।
યેનેમા વિશ્વા ભુવનાનિ સંજિતા । યસ્ય દેવા અનુ સંયન્તિ ચેતઃ ॥

૮ અર્યમા રાજાઽજરસ્તુવિષ્માન્ । ફલ્ગુનીનામૃષભો રોરવીતિ । શ્રેષ્ઠો
દેવાનાં ભગવો ભગાસિ । તત્ત્વા વિદુઃ ફલ્ગુનીસ્તસ્ય વિત્તાત્ । અસ્મભ્યં
ક્ષત્રમજર ꣳ સુવીર્યમ્ । ગોમદશ્વવદુપ સંનુદેહ । ભગો
હ દાતા ભગ ઇત્પ્રદાતા । ભગો દેવીઃ ફલ્ગુનીરાવિવેશ । ભગસ્યેત્તં
પ્રસવં ગમેમ । યત્ર દેવૈઃ સધમાદં મદેમ ॥ ૩। ૧। ૧। ૮॥

૯ આયાતુ દેવઃ સવિતોપયાતુ । હિરણ્યયેન સુવૃતા રથેન । વહન્

હસ્તꣳસુભગં વિદ્મનાપસમ્ । પ્રયચ્છન્તં પપુરિં પુણ્યમચ્છ
। હસ્તઃ પ્રયચ્છત્વમૃતં વસીયઃ । દક્ષિણેન પ્રતિગૃભ્ણીમ એનત્ ।
દાતારમદ્ય સવિતા વિદેય । યો નો હસ્તાય પ્રસુવાતિ યજ્ઞમ્ । ત્વષ્ટા
નક્ષત્રમભ્યેતિ ચિત્રામ્ । સુભꣳસસં યુવતિꣳ રોચમાનામ્ ॥ ૩। ૧। ૧। ૯॥
૧૦ નિવેશયન્નમૃતાન્મર્ત્યાગ્શ્ચ । રૂપાણિ પિꣳશન્ભુવનાનિ વિશ્વા
। તન્નસ્ત્વષ્ટા તદુ ચિત્રા વિચષ્ટામ્ । તન્નક્ષત્રં ભૂરિદા અસ્તુ મહ્યમ્
। તન્નઃ પ્રજાં વીરવતીꣳ સનોતુ । ગોભિર્નો અશ્વૈઃ સમનક્તુ યજ્ઞમ્ ।
વાયુર્નક્ષત્રમભ્યેતિ નિષ્ટ્યામ્ । તિગ્મશૃઙ્ગો વૃષભો રોરુવાણઃ ।
સમીરયન્ભુવના માતરિશ્વા । અપ દ્વેષાꣳસિ નુદતામરાતીઃ ॥ ૩। ૧। ૧। ૧૦॥
૧૧ તન્નો વાયુસ્તદુ નિષ્ટ્યા શૃણોતુ । તન્નક્ષત્રં ભૂરિદા અસ્તુ મહ્યમ્
। તન્નો દેવાસો અનુજાનન્તુ કામમ્ । યથા તરેમ દુરિતાનિ વિશ્વા ।
દૂરમસ્મચ્છત્રવો યન્તુ ભીતાઃ । તદિન્દ્રાગ્ની કૃણુતાં તદ્વિશાખે
। તન્નો દેવા અનુમદન્તુ યજ્ઞમ્ । પશ્ચાત્પુરસ્તાદભયં નો અસ્તુ ।
નક્ષત્રાણામધિપત્ની વિશાખે । શ્રેષ્ઠાવિન્દ્રાગ્ની ભુવનસ્ય ગોપૌ ॥

૩। ૧। ૧। ૧૧॥

૧૨ વિષૂચઃ શત્રૂનપ બાધમાનૌ । અપ ક્ષુધં નુદતામરાતિમ્ । પૂર્ણા
પશ્ચાદુત પૂર્ણા પુરસ્તાત્ । ઉન્મધ્યતઃ પૌર્ણમાસી જિગાય । તસ્યાં
દેવા અધિ સંવસન્તઃ । ઉત્તમે નાક ઇહ માદયન્તામ્ । પૃથ્વી સુવર્ચા
યુવતિઃ સજોષાઃ । પૌર્ણમાસ્યુદગાચ્છોભમાના । આપ્યાયયન્તી દુરિતાનિ
વિશ્વા । ઉરું દુહાં યજમાનાય યજ્ઞમ્ ॥ ૩। ૧। ૧। ૧૨॥ ચિત્રભાનુર્યજમાને
દધાતુ હવિર્નઃ પાથશ્ચેતો જુષન્તાં ચેતો મદેમ રોચમાનામરાતીર્ગોપૌ
યજ્ઞમ્ ॥ ૧॥
૧૩ ઋધ્યાસ્મ હવ્યૈર્નમસોપસદ્ય । મિત્રં દેવં મિત્રધેયં નો અસ્તુ ।
અનૂરાધાન્, હવિષા વર્ધયન્તઃ । શતં જીવેમ શરદઃ સવીરાઃ ।
ચિત્રં નક્ષત્રમુદગાત્પુરસ્તાત્ । અનૂરાધાસ ઇતિ યદ્વદન્તિ ।
તન્મિત્ર એતિ પથિભિર્દેવયાનૈઃ । હિરણ્યયૈર્વિતતૈરન્તરિક્ષે ।
ઇન્દ્રો જ્યેષ્ઠામનુ નક્ષત્રમેતિ । યસ્મિન્વૃત્રં વૃત્રતૂર્યે તતાર

॥ ૩। ૧। ૨। ૧॥

૧૪ તસ્મિન્વયમમૃતં દુહાનાઃ । ક્ષુધં તરેમ દુરિતિં દુરિષ્ટિમ્ ।
પુરન્દરાય વૃષભાય ધૃષ્ણવે । અષાઢાય સહમાનાય મીઢુષે ।
ઇન્દ્રાય જ્યેષ્ઠા મધુમદ્દુહાના । ઉરું કૃણોતુ યજમાનાય લોકમ્ । મૂલં
પ્રજાં વીરવતીં વિદેય । પરાચ્યેતુ નિરૃતિઃ પરાચા । ગોભિર્નક્ષત્રં
પશુભિઃ સમક્તમ્ । અહર્ભૂયાદ્યજમાનાય મહ્યમ્ ॥ ૩। ૧। ૨। ૨॥

૧૫ અહર્નો અદ્ય સુવિતે દધાતુ । મૂલં નક્ષત્રમિતિ યદ્વદન્તિ । પરાચીં
વાચા નિરૃતિં નુદામિ । શિવં પ્રજાયૈ શિવમસ્તુ મહ્યમ્ । યા દિવ્યા
આપઃ પયસા સંબભૂવુઃ । યા અન્તરિક્ષ ઉત પાર્થિવીર્યાઃ । યાસામષાઢા
અનુયન્તિ કામમ્ । તા ન આપઃ શગ્ં સ્યોના ભવન્તુ । યાશ્ચ કૂપ્યા
યાશ્ચ નાદ્યાઃ સમુદ્રિયાઃ । યાશ્ચ વૈશન્તીરુત પ્રાસચીર્યાઃ ॥ ૩। ૧। ૨। ૩॥

૧૬ યાસામષાઢા મધુ ભક્ષયન્તિ । તા ન આપઃ શગ્ં સ્યોના ભવન્તુ ।
તન્નો વિશ્વે ઉપ શ઼ૃણ્વન્તુ દેવાઃ । તદષાઢા અભિ સંયન્તુ યજ્ઞમ્ ।
તન્નક્ષત્રં પ્રથતાં પશુભ્યઃ । કૃષિર્વૃષ્ટિર્યજમાનાય કલ્પતામ્ ।
શુભ્રાઃ કન્યા યુવતયઃ સુપેશસઃ । કર્મકૃતઃ સુકૃતો વીર્યાવતીઃ
। વિશ્વાન્દેવાન્ હવિષા વર્ધયન્તીઃ । અષાઢાઃ કામમુપયાન્તુ યજ્ઞમ્ ॥
૩। ૧। ૨। ૪॥

૧૭ યસ્મિન્બ્રહ્માભ્યજયથ્સર્વમેતત્ । અમું ચ લોકમિદમૂ ચ સર્વમ્ ।
તન્નો નક્ષત્રમભિજિદ્વિજિત્ય । શ્રિયં દધાત્વહૃણીયમાનમ્ । ઉભૌ લોકૌ
બ્રહ્મણા સંજિતેમૌ । તન્નો નક્ષત્રમભિજિદ્વિચષ્ટામ્ । તસ્મિન્વયં
પૃતનાઃ સંજયેમ । તં નો દેવાસો અનુજાનન્તુ કામમ્ । શ઼ૃણ્વન્તિ
શ્રોણામમૃતસ્ય ગોપામ્ । પુણ્યામસ્યા ઉપશ઼ૃણોમિ વાચમ્ ॥ ૩। ૧। ૨। ૫॥

૧૮ મહીં દેવીં વિષ્ણુપત્નીમજૂર્યામ્ । પ્રતીચીમેનાગ્ં હવિષા યજામઃ ।
ત્રેધા વિષ્ણુરુરુગાયો વિચક્રમે । મહીં દિવં પૃથિવીમન્તરિક્ષમ્ ।
તચ્છ્રોણૈતિ શ્રવ ઇચ્છમાના । પુણ્યગ્ગ્ શ્લોકં યજમાનાય કૃણ્વતી ।
અષ્ટૌ દેવા વસવઃ સોમ્યાસઃ । ચતસ્રો દેવીરજરાઃ શ્રવિષ્ઠાઃ । તે
યજ્ઞં પાન્તુ રજસઃ પરસ્તાત્ । સંવથ્સરીણમમૃતગ્ગ્ સ્વસ્તિ ॥

૩। ૧। ૨। ૬॥

૧૯ યજ્ઞં નઃ પાન્તુ વસવઃ પુરસ્તાત્ । દક્ષિણતોઽભિયન્તુ શ્રવિષ્ઠાઃ । પુણ્યં નક્ષત્રમભિ સંવિશામ । મા નો અરાતિરઘશ ँ સા ગન્ । ક્ષત્રસ્ય રાજા વરુણોઽધિરાજઃ । નક્ષત્રાણા ँ શતભિષગ્વસિષ્ઠઃ । તૌ દેવેભ્યઃ કૃણુતો દીર્ઘમાયુઃ । શત ँ સહસ્રા ભેષજાનિ ધત્તઃ । યજ્ઞં નો રાજા વરુણ ઉપયાતુ । તં નો વિશ્વે અભિ સંયન્તુ દેવાઃ ॥ ૩। ૧। ૨। ૭॥

૨૦ તન્નો નક્ષત્ર ँ શતભિષગ્જુષાણમ્ । દીર્ઘમાયુઃ પ્રતિરદ્ભેષજાનિ । અજ એકપાદુદગાત્પુરસ્તાત્ । વિશ્વા ભૂતાનિ પ્રતિમોદમાનઃ । તસ્ય દેવાઃ પ્રસવં યન્તિ સર્વે । પ્રોષ્ઠપદાસો અમૃતસ્ય ગોપાઃ । વિભ્રાજમાનઃ સમિધાન ઉગ્રઃ । આઽન્તરિક્ષમરુહદગન્દ્યામ્ । ત ँ સૂર્યં દેવમજમેકપાદમ્ । પ્રોષ્ઠપદાસો અનુયન્તિ સર્વે ॥ ૩। ૧। ૨। ૮॥

૨૧ અહિર્બુધ્નિયઃ પ્રથમાન એતિ । શ્રેષ્ઠો દેવાનામુત માનુષાણામ્ । તં બ્રાહ્મણાઃ સોમપાઃ સોમ્યાસઃ । પ્રોષ્ઠપદાસો અભિરક્ષન્તિ સર્વે । ચત્વાર એકમભિકર્મ દેવાઃ । પ્રોષ્ઠપદાસ ઇતિ યાન્, વદન્તિ । તે બુધ્નિયં પરિષદ્યગ્ં સ્તુવન્તઃ । અહિ ँરક્ષન્તિ નમસોપસદ્ય । પૂષા રેવત્યન્વેતિ પન્થામ્ । પુષ્ટિપતી પશુપા વાજબસ્ત્યૌ ॥ ૩। ૧। ૨। ૯॥

૨૨ ઇમાનિ હવ્યા પ્રયતા જુષાણા । સુગૈર્નો યાનૈરુપયાતાં યજ્ઞમ્ । ક્ષુદ્રાન્પશૂન્રક્ષતુ રેવતી નઃ । ગાવો નો અશ્વા ँ અન્વેતુ પૂષા । અન્ન ँ રક્ષન્તૌ બહુધા વિરૂપમ્ । વાજ ँસનુતાં યજમાનાય યજ્ઞમ્ । તદશ્વિનાવશ્વયુજોપયાતામ્ । શુભં ગમિષ્ઠૌ સુયમેભિરશ્વૈઃ । સ્વં નક્ષત્ર ँ હવિષા યજન્તૌ । મધ્વા સંપૃક્તૌ યજુષા સમક્તૌ ॥

૩। ૧। ૨। ૧૦॥

૨૩ યૌ દેવાનાં ભિષજૌ હવ્યવાહૌ । વિશ્વસ્ય દૂતાવમૃતસ્ય ગોપૌ । તૌ નક્ષત્રં જુજુષાણોપયાતામ્ । નમોઽશ્વિભ્યાં કૃણુમોઽશ્વયુગ્ભ્યામ્ । અપ પાપ્માનં ભરણીર્ભરન્તુ । તદ્યમો રાજા ભગવાન્ વિચષ્ટામ્ । લોકસ્ય

રાજા મહતો મહાન્ હિ । સુગં નઃ પન્થામભયં કૃણોતુ । યસ્મિન્નક્ષત્રે
યમ એતિ રાજા । યસ્મિન્નેનમભ્યષિઞ્ચન્ત દેવાઃ । તદસ્ય ચિત્રꣳ
હવિષા યજામ । અપ પાપ્માનં ભરણીર્ભરન્તુ । નિવેશની યત્તે દેવા
અદધુઃ ॥ ૩। ૧। ૨। ૧૧॥ તતાર મહ્યં પ્રાસચીર્યા યાન્તુ યજ્ઞં વાચગ્ગ્
સ્વસ્તિ દેવા અનુ યન્તિ સર્વે વાજબસ્ત્યૌ સમક્તૌ દેવાસ્ત્રીણિ ચ ॥ ૨॥

૨૪ નવો નવો ભવતિ જાયમાનો યમાદિત્યા અꣳ શુમાપ્યાયયન્તિ ।
યે વિરૂપે સમનસા સંવ્યયન્તી । સમાનં તન્તું પરિ તાતનાતે । વિભૂ
પ્રભૂ અનુભૂ વિશ્વતો હુવે । તે નો નક્ષત્રે હવમાગમેતમ્ । વયં દેવી
બ્રહ્મણા સંવિદાનાઃ । સુરત્નાસો દેવવીતિં દધાનાઃ । અહોરાત્રે હવિષા
વર્ધયન્તઃ । અતિ પાપ્માનમતિમુક્ત્યા ગમેમ । પ્રત્યુવદૃશ્યાયતી ॥ ૩। ૧। ૩। ૧॥

૨૫ વ્યુચ્છન્તી દુહિતા દિવઃ । અપો મહી વૃણુતે ચક્ષુષા ।
તમો જ્યોતિષ્કૃણોતિ સૂનરી । ઉદુસ્રિયાઃ સચતે સૂર્યઃ । સચા
ઉદ્યન્નક્ષત્રમર્ચિમત્ । તવેદુષો વ્યુષિ સૂર્યસ્ય ચ । સં ભક્તેન
ગમેમહિ । તન્નો નક્ષત્રમર્ચિમત્ । ભાનુમત્તેજ ઉચ્ચરત્ । ઉપ
યજ્ઞમિહાગમત્ ॥ ૩। ૧। ૩। ૨॥

૨૬ પ્ર નક્ષત્રાય દેવાય । ઇન્દ્રાયેન્દુꣳ હવામહે । સ નઃ સવિતા
સુવથ્સનિમ્ । પુષ્ટિદાં વીરવત્તમમ્ । ઉદુ ત્યં ચિત્રમ્ । અદિતિર્ન ઉરુષ્યતુ
મહીમૂષુ માતરમ્ । ઇદં વિષ્ણુઃ પ્ર તદ્વિષ્ણુઃ । અગ્નિર્મૂર્ધા ભુવઃ ।
અનુ નોઽદ્યાનુમતિરન્વિદનુમતે ત્વમ્ । હવ્યવાહગ્ગ્ સ્વિષ્ટમ્ ॥ ૩। ૧। ૩। ૩॥ આયત્યગમથ્સ્વિષ્ટમ્ ॥ ૩॥

૨૭ અગ્નિર્વા અકામયત । અન્નાદો દેવાનાગ્ સ્યામિતિ । સ એતમગ્નયે
કૃત્તિકાભ્યઃ પુરોડાશમષ્ટાકપાલં નિરવપત્ । તતો વૈ સોઽન્નાદો
દેવાનામભવત્ । અગ્નિર્વૈ દેવાનામન્નાદઃ । યથા હ વા અગ્નિર્દેવાનામન્નાદઃ
। એવꣳ હ વા એષ મનુષ્યાણાં ભવતિ । ય એતેન હવિષા યજતે ।
ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । અગ્નયે સ્વાહા કૃત્તિકાભ્યઃ સ્વાહા
। અમ્બાયૈ સ્વાહા દુલાયૈ સ્વાહા । નિતત્ન્યૈ સ્વાહાઽભ્રયન્ત્યૈ સ્વાહા ।
મેઘયન્ત્યૈ સ્વાહા વર્ષયન્ત્યૈ સ્વાહા । ચુપુણીકાયૈ સ્વાહેતિ ॥

૩। ૧। ૪। ૧॥

૨૮ પ્રજાપતિઃ પ્રજા અસૃજત । તા અસ્માત્સૃષ્ટાઃ પરાચીરાયન્ । તાસાꣳ
રોહિણીમભ્યધ્યાયત્ । સોઽકામયત । ઉપ મા વર્તેત । સમેનયા ગચ્છેયેતિ ।
સ એતં પ્રજાપતયે રોહિણ્યૈ ચરું નિરવપત્ । તતો વૈ સા તમુપાવર્તત ।
સમેનયાઽગચ્છત । ઉપ હ વા એનં પ્રિયમાવર્તતે । સં પ્રિયેણ ગચ્છતે
। ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ ।
પ્રજાપતયે સ્વાહા રોહિણ્યૈ સ્વાહા । રોચમાનાયૈ સ્વાહા પ્રજાભ્યઃ સ્વાહેતિ
॥ ૩। ૧। ૪। ૨॥

૨૯ સોમો વા અકામયત । ઓષધીનાꣳ રાજ્યમભિજયેયમિતિ । સ એતꣳ
સોમાય મૃગશીર્ષાય શ્યામાકં ચરું પયસિ નિરવપત્ । તતો વૈ સ
ઓષધીનાꣳ રાજ્યમભ્યજયત્ । સમાનાનાꣳ હ વૈ રાજ્યમભિજયતિ ।
ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । સોમાય
સ્વાહા મૃગશીર્ષાય સ્વાહા । ઇન્વકાભ્યઃ સ્વાહૌષધીભ્યઃ સ્વાહા ।
રાજ્યાય સ્વાહાઽભિજિત્યૈ સ્વાહેતિ ॥ ૩। ૧। ૪। ૧॥

૩૦ રુદ્રો વા અકામયત । પશુમાન્થ્સ્યામિતિ । સ એતꣳ રુદ્રાયાર્દ્રાયૈ
પ્રૈય્યઙ્ગવં ચરું પયસિ નિરવપત્ । તતો વૈ સ પશુમાનભવત્ ।
પશુમાન્ હ વૈ ભવતિ । ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં
વેદ । સોઽત્ર જુહોતિ । રુદ્રાય સ્વાહાઽઽર્દ્રાયૈ સ્વાહા । પિન્વમાનાયૈ સ્વાહા
પશુભ્યઃ સ્વાહેતિ ॥ ૩। ૧। ૪। ૪॥

૩૧ ઋક્ષા વા ઇયમલોમકાઽઽસીત્ । સાઽકામયત । ઓષધીભિર્વનસ્પતિભિઃ
પ્રજાયેયેતિ । સૈતમદિત્યૈ પુનર્વસુભ્યાં ચરું નિરવપત્ । તતો વા
ઇયમોષધીભિર્વનસ્પતિભિઃ પ્રાજાયત । પ્રજાયતે હ વૈ પ્રજયા
પશુભિઃ । ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર
જુહોતિ । અદિત્યૈ સ્વાહા પુનર્વસુભ્યામ્ । સ્વાહાઽઽભૂત્યૈ સ્વાહા પ્રજાત્યૈ
સ્વાહેતિ ॥ ૩। ૧। ૪। ૫॥

૩૨ બૃહસ્પતિર્વા અકામયત । બ્રહ્મવર્ચસી સ્યામિતિ । સ એતં
બૃહસ્પતયે તિષ્યાય નૈવારં ચરું પયસિ નિરવપત્ । તતો વૈ

સ બ્રહ્મવર્ચસ્યભવત્ । બ્રહ્મવર્ચસી હ વૈ ભવતિ । ય એતેન
હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । બૃહસ્પતયે
સ્વાહા તિષ્યાય સ્વહા । બ્રહ્મવર્ચસાય સ્વાહેતિ ॥ ૩। ૧। ૪। ૬॥

૩૩ દેવાસુરાઃ સંયત્તા આસન્ન્ । તે દેવાઃ સર્પેભ્ય આશ્રેષાભ્ય આજ્યે
કરમ્ભં નિરવપન્ન્ । તાનેતાભિરેવ દેવતાભિરુપાનયન્ । એતાભિર્હ વૈ
દેવતાભિર્દ્વિષન્તં ભ્રાતૃવ્યમુપનયતિ । ય એતેન હવિષા યજતે ।
ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । સર્પેભ્યઃ સ્વાહાઽઽશ્રેષાભ્યઃ
સ્વાહા । દન્દશૂકેભ્યઃ સ્વાહેતિ ॥ ૩। ૧। ૪। ૭॥

૩૪ પિતરો વા અકામયન્ત । પિતૃલોક ઋધ્નુયામેતિ । ત એતં પિતૃભ્યો
મઘાભ્યઃ પુરોડાશꣳ ષટ્કપાલં નિરવપન્ન્ । તતો વૈ તે પિતૃલોક
આર્ધ્નુવન્ । પિતૃલોકે હ વા ઋધ્નોતિ । ય એતેન હવિષા યજતે ।
ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । પિતૃભ્યઃ સ્વાહા મઘાભ્યઃ ।
સ્વાહાઽનઘાભ્યઃ સ્વાહાઽગદાભ્યઃ । સ્વાહાઽરુન્ધતીભ્યઃ સ્વાહેતિ ॥ ૩। ૧। ૪। ૮॥

૩૫ અર્યમા વા અકામયત । પશુમાન્થ્સ્યામિતિ । સ એતમર્યમ્ણે ફલ્ગુનીભ્યાં
ચરું નિરવપત્ । તતો વૈ સ પશુમાનભવત્ । પશુમાન્ હ વૈ ભવતિ ।
ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । અર્યમ્ણે
સ્વાહા ફલ્ગુનીભ્યાગ્ સ્વાહા । પશુભ્યઃ સ્વાહેતિ ॥ ૩। ૧। ૪। ૯॥

૩૬ ભગો વા અકામયત । ભગી શ્રેષ્ઠી દેવાનાગ્ સ્યામિતિ । સ એતં ભગાય
ફલ્ગુનીભ્યાં ચરું નિરવપત્ । તતો વૈ સ ભગી શ્રેષ્ઠી દેવાનામભવત્ ।
ભગી હ વૈ શ્રેષ્ઠી સમાનાનાં ભવતિ । ય એતેન હવિષા યજતે । ય
ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । ભગાય સ્વાહા ફલ્ગુનીભ્યાગ્ સ્વાહા
। શ્રૈષ્ઠ્યાય સ્વાહેતિ ॥ ૩। ૧। ૪। ૧૦॥

૩૭ સવિતા વા અકામયત । શ્રન્મે દેવા દધીરન્ન્ । સવિતા સ્યામિતિ ।
સ એતꣳ સવિત્રે હસ્તાય પુરોડાશં દ્વાદશકપાલં નિરવપદાશૂનાં
વ્રીહીણામ્ । તતો વૈ તસ્મૈ શ્રદ્દેવા અદધત । સવિતાઽભવત્ । શ્રદ્ધ
વા અસ્મૈ મનુષ્યા દધતે । સવિતા સમાનાનાં ભવતિ । ય એતેન હવિષા
યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । સવિત્રે સ્વાહા હસ્તાય ।

સ્વાહા દદતે સ્વાહા પૃણતે । સ્વાહા પ્રયચ્છતે સ્વાહા પ્રતિગૃભ્ણતે
સ્વાહેતિ ॥ ૩। ૧। ૪। ૧૧॥

૩૮ ત્વષ્ટા વા અકામયત । ચિત્રં પ્રજાં વિન્દેયેતિ । સ એતં ત્વષ્ટ્રે
ચિત્રાયૈ પુરોડાશમષ્ટાકપાલં નિરવપત્ । તતો વૈ સ ચિત્રં
પ્રજામવિન્દત । ચિત્રꣳ હ વૈ પ્રજાં વિન્દતે । ય એતેન હવિષા
યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । ત્વષ્ટ્રે સ્વાહા ચિત્રાયૈ
સ્વાહા । ચૈત્રાય સ્વાહા પ્રજાયૈ સ્વાહેતિ ॥ ૩। ૧। ૪। ૧૨॥

૩૯ વાયુર્વા અકામયત । કામચારમેષુ લોકેષ્વભિજયેયમિતિ ।
સ એતદ્વાયવે નિષ્ટ્યાયૈ ગૃષ્ટ્યૈ દુગ્ધં પયો નિરવપત્ । તતો વૈ
સ કામચારમેષુ લોકેષ્વભ્યજયત્ । કામચારꣳહ વા એષુ
લોકેષ્વભિજયતિ । ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ
। સોઽત્ર જુહોતિ । વાયવે સ્વાહા નિષ્ટ્યાયૈ સ્વાહા । કામચારાય
સ્વાહાઽભિજિત્યૈ સ્વાહેતિ ॥ ૩। ૧। ૪। ૧૩॥

૪૦ ઇન્દ્રાગ્ની વા અકામયેતામ્ । શ્રૈષ્ઠ્યં દેવાનામભિજયેવેતિ ।
તાવેતમિન્દ્રાગ્નિભ્યાં વિશાખાભ્યાં પુરોડાશમેકાદશકપાલં નિરવપતામ્
। તતો વૈ તૌ શ્રૈષ્ઠ્યં દેવાનામભ્યજયતામ્ । શ્રૈષ્ઠ્યꣳહ વૈ
સમાનાનામભિજયતિ । ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ ।
સોઽત્ર જુહોતિ । ઇન્દ્રાગ્નિભ્યાગ્ સ્વાહા વિશાખાભ્યાગ્ સ્વાહા । શ્રૈષ્ઠ્યાય
સ્વાહાઽભિજિત્યૈ સ્વાહેતિ ॥ ૩। ૧। ૪। ૧૪॥

૪૧ અથૈતત્પૌર્ણમાસ્યા આજ્યં નિર્વપતિ । કામો વૈ પૌર્ણમાસી । કામ આજ્યમ્ ।
કામેનૈવ કામꣳ સમર્ધયતિ । ક્ષિપ્રમેનꣳ સ કામ ઉપનમતિ
। યેન કામેન યજતે । સોઽત્ર જુહોતિ । પૌર્ણમાસ્યૈ સ્વાહા કામાય
સ્વાહાઽગત્યૈ સ્વાહેતિ ॥ ૩। ૧। ૪। ૧૫॥

૪૨ મિત્રો વા અકામયત । મિત્રધેયમેષુ લોકેષ્વભિજયેયમિતિ । સ એતં
મિત્રાયાનૂરાધેભ્યશ્ચરું નિરવપત્ । તતો વૈ સ મિત્રધેયમેષુ
લોકેષ્વભ્યજયત્ । મિત્રધેયꣳહ વા એષુ લોકેષ્વભિજયતિ । ય
એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । મિત્રાય

સ્વાહાઽનૂરાધેભ્યઃ સ્વાહા । મિત્રધેયાય સ્વાહાઽભિજિત્યૈ સ્વાહેતિ ॥
૩। ૧। ૫। ૧॥

૪૩ ઇન્દ્રો વા અકામયત । જ્યૈષ્ઠ્યં દેવાનામભિજયેયમિતિ । સ એતમિન્દ્રાય
જ્યેષ્ઠાયૈ પુરોડાશમેકાદશકપાલં નિરવપન્ મહાવ્રીહીણામ્ । તતો વૈ સ
જ્યૈષ્ઠ્યં દેવાનામભ્યજયત્ । જ્યૈષ્ઠ્યꣳ હ વૈ સમાનાનામભિજયતિ
। ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । ઇન્દ્રાય
સ્વાહા જ્યેષ્ઠાયૈ સ્વાહા । જ્યૈષ્ઠ્યાય સ્વાહાઽભિજિત્યૈ સ્વાહેતિ ॥ ૩। ૧। ૫। ૨॥

૪૪ પ્રજાપતિર્વા અકામયત । મૂલં પ્રજાં વિન્દેયેતિ । સ એતં પ્રજાપતયે
મૂલાય ચરું નિરવપત્ । તતો વૈ સ મૂલં પ્રજામવિન્દત । મૂલꣳ હ
વૈ પ્રજાં વિન્દતે । ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ ।
સોઽત્ર જુહોતિ । પ્રજાપતયે સ્વાહા મૂલાય સ્વાહા । પ્રજાયૈ સ્વાહેતિ ॥
૩। ૧। ૫। ૩॥

૪૫ આપો વા અકામયન્ત । સમુદ્રં કામમભિજયેમેતિ । તા
એતમદ્ભ્યોઽષાઢાભ્યશ્ચરું નિરવપન્ન્ । તતો વૈ તાઃ સમુદ્રં
કામમભ્યજયન્ન્ । સમુદ્રꣳ હ વૈ કામમભિજયતિ । ય એતેન
હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । અદ્ભ્યઃ
સ્વાહાઽષાઢાભ્યઃ સ્વાહા । સમુદ્રાય સ્વાહા કામાય સ્વાહા । અભિજિત્યૈ
સ્વાહેતિ ॥ ૩। ૧। ૫। ૪॥

૪૬ વિશ્વે વૈ દેવા અકામયન્ત । અનપજય્યં જયેમેતિ । ત એતં વિશ્વેભ્યો
દેવેભ્યોઽષાઢાભ્યશ્ચરું નિરવપન્ન્ । તતો વૈ તેઽનપજય્યમજયન્
। અનપજય્યꣳ હ વૈ જયતિ । ય એતેન હવિષા યજતે । ય ઉ
ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । વિશ્વેભ્યો દેવેભ્યઃ સ્વાહાઽષાઢાભ્યઃ
સ્વાહા । અનપજય્યાય સ્વાહા જિત્યૈ સ્વાહેતિ ॥ ૩। ૧। ૫। ૫॥

૪૭ બ્રહ્મ વા અકામયત । બ્રહ્મલોકમભિ જયેયમિતિ । તદેતં
બ્રહ્મણેઽભિજિતે ચરું નિરવપત્ । તતો વૈ તદ્બ્રહ્મલોકમભ્યજયત્ ।
બ્રહ્મલોકꣳ હ વા અભિજયતિ । ય એતેન હવિષા યજતે । ય ઉ

ચૈનદ્દેવં વેદ । સોઽત્ર જુહોતિ । બ્રહ્મણે સ્વાહાઽભિજિતે સ્વાહા ।
બ્રહ્મલોકાય સ્વાહાઽભિજિત્યૈ સ્વાહેતિ ॥ ૩। ૧। ૫। ૬॥

૪૮ વિષ્ણુર્વા અકામયત । પુણ્યગ્ગ્ શ્લોકꣳ શૃણ્વીય । ન મા પાપી
કીર્તિરાગચ્છેદિતિ । સ એતં વિષ્ણવે શ્રોણાયૈ પુરોડાશં ત્રિકપાલં
નિરવપત્ । તતો વૈ સ પુણ્યગ્ગ્ શ્લોકમશૃણુત । નૈનં પાપી કીર્તિરાગચ્છત્
। પુણ્યꣳહ વૈ શ્લોકꣳશૃણુતે । નૈનં પાપી કીર્તિરાગચ્છતિ । ય
એતેન હવિષા યજતે । ય ઉ ચૈનદ્દેવં વેદ । સોઽત્ર જુહોતિ । વિષ્ણવે
સ્વાહા શ્રોણાયૈ સ્વાહા । શ્લોકાય સ્વાહા શ્રુતાય સ્વાહેતિ ॥ ૩। ૧। ૫। ૭॥

૪૯ વસવો વા અકામયન્ત । અગ્રં દેવતાનાં પરીયામેતિ । ત એતં વસુભ્યઃ
શ્રવિષ્ઠાભ્યઃ પુરોડાશમષ્ટાકપાલં નિરવપન્ । તતો વૈ તેઽગ્રં
દેવતાનાં પર્યાયન્ । અગ્રꣳહ વૈ સમાનાનાં પર્યેતિ । ય એતેન
હવિષા યજતે । ય ઉ ચૈનદ્દેવં વેદ । સોઽત્ર જુહોતિ । વસુભ્યઃ સ્વાહા
શ્રવિષ્ઠાભ્યઃ સ્વાહા । અગ્રાય સ્વાહા પરીત્યૈ સ્વાહેતિ ॥ ૩। ૧। ૫। ૮॥

૫૦ ઇન્દ્રો વા અકામયત । દૃઢોઽશિથિલઃ સ્યામિતિ । સ એતં વરુણાય
શતભિષજે ભેષજેભ્યઃ પુરોડાશં દશકપાલં નિરવપત્કૃષ્ણાનાં
વ્રીહીણામ્ । તતો વૈ સ દૃઢોઽશિથિલોઽભવત્ । દૃઢો હ વા અશિથિલો
ભવતિ । ય એતેન હવિષા યજતે । ય ઉ ચૈનદ્દેવં વેદ । સોઽત્ર જુહોતિ ।
વરુણાય સ્વાહા શતભિષજે સ્વાહા । ભેષજેભ્યઃ સ્વાહેતિ ॥ ૩। ૧। ૫। ૯॥

૫૧ અજો વા એકપાદકામયત । તેજસ્વી બ્રહ્મવર્ચસી સ્યામિતિ । સ
એતમજાયૈકપદે પ્રોષ્ઠપદેભ્યશ્ચરું નિરવપત્ । તતો વૈ સ તેજસ્વી
બ્રહ્મવર્ચસ્યભવત્ । તેજસ્વી હ વૈ બ્રહ્મવર્ચસી ભવતિ । ય એતેન
હવિષા યજતે । ય ઉ ચૈનદ્દેવં વેદ । સોઽત્ર જુહોતિ । અજાયૈકપદે સ્વાહા
પ્રોષ્ઠપદેભ્યઃ સ્વાહા । તેજસે સ્વાહા બ્રહ્મવર્ચસાય સ્વાહેતિ ॥ ૩। ૧। ૫। ૧૦॥

૫૨ અહિર્વૈ બુધ્નિયોઽકામયત । ઇમાં પ્રતિષ્ઠાં વિન્દેયેતિ । સ એતમહયે
બુધ્નિયાય પ્રોષ્ઠપદેભ્યઃ પુરોડાશં ભૂમિકપાલં નિરવપત્ । તતો વૈ સ
ઇમાં પ્રતિષ્ઠામવિન્દત । ઇમાꣳ હ વૈ પ્રતિષ્ઠાં વિન્દતે । ય એતેન
હવિષા યજતે । ય ઉ ચૈનદ્દેવં વેદ । સોઽત્ર જુહોતિ । અહયે બુધ્નિયાય

સ્વાહા પ્રોષ્ઠપદેભ્યઃ સ્વાહા । પ્રતિષ્ઠાયૈ સ્વાહેતિ ॥ ૩। ૧। ૫। ૧૧॥

૫૩ પૂષા વા અકામયત । પશુમાન્થ્સ્યામિતિ । સ એતં પૂષ્ણે રેવત્યૈ
ચરું નિરવપત્ । તતો વૈ સ પશુમાનભવત્ । પશુમાન્ હ વૈ ભવતિ ।
ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । પૂષ્ણે
સ્વાહા રેવત્યૈ સ્વાહા । પશુભ્યઃ સ્વાહેતિ ॥ ૩। ૧। ૫। ૧૨॥

૫૪ અશ્વિનૌ વા અકામયેતામ્ । શ્રોત્રસ્વિનાવબધિરૌ સ્યાવેતિ ।
તાવેતમશ્વિભ્યામશ્વયુગ્ભ્યાં પુરોડાશં દ્વિકપાલં નિરવપતામ્ । તતો
વૈ તૌ શ્રોત્રસ્વિનાવબધિરાવભવતામ્ । શ્રોત્રસ્વી હ વા અબધિરો ભવતિ । ય
એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । અશ્વિભ્યાગ્
સ્વાહાઽશ્વયુગ્ભ્યાગ્ સ્વાહા । શ્રોત્રાય સ્વાહા શ્રુત્યૈ સ્વાહેતિ ॥ ૩। ૧। ૫। ૧૩॥

૫૫ યમો વા અકામયત । પિતૃણાꣳ રાજ્યમભિજયેયમિતિ । સ એતં
યમાયાપભરણીભ્યશ્ચરું નિરવપત્ । તતો વૈ સ પિતૃણાꣳ
રાજ્યમભ્યજયત્ । સમાનાનાꣳ હ વૈ રાજ્યમભિજયતિ । ય
એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । યમાય
સ્વાહાઽપભરણીભ્યઃ સ્વાહા । રાજ્યાય સ્વાહાઽભિજિત્યૈ સ્વાહેતિ ॥ ૩। ૧। ૫। ૧૪॥

૫૬ અથૈતદમાવાસ્યાયા આજ્યં નિર્વપતિ । કામો વા અમાવાસ્યા । કામ
આજ્યમ્ । કામેનૈવ કામꣳ સમર્ધયતિ । ક્ષિપ્રમેનꣳ સ કામ
ઉપનમતિ । યેન કામેન યજતે । સોઽત્ર જુહોતિ । અમાવાસ્યાયૈ સ્વાહા
કામાય સ્વાહાઽગત્યૈ સ્વાહેતિ ॥ ૩। ૧। ૫। ૧૫॥

૫૭ ચન્દ્રમા વા અકામયત । અહોરાત્રાનર્ધમાસાન્
માસાનૃતૂન્થ્સંવથ્સરમાપ્ત્વા । ચન્દ્રમસઃ સાયુજ્યꣳ
સલોકતામાપ્નુયામિતિ । સ એતં ચન્દ્રમસે પ્રતીદૃશ્યાયૈ
પુરોડાશં પઞ્ચદશકપાલં નિરવપત્ । તતો વૈ
સોઽહોરાત્રાનર્ધ માસાન્માસાનૃતૂન્થ્સંવથ્સરમાપ્ત્વા ।
ચન્દ્રમસઃ સાયુજ્યꣳ સલોકતામાપ્નોત્ । અહોરાત્રાન્ હ વા અર્ધ
માસાન્માસાનૃતૂન્થ્સંવથ્સરમાપ્ત્વા । ચન્દ્રમસઃ સાયુજ્યꣳ
સલોકતામાપ્નોતિ । ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં

વેદ । સોઽત્ર જુહોતિ । ચન્દ્રમસે સ્વાહા પ્રતીદૃશ્યાયૈ સ્વાહા ।
અહોરાત્રેભ્યઃ સ્વાહાઽર્ધમાસેભ્યઃ સ્વાહા । માસેભ્યઃ સ્વાહાર્તુભ્યઃ
સ્વાહા । સંવથ્સરાય સ્વાહેતિ ॥ ૩। ૧। ૬। ૧॥

૫૮ અહોરાત્રે વા અકામયેતામ્ । અત્યહોરાત્રે મુચ્યેવહિ । ન નાવહોરાત્રે
આપ્નુયાતામિતિ । તે એતમહોરાત્રાભ્યાં ચરું નિરવપતામ્ । દ્વયાનાં
વ્રીહીણામ્ । શુક્લાનાં ચ કૃષ્ણાનાં ચ । સવાત્યોર્દુગ્ધે । શ્વેતાયૈ ચ
કૃષ્ણાયૈ ચ । તતો વૈ તે અત્યહોરાત્રે અમુચ્યેતે । નૈને અહોરાત્રે આપ્નુતામ્ ।
અતિ હ વા અહોરાત્રે મુચ્યતે । નૈનમહોરાત્રે આપ્નુતઃ । ય એતેન હવિષા
યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । અહ્ને સ્વાહા રાત્રિયૈ સ્વાહા
। અતિમુક્ત્યૈ સ્વાહેતિ ॥ ૩। ૧। ૬। ૨॥

૫૯ ઉષા વા અકામયત । પ્રિયાઽઽદિત્યસ્ય સુભગા સ્યામિતિ । સૈતમુષસે
ચરું નિરવપત્ । તતો વૈ સા પ્રિયાઽઽદિત્યસ્ય સુભગાઽભવત્ । પ્રિયો
હ વૈ સમાનાનાꣳ સુભગો ભવતિ । ય એતેન હવિષા યજતે । ય
ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । ઉષસે સ્વાહા વ્યુષ્ટ્યૈ સ્વાહા ।
વ્યૂષુષ્યૈ સ્વાહા વ્યુચ્છન્ત્યૈ સ્વાહા । વ્યુષ્ટાયૈ સ્વાહેતિ ॥ ૩। ૧। ૬। ૩॥

૬૦ અથૈતસ્મૈ નક્ષત્રાય ચરું નિર્વપતિ । યથા ત્વં દેવાનામસિ
। એવમહં મનુષ્યાણાં ભૂયાસમિતિ । યથા હ વા એતદ્દેવાનામ્ ।
એવꣳ હ વા એષ મનુષ્યાણાં ભવતિ । ય એતેન હવિષા યજતે ।
ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । નક્ષત્રાય સ્વાહોદેષ્યતે સ્વાહા
। ઉદ્યતે સ્વાહોદિતાય સ્વાહા । હરસે સ્વાહા ભરસે સ્વાહા । ભ્રાજસે
સ્વાહા તેજસે સ્વાહા । તપસે સ્વાહા બ્રહ્મવર્ચસાય સ્વાહેતિ ॥ ૩। ૧। ૬। ૪॥

૬૧ સૂર્યો વા અકામયત । નક્ષત્રાણાં પ્રતિષ્ઠા સ્યામિતિ । સ એતꣳ સૂર્યાય
નક્ષત્રેભ્યશ્ચરું નિરવપત્ । તતો વૈ સ નક્ષત્રાણાં પ્રતિષ્ઠાઽભવત્ ।
પ્રતિષ્ઠા હ વૈ સમાનાનાં ભવતિ । ય એતેન હવિષા યજતે । ય ઉ
ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । સૂર્યાય સ્વાહા નક્ષત્રેભ્યઃ સ્વાહા ।
પ્રતિષ્ઠાયૈ સ્વાહેતિ ॥ ૩। ૧। ૬। ૫॥

૬૨ અથૈતમદિત્યૈ ચરું નિર્વપતિ । ઇયં વા અદિતિઃ । અસ્યામેવ પ્રતિતિષ્ઠતિ

। સોઽત્ર જુહોતિ । અદિત્યૈ સ્વાહા પ્રતિષ્ઠાયૈ સ્વાહેતિ ॥ ૩। ૧। ૬। ૬॥

૬૩ અથૈતં વિષ્ણવે ચરું નિર્વપતિ । યજ્ઞો વૈ વિષ્ણુઃ । યજ્ઞ
એવાન્તતઃ પ્રતિતિષ્ઠતિ । સોઽત્ર જુહોતિ । વિષ્ણવે સ્વાહા યજ્ઞાય સ્વાહા
। પ્રતિષ્ઠાયૈ સ્વાહેતિ ॥ ૩। ૧। ૬। ૭॥

અગ્નિઃ પંચદશ પ્રજાપતિઃ ષોડશ સોમ એકાદશ રુદ્રો
દશર્ક્ષૈકાદશ બૃહસ્પતિર્દશ દેવાસુરા નવ પિતર
એકાદશાર્યમા ભગો દશદશ સવિતા ચતુર્દશ ત્વષ્ટા વાયુરિંદ્રાગ્ની
દશ દશાથૈતત્પૌર્ણમાસ્યા અષ્ટૌ પંચદશ ॥ મિત્ર ઇન્દ્રઃ
પ્રજાપતિર્દશદશાપ એકાદશ વિશ્વે બ્રહ્મ દશદશ
વિષ્ણુસ્ત્રયોદશ વસવ ઇન્દ્રોઽજોઽહિર્બુધ્નિયઃ પૂષાઽશ્વિનૌ
યમો દશદશાથૈતદમાવાસ્યાયા અષ્ટૌ પઞ્ચદશ । ચન્દ્રમાઃ
પઞ્ચદશાહોરાત્રે સપ્તદશોષા એકાદશાથૈતસ્મૈ નક્ષત્રાય
ત્રયોદશ સૂર્યો દશાથૈતમદિત્યૈ પઞ્ચાથૈતં વિષ્ણવે ષટ્થ્સપ્ત
। સવિતાઽઽશૂનાં વ્રીહિણામિન્દ્રો મહાવ્રીહીણામિન્દ્રઃ કૃષ્ણાનાં
વ્રીહીણામહોરાત્રે દ્રયાનાં વ્રીહીણામ્ । પિતરઃ ષટ્કપાલꣳ સવિતા
દ્વાદશકપાલમિંદ્રાગ્ની એકાદશકપાલમિંદ્ર એકાદશકપાલમિન્દ્રો દશકપાલં
વિષ્ણુસ્ત્રિ કપાલમહિર્ભૂમિ કપાલમશ્વિનૌ દ્વિકપાલં ચન્દ્રમાઃ પઞ્ચદશ
કપાલમગ્નિસ્ત્વષ્ટા વસવોઽષ્ટાકપાલમન્યત્ર ચરુમ્ । રુદ્રોઽર્યમા
પૂષા પશુમાન્થ્સ્યાꣳ સોમો રુદ્રો બૃહસ્પતિઃ પયસિ વાયુઃ પયઃ
સોમો વાયુરિંદ્રાગ્ની મિત્ર ઇન્દ્ર આપો બ્રહ્મ યમોઽભિજિત્યૈ ત્વષ્ટા
પ્રજાપતિઃ પ્રજાયૈ પૌર્ણમાસ્યા અમાવાસ્યાયા આગત્યૈ વિશ્વે જિત્યા
અશ્વિનૌ શ્રુત્યૈ ॥ બ્રહ્મતદેતં વિષ્ણુઃ સ એતં વાયુઃ સ એતદાપસ્તાઃ ॥
પિતરો વિશ્વે વસવોઽકામયન્તમેતિ ત એતં નિરવપન્ । આપો કામયંતમેતિ
તા એતન્નિરવપન્ । ઇંદ્રાગ્ની અશ્વિનાવકામયેતાં વેતિ તાવેતન્નિરવપતામ્ ।
અહોરાત્રે વા અકામયેતામિતિ તે એતં નિરવપતામ્ । અન્યત્રાકામયતમિતિ
સ એતં નિરવપત્ । ઇન્દ્રાગ્ની શ્રૈષ્ઠ્યમિન્દ્રો જ્યૈષ્ઠ્યમિન્દ્રો દૃઢઃ
। અહિઃ સૂર્યોઽદિત્યૈ વિષ્ણવે પ્રતિષ્ઠાયૈ । સોમો યમઃ સમાનાનામ્ ।

અગ્નિર્નોરીરિષન્નન્યત્ર રીરિષઃ । હવિષા વિદુષો ય ઉ ચૈનદેવં વેદ
યજતે ચિનુતે ય ઉ ચૈનમેવં વેદ ॥
અગ્નિર્ન ઋધ્યાસ્મ નવો નવોઽગ્નિર્મિત્રશ્ચંદ્રમાઃ ષટ્ ॥
અગ્નિર્નસ્તન્નો વાયુરહિર્બુધ્નિય ઋક્ષા વા ઇયમથૈતત્પૌર્ણમાસ્યા
અજો વા એકપાથ્સૂર્યસ્ત્રિષષ્ટિઃ ॥
અગ્નિર્નઃ પાતુ પ્રતિષ્ઠાયૈ સ્વાહેતિ ॥

## તૃતીયાષ્ટકે દ્વિતીયઃ પ્રપાઠકઃ ૨

૧ તૃતીયસ્યામિતો દિવિ સોમ આસીત્ । તં ગાયત્ર્યાઽહરત્ । તસ્ય
પર્ણમચ્છિદ્યત । તત્પર્ણોઽભવત્ । તત્પર્ણસ્ય પર્ણત્વમ્ । બ્રહ્મ વૈ
પર્ણઃ । યત્પર્ણશાખયા વથ્સાનપાકરોતિ । બ્રહ્મણૈવૈનાનપાકરોતિ
। ગાયત્રો વૈ પર્ણઃ । ગાયત્રાઃ પશવઃ ॥ ૩। ૨। ૧। ૧॥

૨ તસ્માત્ત્રીણિ ત્રીણિ પર્ણસ્ય પલાશાનિ । ત્રિપદા ગાયત્રી ।
યત્પર્ણશાખયા ગાઃ પ્રાર્પયતિ । સ્વયૈવૈના દેવતયા પ્રાર્પયતિ
। યં કામયેતાપશુઃ સ્યાદિતિ । અપર્ણાં તસ્મૈ શુષ્કાગ્રામાહરેત્ ।
અપશુરેવ ભવતિ । યં કામયેત પશુમાન્થ્સ્યાદિતિ । બહુપર્ણાં
તસ્મૈ બહુશાખામાહરેત્ । પશુમન્તમેવૈનં કરોતિ ॥ ૩। ૨। ૧। ૨॥

૩ યત્પ્રાચીમાહરેત્ । દેવલોકમભિજયેત્ । યદુદીચીં મનુષ્યલોકમ્ ।
પ્રાચીમુદીચીમાહરતિ । ઉભયોર્લોકયોરભિજિત્યૈ । ઇષે ત્વોર્જે
ત્વેત્યાહ । ઇષમેવોર્જં યજમાને દધાતિ । વાયવઃ સ્થેત્યાહ । વાયુર્વા
અન્તરિક્ષસ્યાધ્યક્ષાઃ । અન્તરિક્ષદેવત્યાઃ ખલુ વૈ પશવઃ
॥ ૩। ૨। ૧। ૩॥

૪ વાયવ એવૈનાન્પરિદદાતિ । પ્ર વા એનાનેતદાકરોતિ । યદાહ । વાયવઃ
સ્થેત્યુપાયવઃ સ્થેત્યાહ । યજમાનાયૈવ પશૂનુપહ્વયતે । દેવો વઃ
સવિતા પ્રાર્પયત્વિત્યાહ પ્રસૂત્યૈ । શ્રેષ્ઠતમાય કર્મણ ઇત્યાહ
। યજ્ઞો હિ શ્રેષ્ઠતમં કર્મ । તસ્માદેવમાહ । આપ્યાયધ્વમઘ્નિયા

દેવભાગમિત્યાહ ॥ ૩। ૨। ૧। ૪॥

૫ વથ્સેભ્યશ્ચ વા એતાઃ પુરા મનુષ્યેભ્યશ્ચાપ્યાયન્ત । દેવેભ્ય
એવૈના ઇન્દ્રાયાપ્યાયયતિ । ઊર્જસ્વતીઃ પયસ્વતીરિત્યાહ । ઊર્જꣳ
હિ પયઃ સંભરન્તિ । પ્રજાવતીરનમીવા અયક્ષ્મા ઇત્યાહ પ્રજાત્યૈ ।
મા વઃ સ્તેન ઈશત માઽઘશꣳસ ઇત્યાહ ગુપ્ત્યૈ । રુદ્રસ્ય હેતિઃ
પરિ વો વૃણક્ત્વિત્યાહ । રુદ્રાદેવૈનાસ્ત્રાયતે । ધ્રુવા અસ્મિન્ગોપતૌ સ્યાત
બહ્વીરિત્યાહ । ધ્રુવા એવાસ્મિન્બહ્વીઃ કરોતિ ॥ ૩। ૨। ૧। ૫॥

૬ યજમાનસ્ય પશૂન્પાહીત્યાહ । પશૂનાં ગોપીથાય । તસ્માથ્સાયં
પશવ ઉપસમાવર્તન્તે । અનધઃ સાદયતિ । ગર્ભાણાં ધૃત્યા અપ્રપાદાય
। તસ્માદ્ગર્ભાઃ પ્રજાનામપ્રપાદુકાઃ । ઉપરીવ નિદધાતિ । ઉપરીવ હિ
સુવર્ગો લોકઃ । સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ ॥ ૩। ૨। ૧। ૬॥ પશવઃ
કરોતિ પશવો દેવભાગમિત્યાહ કરોતિ નવ ચ ॥ ૧॥

૭ દેવસ્ય ત્વા સવિતુઃ પ્રસવ ઇત્યશ્વપર્શુમાદત્તે પ્રસૂત્યૈ ।
અશ્વિનોર્બાહુભ્યામિત્યાહ । અશ્વિનૌ હિ દેવાનામધ્વર્યૂ આસ્તામ્ । પૂષ્ણો
હસ્તાભ્યામિત્યાહ યત્યૈ । યો વા ઓષધીઃ પર્વશો વેદ । નૈનાઃ સ હિનસ્તિ ।
પ્રજાપતિર્વા ઓષધીઃ પર્વશો વેદ । સ એના ન હિનસ્તિ । અશ્વપર્શ્વા
બર્હિરચ્છૈતિ । પ્રાજાપત્યો વા અશ્વઃ સયોનિત્વાય ॥ ૩। ૨। ૨। ૧॥

૮ ઓષધીનામહિꣳસાયૈ । યજ્ઞસ્ય ઘોષદસીત્યાહ । યજમાન એવ
રયિં દધાતિ । પ્રત્યુષ્ટꣳ રક્ષઃ પ્રત્યુષ્ટા અરાતય ઇત્યાહ ।
રક્ષસામપહત્યૈ । પ્રેયમગાદ્ધિષણા બર્હિરચ્છેત્યાહ । વિદ્યા વૈ
ધિષણા । વિદ્યયૈવૈનદચ્છૈતિ । મનુના કૃતા સ્વધયા વિતષ્ટેત્યાહ
। માનવી હિ પર્શુઃ સ્વધા કૃતા ॥ ૩। ૨। ૨। ૨॥

૯ ત આવહન્તિ કવયઃ પુરસ્તાદિત્યાહ । શુશ્રુવાꣳસો વૈ કવયઃ ।
યજ્ઞઃ પુરસ્તાત્ । મુખત એવ યજ્ઞમારભતે । અથો યદેતદુક્ત્વા યતઃ
કુતશ્ચાહરતિ । તત્પ્રાચ્યા એવ દિશો ભવતિ । દેવેભ્યો જુષ્ટમિહ
બર્હિરાસદ ઇત્યાહ । બર્હિષઃ સમૃદ્ધ્યૈ । કર્મણોઽનપરાધાય ।
દેવાનાં પરિષૂતમસીત્યાહ ॥ ૩। ૨। ૨। ૩॥

૧૦ યદ્વા ઇદં કિંચ । તદ્દેવાનાં પરિષૂતમ્ । અથો યથા વસ્યસે
પ્રતિપ્રોચ્યાહેદં કરિષ્યામીતિ । એવમેવ તદધ્વર્યુર્દેવેભ્યઃ
પ્રતિપ્રોચ્ય બર્હિર્દાતિ । આત્મનોઽહિ ँસાયૈ । યાવતઃ સ્તમ્બાન્પરિદિશેત્ ।
યત્તેષામુચ્છિંગ્ગૃષ્યાત્ । અતિ તદ્યજ્ઞસ્ય રેચયેત્ । એકગ્ગ્ સ્તમ્બં પરિદિશેત્
। તँ સર્વં દાયાત્ ॥ ૩। ૨। ૨। ૪॥
૧૧ યજ્ઞસ્યાનતિરેકાય । વર્ષવૃદ્ધમસીત્યાહ । વર્ષવૃદ્ધા વા
ઓષધયઃ । દેવ બર્હિરિત્યાહ । દેવેભ્ય એવૈનત્કરોતિ । મા ત્વાઽન્વઙ્મા
તિર્યગિત્યાહાહિँસાયૈ । પર્વતે રાધ્યાસમિત્યાહર્દ્ધ્યૈ । આચ્છેત્તા તે
મારિષમિત્યાહ । નાસ્યાત્મનો મીયતે । ય એવં વેદ ॥ ૩। ૨। ૨। ૫॥
૧૨ દેવ બર્હિઃ શતવલ્શં વિરોહેત્યાહ । પ્રજા વૈ બર્હિઃ ।
પ્રજાનાં પ્રજનનાય । સહસ્રવલ્શા વિ વયँ રુહેમેત્યાહ ।
આશિષમેવૈતામાશાસ્તે । પૃથિવ્યાઃ સંપૃચઃ પાહીત્યાહ પ્રતિષ્ઠિત્યૈ
। અયુઙ્ગાઽયુઙ્ગાન્મુષ્ટીન્લુનોતિ । મિથુનત્વાય પ્રજાત્યૈ । સુસંભૃતા
ત્વા સંભરામીત્યાહ । બ્રહ્મણૈવૈનથ્સંભરતિ ॥ ૩। ૨। ૨। ૬॥
૧૩ અદિત્યૈ રાસ્નાઽસીત્યાહ । ઇયં વા અદિતિઃ । અસ્યા એવૈનદ્રાસ્નાં કરોતિ ।
ઇન્દ્રાણ્યૈ સંનહનમિત્યાહ । ઇન્દ્રાણી વા અગ્રે દેવતાનાँ સમનહ્યત
। સાઽઽર્ધ્નોત્ । ઋદ્ધ્યૈ સન્નહ્યતિ । પ્રજા વૈ બર્હિઃ । પ્રજાનામપરાવાપાય
। તસ્માથ્સ્નાવસંતતાઃ પ્રજા જાયન્તે ॥ ૩। ૨। ૨। ૭॥
૧૪ પૂષા તે ગ્રન્થિં ગ્રથ્નાત્વિત્યાહ । પુષ્ટિમેવ યજમાને દધાતિ । સ
તે માઽઽસ્થાદિત્યાહાહિँસાયૈ । પશ્ચાત્પ્રાઞ્ચમુપ ગૂહતિ । પશ્ચાદ્ધિ
પ્રાચીનँ રેતો ધીયતે । પશ્ચાદેવાસ્મૈ પ્રાચીનँ રેતો દધાતિ
। ઇન્દ્રસ્ય ત્વા બાહુભ્યામુદ્યચ્છ ઇત્યાહ । ઇન્દ્રિયમેવ યજમાને દધાતિ ।
બૃહસ્પતેર્મૂર્ધ્ના હરામીત્યાહ । બ્રહ્મ વૈ દેવાનાં બૃહસ્પતિઃ ॥ ૩। ૨। ૨। ૮॥
૧૫ બ્રહ્મણૈવૈનદ્ધરતિ । ઉર્વન્તરિક્ષમન્વિહીત્યાહ ગત્યૈ ।
દેવંગમમસીત્યાહ । દેવાનેવૈનદ્ગમયતિ । અનધઃ સાદયતિ । ગર્ભાણાં
ધૃત્યા અપ્રપાદાય । તસ્માદ્ગર્ભાઃ પ્રજાનામપ્રપાદુકાઃ । ઉપરીવ નિદધાતિ

। ઉપરીવ હિ સુવર્ગો લોકઃ । સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ ॥ ૩। ૨। ૨। ૯॥ સયોનિત્વાય સ્વધાકૃતાઽસીત્યાહ
દાયાદ્વેદ ભરતિ જાયન્તે
બૃહસ્પતિઃ સમષ્ટ્યૈ ॥ ૨॥

૧૬ પૂર્વેદ્યુરિધ્માબર્હિઃ કરોતિ । યજ્ઞમેવારભ્ય ગૃહીત્વોપવસતિ ।
પ્રજાપતિર્યજ્ઞમસૃજત । તસ્યોખે અસ્રꣳ સેતામ્ । યજ્ઞો વૈ પ્રજાપતિઃ ।
યથ્સાંન્નાય્યોખે ભવતઃ । યજ્ઞસ્યૈવ તદુખે ઉપદધાત્યપ્રસ્રꣳસાય
। શુન્ધધ્વં દૈવ્યાય કર્મણે દેવયજ્યાયા ઇત્યાહ । દેવયજ્યાયા
એવૈનાનિ શુન્ધતિ । માતરિશ્વનો ઘર્મોઽસીત્યાહ ॥ ૩। ૨। ૩। ૧॥

૧૭ અન્તરિક્ષં વૈ માતરિશ્વનો ઘર્મઃ । એષાં લોકાનાં વિધૃત્યૈ ।
દ્યૌરસિ પૃથિવ્યસીત્યાહ । દિવશ્ચ હ્યેષા પૃથિવ્યાશ્ચ સંભૃતા ।
યદુખા । તસ્માદેવમાહ । વિશ્વધાયા અસિ પરમેણ ધામ્નેત્યાહ । વૃષ્ટિર્વૈ
વિશ્વધાયાઃ । વૃષ્ટિમેવાવરુન્ધે । દૃꣳહસ્વ મા હ્વારિત્યાહ
ધૃત્યૈ ॥ ૩। ૨। ૩। ૨॥

૧૮ વસૂનાં પવિત્રમસીત્યાહ । પ્રાણા વૈ વસવઃ । તેષાં વા
એતદ્ભાગધેયમ્ । યત્પવિત્રમ્ । તેભ્ય એવૈનત્કરોતિ । શતધારꣳ
સહસ્રધારમિત્યાહ । પ્રાણેષ્વેવાયુર્દધાતિ સર્વત્વાય । ત્રિવૃત્પલાશ
શાખાયાં દર્ભમયં ભવતિ । ત્રિવૃદ્વૈ પ્રાણઃ । ત્રિવૃતમેવ પ્રાણં
મધ્યતો યજમાને દધાતિ ॥ ૩। ૨। ૩। ૩॥

૧૯ સૌમ્યઃ પર્ણઃ સયોનિત્વાય । સાક્ષાત્પવિત્રં દર્ભાઃ ।
પ્રાખ્સાયમધિનિદધાતિ । તત્પ્રાણાપાનયો રૂપમ્ । તિર્યક્પ્રાતઃ । તદ્દર્શસ્ય
રૂપમ્ । દાર્શ્યરꣳ હ્યેતદહઃ । અન્નં વૈ ચન્દ્રમાઃ । અન્નં પ્રાણાઃ ।
ઉભયમેવોપૈત્યજામિત્વાય ॥ ૩। ૨। ૩। ૪॥

૨૦ તસ્માદયꣳ સર્વતઃ પવતે । હુતઃ સ્તોકો હુતો દ્રપ્સ ઇત્યાહ
પ્રતિષ્ઠિત્યૈ । હવિષોઽસ્કન્દાય । ન હિ હુતરꣳ સ્વાહાકૃતગ્ગ્
સ્કન્દતિ । દિવિ નાકો નામાગ્નિઃ । તસ્ય વિપ્રુષો ભાગધેયમ્ । અગ્નયે
બૃહતે નાકાયેત્યાહ । નાકમેવાગ્નિં ભાગધેયેન સમર્ધયતિ । સ્વાહા
દ્યાવાપૃથિવીભ્યામિત્યાહ । દ્યાવાપૃથિવ્યોરેવૈનત્ પ્રતિષ્ઠાપયતિ ॥ ૩। ૨। ૩। ૫॥

૨૧ પવિત્રવત્યાનયતિ । અપાં ચૈવૌષધીનાં ચ રસ ँ સ ँ સૃજતિ
। અથો ઓષધીષ્વેવ પશૂન્પ્રતિષ્ઠાપયતિ । અન્વારભ્ય વાચં યચ્છતિ
। યજ્ઞસ્ય ધૃત્યૈ । ધારયન્નાસ્તે । ધારયન્ત ઇવ હિ દુહન્તિ ।
કામધુક્ષ ઇત્યાહા તૃતીયસ્યૈ । ત્રય ઇમે લોકાઃ । ઇમાનેવ લોકાન્,
યજમાનો દુહે ॥ ૩। ૨। ૩। ૬॥

૨૨ અમૂમિતિ નામ ગૃહ્ણાતિ । ભદ્રમેવાસાં કર્માવિષ્કરોતિ । સા વિશ્વાયુઃ
સા વિશ્વવ્યચાઃ સા વિશ્વકર્મેત્યાહ । ઇયં વૈ વિશ્વાયુઃ । અન્તરિક્ષં
વિશ્વવ્યચાઃ । અસૌ વિશ્વકર્મા । ઇમાનેવૈતાભિર્લોકાન્, યથાપૂર્વં
દુહે । અથો યથા પ્રદાત્રે પુણ્યમાશાસ્તે । એવમેવૈના એતદુપસ્તૌતિ ।
તસ્માત્પ્રાદાદિત્યુન્નીય વન્દમાના ઉપસ્તુવન્તઃ પશૂન્દુહન્તિ ॥ ૩। ૨। ૩। ૭॥

૨૩ બહુ દુગ્ધીન્દ્રાય દેવેભ્યો હવિરિતિ વાચં વિસૃજતે ।
યથાદેવતમેવ પ્રસૌતિ । દૈવ્યસ્ય ચ માનુષસ્ય ચ વ્યાવૃત્ત્યૈ
। ત્રિરાહ । ત્રિષત્યા હિ દેવાઃ । અવાચં યમોઽનન્વારભ્યોત્તરાઃ ।
અપરિમિતમેવાવરુન્ધે । ન દારુપાત્રેણ દુહ્યાત્ । અગ્નિવદ્ધૈ દારુપાત્રમ્ ।
યદ્દારુપાત્રેણ દુહ્યાત્ ॥ ૩। ૨। ૩। ૮॥

૨૪ યાતયામ્ના હવિષા યજેત । અથો ખલ્વાહુઃ । પુરોડાશમુખાનિ વૈ
હવી ँ ષિ । નેત ઇતઃ પુરોડાશ ँ હવિષો યામોઽસ્તીતિ । કામમેવ
દારુપાત્રેણ દુહ્યાત્ । શૂદ્ર એવ ન દુહ્યાત્ । અસતો વા એષ સંભૂતઃ ।
યચ્છૂદ્રઃ । અહવિરેવ તદિત્યાહુઃ । યચ્છૂદ્રો દોગ્ધીતિ ॥ ૩। ૨। ૩। ૯॥

૨૫ અગ્નિહોત્રમેવ ન દુહ્યાચ્છૂદ્રઃ । તદ્ધિ નોત્પુનન્તિ । યદા ખલુ વૈ
પવિત્રમત્યેતિ । અથ તદ્ધવિરિતિ । સંપૃચ્યધ્વમૃતાવરીરિત્યાહ ।
અપાં ચૈવૌષધીનાં ચ રસ ँ સ ँ સૃજતિ । તસ્માદપાં ચૌષધીનાં
ચ રસમુપજીવામઃ । મન્દ્રા ધનસ્ય સાતય ઇત્યાહ । પુષ્ટિમેવ યજમાને
દધાતિ । સોમેન ત્વાઽઽતનચ્મીન્દ્રાય દધીત્યાહ ॥ ૩। ૨। ૩। ૧૦॥

૨૬ સોમમેવૈનત્કરોતિ । યો વૈ સોમં ભક્ષયિત્વા । સંવત્સર ँ સોમં ન
પિબતિ । પુનર્ભક્ષ્યોઽસ્ય સોમપીથો ભવતિ । સોમઃ ખલુ વૈ સાન્નાય્યમ્ ।

ય એવં વિદ્વાન્થ્સાંનાય્યં પિબતિ । અપુનર્ભક્ષ્યોઽસ્ય સોમપીથો ભવતિ

। ન મૃન્મયેનાપિદધ્યાત્ । યન્મૃન્મયેનાપિદધ્યાત્ । પિતૃદેવત્યગ્ગ્

સ્યાત્ ॥ ૩। ૨। ૩। ૧૧॥

૨૭ અયસ્પાત્રેણ વા દારુપાત્રેણ વાઽપિદધાતિ । તદ્ધિ સદેવમ્ ।

ઉદન્વદ્ભવતિ । આપો વૈ રક્ષોઘ્નીઃ । રક્ષસામપહત્યૈ । અદસ્તમસિ

વિષ્ણવે ત્વેત્યાહ । યજ્ઞો વૈ વિષ્ણુઃ । યજ્ઞાયૈવૈનદદસ્તં કરોતિ ।

વિષ્ણો હવ્યꣳ રક્ષસ્વેત્યાહ ગુપ્ત્યૈ । અનધઃ સાદયતિ । ગર્ભાણાં

ધૃત્યા અપ્રપાદાય । તસ્માદ્ગર્ભાઃ પ્રજાનામપ્રપાદુકાઃ । ઉપરીવ નિદધાતિ

। ઉપરીવ હિ સુવર્ગો લોકઃ । સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ ॥ ૩। ૨। ૩। ૧૨॥ અસીત્યાહ ધૃત્યૈ યજમાને

દધાત્યજામિત્વાય સ્થાપયતિ દુહે દુહન્તિ

દુહ્યાદ્દોગ્ધીતિ દધીત્યાહ સ્યાત્સાદયતિ પઙ્ચ ચ ॥ ૩॥

૨૮ કર્મણે વાં દેવેભ્યઃ શકેયમિત્યાહ શક્ત્યૈ । યજ્ઞસ્ય વૈ

સંતતિમનુ પ્રજાઃ પશવો યજમાનસ્ય સંતાયન્તે । યજ્ઞસ્ય

વિચ્છિત્તિમનુ પ્રજાઃ પશવો યજમાનસ્ય વિચ્છિદ્યન્તે ।

યજ્ઞસ્ય સંતતિરસિ યજ્ઞસ્ય ત્વા સંતત્યૈ સ્તૃણામિ સંતત્યૈ

ત્વા યજ્ઞસ્યેત્યાહવનીયાત્સંતનોતિ । યજમાનસ્ય પ્રજાયૈ પશૂનાꣳ

સંતત્યૈ । અપઃ પ્રણયતિ । શ્રદ્ધા વા આપઃ । શ્રદ્ધામેવારભ્ય પ્રણીય

પ્રચરતિ । અપઃ પ્રણયતિ । યજ્ઞો વા આપઃ ॥ ૩। ૨। ૪। ૧॥

૨૯ યજ્ઞમેવારભ્ય પ્રણીય પ્રચરતિ । અપઃ પ્રણયતિ । વજ્રો વા આપઃ ।

વજ્રમેવ ભ્રાતૃવ્યેભ્યઃ પ્રહૃત્ય પ્રણીય પ્રચરતિ । અપઃ પ્રણયતિ ।

આપો વૈ રક્ષોઘ્નીઃ । રક્ષસામપહત્યૈ । અપઃ પ્રણયતિ । આપો વૈ દેવાનાં

પ્રિયં ધામ । દેવાનામેવ પ્રિયં ધામ પ્રણીય પ્રચરતિ ॥ ૩। ૨। ૪। ૨॥

૩૦ અપઃ પ્રણયતિ । આપો વૈ સર્વા દેવતાઃ । દેવતા એવારભ્ય પ્રણીય

પ્રચરતિ । વેષાય ત્વેત્યાહ । વેષાય હ્યેનદાદત્તે । પ્રત્યુષ્ટꣳ

રક્ષઃ પ્રત્યુષ્ટા અરાતય ઇત્યાહ । રક્ષસામપહત્યૈ । ધૂરસીત્યાહ ।

એષ વૈ ધુર્યોઽગ્નિઃ । તં યદનુપસ્પૃશ્યાતીયાત્ ॥ ૩। ૨। ૪। ૩॥

૩૧ અધ્વર્યું ચ યજમાનં ચ પ્રદહેત્ । ઉપસ્પૃશ્યાત્યેતિ ।

અધ્વર્યોશ્ચ યજમાનસ્ય ચાપ્રદાહાય । ધૂર્વતં યોઽસ્માન્ધૂર્વતિ તં
ધૂર્વયં વયં ધૂર્વામ ઇત્યાહ । દ્વૌ વાવ પુરુષૌ । યં ચૈવ ધૂર્વતિ ।
યશ્ચૈનં ધૂર્વતિ । તાવુભૌ શુચાઽર્પયતિ । ત્વં દેવાનામસિ સસ્નિતમં
પપ્રિતમં જુષ્ટતમં વહ્નિતમં દેવહૂતમમિત્યાહ । યથા યજુરેવૈતત્
॥ ૩। ૨। ૪। ૪॥

૩૨ અહ્રુતમસિ હવિર્ધાનમિત્યાહાનાર્ત્યૈ । દૃꣳહસ્વ મા હ્વારિત્યાહ
ધૃત્યૈ । મિત્રસ્ય ત્વા ચક્ષુષા પ્રેક્ષ ઇત્યાહ મિત્રત્વાય
। મા ભેર્મા સંવિક્થા મા ત્વા હિꣳસિષમિત્યાહાહિꣳસાયૈ । યદ્વૈ
કિંચ વાતો નાભિવાતિ । તથ્સર્વં વરુણદેવત્યમ્ । ઉરુવાતાયેત્યાહ ।
અવારુણમેવૈનત્કરોતિ । દેવસ્ય ત્વા સવિતુઃ પ્રસવ ઇત્યાહ પ્રસૂત્યૈ ।
અશ્વિનોર્બાહુભ્યામિત્યાહ ॥ ૩। ૨। ૪। ૫॥

૩૩ અશ્વિનૌ હિ દેવાનામધ્વર્યૂ આસ્તામ્ । પૂષ્ણો હસ્તાભ્યામિત્યાહ યત્યૈ
। અગ્નયે જુષ્ટં નિર્વપામીત્યાહ । અગ્નય એવૈનાં જુષ્ટં નિર્વપતિ ।
ત્રિર્યજુષા । ત્રય ઇમે લોકાઃ । એષાં લોકાનામાપ્ત્યૈ । તૂષ્ણીં ચતુર્થમ્ ।
અપરિમિતમેવાવરુન્ધે । સ એવમેવાનુ પૂર્વꣳ હવીꣳષિ નિર્વપતિ ॥
૩। ૨। ૪। ૬॥

૩૪ ઇદં દેવાનામિદમુનઃ સહેત્યાહ વ્યાવૃત્ત્યૈ । સ્ફાત્યૈ ત્વા નારાત્યા
ઇત્યાહ ગુપ્ત્યૈ । તમસીવ વા એષોઽન્તશ્ચરતિ । યઃ પરીણહિ
। સુવરભિ વિખ્યેષં વૈશ્વાનરં જ્યોતિરિત્યાહ । સુવરેવાભિ
વિપશ્યતિ વૈશ્વાનરં જ્યોતિઃ । દ્યાવાપૃથિવી હવિષિ ગૃહીત
ઉદવેપેતામ્ । દૃꣳહન્તાં દુર્યા દ્યાવાપૃથિવ્યોરિત્યાહ । ગૃહાણાં
દ્યાવાપૃથિવ્યોર્ધૃત્યૈ । ઉર્વન્તરિક્ષમન્વિહીત્યાહ ગત્યૈ ।
અદિત્યાસ્ત્વોપસ્થે સાદયામીત્યાહ । ઇયં વા અદિતિઃ । અસ્યા એવૈનદુપસ્થે
સાદયતિ । અગ્ને હવ્યꣳ રક્ષસ્વેત્યાહ ગુપ્ત્યૈ ॥ ૩। ૨। ૪। ૭॥ યજ્ઞો વા
આપો ધામ પ્રણીય પ્રચરત્યતીયાદેતદ્બાહુભ્યામિત્યાહ હવીꣳષિ
નિર્વપતિ ગત્યૈ ચત્વારિ ચ ॥ ૪॥

૩૫ ઇન્દ્રો વૃત્રમહન્ । સોઽપઃ । અભ્યમ્રિયત । તાસાં યન્મેધ્યં

યજ્ઞિય ઁ સદેવમાસીત્ । તદપોદક્રામત્ । તે દર્ભા અભવન્ ।
યદ્દર્ભૈરપ ઉત્પુનાતિ । યા એવ મેધ્યા યજ્ઞિયાઃ સદેવા આપઃ ।
તાભિરેવૈના ઉત્પુનાતિ । દ્વાભ્યામુત્પુનાતિ ॥ ૩। ૨। ૫। ૧॥

૩૬ દ્વિપાદ્યજમાનઃ પ્રતિષ્ઠિત્યૈ । દેવો વઃ સવિતોત્પુનાત્વિત્યાહ ।
સવિતૃપ્રસૂત એવૈના ઉત્પુનાતિ । અચ્છિદ્રેણ પવિત્રેણેત્યાહ । અસૌ
વા આદિત્યોઽચ્છિદ્રં પવિત્રમ્ । તેનૈવૈના ઉત્પુનાતિ । વસોઃ સૂર્યસ્ય
રશ્મિભિરિત્યાહ । પ્રાણા વા આપઃ । પ્રાણા વસવઃ । પ્રાણા રશ્મયઃ ॥ ૩। ૨। ૫। ૨॥

૩૭ પ્રાણૈરેવ પ્રાણાન્થ્સંપૃણક્તિ । સાવિત્રિયર્ચા । સવિતૃપ્રસૂતં
મે કર્માસદિતિ । સવિતૃપ્રસૂતમેવાસ્ય કર્મ ભવતિ । પચ્છો
ગાયત્રિયા ત્રિષ્ષમૃદ્ધત્વાય । આપો દેવીરગ્રેપુવો અગ્રે ગુવ ઇત્યાહ ।
રૂપમેવાસામેતન્મહિમાનં વ્યાચષ્ટે । અગ્ર ઇમં યજ્ઞં નયતાગ્રે
યજ્ઞપતિમિત્યાહ । અગ્ર એવ યજ્ઞં નયન્તિ । અગ્રે યજ્ઞપતિમ્ ॥ ૩। ૨। ૫। ૩॥

૩૮ યુષ્માનિન્દ્રોઽવૃણીત વૃત્રતૂર્યે યૂયમિન્દ્રમવૃણીધ્વં વૃત્રતૂર્યે
ઇત્યાહ । વૃત્ર ઁ હ હનિષ્યન્નિન્દ્ર આપો વવ્રે । આપો હેન્દ્રં વવ્રિરે
। સંજ્ઞામેવાસામેતથ્સામાનં વ્યાચષ્ટે । પ્રોક્ષિતાઃ સ્થેત્યાહ ।
તેનાપઃ પ્રોક્ષિતાઃ । અગ્નયે વો જુષ્ટં પ્રોક્ષામ્યગ્નીષોમાભ્યામિત્યાહ ।
યથાદેવતમેવૈનાન્પ્રોક્ષતિ । ત્રિઃ પ્રોક્ષતિ । ત્ર્યાવૃદ્ધિ યજ્ઞઃ ॥

૩। ૨। ૫। ૪॥

૩૯ અથો રક્ષસામપહત્યૈ । શુન્ધધ્વં દૈવ્યાય કર્મણે દેવયજ્યાયા
ઇત્યાહ । દેવયજ્યાયા એવૈનાનિ શુન્ધતિ । ત્રિઃ પ્રોક્ષતિ । ત્ર્યાવૃદ્ધિ
યજ્ઞઃ । અથો મેધ્યત્વાય । અવધૂત ઁ રક્ષોઽવધૂતા અરાતય ઇત્યાહ
। રક્ષસામપહત્યૈ । અદિત્યાસ્ત્વગસીત્યાહ । ઇયં વા અદિતિઃ ॥ ૩। ૨। ૫। ૫॥

૪૦ અસ્યા એવૈનત્ત્વચં કરોતિ । પ્રતિ ત્વા પૃથિવી વેત્ત્વિત્યાહ પ્રતિષ્ઠિત્યૈ
। પુરસ્તાત્પ્રતીચીન ગ્રીવમુત્તરલોમોપ સ્તૃણાતિ મેધ્યત્વાય ।
તસ્માત્પુરસ્તાત્પ્રત્યઞ્ચઃ પશવો મેધમુપતિષ્ઠન્તે । તસ્માત્પ્રજા
મૃગં ગ્રાહુકાઃ । યજ્ઞો દેવેભ્યો નિલાયત । કૃષ્ણો રૂપં કૃત્વા ।
યત્કૃષ્ણાજિને હવિરધ્યવહન્તિ । યજ્ઞાદેવ તદ્યજ્ઞં પ્રયુઙ્ક્તે ।

હવિષોઽસ્કન્દાય ॥ ૩। ૨। ૫। ૬॥

૪૧ અધિષવણમસિ વાનસ્પત્યમિત્યાહ । અધિષવણમેવૈનત્કરોતિ । પ્રતિ
ત્વાઽદિત્યાસ્ત્વગ્વેત્ત્વિત્યાહ સયત્વાય । અગ્નેસ્તનૂરસીત્યાહ । અગ્નેર્વા
એષા તનૂઃ । યદોષધયઃ । વાચો વિસર્જનમિત્યાહ । યદા હિ પ્રજા
ઓષધીનામશ્નન્તિ । અથ વાચં વિસૃજન્તે । દેવવીતયે ત્વા ગૃહ્ણામીત્યાહ
॥ ૩। ૨। ૫। ૭॥

૪૨ દેવતાભિરેવૈનથ્સમર્ધયતિ । અદ્રિરસિ વાનસ્પત્ય ઇત્યાહ ।
ગ્રાવાણમેવૈનત્કરોતિ । સ ઇદં દેવેભ્યો હવ્યꣳ સુશમિ શમિષ્વેત્યાહ
શાન્ત્યૈ । હવિષ્કૃદેહીત્યાહ । ય એવ દેવાનાꣳહવિષ્કૃતઃ । તાન્હ્વયતિ
। ત્રિર્હ્વયતિ । ત્રિષત્યા હિ દેવાઃ । ઇષમા વદોર્જમા વદેત્યાહ ॥ ૩। ૨। ૫। ૮॥

૪૩ ઇષમેવોર્જં યજમાને દધાતિ । દ્યુમદ્વદત વયꣳ સંઘાતં
જેષ્મેત્યાહ ભ્રાતૃવ્યાભિભૂત્યૈ । મનોઃ શ્રદ્ધાદેવસ્ય
યજમાનસ્યાસુરઘ્ની વાક્ । યજ્ઞાયુધેષુ પ્રવિષ્ટાઽઽસીત્ । તેઽસુરા
યાવન્તો યજ્ઞાયુધાનામુદ્વદતામુપાશ઼ૃણ્વન્ન્ । તે પરાભવન્ન્ ।
તસ્માથ્સ્વાનાં મધ્યેઽવસાય યજેત । યાવન્તોઽસ્ય ભ્રાતૃવ્યા
યજ્ઞાયુધાનામુદ્વદતામુપશ઼ૃણ્વન્તિ । તે પરાભવન્તિ । ઉચ્ચૈઃ
સમાહન્તવા આહ વિજિત્યૈ ॥ ૩। ૨। ૫। ૯॥

૪૪ વૃઙ્ક્ત એષામિન્દ્રિયં વીર્યમ્ । શ્રેષ્ઠ એષાં ભવતિ ।
વર્ષવૃદ્ધમસિ પ્રતિ ત્વા વર્ષવૃદ્ધં વેત્ત્વિત્યાહ ।
વર્ષવૃદ્ધા વા ઓષધયઃ । વર્ષવૃદ્ધા ઇષીકાઃ સમૃદ્ધ્યૈ ।
યજ્ઞꣳ રક્ષાગ્સ્યનુપ્રાવિશન્ન્ । તાન્યસ્ના પશુભ્યો નિરવાદયન્ત ।
તુષૈરોષધીભ્યઃ । પરાપૂતꣳ રક્ષઃ પરાપૂતા અરાતય ઇત્યાહ ।
રક્ષસામપહત્યૈ ॥ ૩। ૨। ૫। ૧૦॥

૪૫ રક્ષસાં ભાગોઽસીત્યાહ । તુષૈરેવ રક્ષાꣳસિ નિરવદયતે ।
અપ ઉપસ્પૃશતિ મેધ્યત્વાય । વાયુર્વો વિવિનક્ત્વિત્યાહ । પવિત્રં વૈ
વાયુઃ । પુનાત્યેવૈનાન્ । અન્તરિક્ષાદિવ વા એતે પ્રસ્કન્દન્તિ । યે શૂર્પાત્
। દેવો વઃ સવિતા હિરણ્યપાણિઃ પ્રતિગૃહ્ણાત્વિત્યાહ પ્રતિષ્ઠિત્યૈ ।

હવિષોઽસ્કન્દાય । ત્રિષ્ફલી કર્તવા આહ । ત્ર્યાવૃદ્ધિ યજ્ઞઃ ।
અથો મેધ્યત્વાય ॥ ૩। ૨। ૫। ૧૧॥ દ્વાભ્યામુત્પુનાતિ રશ્મયો નયન્ત્યગ્રે
યજ્ઞપતિં યજ્ઞોઽદિતિરસ્કન્દાય ગૃહ્ણામીત્યાહ વદેત્યાહ વિજિત્યા
અપહત્યા અસ્કન્દાય ત્રીણિ ચ ॥ ૫॥

૪૬ અવધૂત ँ રક્ષોઽવધૂતા અરાતય ઇત્યાહ । રક્ષસામપહત્યૈ
। અદિત્યાસ્ત્વગસીત્યાહ । ઇયં વા અદિતિઃ । અસ્યા એવૈનત્ત્વચં કરોતિ ।
પ્રતિ ત્વા પૃથિવી વેત્ત્વિત્યાહ પ્રતિષ્ઠિત્યૈ । પુરસ્તાત્પ્રતીચીન
ગ્રીવમુત્તર લોમોપસ્તૃણાતિ મેધ્યત્વાય । તસ્માત્પુરસ્તાત્પ્રત્યઞ્ચઃ
પશવો મેધમુપતિષ્ઠન્તે । તસ્માત્પ્રજા મૃગં ગ્રાહુકાઃ । યજ્ઞો દેવેભ્યો
નિલાયત ॥ ૩। ૨। ૬। ૧॥

૪૭ કૃષ્ણો રૂપં કૃત્વા । યત્કૃષ્ણાજિને હવિરધિ પિનષ્ટિ ।
યજ્ઞાદેવ તદ્યજ્ઞં પ્રયુઙ્ક્તે । હવિષોઽસ્કન્દાય । દ્યાવાપૃથિવી
સહાસ્તામ્ । તે શમ્યામાત્રમેકમહર્વ્યૈતા ँશમ્યામાત્રમેકમહઃ । દિવઃ
સ્કમ્ભનિરસિ પ્રતિ ત્વાઽદિત્યાસ્ત્વગ્વેત્ત્વિત્યાહ । દ્યાવાપૃથિવ્યોર્વીત્યૈ
। ધિષણાઽસિ પર્વત્યા પ્રતિ ત્વા દિવઃ સ્કમ્ભ નિર્વેત્ત્વિત્ત્યાહ ।
દ્યાવાપૃથિવ્યોર્વિધૃત્યૈ ॥ ૩। ૨। ૬। ૨॥

૪૮ ધિષણાઽસિ પાર્વતેયી પ્રતિ ત્વા પર્વતિર્વેત્ત્વિત્યાહ ।
દ્યાવાપૃથિવ્યોર્ધૃત્યૈ । દેવસ્ય ત્વા સવિતુઃ પ્રસવ ઇત્યાહ
પ્રસૂત્યૈ । અશ્વિનોર્બાહુભ્યામિત્યાહ । અશ્વિનૌ હિ દેવાનામધ્વર્યૂ
આસ્તામ્ । પૂષ્ણો હસ્તાભ્યામિત્યાહ યત્યૈ । અધિવપામીત્યાહ ।
યથાદેવતમેવૈનાનધિવપતિ । ધાન્યમસિ ધિનુહિ દેવાનિત્યાહ ।
એતસ્ય યજુષો વીર્યેણ ॥ ૩। ૨। ૬। ૩॥

૪૯ યાવદેકા દેવતા કામયતે યાવદેકા । તાવદાહુતિઃ પ્રથતે । ન હિ
તદસ્તિ । યત્તાવદેવ સ્યાત્ । યાવજ્જુહોતિ । પ્રાણાય ત્વાઽપાનાયત્વેત્યાહ
। પ્રાણાનેવ યજમાને દધાતિ । દીર્ઘામનુ પ્રસિતિમાયુષે ધામિત્યાહ
। આયુરેવાસ્મિન્દધાતિ । અન્તરિક્ષાદિવ વા એતાનિ પ્રસ્કન્દન્તિ । યાનિ
દૃષદઃ । દેવો વઃ સવિતા હિરણ્યપાણિઃ પ્રતિગૃહ્ણાત્વિત્યાહ

પ્રતિષ્ઠિત્યૈ । હવિષોઽસ્કન્દાય । અસંવપન્તી પિꣳષાણૂનિ કુરુતાદિત્યાહ
મેધ્યત્વાય ॥ ૩। ૨। ૬। ૪॥ નિલાયત વિધૃત્યૈ વીર્યેણ સ્કન્દન્તિ ચત્વારિ
ચ ॥ ૬॥

૫૦ ધૃષ્ટિરસિ બ્રહ્મ યચ્છેત્યાહ ધૃત્યૈ । અપાગ્નેઽગ્નિ મા માદં
જહિ નિષ્ક્રવ્યાદꣳસેધા દેવયજં વહેત્યાહ । ય એવામાત્ક્રવ્યાત્ ।
તમપહત્ય । મેધ્યેઽગ્નૌ કપાલમુપદધાતિ । નિર્દગ્ધꣳ રક્ષો
નિર્દગ્ધા અરાતય ઇત્યાહ । રક્ષાગ્સ્યેવ નિર્દહતિ । અગ્નિવત્યુપદધાતિ ।
અસ્મિન્નેવ લોકે જ્યોતિર્ધત્તે । અઙ્ગારમધિ વર્તયતિ ॥ ૩। ૨। ૭। ૧॥

૫૧ અન્તરિક્ષ એવ જ્યોતિર્ધત્તે । આદિત્યમેવામુષ્મિં લ્લોકે જ્યોતિર્ધત્તે ।
જ્યોતિષ્મન્તોઽસ્મા ઇમે લોકા ભવન્તિ । ય એવં વેદ । ધ્રુવમસિ પૃથિવીં
દૃꣳહેત્યાહ । પૃથિવીમેવૈતેન દૃꣳહતિ । ધર્ત્રમસ્યન્તરિક્ષં
દૃꣳહેત્યાહ । અન્તરિક્ષમેવૈતેન દૃꣳહતિ । ધરુણમસિ દિવં
દૃꣳહેત્યાહ । દિવમેવૈતેન દૃꣳહતિ ॥ ૩। ૨। ૭। ૨॥

૫૨ ધર્માઽસિ દિશો દૃꣳહેત્યાહ । દિશ એવૈતેન દૃꣳહતિ ।
ઇમાનેવૈતૈર્લોકાન્દૃꣳહતિ । દૃꣳહન્તેઽસ્મા ઇમે લોકાઃ પ્રજયા
પશુભિઃ । ય એવં વેદ । ત્રીણ્યગ્રે કપાલાન્યુપદધાતિ । ત્રય ઇમે લોકાઃ ।
એષાં લોકાનામાપ્ત્યૈ । એકમગ્રે કપાલમુપદધાતિ । એકં વા અગ્રે કપાલં
પુરુષસ્ય સંભવતિ ॥ ૩। ૨। ૭। ૩॥

૫૩ અથ દ્વે । અથ ત્રીણિ । અથ ચત્વારિ । અથાષ્ટૌ । તસ્માદષ્ટાકપાલં
પુરુષસ્ય શિરઃ । યદેવં કપાલાન્યુપદધાતિ । યજ્ઞો વૈ પ્રજાપતિઃ ।
યજ્ઞમેવ પ્રજાપતિꣳ સરꣳસ્કરોતિ । આત્માનમેવ તથ્સરꣳસ્કરોતિ
। તꣳ સરꣳસ્કૃતમાત્માનમ્ ॥ ૩। ૨। ૭। ૪॥

૫૪ અમુષ્મિં લ્લોકેઽનુ પરૈતિ । યદષ્ટાવુપદધાતિ । ગાયત્રિયા
તથ્સંમિતમ્ । યન્નવ । ત્રિવૃતા તત્ । યદ્દશ । વિરાજા તત્ । યદેકાદશ ।
ત્રિષ્ટુભા તત્ । યદ્દ્વાદશ ॥ ૩। ૨। ૭। ૫॥

૫૫ જગત્યા તત્ । છન્દઃસંમિતાનિ સ ઉપદધત્કપાલાનિ । ઇમાન્
લોકાનનુપૂર્વં દિશો વિધૃત્યૈ દૃꣳહતિ । અથાયુઃ પ્રાણાન્પ્રજાં પશૂન્,

યજમાને દધાતિ । સજાતાનસ્મા અભિતો બહુલાન્કરોતિ । ચિતઃ સ્થેત્યાહ
। યથા યજુરેવૈતત્ । ભૃગૂણામંગિરસાં તપસા તપ્યધ્વમિત્યાહ
। દેવતાનામેવૈનાનિ તપસા તપતિ । તાનિ તતઃ સરँ સ્થિતે । યાનિ
ઘર્મે કપાલાન્યુપચિન્વન્તિ વેધસ ઇતિ ચતુષ્પદયર્ચા વિમુઞ્ચતિ
। ચતુષ્પાદઃ પશવઃ । પશુષ્વેવોપરિષ્ટાત્પ્રતિતિષ્ઠતિ ॥ ૩। ૨। ૭। ૬॥ વર્તયતિ દિવમેવૈતેન દૃँહતિ
સમ્ભવતિ તँ
સરँ સ્કૃતમાત્માનં દ્વાદશ સરँ સ્થિતે ત્રીણિ ચ ॥ ૭॥

૫૬ દેવસ્ય ત્વા સવિતુઃ પ્રસવ ઇત્યાહ પ્રસૂત્યૈ ।
અશ્વિનોર્બાહુભ્યામિત્યાહ । અશ્વિનૌ હિ દેવાનામધ્વર્યૂ આસ્તામ્ । પૂષ્ણો
હસ્તાભ્યામિત્યાહ યત્યૈ । સં વપામીત્યાહ । યથાદેવતમેવૈનાનિ
સંવપતિ । સમાપો અદ્ભિરગ્મત સમોષધયો રસેનેત્યાહ । આપો વા
ઓષધીર્જિન્વન્તિ । ઓષધયોઽપો જિન્વન્તિ । અન્યા વા એતાસામન્યા જિન્વન્તિ ॥

૩। ૨। ૮। ૧॥

૫૭ તસ્માદેવમાહ । સँ રેવતીર્જગતીભિર્મધુમતીર્મધુમતીભિઃ
સૃજ્યધ્વમિત્યાહ । આપો વૈ રેવતીઃ । પશવો જગતીઃ । ઓષધયો
મધુમતીઃ । આપ ઓષધીઃ પશૂન્ । તાનેવાસ્મા એકધા સँ સૃજ્ય ।
મધુમતઃ કરોતિ । અદ્ભ્યઃ પરિ પ્રજાતાઃ સ્થ સમદ્ભિઃ પૃચ્યધ્વમિતિ
પર્યાપ્લાવયતિ । યથા સુવૃષ્ટ ઇમામનુ વિસૃત્ય ॥ ૩। ૨। ૮। ૨॥

૫૮ આપ ઓષધીર્મહયન્તિ । તાદૃગેવ તત્ । જનયત્યૈ ત્વા સંયૌમીત્યાહ ।
પ્રજા એવૈતેન દાધાર । અગ્નયે ત્વાઽગ્નીષોમાભ્યામિત્યાહ વ્યાવૃત્ત્યૈ
। મખસ્ય શિરોઽસીત્યાહ । યજ્ઞો વૈ મખઃ । તસ્યૈતચ્છિરઃ ।
યત્પુરોડાશઃ । તસ્માદેવમાહ ॥ ૩। ૨। ૮। ૩॥

૫૯ ઘર્મોસિ વિશ્વાયુરિત્યાહ । વિશ્વમેવાયુર્યજમાને દધાતિ । ઉરુ
પ્રથસ્વોરુ તે યજ્ઞપતિઃ પ્રથતામિત્યાહ । યજમાનમેવ પ્રજયા
પશુભિઃ પ્રથયતિ । ત્વચં ગૃહ્ણીષ્વેત્યાહ । સર્વમેવૈનँ સતનું
કરોતિ । અથાપ આનીય પરિમાર્ષ્ટિ । માँ સ એવ તત્ત્વચં દધાતિ ।
તસ્માત્ત્વચા માँ સં છન્નમ્ । ઘર્મો વા એષોઽશાન્તઃ ॥ ૩। ૨। ૮। ૪॥

૬૦ અર્ધમાસેઽર્ધમાસે પ્રવૃજ્યતે । યત્પુરોડાશઃ । સ ઈશ્વરો યજમાનꣳ શુચાઽપ્રદહઃ । પર્યગ્નિ કરોતિ । પશુમેવૈનમકઃ । શાન્ત્યા અપ્રદાહાય । ત્રિઃ પર્યગ્નિ કરોતિ । ત્ર્યાવૃદ્ધિ યજ્ઞઃ । અથો રક્ષસામપહત્યૈ । અન્તરિતꣳ રક્ષોઽન્તરિતા અરાતય ઇત્યાહ ॥

૩। ૨। ૮। ૫॥

૬૧ રક્ષસામન્તર્હિત્યૈ । પુરોડાશં વા અધિશ્રિતꣳ રક્ષાગ્ꣳસ્યજિઘાꣳસન્ । દિવિ નાકો નામાગ્ની રક્ષોહા । સ એવાસ્માદ્રક્ષાગ્ꣳસ્યપાહન્ । દેવસ્ત્વા સવિતા શ્રપયત્વિત્યાહ । સવિતૃપ્રસૂત એવૈનગ્ꣳ શ્રપયતિ । વર્ષિષ્ઠે અધિનાક ઇત્યાહ । રક્ષસામપહત્યૈ । અગ્નિસ્તે તનુવં માઽતિ ધાગિત્યાહાનતિદાહાય । અગ્ને હવ્યꣳ રક્ષસ્વેત્યાહ ગુપ્ત્યૈ ॥ ૩। ૨। ૮। ૬॥

૬૨ અવિદહન્ત શ્રપયતેતિ વાચં વિસૃજતે । યજ્ઞમેવ હવીગ્ꣳષ્યભિવ્યાહૃત્ય પ્રતનુતે । પુરોરુચમવિદાહાય શꣳત્યૈ કરોતિ । મસ્તિષ્કો વૈ પુરોડાશઃ । તં યન્નાભિવાસયેત્ । આવિર્મસ્તિષ્કઃ સ્યાત્ । અભિવાસયતિ । તસ્માદ્ગુહા મસ્તિષ્કઃ । ભસ્મનાઽભિવાસયતિ । તસ્માન્માꣳસેનાસ્થિ છન્નમ્ ॥ ૩। ૨। ૮। ૭॥

૬૩ વેદેનાભિ વાસયતિ । તસ્માત્કેશૈઃ શિરશ્છન્નમ્ । અખ્લતિભાવુકો ભવતિ । ય એવં વેદ । પશોર્વૈ પ્રતિમા પુરોડાશઃ । સ નાયજુષ્કમભિવાસ્યઃ । વૃથેવ સ્યાત્ । ઈશ્વરા યજમાનસ્ય પશવઃ પ્રમેતોઃ । સં બ્રહ્મણા પૃચ્યસ્વેત્યાહ । પ્રાણા વૈ બ્રહ્મ ॥ ૩। ૨। ૮। ૮॥

૬૪ પ્રાણાઃ પશવઃ । પ્રાણૈરેવ પશૂન્થ્સં પૃણક્તિ । ન પ્રમાયુકા ભવન્તિ । યજમાનો વૈ પુરોડાશઃ । પ્રજા પશવઃ પુરીષમ્ । યદેવમભિ વાસયતિ । યજમાનમેવ પ્રજયા પશુભિઃ સમર્ધયતિ । દેવા વૈ હવિર્ભૃત્વાઽબ્રુવન્ । કસ્મિન્નિદં મ્રક્ષ્યામહ ઇતિ । સોઽગ્નિરબ્રવીત્ ॥

૩। ૨। ૮। ૯॥

૬૫ મયિ તનૂઃ સંનિધધ્વમ્ । અહં વસ્તં જનયિષ્યામિ । યસ્મિન્ મ્રક્ષ્યધ્વ

ઇતિ । તે દેવા અગ્નૌ તનૂઃ સંન્યદધત । તસ્માદાહુઃ । અગ્નિઃ સર્વા
દેવતા ઇતિ । સોઽઙ્ગારેણાપઃ । અભ્યપાતયત્ । તત એકતોઽજાયત । સ
દ્વિતીયમભ્યપાતયત્ ॥ ૩। ૨। ૮। ૧૦॥

૬૬ તતો દ્વિતોઽજાયત । સ તૃતીયમભ્યપાતયત્ । તતસ્ત્રિતોઽજાયત
। યદદ્ભ્યોઽજાયન્ત । તદાપ્યાનામાપ્યત્વમ્ । યદાત્મભ્યોઽજાયન્ત
। તદાત્મ્યાનામાત્મ્યત્વમ્ । તે દેવા આપ્યેષ્વમૃજત । આપ્યા અમૃજત
સૂર્યાભ્યુદિતે । સૂર્યાભ્યુદિતઃ સૂર્યાભિનિમ્રુક્તે ॥ ૩। ૨। ૮। ૧૧॥

૬૭ સૂર્યાભિનિમ્રુક્તઃ કુનખિનિ । કુનખી શ્યાવદતિ । શ્યાવદન્નગ્રદિધિષૌ
। અગ્રદિધિષુઃ પરિવિત્તે । પરિવિત્તો વીરહણિ । વીરહા
બ્રહ્મહણિ । તદ્બ્રહ્મહણં નાત્યચ્યવત । અન્તર્વેદિ નિનયત્યવરુધ્યૈ
। ઉલ્મુકેનાભિ ગૃહ્ણાતિ શ઼ૃતત્વાય । શ઼ૃતકામા ઇવ હિ દેવાઃ ॥ ૩। ૨। ૮। ૧૨॥ અન્યા
જિન્વન્ત્યનુવિસૃત્યૈવમાહાશાન્ત આહ ગુપ્ત્યૈ છન્નં બ્રહ્માબ્રવીદ્
દ્વિતીયમભ્યપાતયત્ સૂર્યાભિનિમ્રુક્તે દેવાઃ ॥ ૮॥

૬૮ દેવસ્ય ત્વા સવિતુઃ પ્રસવ ઇતિ સ્ફ્યમાદત્તે પ્રસૂત્યૈ ।
અશ્વિનોર્બાહુભ્યામિત્યાહ । અશ્વિનૌ હિ દેવાનામધ્વર્યૂ આસ્તામ્ । પૂષ્ણો
હસ્તાભ્યામિત્યાહ યત્યૈ । આદદ ઇન્દ્રસ્ય બાહુરસિ દક્ષિણ ઇત્યાહ
। ઇન્દ્રિયમેવ યજમાને દધાતિ । સહસ્રભૃષ્ટિઃ શતતેજા ઇત્યાહ ।
રૂપમેવાસ્યૈતન્મહિમાનં વ્યાચષ્ટે । વાયુરસિ તિગ્મતેજા ઇત્યાહ ।
તેજો વૈ વાયુઃ ॥ ૩। ૨। ૯। ૧॥

૬૯ તેજ એવાસ્મિન્દધાતિ । વિષાદ્વૈ નામાસુર આસીત્ । સોઽબિભેત્ । યજ્ઞેન
મા દેવા અભિભવિષ્યન્તીતિ । સ પૃથિવીમભ્યવમીત્ । સાઽમેધ્યાઽભવત્
। અથો યદિન્દ્રો વૃત્રમહન્ન્ । તસ્ય લોહિતં પૃથિવીમનુ વ્યધાવત્ ।
સાઽમેધ્યાઽભવત્ । પૃથિવિ દેવ યજનીત્યાહ ॥ ૩। ૨। ૯। ૨॥

૭૦ મેધ્યામેવૈનાં દેવયજનીં કરોતિ । ઓષધ્યાસ્તે મૂલં મા
હિꣳસિષમિત્યાહ । ઓષધીનામહિꣳસાયૈ । વ્રજં ગચ્છ
ગોસ્થાનમિત્યાહ । છન્દાꣳસિ વૈ વ્રજો ગોસ્થાનઃ । છન્દાગ્સ્યેવાસ્મૈ
વ્રજં ગોસ્થાનં કરોતિ । વર્ષતુ તે દ્યૌરિત્યાહ । વૃષ્ટિર્વૈ દ્યૌઃ ।

વૃષ્ટિમેવાવરુન્ધે । બધાન દેવ સવિતઃ પરમસ્યાં પરાવતીત્યાહ ॥

૩। ૨। ૯। ૩॥

૭૧ દ્વૌ વાવ પુરુષૌ । યં ચૈવ દ્વેષ્ટિ । યશ્ચૈનં દ્વેષ્ટિ । તાવુભૌ
બધ્નાતિ પરમસ્યાં પરાવતિ શતેન પાશૈઃ । યોઽસ્માન્દ્વેષ્ટિ યં ચ
વયં દ્વિષ્મસ્તમતો મા મૌગિત્યાહાનિર્મુક્ત્યૈ । અરરુર્વૈ નામાસુર આસીત્
। સ પૃથિવ્યામુપમ્લુપ્તોઽશયત્ । તં દેવા અપહતોઽરરુઃ પૃથિવ્યા ઇતિ
પૃથિવ્યા અપાઘ્નન્ । ભ્રાતૃવ્યો વા અરરુઃ । અપહતોઽરરુઃ પૃથિવ્યા
ઇતિ યદાહ ॥ ૩। ૨। ૯। ૪॥

૭૨ ભ્રાતૃવ્યમેવ પૃથિવ્યા અપહન્તિ । તેઽમન્યન્ત । દિવં વા અયમિતઃ
પતિષ્યતીતિ । તમરરુસ્તે દિવં મા સ્કાનિતિ દિવઃ પર્યબાધન્ત
। ભ્રાતૃવ્યો વા અરરુઃ । અરરુસ્તે દિવં મા સ્કાનિતિ યદાહ ।
ભ્રાતૃવ્યમેવ દિવઃ પરિબાધતે । સ્તમ્બયજુર્ હરતિ । પૃથિવ્યા એવ
ભ્રાતૃવ્યમપહન્તિ । દ્વિતીય ँહરતિ ॥ ૩। ૨। ૯। ૫॥

૭૩ અન્તરિક્ષાદેવૈનમપહન્તિ । તૃતીય ँહરતિ । દિવ એવૈનમપહન્તિ
। તૂષ્ણીં ચતુર્થ ँ હરતિ । અપરિમિતાદેવૈનમપહન્તિ । અસુરાણાં
વા ઇયમગ્ર આસીત્ । યાવદાસીનઃ પરાપશ્યતિ । તાવદ્દેવાનામ્ । તે દેવા
અબ્રુવન્ । અસ્ત્વેવ નો સ્યામપીતિ ॥ ૩। ૨। ૯। ૬॥

૭૪ ક્વન્નો દાસ્યથેતિ । યાવથ્સ્વયં પરિગૃહ્ણીથેતિ । તે વસવસ્ત્વેતિ
દક્ષિણતઃ પર્યગૃહ્ણન્ । રુદ્રાસ્ત્વેતિ પશ્ચાત્ । આદિત્યાસ્ત્વેત્યુત્તરતઃ
। તેઽગ્નિના પ્રાઞ્ચોઽજયન્ । વસુભિર્દક્ષિણા । રુદ્રૈઃ પ્રત્યઞ્ચઃ ।
આદિત્યૈરુદઞ્ચઃ । યસ્યૈવં વિદુષો વેદિં પરિગૃહ્ણન્તિ ॥ ૩। ૨। ૯। ૭॥

૭૫ ભવત્યાત્મના । પરાઽસ્ય ભ્રાતૃવ્યો ભવતિ । દેવસ્ય સવિતુઃ
સવ ઇત્યાહ પ્રસૂત્યૈ । કર્મ કૃણ્વન્તિ વેધસ ઇત્યાહ । ઇષિત ँ
હિ કર્મ ક્રિયતે । પૃથિવ્યૈ મેધ્યં ચામેધ્યં ચ વ્યુદક્રામતામ્
। પ્રાચીનમુદીચીનં મેધ્યમ્ । પ્રતીચીનં દક્ષિણાઽમેધ્યમ્ ।
પ્રાચીમુદીચીં પ્રવણાં કરોતિ । મેધ્યામેવૈનાં દેવયજનીં કરોતિ ॥ ૩। ૨। ૯। ૮॥

૭૬ પ્રાગ્ચૌ વેદ્ય ઁ સાવુન્નયતિ । આહવનીયસ્ય પરિગૃહીત્યૈ ।
પ્રતિચી શ્રોણી । ગાર્હપત્યસ્ય પરિગૃહીત્યૈ । અથો મિથુનત્વાય ।
ઉદ્ધન્તિ । યદેવાસ્યા અમેધ્યમ્ । તદપહન્તિ । ઉદ્ધન્તિ । તસ્માદોષધયઃ
પરાભવન્તિ ॥ ૩। ૨। ૯। ૯॥

૭૭ મૂલં છિનત્તિ । ભ્રાતૃવ્યસ્યૈવ મૂલં છિનત્તિ । મૂલં વા
અતિતિષ્ઠદ્રક્ષાગ્સ્યનૂત્પિપતે । યદ્ધસ્તેન છિન્દ્યાત્ । કુનખિનીઃ પ્રજાઃ
સ્યુઃ । સ્ફ્યેન છિનત્તિ । વજ્રો વૈ સ્ફ્યઃ । વજ્રેણૈવ યજ્ઞાદ્રક્ષાગ્સ્યપહન્તિ
। પિતૃદેવત્યાઽતિખાતા । ઇયતીં ખનતિ ॥ ૩। ૨। ૯। ૧૦॥

૭૮ પ્રજાપતિના યજ્ઞમુખેન સંમિતામ્ । વેદિર્દેવેભ્યો નિલાયત । તાં
ચતુરઙ્ગુલેઽન્વવિન્દન્ન્ । તસ્માચ્ચતુરઙ્ગુલં ખેયા । ચતુરઙ્ગુલં
ખનતિ । ચતુરઙ્ગુલે હ્યોષધયઃ પ્રતિતિષ્ઠન્તિ । આપ્રતિષ્ઠાયૈ
ખનતિ । યજમાનમેવ પ્રતિષ્ઠાં ગમયતિ । દક્ષિણતો વર્ષીયસીં કરોતિ ।
દેવયજનસ્યૈવ રૂપમકઃ ॥ ૩। ૨। ૯। ૧૧॥

૭૯ પુરીષવતીં કરોતિ । પ્રજા વૈ પશવઃ પુરીષમ્ । પ્રજયૈવૈનં
પશુભિઃ પુરીષવન્તં કરોતિ । ઉત્તરં પરિગ્રાહં પરિગૃહ્ણાતિ । એતાવતી
વૈ પૃથિવી । યાવતી વેદિઃ । તસ્યા એતાવત એવ ભ્રાતૃવ્યં નિર્ભજ્ય
। આત્મન ઉત્તરં પરિગ્રાહં પરિગૃહ્ણાતિ । ઋતમસ્યૃત સદનમસ્યૃત
શ્રીરસીત્યાહ । યથાયજુરેવૈતત્ ॥ ૩। ૨। ૯। ૧૨॥

૮૦ ક્રૂરમિવ વા એતત્કરોતિ । યદ્વેદિં કરોતિ । ધા અસિ સ્વધા અસીતિ
યોયુપ્યતે શાન્ત્યૈ । ઉર્વી ચાસિ વસ્વી ચાસીત્યાહ । ઉર્વીમેવૈનાં વસ્વીં
કરોતિ । પુરા ક્રૂરસ્ય વિસૃપો વિરફ્શિન્નિત્યાહ મેધ્યત્વાય । ઉદાદાય
પૃથિવીં જીરદાનુર્યામૈરયચ્ચન્દ્રમસિ સ્વધાભિરિત્યાહ । યદેવાસ્યા
અમેધ્યમ્ । તદપહત્ય । મેધ્યાં દેવયજનીં કૃત્વા ॥ ૩। ૨। ૯। ૧૩॥

૮૧ યદદશ્ચન્દ્રમસિ મેધ્યમ્ । તદસ્યામેરયતિ । તાં ધીરાસો અનુદૃશ્ય
યજન્ત ઇત્યાહાનુખ્યાત્યૈ । પ્રોક્ષણીરાસાદય । ઇધ્માબર્હિરુપસાદય
। સ્રુવં ચ સ્રુચશ્ચ સંમૃડ્ઢિ । પત્ની ઁ સંનહ્ય ।
આજ્યેનોદેહીત્યાહાનુપૂર્વતાયૈ । પ્રોક્ષણીરાસાદયતિ । આપો વૈ રક્ષોઘ્નીઃ ॥

૩। ૨। ૯। ૧૪॥

૮૨ રક્ષસામપહત્યૈ । સ્ફ્યસ્ય વર્ત્મન્થ્સાદયતિ । યજ્ઞસ્ય સંતત્યૈ
। ઉવાચ હાસિતો દૈવલઃ । એતાવતીર્વા અમુષ્મિં લ્લોક આપ આસન્ન્ ।
યાવતીઃ પ્રોક્ષણીરિતિ । તસ્માદ્બહ્વીરાસાદ્યાઃ । સ્ફ્યમુદસ્યન્ન્ ।
યં દ્વિષ્યાત્તં ધ્યાયેત્ । શુચૈવૈનમર્પયતિ ॥ ૩। ૨। ૯। ૧૫॥ વૈ વાયુરાહ
પરાવતીત્યાહાહ દ્વિતીયꣳહરતીતિ પરિગૃહ્ણન્તિ દેવયજનીં કરોતિ
ભવન્તિ ખનત્યકરેતત્કૃત્વા રક્ષોઘ્નીરર્પયતિ ॥ ૯॥

૮૩ વજ્રો વૈ સ્ફ્યઃ । યદન્વઞ્ચં ધારયેત્ । વજ્રેઽધ્વર્યુઃ, ક્ષણ્વીત ।
પુરસ્તાત્તિર્યઞ્ચં ધારયતિ । વજ્રો વૈ સ્ફ્યઃ । વજ્રેણૈવ યજ્ઞસ્ય
દક્ષિણતો રક્ષાꣳસ્યપહન્તિ । અગ્નિભ્યાં પ્રાચશ્ચ પ્રતીચશ્ચ ।
સ્ફ્યેનોદીચશ્ચાધરાચશ્ચ । સ્ફ્યેન વા એષ વજ્રેણાસ્યૈ પાપ્માનં
ભ્રાતૃવ્યમપહત્ય । ઉત્કરેઽધિ પ્રવૃશ્ચતિ ॥ ૩। ૨। ૧૦। ૧॥

૮૪ યથોપધાય વૃશ્ચન્ત્યેવમ્ । હસ્તાવવનેનિક્તે । આત્માનમેવ પવયતે ।
સ્ફ્યં પ્રક્ષાલયતિ મેધ્યત્વાય । અથો પાપ્મન એવ ભ્રાતૃવ્યસ્ય ન્યઙ્ગં
છિનત્તિ । ઇધ્માબર્હિરુપસાદયતિ યુક્ત્યૈ । યજ્ઞસ્ય મિથુનત્વાય
। અથો પુરોરુચમેવૈતાં દધાતિ । ઉત્તરસ્ય કર્મણોઽનુખ્યાત્યૈ । ન
પુરસ્તાત્પ્રત્યગુપસાદયેત્ ॥ ૩। ૨। ૧૦। ૨॥

૮૫ યત્પુરસ્તાત્પ્રત્યગુપસાદયેત્ । અન્યત્રાઽઽહુતિપથાદિધ્મં પ્રતિપાદયેત્
। પ્રજા વૈ બર્હિઃ । અપરાધ્નુયાદ્બર્હિષા પ્રજાનાં પ્રજનનમ્ ।
પશ્ચાત્પ્રાગુપસાદયતિ । આહુતિપથેનેધ્મં પ્રતિપાદયતિ । સંપ્રત્યેવ
બર્હિષા પ્રજાનાં પ્રજનનમુપૈતિ । દક્ષિણમિધ્મમ્ । ઉત્તરં બર્હિઃ
। આત્મા વા ઇધ્મઃ । પ્રજા બર્હિઃ । પ્રજા હ્યાત્મન ઉત્તરતરા તીર્થે । તતો
મેધમુપનીય । યથાદેવતમેવૈનત્પ્રતિષ્ઠાપયતિ । પ્રતિતિષ્ઠતિ
પ્રજયા પશુભિર્યજમાનઃ ॥ ૩। ૨। ૧૦। ૩॥ વૃશ્ચતિ સાદયેદિધ્મઃ
પઞ્ચ ચ ॥ ૧૦॥

તૃતીયસ્યાં દેવસ્યાશ્વપર્શું યો વૈ પૂર્વેદ્યુઃ કર્મણે વામિન્દ્રો

વૃત્રમહન્થ્સોઽપોવધૂતં ધૃષ્ટિર્દેવસ્યેત્યાહ સંવપામિ દેવસ્ય
સ્ફ્યમાદદે વજ્રો વૈ સ્ફ્યો દશ ॥ ૧૦॥
તૃતીયસ્યાં યજ્ઞસ્યાનતિરેકાય પવિત્રવત્યધ્વર્યું
ચાધિષવણમસ્યન્તરિક્ષ એવ રક્ષસામન્તર્હિત્યૈ દ્વૌ વાવ પુરુષૌ
યદદશ્ચન્દ્રમસિ મેધ્યં પઞ્ચાશીતિઃ ॥ ૮૫॥
તૃતીયસ્યાં યજમાનઃ ॥

## તૃતીયાષ્ટકે તૃતીયઃ પ્રપાઠકઃ ૩

૧ પ્રત્યુષ્ટꣳ રક્ષઃ પ્રત્યુષ્ટા અરાતય ઇત્યાહ । રક્ષસામપહત્યૈ
। અગ્નેર્વસ્તેજિષ્ઠેન તેજસા નિષ્ટપામીત્યાહ મેધ્યત્વાય । સ્રુચઃ
સંમાર્ષ્ટિ । સ્રુવમગ્રે । પુમાꣳસમેવાભ્યઃ સરꣳશ્યતિ મિથુનત્વાય
। અથ જુહૂમ્ । અથોપભૃતમ્ । અથ ધ્રુવામ્ । અસૌ વૈ જુહૂઃ ॥ ૩। ૩। ૧। ૧॥
૨ અન્તરિક્ષમુપભૃત્ । પૃથિવી ધ્રુવા । ઇમે વૈ લોકાઃ સ્રુચઃ ।
વૃષ્ટિઃ સંમાર્જનાનિ । વૃષ્ટિર્વા ઇમાન્ લોકાનનુપૂર્વં કલ્પયતિ । તે
તતઃ ક્લૃપ્તાઃ સમેધન્તે । સમેધન્તેઽસ્મા ઇમે લોકાઃ પ્રજયા પશુભિઃ
। ય એવં વેદ । યદિ કામયેત વર્ષુકઃ પર્જન્યઃ સ્યાદિતિ । અગ્રતઃ
સંમૃજ્યાત્ ॥ ૩। ૩। ૧। ૨॥
૩ વૃષ્ટિમેવ નિયચ્છતિ । અવાચીનાગ્રા હિ વૃષ્ટિઃ । યદિ
કામયેતાવર્ષુકઃ સ્યાદિતિ । મૂલતઃ સંમૃજ્યાત્ । વૃષ્ટિમેવોદ્યચ્છતિ
। તદુ વા આહુઃ । અગ્રત એવોપરિષ્ટાથ્સંમૃજ્યાત્ । મૂલતોઽધસ્તાત્ ।
તદનુપૂર્વં કલ્પતે । વર્ષુકો ભવતીતિ ॥ ૩। ૩। ૧। ૩॥
૪ પ્રાચીમભ્યાકારમ્ । અગ્નૈરન્તરતઃ । એવમિવ હ્યન્નમદ્યતે । અથો
અગ્રાદ્વા ઓષધીનામૂર્જં પ્રજા ઉપજીવન્તિ । ઊર્જ એવાન્નાદ્યસ્યાવરુધ્યૈ ।
અધસ્તાત્પ્રતીચીમ્ । દણ્ડમુત્તમતઃ । મૂલેન મૂલં પ્રતિષ્ઠિત્યૈ ।
તસ્માદરત્નૌ પ્રાઞ્ચ્યુપરિષ્ટાલ્લોમાનિ । પ્રત્યઞ્ચ્યધસ્તાત્ ॥ ૩। ૩। ૧। ૪॥
૫ સ્રુગ્ઘ્યેષા । પ્રાણો વૈ સ્રુવઃ । જુહૂર્દક્ષિણો હસ્તઃ । ઉપભૃથ્સવ્યઃ

। આત્મા ધ્રુવા । અન્નꣳ સંમાર્જનાનિ । મુખતો વૈ પ્રાણોઽપાનો
ભૂત્વા । આત્માનમન્નં પ્રવિશ્ય । બાહ્યતસ્તનુવꣳ શુભયતિ ।
તસ્માથ્સ્રુવમેવાગ્રે સંમાર્ષ્ટિ । મુખતો હિ પ્રાણોઽપાનો ભૂત્વા ।
આત્માનમન્નમાવિશતિ । તૌ પ્રાણાપાનૌ । અવ્યર્ધુકઃ પ્રાણાપાનાભ્યાં ભવતિ ।
ય એવં વેદ ॥ ૩। ૩। ૧। ૫॥ જુહૂર્મૃજ્યાદ્ભવતીતિ પ્રત્યઙ્ઙ્યધસ્તાન્માર્ષ્ટિ
પઞ્ચ ચ ॥ ૧॥

૬ દિવઃ શિલ્પમવતતમ્ । પૃથિવ્યાઃ કકુભિ શ્રિતમ્ । તેન વયꣳ
સહસ્રવલ્શેન । સપત્નં નાશયામસિ સ્વાહેતિ સ્રુખ્સંમાર્જનાન્યગ્નૌ
પ્રહરતિ । આપો વૈ દર્ભાઃ । રૂપમેવૈષામેતન્મહિમાનં વ્યાચષ્ટે ।
અનુષ્ટુભર્ચા । આનુષ્ટુભઃ પ્રજાપતિઃ । પ્રાજાપત્યો વેદઃ । વેદસ્યાગ્રઙ્ગ્
સ્રુખ્સંમાર્જનાનિ ॥ ૩। ૩। ૨। ૧॥

૭ સ્વેનૈવૈનાનિ છન્દસા । સ્વયા દેવતયા સમર્ધયતિ । અથો ઋઙ્વાવ
યોષા । દર્ભો વૃષા । તન્મિથુનમ્ । મિથુનમેવાસ્ય તદ્યજ્ઞે
કરોતિ પ્રજનનાય । પ્રજાયતે પ્રજયા પશુભિર્યજમાનઃ । તાન્યેકે
વૃથૈવાપાસ્યન્તિ । તત્તથા ન કાર્યમ્ । આરબ્ધસ્ય યજ્ઞિયસ્ય કર્મણઃ
સઃ વિદોહઃ ॥ ૩। ૩। ૨। ૨॥

૮ યદ્યેનાનિ પશવોઽભિતિષ્ઠેયુઃ । ન તત્પશુભ્યઃ કમ્ ।
અદ્ભિર્માર્જયિત્વોત્કરે ન્યસ્યેત્ । યદ્વૈ યજ્ઞિયસ્ય કર્મણોઽન્યત્રાહુતીભ્યઃ
સંતિષ્ઠતે । ઉત્કરો વાવ તસ્ય પ્રતિષ્ઠા । એતાꣳ હિ તસ્મૈ પ્રતિષ્ઠાં
દેવાઃ સમભરન્ । યદદ્ભિર્માર્જયતિ । તેન શાન્તમ્ । યદુત્કરે ન્યસ્યતિ
। પ્રતિષ્ઠામેવૈનાનિ તદ્ગમયતિ ॥ ૩। ૩। ૨। ૩॥

૯ પ્રતિતિષ્ઠતિ પ્રજયા પશુભિર્યજમાનઃ । અથો સ્તમ્બસ્ય વા એતદ્રૂપમ્ ।
યથ્સ્રુખ્સંમાર્જનાનિ । સ્તમ્બશો વા ઓષધયઃ । તાસાં જરત્કક્ષે પશવો
ન રમન્તે । અપ્રિયો હ્યેષાં જરત્કક્ષઃ । યાવદપ્રિયો હ વૈ જરત્કક્ષઃ
પશૂનામ્ । તાવદપ્રિયઃ પશૂનાં ભવતિ । યસ્યૈતાન્યન્યત્રાગ્નેર્દધતિ ।
નવદાવ્યાસુ વા ઓષધીષુ પશવો રમન્તે ॥ ૩। ૩। ૨। ૪॥

૧૦ નવદાવો હ્યેષાં પ્રિયઃ । યાવત્પ્રિયો હ વૈ નવદાવઃ

પશૂનામ્ । તાવત્પ્રિયઃ પશૂનાં ભવતિ । યસ્યૈતાન્યગ્નૌ પ્રહરન્તિ ।
તસ્માદેતાન્યગ્નાવેવ પ્રહરેત્ । યતરસ્મિન્ત્સંમૃજ્યાત્ । પશૂનાં
ધૃત્યૈ । યો ભૂતાનામધિપતિઃ । રુદ્રસ્તન્તિચરો વૃષા । પશૂનસ્માકં
મા હિꣳસીઃ । એતદસ્તુ હુતં તવ સ્વાહેત્યગ્નિસંમાર્જનાન્યગ્નૌ પ્રહરતિ ।
એષા વા એતેષાં યોનિઃ । એષા પ્રતિષ્ઠા । સ્વામેવૈનાનિ યોનિમ્ । સ્વાં
પ્રતિષ્ઠાં ગમયતિ । પ્રતિતિષ્ઠતિ પ્રજયા પશુભિર્યજમાનઃ ॥ ૩। ૩। ૨। ૫॥ વેદસ્યાગ્રગ્ગ્ સ્રુખ્સંમાર્જનાનિ
વિદોહો ગમયતિ પશવો રમન્તે
હિꣳસીષ્ટ્ચ ॥ ૨॥

૧૧ અયજ્ઞો વા એષઃ । યોઽપત્નીકઃ । ન પ્રજાઃ પ્રજાયેરન્ । પત્ન્યન્વાસ્તે ।
યજ્ઞમેવાકઃ । પ્રજાનાં પ્રજનનાય । યત્તિષ્ઠન્તી સંનહ્યેત । પ્રિયં
જ્ઞાતિꣳ રુન્ધ્યાત્ । આસીના સંનહ્યતે । આસીના હ્યેષા વીર્યં કરોતિ
॥ ૩। ૩। ૩। ૧॥

૧૨ યત્પશ્ચાત્પ્રાચ્યન્વાસીત । અનયા સમદં દધીત । દેવાનાં પત્નિયા
સમદં દધીત । દેશાદ્દક્ષિણત ઉદીચ્યન્વાસ્તે । આત્મનો ગોપીથાય ।
આશાસાના સૌમનસમિત્યાહ । મેધ્યામેવૈનાં કેવલીં કૃત્વા । આશિષા
સમર્ધયતિ । અગ્નેરનુવ્રતા ભૂત્વા સંનહ્યે સુકૃતાય કમિત્યાહ । એતદ્વૈ
પત્નિયૈ વ્રતોપનયનમ્ ॥ ૩। ૩। ૩। ૨॥

૧૩ તેનૈવૈનાં વ્રતમુપનયતિ । તસ્માદાહુઃ । યશ્ચૈવં વેદ યશ્ચ ન ।
યોક્ત્રમેવ યુતે । યમન્વાસ્તે । તસ્યામુષ્મિં લ્લોકે ભવતીતિ યોક્ત્રેણ ।
યદ્યોક્ત્રમ્ । સ યોગઃ । યદાસ્તે । સ ક્ષેમઃ ॥ ૩। ૩। ૩। ૩॥

૧૪ યોગક્ષેમસ્ય ક્લૃપ્ત્યૈ । યુક્તં ક્રિયાતા આશીઃકામે યુજ્યાતા ઇતિ ।
આશિષઃ સમૃદ્ધ્યૈ । ગ્રન્થિં ગ્રથ્નાતિ । આશિષ એવાસ્યાં પરિગૃહ્ણાતિ ।
પુમાન્ વૈ ગ્રન્થિઃ । સ્ત્રી પત્ની । તન્મિથુનમ્ । મિથુનમેવાસ્ય તદ્યજ્ઞે
કરોતિ પ્રજનનાય । પ્રજાયતે પ્રજયા પશુભિર્યજમાનઃ ॥ ૩। ૩। ૩। ૪॥

૧૫ અથો અર્ધો વા એષ આત્મનઃ । યત્પત્ની । યજ્ઞસ્ય ધૃત્યા અશિથિલં
ભાવાય । સુપ્રજસસ્ત્વા વયꣳ સુપત્નીરુપસેદિમેત્યાહ । યજ્ઞમેવ
તન્મિથુની કરોતિ । ઊનેઽતિરિક્તં ધીયાતા ઇતિ પ્રજાત્યૈ । મહીનાં

પયોઽસ્યોષધીનાꣳ રસ ઇત્યાહ । રૂપમેવાસ્યૈતન્મહિમાનં
 વ્યાચષ્ટે । તસ્ય તેઽક્ષીયમાણસ્ય નિર્વપામિ દેવયજ્યાયા ઇત્યાહ ।
આશિષમેવૈતામાશાસ્તે ॥ ૩। ૩। ૩। ૫॥ કરોતિ વ્રતોપનયનં ક્ષેમો
 યજમાનઃ શાસ્તે ॥ ૩॥

૧૬ ઘૃતં ચ વૈ મધુ ચ પ્રજાપતિરાસીત્ । યતો મધ્વાસીત્ । તતઃ પ્રજા
 અસૃજત । તસ્માન્મધુષિ પ્રજનનમિવાસ્તિ । તસ્માન્મધુષા ન પ્રચરન્તિ ।
 યાતયામ હિ । આજ્યેન પ્રચરન્તિ । યજ્ઞો વા આજ્યમ્ । યજ્ઞેનૈવ યજ્ઞં
 પ્રચરન્ત્યયાતયામત્વાય । પત્ન્યવેક્ષતે ॥ ૩। ૩। ૪। ૧॥

૧૭ મિથુનત્વાય પ્રજાત્યૈ । યદ્વૈ પત્ની યજ્ઞસ્ય કરોતિ । મિથુનં
 તત્ । અથો પત્નિયા એવૈષ યજ્ઞસ્યાન્વારમ્ભોઽનવચ્છિત્ત્યૈ । અમેધ્યં
 વા એતત્કરોતિ । યત્પત્ન્યવેક્ષતે । ગાર્હપત્યેઽધિશ્રયતિ મેધ્યત્વાય
 । આહવનીયમભ્યુદ્દ્રવતિ । યજ્ઞસ્ય સન્તત્યૈ । તેજોઽસિ તેજોઽનુ
 પ્રેહીત્યાહ ॥ ૩। ૩। ૪। ૨॥

૧૮ તેજો વા અગ્નિઃ । તેજ આજ્યમ્ । તેજસૈવ તેજઃ સમર્ધયતિ । અગ્નિસ્તે તેજો
 મા વિનૈદિત્યાહાહિꣳસાયૈ । સ્ફ્યસ્ય વર્ત્મન્થ્સાદયતિ । યજ્ઞસ્ય સન્તત્યૈ ।
 અગ્નેર્જિહ્વાઽસિ સુભૂર્દેવાનામિત્યાહ । યથાયજુરેવૈતત્ । ધામ્ને ધામ્ને
 દેવેભ્યો યજુષે યજુષે ભવેત્યાહ । આશિષમેવૈતામાશાસ્તે ॥ ૩। ૩। ૪। ૩॥

૧૯ તદ્વા અતઃ પવિત્રાભ્યામેવોત્પુનાતિ । યજમાનો વા આજ્યમ્ । પ્રાણાપાનૌ
 પવિત્રે । યજમાન એવ પ્રાણાપાનૌ દધાતિ । પુનરાહારમ્ । એવમિવ
 હિ પ્રાણાપાનૌ સંચરતઃ । શુક્રમસિ જ્યોતિરસિ તેજોઽસીત્યાહ ।
 રૂપમેવાસ્યૈતન્મહિમાનં વ્યાચષ્ટે । ત્રિર્યજુષા । ત્રય ઇમે લોકાઃ ॥
 ૩। ૩। ૪। ૪॥

૨૦ એષાં લોકાનામાપ્ત્યૈ । ત્રિઃ । ત્ર્યાવૃદ્ધિ યજ્ઞઃ । અથો મેધ્યત્વાય
 । અથાજ્યવતીભ્યામપઃ । રૂપમેવાસામેતદ્વર્ણં દધાતિ । અપિ વા ઉતાહુઃ ।
 યથા હ વૈ યોષા સુવર્ણꣳ હિરણ્યં પેશલં બિભ્રતી રૂપાણ્યાસ્તે
 । એવમેતા એતર્હીતિ । આપો વૈ સર્વા દેવતાઃ ॥ ૩। ૩। ૪। ૫॥

૨૧ એષા હિ વિશ્વેષાં દેવાનાં તનૂઃ । યદાજ્યમ્ । તત્રોભયોર્મીમાँ સા
। જામિઃ સ્યાત્ । યદ્યજુષાઽઽજ્યં યજુષાઽપ ઉત્પુનીયાત્ । છન્દસાઽપ
ઉત્પુનાત્યજામિત્વાય । અથો મિથુનત્વાય । સાવિત્રિયર્ચા । સવિતૃપ્રસૂતં
મે કર્માસદિતિ । સવિતૃપ્રસૂતમેવાસ્ય કર્મ ભવતિ । પચ્છો
ગાયત્રિયા ત્રિઃષમૃદ્ધત્વાય । અદ્ભિરેવૌષધીઃ સંનયતિ ।
ઓષધીભિઃ પશૂન્ । પશુભિર્યજમાનમ્ । શુક્રં ત્વા શુક્રાયાં જ્યોતિસ્ત્વા
જ્યોતિષ્યર્ચિસ્ત્વાઽર્ચિષીત્યાહ સર્વત્વાય । પર્યાપ્ત્યા અનન્તરાયાય ॥ ૩। ૩। ૪। ૬॥ ઈક્ષત આહ શાસ્તે
લોકા દેવતા ભવતિ ષટ્ચ ॥ ૪॥

૨૨ દેવાસુરાઃ સંયત્તા આસન્ । સ એતમિન્દ્ર આજ્યસ્યાવકાશમપશ્યત્ ।
તેનાવૈક્ષત । તતો દેવા અભવન્ । પરાઽસુરાઃ । ય એવં વિદ્વાનાજ્યમવેક્ષતે
। ભવત્યાત્મના । પરાઽસ્ય ભ્રાતૃવ્યો ભવતિ । બ્રહ્મવાદિનો વદન્તિ ।
યદાજ્યેનાન્યાનિ હવીગ્ંષ્યભિ ઘારયતિ ॥ ૩। ૩। ૫। ૧॥

૨૩ અથ કેનાજ્યમિતિ । સત્યેનેતિ બ્રૂયાત્ । ચક્ષુર્વૈ સત્યમ્ ।
સત્યેનૈવૈનદભિ ઘારયતિ । ઈશ્વરો વા એષોઽન્ધો ભવિતોઃ ।
યશ્ચક્ષુષાઽઽજ્યમવેક્ષતે । નિમીલ્યાવેક્ષેત । દાધારાત્મન્ચક્ષુઃ ।
અભ્યાજ્યં ઘારયતિ । આજ્યં ગૃહ્ણાતિ ॥ ૩। ૩। ૫। ૨॥

૨૪ છન્દાँસિ વા આજ્યમ્ । છન્દાગ્ંસ્યેવ પ્રીણાતિ । ચતુર્જુહ્વાં ગૃહ્ણાતિ ।
ચતુષ્પાદઃ પશવઃ । પશૂનેવાવરુન્ધે । અષ્ટાવુપભૃતિ । અષ્ટાક્ષરા
ગાયત્રી । ગાયત્રઃ પ્રાણઃ । પ્રાણમેવ પશુષુ દધાતિ । ચતુર્ધ્રુવાયામ્
॥ ૩। ૩। ૫। ૩॥

૨૫ ચતુષ્પાદઃ પશવઃ । પશુષ્વેવોપરિષ્ટાત્પ્રતિતિષ્ઠતિ ।
યજમાનદેવત્યા વૈ જુહૂઃ । ભ્રાતૃવ્યદેવત્યોપભૃત્ ।
ચતુર્જુહ્વાં ગૃહ્ણન્ભૂયો ગૃહ્ણીયાત્ । અષ્ટાવુપભૃતિ ગૃહ્ણન્કનીયઃ
। યજમાનાયૈવ ભ્રાતૃવ્યમુપસ્તિં કરોતિ । ગૌર્વૈ સ્રુચઃ । ચતુર્જુહ્વાં
ગૃહ્ણાતિ । તસ્માચ્ચતુષ્પદી ॥ ૩। ૩। ૫। ૪॥

૨૬ અષ્ટાવુપભૃતિ । તસ્માદષ્ટાશફા । ચતુર્ધ્રુવાયામ્
। તસ્માચ્ચતુસ્સ્તના । ગામેવ તથ્સરँ સ્કરોતિ । સાઽસ્મૈ

સરꣳ સ્કૃતેષમૂર્જં દુહે । યજ્જુહ્વાં ગૃહ્ણાતિ । પ્રયાજેભ્યસ્તત્ ।
યદુપભૃતિ । પ્રયાજાનૂયાજેભ્યસ્તત્ । સર્વસ્મૈ વા એતદ્યજ્ઞાય
ગૃહ્યતે । યદ્ધ્રુવાયામાજ્યમ્ ॥ ૩। ૩। ૫। ૫॥ અભિઘારયતિ ગૃહ્ણાતિ ધ્રુવાયાં
ચતુષ્પદી પ્રયાજાનૂયાજેભ્યસ્તદ્દ્વે ચ ॥ ૫॥

૨૭ આપો દેવીરગ્રેપુવો અગ્રે ગુવ ઇત્યાહ । રૂપમેવાસામેતન્મહિમાનં
વ્યાચષ્ટે । અગ્ર ઇમં યજ્ઞં નયતાગ્રે યજ્ઞપતિમિત્યાહ । અગ્ર
એવ યજ્ઞં નયન્તિ । અગ્રે યજ્ઞપતિમ્ । યુષ્માનિન્દ્રોઽવૃણીત વૃત્રતૂર્યે
યૂયમિન્દ્રમવૃણીધ્વં વૃત્રતૂર્ય ઇત્યાહ । વૃત્રꣳ હ હનિષ્યન્નિન્દ્ર
આપો વવ્રે । આપો હેન્દ્રં વવ્રિરે । સંજ્ઞામેવાસામેતથ્સામાનં વ્યાચષ્ટે ।
પ્રોક્ષિતાઃ સ્થેત્યાહ ॥ ૩। ૩। ૬। ૧॥

૨૮ તેનાપઃ પ્રોક્ષિતાઃ । અગ્નિર્દેવેભ્યો નિલાયત । કૃષ્ણો રૂપં કૃત્વા ।
સ વનસ્પતીન્પ્રાવિશત્ । કૃષ્ણોઽસ્યાખરેષ્ઠોઽગ્નયે ત્વા સ્વાહેત્યાહ ।
અગ્નય એવૈનં જુષ્ટં કરોતિ । અથો અગ્નેરેવ મેધમવરુન્ધે । વેદિરસિ
બર્હિષે ત્વા સ્વાહેત્યાહ । પ્રજા વૈ બર્હિઃ । પૃથિવી વેદિઃ ॥ ૩। ૩। ૬। ૨॥

૨૯ પ્રજા એવ પૃથિવ્યાં પ્રતિષ્ઠાપયતિ । બર્હિરસિ સ્રુગ્ભ્યસ્ત્વા
સ્વાહેત્યાહ । પ્રજા વૈ બર્હિઃ । યજમાનઃ સ્રુચઃ । યજમાનમેવ પ્રજાસુ
પ્રતિષ્ઠાપયતિ । દિવે ત્વાઽન્તરિક્ષાય ત્વા પૃથિવ્યૈ ત્વેતિ બર્હિરાસાદ્ય
પ્રોક્ષતિ । એભ્ય એવૈનં લ્લોકેભ્યઃ પ્રોક્ષતિ । અથ તતઃ સહ સ્રુચા
પુરસ્તાત્પ્રત્યઞ્ચં ગ્રન્થિં પ્રત્યુક્ષતિ । પ્રજા વૈ બર્હિઃ । યથા
સૂત્યૈ કાલ આપઃ પુરસ્તાદ્યન્તિ ॥ ૩। ૩। ૬। ૩॥

૩૦ તાદૃગેવ તત્ । સ્વધા પિતૃભ્ય ઇત્યાહ । સ્વધાકારો હિ પિતૃણામ્
। ઊર્ગ્ભવ બર્હિષદ્ભ્ય ઇતિ દક્ષિણાયૈ શ્રોણેરોત્તરસ્યૈ નિનયતિ
સંતત્યૈ । માસા વૈ પિતરો બર્હિષદઃ । માસાનેવ પ્રીણાતિ । માસા વા
ઓષધીર્વર્ધયન્તિ । માસાઃ પચન્તિ સમૃદ્ધ્યૈ । અનતિસ્કન્દન્ હ પર્જન્યો
વર્ષતિ । યત્રૈતદેવં ક્રિયતે ॥ ૩। ૩। ૬। ૪॥

૩૧ ઊર્જા પૃથિવીં ગચ્છતેત્યાહ । પૃથિવ્યામેવોર્જં દધાતિ ।
તસ્માત્પૃથિવ્યા ઊર્જા ભુઞ્જતે । ગ્રન્થિં વિસ્રꣳસયતિ । પ્રજનયત્યેવ તત્

। ઊર્ધ્વં પ્રાગ્ચમુદૂઢં પ્રત્યગ્ચમાયચ્છતિ । તસ્માત્પ્રાચીન ૨ઁ
રેતો ધીયતે । પ્રતીચીઃ પ્રજા જાયન્તે । વિષ્ણોઃ સ્તૂપોઽસીત્યાહ । યજ્ઞો
વૈ વિષ્ણુઃ ॥ ૩। ૩। ૬। ૫॥

૩૨ યજ્ઞસ્ય ધૃત્યૈ । પુરસ્તાત્પ્રસ્તરં ગૃહ્ણાતિ । મુખ્યમેવૈનં કરોતિ
। ઇયન્તં ગૃહ્ણાતિ । પ્રજાપતિના યજ્ઞમુખેન સંમિતમ્ । ઇયન્તં ગૃહ્ણાતિ ।
યજ્ઞપરુષા સંમિતમ્ । ઇયન્તં ગૃહ્ણાતિ । એતાવદ્વૈ પુરુષે વીર્યમ્ ।
વીર્યસંમિતમ્ ॥ ૩। ૩। ૬। ૬॥

૩૩ અપરિમિતં ગૃહ્ણાતિ । અપરિમિતસ્યાવરુદ્ધ્યૈ । તસ્મિન્પવિત્રે અપિસૃજતિ ।
યજમાનો વૈ પ્રસ્તરઃ । પ્રાણાપાનૌ પવિત્રે । યજમાન એવ પ્રાણાપાનૌ
દધાતિ । ઊર્ણામ્રદસં ત્વા સ્તૃણામીત્યાહ । યથાયજુરેવૈતત્ । સ્વાસસ્થં
દેવેભ્ય ઇત્યાહ । દેવેભ્ય એવૈનથ્સ્વાસસ્થં કરોતિ ॥ ૩। ૩। ૬। ૭॥

૩૪ બર્હિઃ સ્તૃણાતિ । પ્રજા વૈ બર્હિઃ । પૃથિવી વેદિઃ । પ્રજા એવ
પૃથિવ્યાં પ્રતિષ્ઠાપયતિ । અનતિદૃશ્નર ૨ઁ સ્તૃણાતિ । પ્રજયૈવૈનં
પશુભિરનતિદૃશ્નં કરોતિ । ધારયન્પ્રસ્તરં પરિધીન્પરિદધાતિ ।
યજમાનો વૈ પ્રસ્તરઃ । યજમાન એવ તથ્સ્વયં પરિધીન્પરિદધાતિ ।
ગન્ધર્વોઽસિ વિશ્વાવસુરિત્યાહ ॥ ૩। ૩। ૬। ૮॥

૩૫ વિશ્વમેવાયુર્યજમાને દધાતિ । ઇન્દ્રસ્ય બાહુરસિ દક્ષિણ ઇત્યાહ ।
ઇન્દ્રિયમેવ યજમાને દધાતિ । મિત્રાવરુણૌ ત્વોત્તરતઃ પરિધત્તામિત્યાહ
। પ્રાણાપાનૌ મિત્રાવરુણૌ । પ્રાણાપાનાવેવાસ્મિન્દધાતિ । સૂર્યસ્ત્વા
પુરસ્તાત્ પાત્વિત્યાહ । રક્ષસામપહત્યૈ । કસ્યાશ્ચિદભિશસ્ત્યા
ઇત્યાહ । અપરિમિતાદેવૈનં પાતિ ॥ ૩। ૩। ૬। ૯॥

૩૬ વીતિહોત્રં ત્વા કવ ઇત્યાહ । અગ્નિમેવ હોત્રેણ સમર્ધયતિ ।
દ્યુમન્ત ૨ઁ સમિધીમહીત્યાહ સમિદ્ધ્યૈ । અગ્ને બૃહન્તમધ્વર
ઇત્યાહ વૃદ્ધ્યૈ । વિશો યન્ત્રે સ્થ ઇત્યાહ । વિશાં યત્યૈ ।
ઉદીચીનાગ્રે નિદધાતિ પ્રતિષ્ઠિત્યૈ । વસૂના ૨ઁ રુદ્રાણામાદિત્યાના ૨ઁ
સદસિ સીદેત્યાહ । દેવતાનામેવ સદને પ્રસ્તર ૨ઁ સાદયતિ । જુહૂરસિ
ઘૃતાચી નામ્નેત્યાહ ॥ ૩। ૩। ૬। ૧૦॥

૩૭ અસૌ વૈ જુહૂઃ । અન્તરિક્ષમુપભૃત્ । પૃથિવી ધ્રુવા । તાસામેતદેવ પ્રિયં નામ । યદ્ઘૃતાચીતિ । યદ્ઘૃતાચીત્યાહ । પ્રિયેણૈવૈના નામ્ના સાદયતિ । એતા અસદન્થ્સુકૃતસ્ય લોક ઇત્યાહ । સત્યં વૈ સુકૃતસ્ય લોકઃ । સત્ય એવૈનાઃ સુકૃતસ્ય લોકે સાદયતિ । તા વિષ્ણો પાહીત્યાહ । યજ્ઞો વૈ વિષ્ણુઃ । યજ્ઞસ્ય ધૃત્યૈ । પાહિ યજ્ઞં પાહિ યજ્ઞપતિં પાહિ માં યજ્ઞનિયમિત્યાહ । યજ્ઞાય યજમાનાયાત્મને । તેભ્ય એવાશિષમાશાસ્તેઽનાર્ત્યૈ ॥ ૩। ૩। ૬। ૧૧॥ સ્થેત્યાહ પૃથિવી વેદિર્યન્તિ ક્રિયતે વિષ્ણુર્વીર્યસંમિતં કરોત્યાહ પાતિ નામ્નેત્યાહ લોકે સાદયતિ ષટ્ચ ॥ ૬॥

૩૮ અગ્નિના વૈ હોત્રા । દેવા અસુરાનભ્યભવન્ । અગ્નયે સમિધ્યમાનાયાનુબ્રૂહીત્યાહ ભ્રાતૃવ્યાભિભૂત્યૈ । એકવિꣳશતિમિધ્મદારૂણિ ભવન્તિ । એકવિꣳશો વૈ પુરુષઃ । પુરુષસ્યાપ્ત્યૈ । પઞ્ચદશેધ્મદારૂણ્યભ્યાદધાતિ । પઞ્ચદશ વા અર્ધમાસસ્ય રાત્રયઃ । અર્ધમાસશઃ સંવથ્સર આપ્યતે । ત્રીન્પરિધીન્પરિદધાતિ ॥ ૩। ૩। ૭। ૧॥

૩૯ ઊર્ધ્વે સમિધાવાદધાતિ । અનૂયાજેભ્યઃ સમિધમતિશિનષ્ટિ । ષટ્થ્સંપદ્યન્તે । ષડ્વા ઋતવઃ । ઋતૂનેવ પ્રીણાતિ । વેદેનોપવાજયતિ । પ્રાજાપત્યો વૈ વેદઃ । પ્રાજાપત્યઃ પ્રાણઃ । યજમાન આહવનીયઃ । યજમાન એવ પ્રાણં દધાતિ ॥ ૩। ૩। ૭। ૨॥

૪૦ ત્રિરુપવાજયતિ । ત્રયો વૈ પ્રાણાઃ । પ્રાણાનેવાસ્મિન્દધાતિ । વેદેનોપયત્ય સ્રુવેણ પ્રાજાપત્યમાઘારમાઘારયતિ । યજ્ઞો વૈ પ્રજાપતિઃ । યજ્ઞમેવ પ્રજાપતિં મુખત આરભતે । અથો પ્રજાપતિઃ સર્વા દેવતાઃ । સર્વા એવ દેવતાઃ પ્રીણાતિ । અગ્નિમગ્નીત્રિસ્ત્રિઃ સંમૃઢ્ઢીત્યાહ । ત્ર્યાવૃદ્ધિ યજ્ઞઃ ॥ ૩। ૩। ૭। ૩॥

૪૧ અથો રક્ષસામપહત્યૈ । પરિધીન્થ્સંમાર્ષ્ટિ । પુનાત્યેવૈનાન્ । ત્રિસ્ત્રિઃ સંમાર્ષ્ટિ । ત્ર્યાવૃદ્ધિ યજ્ઞઃ । અથો મેધ્યત્વાય । અથો

એતે વૈ દેવાશ્વાઃ । દેવાશ્વાનેવ તથ્સંમાર્ષ્ટિ । સુવર્ગસ્ય લોકસ્ય
સમષ્ટ્યૈ । આસીનોઽન્યમાઘારમાઘારયતિ ॥ ૩। ૩। ૭। ૪॥

૪૨ તિષ્ઠન્નન્યમ્ । યથાઽનો વા રથં વા યુઞ્જ્યાત્ । એવમેવ
તદધ્વર્યુર્યજ્ઞં યુનક્તિ । સુવર્ગસ્ય લોકસ્યાભ્યૂઢ્યૈ । વહન્ત્યેનં
ગ્રામ્યાઃ પશવઃ । ય એવં વેદ । ભુવનમસિ વિપ્રથસ્વેત્યાહ । યજ્ઞો
વૈ ભુવનમ્ । યજ્ઞ એવ યજમાનં પ્રજયા પશુભિઃ પ્રથયતિ । અગ્ને
યષ્ટરિદં નમ ઇત્યાહ ॥ ૩। ૩। ૭। ૫॥

૪૩ અગ્નિર્વૈ દેવાનાં યષ્ટા । ય એવ દેવાનાં યષ્ટા । તસ્મા એવ નમસ્કરોતિ ।
જુહ્વેહ્યગ્નિસ્ત્વા હ્વયતિ દેવયજ્યાયા ઉપભૃદેહિ દેવસ્ત્વા સવિતા હ્વયતિ
દેવયજ્યાયા ઇત્યાહ । આગ્નેયી વૈ જુહૂઃ । સાવિત્ર્યુપભૃત્ । તાભ્યામેવૈને
પ્રસૂત આદત્તે । અગ્નાવિષ્ણૂ મા વામવક્રમિષમિત્યાહ । અગ્નિઃ પુરસ્તાત્ ।
વિષ્ણુર્યજ્ઞઃ પશ્ચાત્ ॥ ૩। ૩। ૭। ૬॥

૪૪ તાભ્યામેવ પ્રતિપ્રોચ્યાત્યાક્રામતિ । વિજિહાથાં મા મા
સંતાપ્તમિત્યાહાહિꣳસાયૈ । લોકં મે લોકકૃતૌ કૃણુતમિત્યાહ ।
આશિષમેવૈતામાશાસ્તે । વિષ્ણોઃ સ્થાનમસીત્યાહ । યજ્ઞો વૈ વિષ્ણુઃ ।
એતત્ખલુ વૈ દેવાનામપરાજિતમાયતનમ્ । યદ્યજ્ઞઃ । દેવાનામેવાપરાજિત
આયતને તિષ્ઠતિ । ઇત ઇન્દ્રો અકૃણોદ્વીર્યાણીત્યાહ ॥ ૩। ૩। ૭। ૭॥

૪૫ ઇન્દ્રિયમેવ યજમાને દધાતિ । સમારભ્યોર્ધ્વો અધ્વરો
દિવિસ્પૃશમિત્યાહ વૃદ્ધ્યૈ । આઘારમાઘાર્યમાણમનુ સમારભ્ય
। એતસ્મિન્કાલે દેવાઃ સુવર્ગં લોકમાયન્ । સાક્ષાદેવ યજમાનઃ સુવર્ગં
લોકમેતિ । અથો સમૃદ્ધેનૈવ યજ્ઞેન યજમાનઃ સુવર્ગં લોકમેતિ
। અહુતો યજ્ઞો યજ્ઞપતેરિત્યાહાનાર્ત્યૈ । ઇન્દ્રાવાન્થ્સ્વાહેત્યાહ ।
ઇન્દ્રિયમેવ યજમાને દધાતિ । બૃહદ્ભા ઇત્યાહ ॥ ૩। ૩। ૭। ૮॥

૪૬ સુવર્ગો વૈ લોકો બૃહદ્ભાઃ । સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ ।
યજમાનદેવત્યા વૈ જુહૂઃ । ભ્રાતૃવ્યદેવત્યોપભૃત્ ।
પ્રાણ આઘારઃ । યથ્સગ્ગ્સ્પર્શયેત્ । ભ્રાતૃવ્યેઽસ્ય પ્રાણં દધ્યાત્ ।
અસગ્ગ્સ્પર્શયન્નત્યાક્રામતિ । યજમાન એવ પ્રાણં દધાતિ । પાહિ માઽગ્ને

દુશ્ચરિતાદામા સુચરિતે ભજેત્યાહ ॥ ૩। ૩। ૭। ૯॥

૪૭ અગ્નિર્વાવ પવિત્રમ્ । વૃજિનમનૃતં દુશ્ચરિતમ્ । ઋજુકર્મ૱
સત્ય૱ સુચરિતમ્ । અગ્નિરેવૈનં વૃજિનાદનૃતાદ્દુશ્ચરિતાત્પાતિ ।
ઋજુકર્મે સત્યે સુચરિતે ભજતિ । તસ્માદેવમાશાસ્તે । આત્મનો ગોપીથાય
। શિરો વા એતદ્યજ્ઞસ્ય । યદાઘારઃ । આત્મા ધ્રુવા ॥ ૩। ૩। ૭। ૧૦॥

૪૮ આઘારમાઘાર્ય ધ્રુવા૱ સમનક્તિ । આત્મન્નેવ યજ્ઞસ્ય શિરઃ
પ્રતિદધાતિ । દ્વિઃ સમનક્તિ । દ્વૌ હિ પ્રાણાપાનૌ । તદાહુઃ । ત્રિરેવ સમઞ્જ્યાત્ ।
ત્રિધાતુ હિ શિર ઇતિ । શિર ઇવૈતદ્યજ્ઞસ્ય । અથો ત્રયો વૈ પ્રાણાઃ ।
પ્રાણાનેવાસ્મિન્દધાતિ । મખસ્ય શિરોઽસિ સં જ્યોતિષા જ્યોતિરઙ્ક્તામિત્યાહ
। જ્યોતિરેવાસ્મા ઉપરિષ્ટાદ્દધાતિ । સુવર્ગસ્ય લોકસ્યાનુખ્યાત્યૈ ॥
૩। ૩। ૭। ૧૧॥ પરિદધાતિ પ્રાણં દધાતિ હિ યજ્ઞો ધારયતિ નમ ઇત્યાહ
પશ્ચાદ્વીર્યાણીત્યાહ ભા ઇત્યાહ ભજેત્યાહ ધ્રુવૈવાસ્મિન્દધાતિ ત્રીણિ
ચ ॥ ૭॥

૪૯ ધિષ્ણિયા વા એતે ન્યુપ્યન્તે । યદ્બ્રહ્મા । યદ્ધોતા । યદધ્વર્યુઃ । યદગ્નીત્
। યદ્યજમાનઃ । તાન્, યદન્તરેયાત્ । યજમાનસ્ય પ્રાણાન્થ્સંકર્ષેત્ । પ્રમાયુકઃ
સ્યાત્ । પુરોડાશમપગૃહ્ય સંચરત્યધ્વર્યુઃ ॥ ૩। ૩। ૮। ૧॥

૫૦ યજમાનાયૈવ તલ્લોક૱ શિ૱ષતિ । નાસ્ય પ્રાણાન્થ્સંકર્ષતિ ।
ન પ્રમાયુકો ભવતિ । પુરસ્તાત્ પ્રત્યઙ્ઙાસીનઃ । ઇડાયા ઇડામાદધાતિ ।
હસ્ત્યા૱ હોત્રે । પશવો વા ઇડા । પશવઃ પુરુષઃ । પશુષ્વેવ
પશૂન્ પ્રતિષ્ઠાપયતિ । ઇડાયૈ વા એષા પ્રજાતિઃ ॥ ૩। ૩। ૮। ૨॥

૫૧ તાં પ્રજાતિં યજમાનોઽનુ પ્રજાયતે । દ્વિરઙ્ગુલાવનક્તિ પર્વણોઃ
। દ્વિપાદ્યજમાનઃ પ્રતિષ્ઠિત્યૈ । સકૃદુપસ્તૃણાતિ । દ્વિરાદધાતિ
। સકૃદભિઘારયતિ । ચતુઃ સંપદ્યતે । ચત્વારિ વૈ પશોઃ
પ્રતિષ્ઠાનાનિ । યાવાનેવ પશુઃ । તમુપહ્વયતે ॥ ૩। ૩। ૮। ૩॥

૫૨ મુખમિવ પ્રત્યુપહ્વયેત । સંમુખાનેવ પશૂનુપહ્વયતે । પશવો
વા ઇડા । તસ્માથ્સાઽન્વારભ્યા । અધ્વર્યુણા ચ યજમાનેન ચ । ઉપહૂતઃ
પશુમાનસાનીત્યાહ । ઉપ હ્યેનૌ હ્વયતે હોતા । ઇડાયૈ દેવતાનામુપહવે

। ઉપહૂતઃ પશુમાન્ભવતિ । ય એવં વેદ ॥ ૩। ૩। ૮। ૪॥

૫૩ યાં વૈ હસ્ત્યામિડામાદધાતિ । વાચઃ સા ભાગધેયમ્ ।
યામુપહ્વયતે । પ્રાણાનાꣳ સા । વાચં ચૈવ પ્રાણાગ્શ્ચાવરુન્ધે
। અથ વા એતર્હ્યુપહૂતાયામિડાયામ્ । પુરોડાશસ્યૈવ બર્હિષદો
મીમાꣳસા । યજમાનં દેવા અબ્રુવન્ । હવિર્નો નિર્વપેતિ । નાહમભાગો
નિર્વપ્સ્યામીત્યબ્રવીત્ ॥ ૩। ૩। ૮। ૫॥

૫૪ ન મયાઽભાગયાઽનુ વક્ષ્યથેતિ વાગબ્રવીત્ । નાહમભાગા પુરોઽનુવાક્યા
ભવિષ્યામીતિ પુરોઽનુવાક્યા । નાહમભાગા યાજ્યા ભવિષ્યામીતિ યાજ્યા । ન
મયા ભાગેન વષટ્કરિષ્યથેતિ વષટ્કારઃ । યદ્યજમાનભાગં નિધાય
પુરોડાશં બર્હિષદં કરોતિ । તાનેવ તદ્ભાગિનઃ કરોતિ । ચતુર્ધા
કરોતિ । ચતસ્રો દિશઃ । દિક્ષ્વેવ પ્રતિતિષ્ઠતિ । બર્હિષદં કરોતિ
॥ ૩। ૩। ૮। ૬॥

૫૫ યજમાનો વૈ પુરોડાશઃ । પ્રજા બર્હિઃ । યજમાનમેવ પ્રજાસુ
પ્રતિષ્ઠાપયતિ । તસ્માદસ્થાઽન્યાઃ પ્રજાઃ પ્રતિતિષ્ઠન્તિ । માꣳસેનાન્યાઃ
। અથો ખલ્વાહુઃ । દક્ષિણા વા એતા હવિર્યજ્ઞસ્યાન્તર્વેદ્યવરુધ્યન્તે ।
યત્પુરોડાશં બર્હિષદં કરોતીતિ । ચતુર્ધા કરોતિ । ચત્વારો
હ્યેતે હવિર્યજ્ઞસ્યર્ત્વિજઃ ॥ ૩। ૩। ૮। ૭॥

૫૬ બ્રહ્મા હોતાઽધ્વર્યુરગ્નીત્ । તમભિમૃશેત્ । ઇદં બ્રહ્મણઃ । ઇદꣳ
હોતુઃ । ઇદમધ્વર્યોઃ । ઇદમગ્નીધ ઇતિ । યથૈવાદઃ સૌમ્યેઽધ્વરે ।
આદેશમૃત્વિગ્ભ્યો દક્ષિણા નીયન્તે । તાદૃગેવ તત્ । અગ્નીધે પ્રથમાયા
દધાતિ ॥ ૩। ૩। ૮। ૮॥

૫૭ અગ્નિમુખા હ્યૃદ્ધિઃ । અગ્નિમુખામેવર્દ્ધિં યજમાન ઋધ્નોતિ ।
સકૃદુપસ્તીર્ય દ્વિરાદધત્ । ઉપસ્તીર્ય દ્વિરભિઘારયતિ । ષટ્થ્
સંપદ્યન્તે । ષડ્વા ઋતવઃ । ઋતૂનેવ પ્રીણાતિ । વેદેન બ્રહ્મણે
બ્રહ્મભાગં પરિહરતિ । પ્રાજાપત્યો વૈ વેદઃ । પ્રાજાપત્યો બ્રહ્મા ॥ ૩। ૩। ૮। ૯॥

૫૮ સવિતા યજ્ઞસ્ય પ્રસૂત્યૈ । અથ કામમન્યેન । તતો હોત્રે ।
મધ્યં વા એતદ્યજ્ઞસ્ય । યદ્ધોતા । મધ્યત એવ યજ્ઞં પ્રીણાતિ

। અથાધ્વર્યવે । પ્રતિષ્ઠા વા એષા યજ્ઞસ્ય । યદધ્વર્યુઃ ।
તસ્માદ્ધવિર્યજ્ઞસ્યૈતામેવાવૃતમનુ ॥ ૩। ૩। ૮। ૧૦॥

૫૯ અન્યા દક્ષિણા નીયન્તે । યજ્ઞસ્ય પ્રતિષ્ઠિત્યૈ ।
અગ્નિમગ્નીથ્સકૃથ્સકૃથ્સંમૃઢ્ઢીત્યાહ । પરાઙિવ હ્યેતર્હિ
યજ્ઞઃ । ઇષિતા દૈવ્યાહોતાર ઇત્યાહ । ઇષિતꣳ હિ કર્મ ક્રિયતે
। ભદ્રવાચ્યાય પ્રેષિતો માનુષઃ સૂક્તવાકાય સૂક્તા બ્રૂહીત્યાહ ।
આશિષમેવૈતામાશાસ્તે । સ્વગા દૈવ્યાહોતૃભ્ય ઇત્યાહ । યજ્ઞમેવ
તથ્સ્વગા કરોતિ । સ્વસ્તિર્માનુષેભ્ય ઇત્યાહ । આશિષમેવૈતામાશાસ્તે ।
શંયોર્બ્રૂહીત્યાહ । શંયુમેવ બાર્હસ્પત્યં ભાગધેયેન સમર્ધયતિ
॥ ૩। ૩। ૮। ૧૧॥ ચરત્યધ્વર્યુઃ પ્રજાતિર્હ્વયતે વેદાબ્રવીદ્ધર્હિષદં
કરોત્યૃત્વિજો દધાતિ બ્રહ્માઽનુકરોતિ ચત્વારિ ચ ॥ ૮॥

૬૦ અથ સ્રુચાવનુષ્ટુગ્ભ્યાં વાજવતીભ્યાં વ્યૂહતિ । પ્રતિષ્ઠા વા
અનુષ્ટુક્ । અન્નં વાજઃ પ્રતિષ્ઠિત્યૈ । અન્નાદ્યસ્યાવરુધ્યૈ । પ્રાચીં
જુહૂમૂહતિ । જાતાનેવ ભ્રાતૃવ્યાન્પ્રણુદતે । પ્રતીચીમુપભૃતમ્ ।
જનિષ્યમાણાનેવ પ્રતિનુદતે । સ વિષૂચ એવાપોહ્ય સપત્નાન્ યજમાનઃ ।
અસ્મિં લ્લોકે પ્રતિતિષ્ઠતિ ॥ ૩। ૩। ૯। ૧॥

૬૧ દ્વાભ્યામ્ । દ્વિપ્રતિષ્ઠો હિ । વસુભ્યસ્ત્વા
રુદ્રેભ્યસ્ત્વાઽઽદિત્યેભ્યસ્ત્વેત્યાહ । યથાયજુરેવૈતત્ । સ્રુક્ષુ
પ્રસ્તરમનક્તિ । ઇમે વૈ લોકાઃ સ્રુચઃ । યજમાનઃ પ્રસ્તરઃ । યજમાનમેવ
તેજસાઽનક્તિ । ત્રેધાઽનક્તિ । ત્રય ઇમે લોકાઃ ॥ ૩। ૩। ૯। ૨॥

૬૨ એભ્ય એવૈનં લોકેભ્યોઽનક્તિ । અભિપૂર્વમનક્તિ । અભિપૂર્વમેવ
યજમાનં તેજસાઽનક્તિ । અક્તꣳ રિહાણા ઇત્યાહ । તેજો વા આજ્યમ્ ।
યજમાનઃ પ્રસ્તરઃ । યજમાનમેવ તેજસાઽનક્તિ । વિયન્તુ વય ઇત્યાહ ।
વય એવૈનં કૃત્વા । સુવર્ગં લોકં ગમયતિ ॥

૬૩ પ્રજાં યોનિં મા નિર્મૃક્ષમિત્યાહ । પ્રજાયૈ ગોપીથાય । આપ્યાયન્તામાપ
ઓષધય ઇત્યાહ । આપ એવૌષધીરાપ્યાયયતિ મરુતાં પૃષતયઃ
સ્થેત્યાહ । મરુતો વૈ વૃષ્ટ્યા ઇશતે । વૃષ્ટિમેવાવરુન્ધે । દિવં ગચ્છ

તતો નો વૃષ્ટિમેરયેત્યાહ । વૃષ્ટિર્વૈ દ્યૌઃ । વૃષ્ટિમેવાવરુન્ધે ॥

૩। ૩। ૯। ૪॥

૬૪ યાવદ્વા અધ્વર્યુઃ પ્રસ્તરં પ્રહરતિ । તાવદસ્યાયુર્મીયતે । આયુષ્પા
અગ્નેઽસ્યાયુર્મે પાહીત્યાહ । આયુરેવાઽઽત્મન્ધત્તે । યાવદ્વા અધ્વર્યુઃ
પ્રસ્તરં પ્રહરતિ । તાવદસ્ય ચક્ષુર્મીયતે । ચક્ષુષ્પા અગ્નેઽસિ
ચક્ષુર્મે પાહીત્યાહ । ચક્ષુરેવાત્મન્ધત્તે । ધ્રુવાઽસીત્યાહ પ્રતિષ્ઠિત્યૈ
। યં પરિધિં પર્યધત્થા ઇત્યાહ ॥ ૩। ૩। ૯। ૫॥

૬૫ યથાયજુરેવૈતત્ । અગ્ને દેવપણિભિર્વીર્યમાણ ઇત્યાહ ।
અગ્નય એવૈનં જુષ્ટં કરોતિ । તં ત એતમનુજોષં ભરામીત્યાહ ।
સજાતાનેવાસ્મા અનુકાન્કરોતિ । નેદેષ ત્વદપચેતયા તા ઇત્યાહાનુખ્યાત્યૈ
। યજ્ઞસ્ય પાથ ઉપસમિતમિત્યાહ । ભૂમાનમેવોપૈતિ ।
પરિધીન્પ્રહરતિ । યજ્ઞસ્ય સમિષ્ટ્યૈ ॥ ૩। ૩। ૯। ૬॥

૬૬ સ્રુચૌ સંપ્રસ્રાવયતિ । યદેવ તત્ર ક્રૂરમ્ । તત્તેન
શમયતિ । જુહ્વામુપભૃતમ્ । યજમાનદેવત્યા વૈ જુહૂઃ ।
ભ્રાતૃવ્યદેવત્યોપભૃત્ । યજમાનાયૈવ ભ્રાતૃવ્યમુપસ્તિં કરોતિ ।
સઙ્ગ્સ્રાવભાગાઃ સ્થેત્યાહ । વસવો વૈ રુદ્રા આદિત્યાઃ સઙ્ગ્સ્રાવભાગાઃ
। તેષાં તદ્ભાગધેયમ્ ॥ ૩। ૩। ૯। ૭॥

૬૭ તાનેવ તેન પ્રીણાતિ । વૈશ્વદેવ્યર્ચા । એતે હિ વિશ્વે દેવાઃ ।
ત્રિષ્ટુગ્ભવતિ । ઇન્દ્રિયં વૈ ત્રિષ્ટુક્ । ઇન્દ્રિયમેવ યજમાને દધાતિ ।
અગ્નેર્વામપન્નગૃહસ્ય સદસિ સાદયામીત્યાહ । ઇયં વા અગ્નિરપન્નગૃહઃ
। અસ્યા એવૈને સદને સાદયતિ । સુમ્નાય સુમ્નિની સુમ્ને મા ધત્તમિત્યાહ ॥

૩। ૩। ૯। ૮॥

૬૮ પ્રજા વૈ પશવઃ સુમ્નમ્ । પ્રજામેવ પશૂનાત્મન્ધત્તે । ધુરિ
ધુર્યૌ પાતમિત્યાહ । જાયાપત્યોર્ગોપીથાય । અગ્નેઽદબ્ધાયોઽશીતતનો
ઇત્યાહ । યથાયજુરેવૈતત્ । પાહિ માઽદ્ય દિવઃ પાહિ પ્રસિત્યૈ
પાહિ દુરિષ્ટ્યૈ પાહિ દુરદ્મન્યૈ પાહિ દુશ્ચરિતાદિત્યાહ ।

આશિષમેવૈતામાશાસ્તે । અવિષં નઃ પિતું કૃણુ સુષદા યોનિગ્ગ્
સ્વાહેતીધ્મ સંવૃશ્ચનાન્યન્વાહાર્યપચનેઽભ્યાધાય ફલીકરણહોમં
જુહોતિ । અતિરિક્તાનિ વા ઇધ્મસંવૃશ્ચનાનિ ॥ ૩। ૩। ૯। ૯॥

૬૯ અતિરિક્તાઃ ફલીકરણાઃ । અતિરિક્તમાજ્યોચ્છેષણમ્ । અતિરિક્ત એવાતિરિક્તં
દધાતિ । અથો અતિરિક્તેનૈવાતિરિક્તમાપ્ત્વાઽવરુન્ધે । વેદિર્દેવેભ્યો
નિલાયત । તાં વેદેનાન્વવિન્દન્ । વેદેન વેદિં વિવિદુઃ પૃથિવીમ્ । સા
પપ્રથે પૃથિવી પાર્થિવાનિ । ગર્ભં બિભર્તિ ભુવનેષ્વન્તઃ । તતો
યજ્ઞો જાયતે વિશ્વદાનિરિતિ પુરસ્તાથ્સ્તમ્બયજુષો વેદેન વેદિ ँ
સંમાર્ષ્ટ્યનુવિત્ત્યૈ ॥ ૩। ૩। ૯। ૧૦॥

૭૦ અથો યદ્વેદશ્ચ વેદિશ્ચ ભવતઃ । મિથુનત્વાય
પ્રજાત્યૈ । પ્રજાપતેર્વા એતાનિ શ્મશ્રૂણિ । યદ્વેદઃ ।
પત્નિયા ઉપસ્થ આસ્યતિ । મિથુનમેવ કરોતિ । વિન્દતે
પ્રજામ્ । વેદ ँ હોતાઽઽહવનીયાથ્સ્તૃણન્નેતિ । યજ્ઞમેવ
તથ્સંતનોત્યોત્તરસ્માદર્ધમાસાત્ । ત ँ સંતતમુત્તરેઽર્ધમાસ આલભતે
॥ ૩। ૩। ૯। ૧૧॥

૭૧ તં કાલે કાલ આગતે યજતે । બ્રહ્મવાદિનો વદન્તિ । સ ત્વા અધ્વર્યુઃ
સ્યાત્ । યો યતો યજ્ઞં પ્રયુઙ્ક્તે । તદેનં પ્રતિષ્ઠાપયતીતિ । વાતાદ્વા
અધ્વર્યુર્યજ્ઞં પ્રયુઙ્ક્તે । દેવા ગાતુવિદો ગાતું વિત્ત્વા ગાતુમિતેત્યાહ ।
યત એવ યજ્ઞં પ્રયુઙ્ક્તે । તદેનં પ્રતિષ્ઠાપયતિ । પ્રતિતિષ્ઠતિ
પ્રજયા પશુભિર્યજમાનઃ ॥ ૩। ૩। ૯। ૧૨॥

તિષ્ઠતીમે લોકા ગમયતિ દ્યૌર્વૃષ્ટિમેવાવરુન્ધે પર્યધત્થા ઇત્યાહ
સમિષ્ટ્યૈ ભાગધેયં ધત્તમિત્યાહ વા ઇધ્મસંવૃશ્ચનાન્યનુવિત્ત્યૈ
લભતે યજમાનઃ ॥ ૯॥

૭૨ યો વા અયથાદેવતં યજ્ઞમુપચરતિ । આ દેવતાભ્યો વૃશ્ચ્યતે
। પાપીયાન્ભવતિ । યોઽયથાદેવતમ્ । ન દેવતાભ્ય આવૃશ્ચ્યતે ।
વસીયાન્ભવતિ । વારુણો વૈ પાશઃ । ઇમં વિષ્યામિ વરુણસ્ય પાશમિત્યાહ ।
વરુણપાશાદેવૈનાં મુઞ્ચતિ । સવિતૃપ્રસૂતો યથાદેવતમ્ ॥ ૩। ૩। ૧૦। ૧॥

૭૩ ન દેવતાભ્ય આવૃશ્ચ્યતે । વસીયાન્ભવતિ । ધાતુશ્ચ યોનૌ
સુકૃતસ્ય લોક ઇત્યાહ । અગ્નિર્વૈ ધાતા । પુણ્યં કર્મ સુકૃતસ્ય લોકઃ ।
અગ્નિરેવૈનાં ધાતા । પુણ્યે કર્મણિ સુકૃતસ્ય લોકે દધાતિ । સ્યોનં મે
સહ પત્યા કરોમીત્યાહ । આત્મનશ્ચ યજમાનસ્ય ચાનાર્ત્યૈ સંત્વાય
। સમાયુષા સં પ્રજયેત્યાહ ॥ ૩। ૩। ૧૦। ૨॥

૭૪ આશિષમેવૈતામાશાસ્તે પૂર્ણપાત્રે । અન્તતોઽનુષ્ટુભા । ચતુષ્પદ્વા
એતચ્છન્દઃ પ્રતિષ્ઠિતં પત્નિયૈ પૂર્ણપાત્રે ભવતિ । અસ્મિં લ્લોકે
પ્રતિતિષ્ઠાનીતિ । અસ્મિન્નેવ લોકે પ્રતિતિષ્ઠતિ । અથો વાગ્વા અનુષ્ટુક્ ।
વાઙ્મિથુનમ્ । આપો રેતઃ પ્રજનનમ્ । એતસ્માદ્વૈ મિથુનાદ્વિદ્યોતમાનઃ
સ્તનયન્વર્ષતિ । રેતઃ સિઞ્ચન્ ॥ ૩। ૩। ૧૦। ૩॥

૭૫ પ્રજાઃ પ્રજનયન્ન્ । યદ્વૈ યજ્ઞસ્ય બ્રહ્મણા યુજ્યતે । બ્રહ્મણા
વૈ તસ્ય વિમોકઃ । અદ્ભિઃ શાન્તિઃ । વિમુક્તં વા એતર્હિ યોક્ત્રં
બ્રહ્મણા । આદાયૈનત્પત્ની સહાપ ઉપગૃહ્ણીતે શાન્ત્યૈ । અઞ્જલૌ
પૂર્ણપાત્રમાનયતિ । રેત એવાસ્યાં પ્રજાં દધાતિ । પ્રજયા હિ મનુષ્યઃ
પૂર્ણઃ । મુખં વિમૃષ્ટે । અવભૃથસ્યૈવ રૂપં કૃત્વોત્તિષ્ઠતિ ॥
૩। ૩। ૧૦। ૪॥ સવિતૃપ્રસૂતો યથાદેવતં પ્રજયેત્યાહ સિઞ્ચન્મૃષ્ટ
એકં ચ ॥ ૧૦॥

૭૬ પરિવેષો વા એષ વનસ્પતીનામ્ । યદુપવેષઃ । ય એવં વેદ । વિન્દતે
પરિવેષ્ટારમ્ । તમુત્કરે । યં દેવા મનુષ્યેષુ । ઉપવેષમધારયન્ ।
યે અસ્મદપ ચેતસઃ । તાનસ્મભ્યમિહાકુરુ । ઉપવેષોપવિડ્ઢિ નઃ ॥ ૩। ૩। ૧૧। ૧॥

૭૭ પ્રજાં પુષ્ટિમથો ધનમ્ । દ્વિપદો નશ્ચતુષ્પદઃ
। ધ્રુવાનનપગાન્કુર્વિતિ પુરસ્તાત્પ્રત્યઞ્ચમુપગૂહતિ ।
તસ્માત્પુરસ્તાત્પ્રત્યઞ્ચઃ શૂદ્રા અવસ્યન્તિ । સ્થવિમત ઉપગૂહતિ ।
અપ્રતિવાદિન એવૈનાન્કુરુતે । ધૃષ્ટિર્વા ઉપવેષઃ । શુચર્તો વજ્રો બ્રહ્મણા
સ ँ શિતઃ । યોપવેષે શુક્ । સાઽમુમૃચ્છતુ યં દ્વિષ્મ ઇતિ ॥ ૩। ૩। ૧૧। ૨॥

૭૮ અથાસ્મૈ નામગૃહ્ય પ્રહરતિ । નિરમું નુદ ઓકસઃ । સપત્નો યઃ
પૃતન્યતિ । નિર્બાધ્યેન હવિષા । ઇન્દ્ર એણં પરાશરીત્ । ઇહિ તિસ્રઃ

પરાવતઃ । ઇહિ પઞ્ચજના૨ં અતિ । ઇહિ તિસ્રોઽતિ રોચનાયાવત્ ।
સૂર્યો અસદ્દિવિ । પરમાં ત્વા પરાવતમ્ ॥ ૩। ૩। ૧૧। ૩॥

૭૯ ઇન્દ્રો નયતુ વૃત્રહા । યતો ન પુનરાયસિ । શશ્વતીભ્યઃ સમાભ્ય
ઇતિ । ત્રિવૃદ્વા એષ વજ્રો બ્રહ્મણા સ૨ંશિતઃ । શુચૈવૈનં
વિદ્ધ્વા । એભ્યો લોકેભ્યો નિર્ણુદ્ય । વજ્રેણ બ્રહ્મણા સ્તૃણુતે ।
હતોઽસાવવધિષ્મામુમિત્યાહ સ્તૃત્યૈ । યં દ્વિષ્યાત્તં ધ્યાયેત્ ।
શુચૈવૈનમર્પયતિ ॥ ૩। ૩। ૧૧। ૪॥

નોદ્વિષ્મ ઇતિ પરાવતમર્પયતિ ॥ ૧૧॥

પ્રત્યુષ્ટં દિવઃ શિલ્પમયજ્ઞો ઘૃતં ચ દેવાસુરાઃ સ એતમિન્દ્ર આપો
દેવીરગ્નિના ધિષ્ણિયા અથ સ્રુચૌ યો વા અયથાદેવતં પરિવેષો વા એકાદશ
॥ ૧૧॥

પ્રત્યુષ્ટમયજ્ઞ એષા હિ વિશ્વેષાં દેવાનામૂર્જા પૃથિવીમથો
રક્ષસાં તાં પ્રજાતિં દ્વાભ્યાં તં કાલેકાલે નવસપ્તતિઃ ॥ ૭૯॥

પ્રત્યુષ્ટ૨ં શુચૈવૈનમર્પયતિ ॥

## તૃતીયાષ્ટકે ચતુર્થઃ પ્રપાઠકઃ ૪

૧ બ્રહ્મણે બ્રાહ્મણમાલભતે । ક્ષત્રાય રાજન્યમ્ । મરુદ્ભ્યો વૈશ્યમ્ ।
તપસે શૂદ્રમ્ । તમસે તસ્કરમ્ । નારકાય વીરહણમ્ । પાપ્મને ક્લીબમ્ ।
આક્રયાયાયોગૂમ્ । કામાય પુ૨ંશ્ચલૂમ્ । અતિક્રુષ્ટાય માગધમ્ ॥ ૩। ૪। ૧। ૧॥ ॥ ૧॥

૨ ગીતાય સૂતમ્ । નૃત્તાય શૈલૂષમ્ । ધર્માય સભાચરમ્ । નર્માય
રેભમ્ । નરિષ્ઠાયૈ ભીમલમ્ । હસાય કારિમ્ । આનન્દાય સ્ત્રીષખમ્ ।
પ્રમુદે કુમારીપુત્રમ્ । મેધાયૈ રથકારમ્ । ધૈર્યાય તક્ષાણમ્ ॥ ૩। ૪। ૨। ૧॥ ॥ ૨॥

૩ શ્રમાય કૌલાલમ્ । માયાયૈ કાર્માઽરમ્ । રૂપાય મણિકારમ્ । શુભે વપમ્ ।
શરવ્યાયા ઇષુકારમ્ । હેત્યૈ ધન્વકારમ્ । કર્મણે જ્યાકારમ્ । દિષ્ટાય
રજ્જુસર્ગમ્ । મૃત્યવે મૃગયુમ્ । અન્તકાય શ્વનિતમ્ ॥ ૩। ૪। ૩। ૧॥ ॥ ૩॥

૪ સન્ધયે જારમ્ । ગેહાયોપપતિમ્ । નિરૃત્યૈ પરિવિત્તમ્ । આર્ત્યૈ

પરિવિવિદાનમ્ । અરાધ્યૈ દિધિષૂપતિમ્ । પવિત્રાય ભિષજમ્ । પ્રજ્ઞાનાય
નક્ષત્રદર્શમ્ । નિષ્કૃત્યૈ પેશસ્કારીમ્ । બલાયોપદામ્ । વર્ણાયાનૂરુધમ્
॥ ૩। ૪। ૪। ૧॥ ॥ ૪॥

૫ નદીભ્યઃ પૌઞ્જિષ્ટમ્ । ઋક્ષીકાભ્યો નૈષાદમ્ । પુરુષવ્યાઘ્રાય
દુર્મદમ્ । પ્રયુદ્ભ્ય ઉન્મત્તમ્ । ગન્ધર્વાપ્સરાભ્યો વ્રાત્યમ્ ।
સર્પદેવજનેભ્યોઽપ્રતિપદમ્ । અવેભ્યઃ કિતવમ્ । ઇર્યતાયા અકિતવમ્ ।
પિશાચેભ્યો બિદલકારમ્ । યાતુધાનેભ્યઃ કણ્ટકકારમ્ ॥ ૩। ૪। ૫। ૫॥ ॥ ૫॥

૬ ઉત્સાદેભ્યઃ કુબ્જમ્ । પ્રમુદે વામનમ્ । દ્વાર્ભ્યઃ સ્રામમ્ । સ્વપ્નાયાન્ધમ્
। અધર્માય બધિરમ્ । સંજ્ઞાનાય સ્મરકારીમ્ । પ્રકામોદ્યાયોપસદમ્ ।
આશિક્ષાયૈ પ્રશ્નિનમ્ । ઉપશિક્ષાયા અભિપ્રશ્નિનમ્ । મર્યાદાયૈ
પ્રશ્નવિવાકમ્ ॥ ૩। ૪। ૬। ૬॥ ॥ ૬॥

૭ ઋત્યૈ સ્તેનહૃદયમ્ । વૈરહત્યાય પિશુનમ્ । વિવિત્ત્યૈ ક્ષત્તારમ્
। ઔપદ્રષ્ટાય સંગ્રહીતારમ્ । બલાયાનુચરમ્ । ભૂમ્ને પરિષ્કન્દમ્ ।
પ્રિયાય પ્રિયવાદિનમ્ । અરિષ્ટ્યા અશ્વસાદમ્ । મેધાય વાસઃ પલ્પૂલીમ્ ।
પ્રકામાય રજયિત્રીમ્ ॥ ૩। ૪। ૭। ૧॥ ॥ ૭॥

૮ ભાયૈ દાર્વાહારમ્ । પ્રભાયા આગ્નેન્ધમ્ । નાકસ્ય પૃષ્ઠાયાભિષેક્તારમ્
। બ્રધ્નસ્ય વિષ્ટપાય પાત્રનિર્ણેગમ્ । દેવલોકાય પેશિતારમ્ ।
મનુષ્યલોકાય પ્રકરિતારમ્ । સર્વેભ્યો લોકેભ્ય ઉપસેક્તારમ્ ।
અવર્ત્યૈ વધાયોપમન્થિતારમ્ । સુવર્ગાય લોકાય ભાગદુઘમ્ ।
વર્ષિષ્ઠાય નાકાય પરિવેષ્ટારમ્ ॥ ૩। ૪। ૮। ૧॥ ॥ ૮॥

૯ અર્મેભ્યો હસ્તિપમ્ । જવાયાશ્વપમ્ । પુષ્ટ્યૈ ગોપાલમ્ । તેજસેઽજપાલમ્
। વીર્યાયાવિપાલમ્ । ઇરાયૈ કીનાશમ્ । કીલાલાય સુરાકારમ્ । ભદ્રાય
ગૃહપમ્ । શ્રેયસે વિત્તધમ્ । અધ્યક્ષાયાનુક્ષત્તારમ્ ॥ ૩। ૪। ૯। ૧॥ ॥ ૯॥

૧૦ મન્યવેઽયસ્તાપમ્ । ક્રોધાય નિસરમ્ । શોકાયાભિસરમ્
। ઉત્કૂલવિકૂલાભ્યાં ત્રિસ્થિનમ્ । યોગાય યોક્તારમ્ । ક્ષેમાય
વિમોક્તારમ્ । વપુષે માનસ્કૃતમ્ । શીલાયાઞ્જનીકારમ્ । નિરૃત્યૈ કોશકારીમ્
। યમાયાસૂમ્ ॥ ૩। ૪। ૧૦। ૧॥ ॥ ૧૦॥

૧૧ યમ્યૈ  યમસૂમ્ । અથર્વભ્યોઽવતોકામ્ । સંવથ્સરાય  પર્યારિણીમ્
। પરિવથ્સરાયાવિજાતામ્ । ઇદાવથ્સરાયાપસ્કદ્વરીમ્ ।
ઇદ્વથ્સરાયાતીત્વરીમ્ । વથ્સરાય  વિજર્જરામ્ । સર્વંથ્સરાય
પલિક્નીમ્ । વનાય વનપમ્ । અન્યતોઽરણ્યાય દાવપમ્ ॥ ૩। ૪। ૧૧। ૧॥  ॥ ૧૧॥

૧૨ સરોભ્યો ધૈવરમ્ । વેશન્તાભ્યો  દાશમ્ । ઉપસ્થાવરીભ્યો  બૈન્દમ્ ।
નડ્વલાભ્યઃ  શૌષ્કલમ્ । પાર્યાય કૈવર્તમ્ । અવાર્યાય માર્ગારમ્ ।
તીર્થેભ્ય  આન્દમ્ । વિષમેભ્યો મૈનાલમ્ । સ્વનેભ્યઃ  પર્ણકમ્ । ગુહાભ્યઃ
કિરાતમ્ । સાનુભ્યો  જમ્ભકમ્ । પર્વતેભ્યઃ  કિંપૂરુષમ્ ॥ ૩। ૪। ૧૨। ૧॥  ॥ ૧૨॥

૧૩ પ્રતિશ્રુત્કાયા ઋતુલમ્ । ઘોષાય ભષમ્ । અન્તાય બહુવાદિનમ્ ।
અનન્તાય  મૂકમ્ । મહસે વીણાવાદમ્ । ક્રોશાય તૂણવધ્મમ્ । આક્રન્દાય
દુન્દુભ્યાઘાતમ્ । અવરસ્પરાય  શઙ્ખધ્મમ્ । ઋભુભ્યોઽજિનસન્ધાયમ્ ।
સાધ્યેભ્યશ્ચર્મમ્ણમ્ ॥ ૩। ૪। ૧૩। ૧॥  ॥ ૧૩॥

૧૪ બીભથ્સાયૈ  પૌલ્કસમ્ । ભૂત્યૈ  જાગરણમ્ । અભૂત્યૈ સ્વપનમ્ ।
તુલાયૈ  વાણિજમ્ । વર્ણાય હિરણ્યકારમ્ । વિશ્વેભ્યો દેવેભ્યઃ  સિધ્મલમ્ ।
પશ્ચાદ્દોષાય  ગ્લાવમ્ । ઋત્યૈ  જનવાદિનમ્ । વ્યૃદ્ધ્યા અપગલ્ભમ્ ।
સઁશરાય  પ્રચ્છિદમ્ ॥ ૩। ૪। ૧૪। ૧॥  ॥ ૧૪॥

૧૫ હસાય પુરઁશ્ચલૂમાલભતે । વીણાવાદં ગણકં ગીતાય  । યાદસે
શાબુલ્યામ્ । નર્માય  ભદ્રવતીમ્ । તૂષ્ણવધ્મં ગ્રામણ્યં  પાણિસંઘાતં
નૃત્તાય  । મોદાયાનુક્રોશકમ્ । આનન્દાય  તલવમ્ ॥ ૩। ૪। ૧૫। ૧॥  ॥ ૧૫॥

૧૬ અક્ષરાજાય  કિતવમ્ । કૃતાય  સભાવિનમ્ । ત્રેતાયા આદિનવદર્શમ્ ।
દ્વાપરાય  બહિઃસદમ્ । કલયે સભાસ્થાણુમ્ । દુષ્કૃતાય  ચરકાચાર્યમ્
। અધ્વને બ્રહ્મચારિણમ્ । પિશાચેભ્યઃ  સૈલગમ્ । પિપાસાયૈ  ગોવ્યચ્છમ્
। નિરૃત્યૈ ગોઘાતમ્ । ક્ષુધે ગોવિકર્તમ્ । ક્ષુત્તૃષ્ણાભ્યાં  તમ્ । યો
ગાં વિકૃન્તન્તં માઁસં ભિક્ષમાણ ઉપતિષ્ઠતે ॥ ૩। ૪। ૧૬। ૧॥  ॥ ૧૬॥

૧૭ ભૂમ્યૈ  પીઠસર્પિણમાલભતે । અગ્નયેઽઁસલમ્ । વાયવે  ચાણ્ડાલમ્
। અન્તરિક્ષાય વઁશનર્તિનમ્ । દિવે ખલતિમ્ । સૂર્યાય હર્યક્ષમ્ ।
ચન્દ્રમસે મિર્મિરમ્ । નક્ષત્રેભ્યઃ કિલાસમ્ । અહ્ને  શુક્લં પિઙ્ગલમ્ ।

રાત્રિયૈ કૃષ્ણં પિઙ્ગાક્ષમ્ ॥ ૩। ૪। ૧૭। ૧॥ ॥ ૧૭॥

૧૮ વાચે પુરુષમાલભતે । પ્રાણમપાનં વ્યાનમુદાનઁ સમાનં
તાન્, વાયવે । સૂર્યાય ચક્ષુરાલભતે । મનશ્ચન્દ્રમસે । દિગ્ભ્યઃ
શ્રોત્રમ્ । પ્રજાપતયે પુરુષમ્ ॥ ૩। ૪। ૧૮। ૧॥ ॥ ૧૮॥

૧૯ અથૈતાનરૂપેભ્ય આલભતે । અતિહ્રસ્વમતિદીર્ઘમ્ ।
અતિકૃશમત્યઁસલમ્ । અતિશુક્લમતિકૃષ્ણમ્ । અતિશ્લક્ષ્ણમતિલોમશમ્
। અતિકિરિટમતિદન્તુરમ્ । અતિમિર્મિરમતિમેમિષમ્ । આશાયૈ જામિમ્ ।
પ્રતીક્ષાયૈ કુમારીમ્ ॥ ૩। ૪। ૧૯। ૧॥ ॥ ૧૯॥

બ્રહ્મણે ગીતાય શ્રમાય સન્ધયે નદીભ્ય ઉથ્સાદેભ્ય ઋત્યૈભાયા
અર્મેભ્યો મન્યવે યમ્યૈ દશદશ સરોભ્યો દ્વાદશ પ્રતિશ્રુત્કાયૈ
બીભથ્સાયૈ દશદશ હસાય સપ્તાખ્ષ રાજાય ત્રયોદશ ભૂમ્યૈ
દશ વાચે ષડથ નવૈકાન્ન વિઁશતિઃ ॥ ૧૯॥

બ્રહ્મણે યમ્યૈ નવદશ ॥ ૧૯॥

બ્રહ્મણે કુમારીમ્ ॥

## તૃતીયાષ્ટકે પઞ્ચમઃ પ્રપાઠકઃ ૫

૧ સત્યં પ્રપદ્યે । ઋતં પ્રપદ્યે । અમૃતં પ્રપદ્યે । પ્રજાપતેઃ પ્રિયાં
તનુવમનાર્તાં પ્રપદ્યે । ઇદમહં પઞ્ચદશેન વજ્રેણ । દ્વિષન્તં
ભ્રાતૃવ્યમવક્રામામિ । યોઽસ્માન્દ્વેષ્ટિ । યં ચ વયં દ્વિષ્મઃ । ભૂર્ભુવઃ
સુવઃ । હિમ્ ॥ ૩। ૫। ૧। ૧॥ સત્યં દશ ॥ ૧॥

૨ પ્ર વો વાજા અભિદ્યવઃ । હવિષ્મન્તો ઘૃતાચ્યા । દેવાઞ્જિગાતિ સુમ્નયુઃ
। અગ્ન આયાહિ વીતયે । ગૃણાનો હવ્યદાતયે । નિહોતા સથ્સિ બર્હિષિ ।
તં ત્વા સમિદ્ભિરઙ્ગિરઃ । ઘૃતેન વર્ધયામસિ । બૃહચ્છોચા યવિષ્ઠ્ય ।
સ નઃ પૃથુ શ્રવાય્યમ્ ॥ ૩। ૫। ૨। ૧॥

૩ અચ્છા દેવ વિવાસસિ । બૃહદગ્ને સુવીર્યમ્ । ઈડેન્યો નમસ્યસ્તિરઃ ।
તમાઁસિ દર્શતઃ । સમગ્નિરિદ્ધ્યતે વૃષા । વૃષો અગ્નિઃ સમિદ્ધ્યતે ।

અશ્વો ન દેવવાહનઃ । તꣳ હવિષ્મન્ત ઈડતે । વૃષણં ત્વા વયં વૃષન્
। વૃષાણઃ સમિધીમહિ ॥ ૩। ૫। ૨। ૨॥

૪ અગ્ને દીદ્યતં બૃહત્ । અગ્નિં દૂતં વૃણીમહે । હોતારં વિશ્વવેદસમ્ ।
અસ્ય યજ્ઞસ્ય સુક્રતુમ્ । સમિદ્ધ્યમાનો અધ્વરે । અગ્નિઃ પાવક ઈડ્યઃ
। શોચિષ્કેશસ્તમીમહે । સમિદ્ધો અગ્ન આહુત । દેવાન્, યક્ષિ સ્વધ્વર ।
ત્વꣳ હિ હવ્યવાડસિ । આજુહોત દુવસ્યત । અગ્નિં પ્રયત્યધ્વરે ।
વૃણીધ્વꣳ હવ્યવાહનમ્ । ત્વં વરુણ ઉત મિત્રો અગ્ને । ત્વાં વર્ધન્તિ
મતિભિર્વસિષ્ઠાઃ । ત્વે વસુ સુષણનાનિ સન્તુ । યૂયં પાત સ્વસ્તિભિઃ
સદા નઃ ॥ ૩। ૫। ૨। ૩॥ શ્રવાય્યમિધીમહ્યસિ સપ્ત ચ ॥ ૨॥

૫ અગ્ને મહાꣳ અસિ બ્રાહ્મણ ભારત । અસાવસૌ । દેવેદ્ધો મન્વિદ્ધઃ ।
ઋષિષ્ટુતો વિપ્રાનુમદિતઃ । કવિશસ્તો બ્રહ્મસꣳશિતો ઘૃતાહવનઃ ।
પ્રણીર્યજ્ઞાનામ્ । રથીરધ્વરાણામ્ । અતૂર્તો હોતા । તૂર્ણિર્હવ્યવાટ્ ।
આસ્પાત્રં જુહૂર્દેવાનામ્ ॥ ૩। ૫। ૩। ૧॥

૬ ચમસો દેવપાનઃ । અરાꣳ ઇવાગ્ને નેમિર્દેવાઽસ્ત્વં પરિભૂરસિ ।
આવહ દેવાન્, યજમાનાય । અગ્નિમગ્ન આવહ । સોમમાવહ । અગ્નિમાવહ ।
પ્રજાપતિમાવહ । અગ્નીષોમાવાવહ । ઇન્દ્રાગ્ની આવહ । ઇન્દ્રમાવહ ।
મહેન્દ્રમાવહ । દેવાꣳ આજ્યપાꣳ આવહ । અગ્નિꣳ હોત્રાયાવહ ।
સ્વં મહિમાનમાવહ । આ ચાગ્ને દેવાન્, વહ । સુયજા ચ યજ જાતવેદઃ ॥
૩। ૫। ૩। ૨॥ દેવાનામિન્દ્રમાવહ ષટ્ચ ॥ ૩॥

૭ અગ્નિર્હોતા વેત્વગ્નિઃ । હોત્રં વેત્તુ પ્રાવિત્રમ્ । સ્મો વયમ્ । સાધુ તે યજમાન
દેવતા । ઘૃતવતીમધ્વꣲ્યો સ્રુચમાસ્યસ્વ । દેવાયુવં વિશ્વવારામ્ ।
ઈડામહૈ દેવાꣳ ઈડેન્યાન્ । નમસ્યામ નમસ્યાન્ । યજામ યજ્ઞિયાન્
॥ ૩। ૫। ૪। ૧॥ અગ્નિર્હોતા નવ ॥ ૪॥

૮ સમિધો અગ્ન આજ્યસ્ય વિયન્તુ । તનૂનપાદગ્ન આજ્યસ્ય વેતુ । ઇડો અગ્ન
આજ્યસ્ય વિયન્તુ । બર્હિરગ્ન આજ્યસ્ય વેતુ । સ્વાહાઽગ્નિમ્ । સ્વાહા સોમમ્ ।
સ્વાહાઽગ્નિમ્ । સ્વાહા પ્રજાપતિમ્ । સ્વાહાગ્નીષોમૌ । સ્વાહેન્દ્રાગ્ની । સ્વાહેન્દ્રમ્ ।
સ્વાહા મહેન્દ્રમ્ । સ્વાહા દેવાꣳ આજ્યપાન્ । સ્વાહાઽગ્નિꣳ હોત્રાજ્જુષાણાઃ ।

અગ્ન આજ્યસ્ય વિયન્તુ ॥ ૩। ૫। ૫। ૧॥ ઇન્દ્રાગ્ની પઞ્ચ ચ ॥ ૫॥

૯ અગ્નિર્વૃત્રાણિ જઙ્ઘનત્ । દ્રવિણસ્યુર્વિપન્યયા । સમિદ્ધઃ શુક્ર
આહુતઃ । જુષાણો અગ્નિરાજ્યસ્ય વેતુ । ત્વꣳ સોમાસિ સત્પતિઃ । ત્વꣳ રાજોત
વૃત્રહા । ત્વં ભદ્રો અસિક્રતુઃ । જુષાણઃ સોમ આજ્યસ્ય હવિષો
વેતુ । અગ્નિઃ પ્રત્નેન જન્મના । શુમ્ભાનસ્તનુવગ્ગ્ સ્વામ્ । કવિર્વિપ્રેણ
વાવૃધે । જુષાણો અગ્નિરાજ્યસ્ય વેતુ । સોમ ગીર્ભિષ્ટ્વા વયમ્ । વર્ધયામો
વચોવિદઃ । સુમૃડીકો ન આવિશ । જુષાણઃ સોમ આજ્યસ્ય હવિષો
વેતુ ॥ ૩। ૫। ૬। ૧॥ સ્વાꣳ ષટ્ચ ॥ ૬॥

૧૦ અગ્નિર્મૂર્ધા દિવઃ કકુત્ । પતિઃ પૃથિવ્યા અયમ્ । અપાꣳ રેતાꣳસિ
જિન્વતિ । ભુવો યજ્ઞસ્ય રજસશ્ચ નેતા । યત્રા નિયુદ્ભિઃ સચસે
શિવાભિઃ । દિવિ મૂર્ધાનં દધિષે સુવર્ષામ્ । જિહ્વામગ્ને ચકૃષે
હવ્યવાહમ્ । પ્રજાપતે ન ત્વદેતાન્યન્યઃ । વિશ્વા જાતાનિ પરિ તા બભૂવ ।
યત્કામાસ્તે જુહુમસ્તન્નો અસ્તુ ॥ ૩। ૫। ૭। ૧॥

૧૧ વયꣳ સ્યામ પતયો રયીણામ્ । સ વેદ પુત્રઃ પિતરꣳ સ માતરમ્
। સ સૂનુર્ભુવથ્સ ભુવત્પુનર્મઘઃ । સ દ્યામૌર્ણોદન્તરિક્ષꣳ
સ સુવઃ । સ વિશ્વા ભુવો અભવથ્સ આભવત્ । અગ્નીષોમા સવેદસા । સહૂતી
વનતં ગિરઃ । સં દેવત્રા બભૂવથુઃ । યુવમેતાનિ દિવિ રોચનાનિ
। અગ્નિશ્ચ સોમ સક્રતૂ અધત્તમ્ ॥ ૩। ૫। ૭। ૨॥

૧૨ યુવꣳ સિન્ધૂꣳરભિશસ્તેરવદ્યાત્ । અગ્નીષોમાવમુઞ્ચતં ગૃભીતાન્
। ઇન્દ્રાગ્ની રોચના દિવઃ । પરિ વાજેષુ ભૂષથઃ । તદ્વાઞ્ચેતિ પ્રવીર્યમ્
। શ્નથદ્વૃત્રમુત સનોતિ વાજમ્ । ઇન્દ્રાયો અગ્ની સહુરી સપર્યાત્ ।
ઇરજ્યન્તા વસવ્યસ્ય ભૂરેઃ । સહસ્તમા સહસા વાજયન્તા । એન્દ્ર
સાનસિꣳ રયિમ્ ॥ ૩। ૫। ૭। ૩॥

૧૩ સજિત્વાનꣳ સદાસહમ્ । વર્ષિષ્ઠમૂતયે ભર । પ્રસસાહિષે
પુરુહૂત શત્રૂન્ । જ્યેષ્ઠસ્તે શુષ્મ ઇહ રાતિરસ્તુ । ઇન્દ્રાભર
દક્ષિણેના વસૂનિ । પતિઃ સિન્ધૂનામસિ રેવતીનામ્ । મહાꣳ ઇન્દ્રો ય ઓજસા
। પર્જન્યો વૃષ્ટિમાꣳ ઇવ । સ્તોમૈર્વથ્સસ્ય વાવૃધે । મહાꣳ ઇન્દ્રો

નૃવદાચર્ષણિપ્રાઃ ॥ ૩। ૫। ૭। ૪॥

૧૪ ઉત દ્વિબર્હા અમિનઃ સહોભિઃ । અસ્મદ્રિયગ્વાવૃધે વીર્યાય । ઉરુઃ પૃથુઃ સુકૃતઃ કર્તૃભિર્ભૂત્ । પિપ્રીહિ દેવાઁ ઉશતો યવિષ્ઠ । વિદ્વાઁ ઋતૂઁ ઋતુપતે યજેહ । યે દૈવ્યા ઋત્વિજસ્તેભિરગ્ને । ત્વઁ હોતૃણામસ્યા યજિષ્ઠઃ । અગ્નિરઁ સ્વિષ્ટકૃતમ્ । અયાડગ્નિરગ્નેઃ પ્રિયા ધામાનિ । અયાટ્થ્સોમસ્ય પ્રિયા ધામાનિ ॥ ૩। ૫। ૭। ૫॥

૧૫ અયાડગ્નેઃ પ્રિયા ધામાનિ । અયાટ્પ્રજાપતેઃ પ્રિયા ધામાનિ । અયાડગ્નીષોમયોઃ પ્રિયા ધામાનિ । અયાડિન્દ્રાગ્નિયોઃ પ્રિયા ધામાનિ । અયાડિન્દ્રસ્ય પ્રિયા ધામાનિ । અયાણ્મહેન્દ્રસ્ય પ્રિયા ધામાનિ । અયાડ્દેવાનામાજ્યપાનાં પ્રિયા ધામાનિ । યક્ષદગ્નેર્હોતુઃ પ્રિયા ધામાનિ । યક્ષથ્સ્વં મહિમાનમ્ । આયજતામેજ્યા ઇષઃ । કૃણોતુ સો અધ્વરા જાતવેદાઃ । જુષતાઁ હવિઃ । અગ્ને યદદ્ય વિશો અધ્વરસ્ય હોતઃ । પાવક શોચે વેષ્ટ્વઁ હિ યજ્વા । ઋતા યજાસિ મહિના વિયદ્ભૂઃ । હવ્યા વહ યવિષ્ઠયા તે અદ્ય ॥ ૩। ૫। ૭। ૬॥ અસ્ત્વધત્ત ઁ રયિં ચર્ષણિપ્રાઃ સોમસ્ય પ્રિયા ધામાનીષષ્ટ્ચ ॥ ૭॥

૧૬ ઉપહૂતઁ રથન્તરઁ સહ પૃથિવ્યા । ઉપ મા રથન્તરઁ સહ પૃથિવ્યા હ્વયતામ્ । ઉપહૂતં વામદેવ્યઁ સહાન્તરિક્ષેણ । ઉપ મા વામદેવ્યઁ સહાન્તરિક્ષેણ હ્વયતામ્ । ઉપહૂતં બૃહથ્સહ દિવા । ઉપ મા બૃહથ્સહ દિવા હ્વયતામ્ । ઉપહૂતાઃ સપ્ત હોત્રાઃ । ઉપ મા સપ્તહોત્રા હ્વયન્તામ્ । ઉપહૂતા ધેનુઃ સહર્ષભા । ઉપ મા ધેનુઃ સહર્ષભા હ્વયતામ્ ॥ ૩। ૫। ૮। ૧॥

૧૭ ઉપહૂતો ભક્ષઃ સખા । ઉપ મા ભક્ષઃ સખા હ્વયતામ્ । ઉપહૂતા ૪ ં હો । ઇડોપહૂતા । ઉપહૂતેડા । ઉપો અસ્માઁ ઇડા હ્વયતામ્ । ઇડોપહૂતા । ઉપહૂતેડા । માનવી ઘૃતપદી મૈત્રાવરુણી । બ્રહ્મદેવકૃતમુપહૂતમ્ ॥ ૩। ૫। ૮। ૨॥

૧૮ દૈવ્યા અધ્વર્યવ ઉપહૂતાઃ । ઉપહૂતા મનુષ્યાઃ । ય ઇમં યજ્ઞમવાન્ । યે યજ્ઞપતિં વર્ધાન્ । ઉપહૂતે દ્યાવાપૃથિવી । પૂર્વજે ઋતાવરી । દેવી દેવપુત્રે । ઉપહૂતોઽયં યજમાનઃ । ઉત્તરસ્યાં દેવયજ્યાયામુપહૂતઃ

। ભૂયસિ હવિષ્કરણ ઉપહૂતઃ । દિવ્યે ધામન્નુપહૂતઃ । ઇદં મે દેવા
હવિર્જુષન્તામિતિ તસ્મિન્નુપહૂતઃ । વિશ્વમસ્ય પ્રિયમુપહૂતમ્ । વિશ્વસ્ય
પ્રિયસ્યોપહૂતસ્યોપહૂતઃ ॥ ૩। ૫। ૮। ૩॥ સહર્ષભા હ્વયતામુપહૂતꣳ
હવિષ્કરણ ઉપહૂતશ્ચત્વારિ ચ ॥ ૮॥

૧૯ દેવં બર્હિઃ । વસુવને વસુધેયસ્ય વેતુ । દેવો નરાશꣳસઃ ।
વસુવને વસુધેયસ્ય વેતુ । દેવો અગ્નિઃ સ્વિષ્ટકૃત્ । સુદ્રવિણા મન્દ્રઃ
કવિઃ । સત્યમન્માઽઽયજી હોતા । હોતુર્હોતુરાયજીયાન્ । અગ્ને યાન્દેવાનયાટ્
। યાꣳ અપિપ્રેઃ । યે તે હોત્રે અમત્સત । તાꣳ સસનુષીꣳ હોત્રાં
દેવંગમામ્ । દિવિ દેવેષુ યજ્ઞમેરયેમમ્ । સ્વિષ્ટકૃચ્ચાગ્ને હોતાऽભૂઃ ।
વસુવને વસુધેયસ્ય નમોવાકે વીહિ ॥ ૩। ૫। ૯। ૧॥ અપિપ્રે પઞ્ચ ચ ॥ ૯॥

૨૦ ઇદં દ્યાવાપૃથિવી ભદ્રમભૂત્ । આર્ધ્મ સૂક્તવાકમ્ । ઉત નમોવાકમ્
। ઋધ્યાસ્મ સૂક્તોચ્યમગ્ને । ત્વꣳ સૂક્તવાગસિ । ઉપશ્રિતો દિવઃ
પૃથિવ્યોઃ । ઓમન્વતી તેऽસ્મિન્, યજ્ઞે યજમાન દ્યાવાપૃથિવી સ્તામ્ ।
શઙ્ગયે જીરદાનૂ । અત્રસ્નૂ અપ્રવેદે । ઉરુગવ્યૂતી અભયં કૃતૌ ॥
૩। ૫। ૧૦। ૧॥

૨૧ વૃષ્ટિદ્યાવારીત્યાપા । શમ્ભુવૌ મયોભુવૌ । ઊર્જસ્પતી ચ પયસ્વતી
ચ । સૂપચરણા ચ સ્વધિચરણા ચ । તયોરાવિદિ । અગ્નિરિદꣳ
હવિરજુષત । અવીવૃધત મહો જ્યાયોऽકૃત । સોમ ઇદꣳ હવિરજુષત
। અવીવૃધત મહોજ્યાયોऽકૃત । અગ્નિરિદꣳ હવિરજુષત ॥ ૩। ૫। ૧૦। ૨॥

૨૨ અવીવૃધત મહોજ્યાયોऽકૃત । પ્રજાપતિરિદꣳ હવિરજુષત ।
અવીવૃધત મહોજ્યાયોऽકૃત । અગ્નીષોમાવિદꣳ હવિરજુષેતામ્ ।
અવીવૃધેતાં મહોજ્યાયોऽક્રાતામ્ । ઇન્દ્રાગ્ની ઇદꣳ હવિરજુષેતામ્ ।
અવીવૃધેતાં મહો જ્યાયોऽક્રાતામ્ । ઇન્દ્ર ઇદꣳ હવિરજુષત । અવીવૃધત
મહો જ્યાયોऽકૃત । મહેન્દ્ર ઇદꣳ હવિરજુષત ॥ ૩। ૫। ૧૦। ૩॥

૨૩ અવીવૃધત મહો જ્યાયોऽકૃત । દેવા આજ્યપા આજ્યમજુષન્ત ।
અવીવૃધન્ત મહોજ્યાયોऽક્રત । અગ્નિર્હોત્રેણેદꣳ હવિરજુષત ।
અવીવૃધત મહોજ્યાયોऽકૃત । અસ્યામૃધદ્ધોત્રાયાં દેવંગમાયામ્ ।

આશાસ્તેઽયં યજમાનોઽસૌ । આયુરાશાસ્તે । સુપ્રજાસ્ત્વમાશાસ્તે ।
સજાતવનસ્યામાશાસ્તે ॥ ૩। ૫। ૧૦। ૪॥
૨૪ ઉત્તરાં દેવયજ્યામાશાસ્તે । ભૂયો હવિષ્કરણમાશાસ્તે । દિવ્યં
ધામાશાસ્તે । વિશ્વં પ્રિયમાશાસ્તે । યદનેન હવિષાઽઽશાસ્તે ।
તદશ્યાત્તદૃધ્યાત્ । તદસ્મૈ દેવા રાસન્તામ્ । તદગ્નિર્દેવો દેવેભ્યો
વનતે । વયમગ્નેર્માનુષાઃ । ઇષ્ટં ચ વીતં ચ । ઉભે ચ નો
દ્યાવાપૃથિવી અꣳહસઃ સ્પાતામ્ । ઇહ ગતિર્વામસ્યેદં ચ । નમો દેવેભ્યઃ
॥ ૩। ૫। ૧૦। ૫॥ અભયંકૃતાવકૃતાગ્નિરિદꣳ હવિરજુષત મહેન્દ્ર
ઇદꣳ હવિરજુષત સજાતવનસ્યામાશાસ્તે વીતં ચ ત્રીણિ ચ ॥ ૧૦॥
૨૫ તચ્છં યોરાવૃણીમહે । ગાતું યજ્ઞાય । ગાતું યજ્ઞપતયે । દૈવી
સ્વસ્તિરસ્તુ નઃ । સ્વસ્તિર્માનુષેભ્યઃ । ઊર્ધ્વં જિગાતુ ભેષજમ્ । શં નો
અસ્તુ દ્વિપદે । શં ચતુષ્પદે ॥ ૩। ૫। ૧૧। ૧॥ તચ્છંયોરષ્ટૌ ॥ ૧૧॥
૨૬ આપ્યાયસ્વ સં તે । ઇહ ત્વષ્ટારમગ્રિયં તન્નસ્તુરીપમ્ । દેવાનાં
પત્નીરુશતીરવન્તુ નઃ । પ્રાવન્તુ નસ્તુજયે વાજસાતયે । યાઃ પાર્થિવાસો
યા અપામપિ વ્રતે । તા નો દેવીઃ સુહવાઃ શર્મ યચ્છત । ઉતગ્ના વ્યન્તુ
દેવપત્નીઃ । ઇન્દ્રાણ્યગ્નાય્યશ્વિની રાટ્ । આ રોદસી વરુણાની શ઼ૃણોતુ ।
વ્યન્તુ દેવીર્ય ઋતુર્જનીનામ્ ॥
અગ્નિર્હોતા ગૃહપતિઃ સ રાજા । વિશ્વા વેદ જનિમા જાતવેદાઃ ।
દેવાનામુત યો મર્ત્યાનામ્ । યજિષ્ઠઃ સ પ્રયજતામૃતાવા । વયમુ
ત્વા ગૃહપતે જનાનામ્ । અગ્ને અકર્મ સમિધા બૃહન્તમ્ । અસ્થૂરિણો
ગાર્હપત્યાનિ સન્તુ । તિગ્મેન નસ્તેજસા સꣳશિશાધિ ॥ ૩। ૫। ૧૨। ૧॥
જનીનામષ્ટૌ ચ ॥ ૧૨॥
૨૭ ઉપહૂતꣳ રથન્તરꣳ સહ પૃથિવ્યા । ઉપ મા રથન્તરꣳ
સહ પૃથિવ્યા હ્વયતામ્ । ઉપહૂતં વામદેવ્યꣳ સહાન્તરિક્ષેણ । ઉપ
મા વામદેવ્યꣳ સહાન્તરિક્ષેણ હ્વયતામ્ । ઉપહૂતં બૃહત્સહ દિવા । ઉપ
મા બૃહત્સહ દિવા હ્વયતામ્ । ઉપહૂતાઃ સપ્તહોત્રાઃ । ઉપ મા સપ્તહોત્રા
હ્વયન્તામ્ । ઉપહૂતા ધેનુઃ સહર્ષભા । ઉપ મા ધેનુઃ સહર્ષભા હ્વયતામ્ ॥

૩। ૫। ૧૩। ૧॥

૨૮ ઉપહૂતો ભક્ષઃ સખા । ઉપ મા ભક્ષઃ સખા હ્વયતામ્ । ઉપહૂતા ૪ ં હો ।
ઇડોપહૂતા । ઉપહૂતેડા । ઉપો અસ્મા ઁ ઇડા હ્વયતામ્ । ઇડોપહૂતા । ઉપહૂતેડા ।
માનવી ઘૃતપદી મૈત્રાવરુણી । બ્રહ્મ દેવકૃતમુપહૂતમ્ ॥ ૩। ૫। ૧૩। ૨॥

૨૯ દૈવ્યા અધ્વર્યવ ઉપહૂતાઃ । ઉપહૂતા મનુષ્યાઃ । ય ઇમં યજ્ઞમવાન્ ।
યે યજ્ઞપત્નીં વર્ધાન્ । ઉપહૂતે દ્યાવાપૃથિવી । પૂર્વજે ઋતાવરી
। દેવી દેવપુત્રે । ઉપહૂતેયં યજમાના । ઇન્દ્રાણીવાવિધવા । અદિતિરિવ
સુપુત્રા । ઉત્તરસ્યાં દેવયજ્યાયામુપહૂતા । ભૂયસિ હવિષ્કરણ ઉપહૂતા ।
દિવ્યે ધામન્નુપહૂતા । ઇદં મે દેવા હવિર્જુષન્તામિતિ તસ્મિન્નુપહૂતા ।
વિશ્વમસ્યાઃ પ્રિયમુપહૂતમ્ । વિશ્વસ્ય પ્રિયસ્યોપ હૂતસ્યોપહૂતા ॥ ૩। ૫। ૧૩। ૩॥ સહર્ષભા હ્વયતામુપહૂત ઁ
સુપુત્રા ષટ્ચ ॥ ૧૩॥

સત્યં પ્રવોઽગ્ને મહાનગ્નિર્હોતા સમિધોઽગ્નિર્વૃત્રાણ્યગ્નિર્મૂર્ધોપ
હૂતં દેવં બર્હિરિદં દ્યાવાપૃથિવી તચ્છંયોરા પ્યાયસ્વોપહૂતં
ત્રયોદશ ॥ ૧૩॥

સત્યં વયર ઁ સ્યામ વૃષ્ટિદ્યાવા નવવિ ઁ શતિઃ ॥ ૨૯॥

સત્યમુપહૂતા ॥

## તૃતીયાષ્ટકે ષષ્ઠઃ પ્રપાઠકઃ ૬

૧ અઞ્જન્તિ ત્વામધ્વરે દેવયન્તઃ । વનસ્પતે મધુના દૈવ્યેન ।
યદૂર્ધ્વસ્તિષ્ઠાદ્દ્રવિણેહ ધત્તાત્ । યદ્વા ક્ષયો માતુરસ્યા ઉપસ્થે
। ઉચ્છ્રયસ્વ વનસ્પતે । વર્ષ્મન્પૃથિવ્યા અધિ । સુમિતી મીયમાનઃ
। વર્ચોધા યજ્ઞવાહસે । સમિદ્ધસ્ય શ્રયમાણઃ પુરસ્તાત્ । બ્રહ્મ
વન્વાનો અજર ઁ સુવીરમ્ ॥ ૩। ૬। ૧। ૧॥

૨ આરે અસ્મદમતિં બાધમાનઃ । ઉચ્છ્રયસ્વ મહતે સૌભગાય । ઊર્ધ્વ
ઊષુણ ઊતયે । તિષ્ઠા દેવો ન સવિતા । ઊર્ધ્વો વાજસ્ય સનિતા

યદઞ્જિભિઃ । વાઘદ્ભિર્વિહ્વયામહે । ઊર્ધ્વો નઃ પાહ્યꣳ હસો
નિ કેતુના । વિશ્વꣳ સમત્રિણં દહ । કૃધી ન ઊર્ધ્વાઞ્ચ
રથાય જીવસે । વિદા દેવેષુ નો દુવઃ ॥ ૩। ૬। ૧। ૨॥

૩ જાતો જાયતે સુદિનત્વે અહ્નામ્ । સ મર્ય આ વિદથે વર્ધમાનઃ । પુનન્તિ
ધીરા અપસો મનીષા । દેવયા વિપ્ર ઉદિયર્તિ વાચમ્ । યુવા સુવાસાઃ
પરિવીત આગાત્ । સ ઉ શ્રેયાન્ભવતિ જાયમાનઃ । તં ધીરાસઃ કવય
ઉન્નયન્તિ । સ્વાધિયો મનસા દેવયન્તઃ । પૃથુપાજા અમર્ત્યઃ ।
ઘૃતનિર્ણિખ્સ્વાહુતઃ ॥ ૩। ૬। ૧। ૩॥

૪ અગ્નિર્યજ્ઞસ્ય હવ્યવાટ્ । તꣳ સબાધો યતસ્રુચઃ । ઇત્થા ધિયા
યજ્ઞવન્તઃ । આચક્રુરગ્નિમૂતયે । ત્વં વરુણ ઉત મિત્રો અગ્ને । ત્વાં
વર્ધન્તિ મતિભિર્વસિષ્ઠાઃ । ત્વે વસુ સુષણનાનિ સન્તુ । યૂયં પાત
સ્વસ્તિભિઃ સદા નઃ ॥ ૩। ૬। ૧। ૪॥ સુવીરં દુવઃ સ્વાહુતોઽષ્ટૌ ચ ॥ ૧॥

૫ હોતા યક્ષદગ્નિꣳ સમિધા સુષમિધા સમિદ્ધં નાભા પૃથિવ્યાઃ
સંગથે વામસ્ય । વર્ષ્મન્દિવ ઇડસ્પદે વેત્વાજ્યસ્ય હોતર્યજ ।
હોતા યક્ષત્તનૂનપાતમદિતેર્ગર્ભં ભુવનસ્ય ગોપામ્ । મધ્વાઽદ્ય
દેવો દેવેભ્યો દેવયાનાન્પથો અનક્તુ વેત્વાજ્યસ્ય હોતર્યજ । હોતા
યક્ષન્નરાશꣳસં નૃશસ્ત્રં નૃગ્ઃ પ્રણેત્રમ્ । ગોભિર્વપાવાન્થ્સ્યાદ્વીરૈઃ
શક્તીવાન્રથૈઃ પ્રથમયાવા હિરણ્યૈશ્ચન્દ્રી વેત્વાજ્યસ્ય હોતર્યજ ।
હોતા યક્ષદગ્નિમિડ ઈડિતો દેવો દેવાꣳ આવક્ષદ્દૂતો હવ્યવાડમૂરઃ
। ઉપેમં યજ્ઞમુપેમાં દેવો દેવહૂતિમવતુ વેત્વાજ્યસ્ય હોતર્યજ ।
હોતા યક્ષદ્બર્હિઃ સુષ્ટરીમોર્ણ મ્રદા અસ્મિન્, યજ્ઞે વિ ચ પ્ર ચ
પ્રથતાગ્ સ્વાસસ્થં દેવેભ્યઃ । એમેનદદ્ય વસવો રુદ્રા આદિત્યાઃ સદન્તુ
પ્રિયમિન્દ્રસ્યાસ્તુ વેત્વાજ્યસ્ય હોતર્યજ ॥ ૩। ૬। ૨। ૧॥

૬ હોતા યક્ષદ્દુર ઋષ્વાઃ કવષ્યોઽકોષ ધાવનીરુદાતાભિર્જિહતાં
વિ પક્ષોભિઃ શ્રયન્તામ્ । સુપ્રાયણા અસ્મિન્, યજ્ઞે વિશ્રયન્તામૃતાવૃધો
વિયન્ત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષદુષાસાનક્તા બૃહતી
સુપેશસા નૃગ્ઃ પતિભ્યો યોનિં કૃણ્વાને । સગ્ગ્સ્મયમાને

ઇન્દ્રેણ દેવૈરેદં બર્હિઃ સીદતાં વીતામાજ્યસ્ય હોતર્યજ । હોતા
યક્ષદ્દૈવ્યા હોતારા મન્દ્રા પોતારા કવી પ્રચેતસા । સ્વિષ્ટમદ્યાન્યઃ
કરદિષા સ્વભિગૂર્તમન્ય ઊર્જા સતવસેમં યજ્ઞં દિવિ દેવેષુ ધત્તાં
વીતામાજ્યસ્ય હોતર્યજ । હોતા યક્ષત્તિસ્રો દેવીરપસામપસ્તમા
અચ્છિદ્રમદ્યેદમપસ્તન્વતામ્ । દેવેભ્યો દેવીર્દેવમપો વિયન્ત્વાજ્યસ્ય
હોતર્યજ । હોતા યક્ષત્ત્વષ્ટારમચિષ્ટુમપાકઁ રેતોધાં વિશ્રવસં
યશોધામ્ । પુરુરૂપમકામકર્શનઁ સુપોષઃ પોષૈઃ સ્યાથ્સુવીરો
વીરૈર્વેત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષદ્વનસ્પતિમુપાવસ્રક્ષદ્ધિયો
જોષ્ટારઁ શશમન્નરઃ । સ્વદાથ્સ્વધિતિરૃતુથાઽદ્ય દેવો
દેવેભ્યો હવ્યાઽવાડ્વેત્વાજ્યસ્ય હોતર્યજ । હોતા યક્ષદગ્નિરઁ
સ્વાહાઽઽજ્યસ્ય સ્વાહા મેદસઃ સ્વાહા સ્તોકાનાગ્ં સ્વાહા સ્વાહાકૃતીનાગ્ં
સ્વાહા હવ્યસૂક્તીનામ્ । સ્વાહા દેવાઁ આજ્યપાન્થ્સ્વાહાઽગ્નિઁ હોત્રાજ્જુષાણા
અગ્ન આજ્યસ્ય વિયન્તુ હોતર્યજ ॥ ૩। ૬। ૨। ૨॥ પ્રિયમિન્દ્રસ્યાસ્તુ વેત્વાજ્યસ્ય
હોતર્યજ સુવીરો વીરૈર્વેત્વાજ્યસ્ય હોતર્યજ ચત્વારિ ચ ॥ ૨॥ અગ્નિં
તનૂનપાતં નરાશઁ સમગ્નિમિડ ઈડિતો બર્હિર્દુર ઉષાસાનક્તા
દૈવ્યા તિસ્રસ્ત્વષ્ટારં વનસ્પતિમગ્નિમ્ । પઞ્ચ વેત્વેકો વિયન્તુ
દ્વિર્વીતામેકો વિયન્તુ દ્વિર્વેત્વેકો વિયન્તુ હોતર્યજ ॥

૭ સમિદ્ધો અદ્ય મનુષો દુરોણે । દેવો દેવાન્, યજસિ જાતવેદઃ । આ ચ વહ
મિત્રમહશ્ચિકિત્વાન્ । ત્વં દૂતઃ કવિરસિ પ્રચેતાઃ । તનૂનપાત્પથ ઋતસ્ય
યાનાન્ । મધ્વા સમઞ્જન્થ્સ્વદયા સુજિહ્વ । મન્માનિ ધીભિરુત યજ્ઞમૃન્ધન્
। દેવત્રા ચ કૃણુહ્યધ્વરં નઃ । નરાશઁ સસ્ય મહિમાનમેષામ્ ।
ઉપસ્તોષામ યજતસ્ય યજ્ઞૈઃ ॥ ૩। ૬। ૩। ૧॥

૮ તે સુક્રતવઃ શુચયો ધિયંધાઃ । સ્વદન્તુ દેવા ઉભયાનિ હવ્યા ।
આજુહ્વાન ઈડ્યો વન્દ્યશ્ચ । આયાહ્યગ્ને વસુભિઃ સજોષાઃ । ત્વં દેવાનામસિ
યહ્વ હોતા । સ એનાન્, યક્ષીષિતો યજીયાન્ । પ્રાચીનં બર્હિઃ પ્રદિશા
પૃથિવ્યાઃ । વસ્તોરસ્યા વૃજ્યતે અગ્રે અહ્નામ્ । વ્યુપ્રથતે વિતરં વરીયઃ
। દેવેભ્યો અદિતયે સ્યોનમ્ ॥ ૩। ૬। ૩। ૨॥

૯ વ્યચસ્વતીરુર્વિયા વિશ્રયન્તામ્ । પતિભ્યો ન જનયઃ શુમ્ભમાનાઃ ।
દેવીર્દ્વારો બૃહતીર્વિશ્વમિન્વાઃ । દેવેભ્યો ભવથ સુપ્રાયણાઃ । આ સુષ્વયન્તી
યજતે ઉપાકે । ઉષાસા નક્તા સદતાં નિ યોનૌ । દિવ્યે યોષણે બૃહતી
સુરુક્મે । અધિ શ્રિયઁ શુક્રપિશં દધાને । દૈવ્યા હોતારા પ્રથમા
સુવાચા । મિમાના યજ્ઞં મનુષો યજધ્યૈ ॥ ૩। ૬। ૩। ૩॥
૧૦ પ્રચોદયન્તા વિદથેષુ કારૂ । પ્રાચીનં જ્યોતિઃ પ્રદિશા દિશન્તા
। આ નો યજ્ઞં ભારતી તૂયમેતુ । ઇડા મનુષ્વદિહ ચેતયન્તી ।
તિસ્રો દેવીર્બર્હિરેદઁ સ્યોનમ્ । સરસ્વતીઃ સ્વપસઃ સદન્તુ । ય ઇમે
દ્યાવાપૃથિવી જનિત્રી । રૂપૈરપિઁશદ્ભુવનાનિ વિશ્વા । તમદ્ય
હોતરિષિતો યજીયાન્ । દેવં ત્વષ્ટારમિહ યક્ષિ વિદ્વાન્ ॥ ૩। ૬। ૩। ૪॥
૧૧ ઉપાવસૃજત્ત્મન્યા સમઞ્જન્ । દેવાનાં પાથ ઋતુથા હવીઁષિ
। વનસ્પતિઃ શમિતા દેવો અગ્નિઃ । સ્વદન્તુ હવ્યં મધુના ઘૃતેન ।
સદ્યોજાતો વ્યમિમીત યજ્ઞમ્ । અગ્નિર્દેવાનામભવત્પુરોગાઃ । અસ્ય હોતુઃ
પ્રદિશ્યૃતસ્ય વાચિ । સ્વાહાકૃતઁ હવિરદન્તુ દેવાઃ ॥ ૩। ૬। ૩। ૫॥
યજ્ઞૈઃ સ્યોનં યજધ્યૈ વિદ્વાનષ્ટૌ ચ ॥ ૩॥
૧૨ અગ્નિર્હોતા નો અધ્વરે । વાજી સન્પરિણીયતે । દેવો દેવેષુ યજ્ઞિયઃ ।
પરિ ત્રિવિષ્ટ્યધ્વરમ્ । યાત્યગ્ની રથીરિવ । આ દેવેષુ પ્રયો દધત્ ।
પરિ વાજપતિઃ કવિઃ । અગ્નિર્હવ્યાન્યક્રમીત્ । દધદ્રત્નાનિ દાશુષે ॥ ૩। ૬। ૪। ૧॥ અગ્નિર્હોતા નો નવ ॥ ૪॥
૧૩ અજૈદગ્નિઃ । અસનદ્વાજં નિ । દેવો દેવેભ્યો હવ્યાઽવાટ્ । પ્રાઞ્જોભિર્
હિન્વાનઃ । ધેનાભિઃ કલ્પમાનઃ । યજ્ઞસ્યાયુઃ પ્રતિરન્ । ઉપપ્રેષ્ય હોતઃ ।
હવ્યા દેવેભ્યઃ ॥ ૩। ૬। ૫। ૧॥ અજૈદષ્ટૌ ॥ ૫॥
૧૪ દૈવ્યાઃ શમિતાર ઉત મનુષ્યા આરભધ્વમ્ । ઉપનયત મેધ્યા દુરઃ
। આશાસાના મેધપતિભ્યાં મેધમ્ । પ્રાસ્મા અગ્નિં ભરત । સ્તૃણીત
બર્હિઃ । અન્વેનં માતા મન્યતામ્ । અનુ પિતા । અનુ ભ્રાતા સગર્ભ્યઃ । અનુ
સખા સયૂથ્યઃ । ઉદીચીનાઁ અસ્ય પદો નિધત્તાત્ ॥ ૩। ૬। ૬। ૧॥
૧૫ સૂર્યં ચક્ષુર્ગમયતાત્ । વાતં પ્રાણમન્વવસૃજતાત્ । દિશઃ શ્રોત્રમ્ ।

અન્તરિક્ષમસુમ્ । પૃથિવીꣳ શરીરમ્ । એકધાઽસ્ય ત્વચમાચ્છ્યતાત્
। પુરા નાભ્યા અપિશસો વપામુત્ખિદતાત્ । અન્તરેવોષ્માણં વારયતાત્ ।
શ્યેનમસ્ય વક્ષઃ કૃણુતાત્ । પ્રશસા બાહૂ ॥ ૩। ૬। ૬। ૨॥

૧૬ શલા દોષણી । કશ્યપેવાꣳસા । અચ્છિદ્રે શ્રોણી ।
કવષોરૂ સ્રેકપર્ણાઽષ્ઠીવન્તા । ષડ્વિꣳશતિરસ્ય વઙ્ક્રયઃ । તા
અનુષ્ઠ્યોચ્ચ્યાવયતાત્ । ગાત્રં ગાત્રમસ્યાનૂનં કૃણુતાત્ । ઊવધ્યગૂહં
પાર્થિવં ખનતાત્ । અસ્ના રક્ષઃ સꣳસૃજતાત્ । વનિષ્ઠુમસ્ય મા રાવિષ્ટ
॥ ૩। ૬। ૬। ૩॥

૧૭ ઉરૂકં મન્યમાનાઃ । નેદ્વસ્તોકે તનયે । રવિતા રવચ્છમિતારઃ । અધ્રિગો
શમીધ્વમ્ । સુશમિ શમીધ્વમ્ । શમીધ્વમધ્રિગો । અધ્રિગુશ્ચાપાપશ્ચ
। ઉભૌ દેવાનાꣳશમિતારૌ । તાવિમં પશુꣳ શ્રપયતાં
પ્રવિદ્વાꣳસૌ । યથા યથાઽસ્ય શ્રપણં તથા તથા ॥ ૩। ૬। ૬। ૪॥

ધત્તાદ્બાહૂ મા રાવિષ્ટ તથાતથા ॥ ૬॥

૧૮ જુષસ્વ સપ્રથસ્તમમ્ । વચો દેવપ્સરસ્તમમ્ । હવ્યા જુહ્વાન આસનિ ।
ઇમં નો યજ્ઞમમૃતેષુ ધેહિ । ઇમા હવ્યા જાતવેદો જુષસ્વ । સ્તોકાનામગ્ને
મેદસો ઘૃતસ્ય । હોતઃ પ્રાશાન પ્રથમો નિષદ્ય । ઘૃતવન્તઃ પાવક
તે । સ્તોકાઃ શ્ચોતન્તિ મેદસઃ । સ્વધર્મં દેવવીતયે ॥ ૩। ૬। ૭। ૧॥

૧૯ શ્રેષ્ઠં નો ધેહિ વાર્યમ્ । તુભ્યગ્ગ્ સ્તોકા ઘૃતશ્ચુતઃ । અગ્ને વિપ્રાય
સન્ત્ય । ઋષિઃ શ્રેષ્ઠઃ સમિધ્યસે । યજ્ઞસ્ય પ્રાવિતા ભવ । તુભ્યગ્ગ્
શ્ચોતન્ત્યધ્રિગો શચીવઃ । સ્તોકાસો અગ્ને મેદસો ઘૃતસ્ય । કવિશસ્તો
બૃહતા ભાનુનાઽઽગાઃ । હવ્યા જુષસ્વ મેધિર । ઓજિષ્ઠં તે મધ્યતો મેદ
ઉદ્ભૃતમ્ । પ્ર તે વયં દદામહે । શ્ચોતન્તિ તે વસો સ્તોકા અધિત્વચિ ।
પ્રતિ તાન્દેવશો વિહિ ॥ ૩। ૬। ૭। ૨॥ દેવવીતય ઉદ્ભૃતં ત્રીણિ ચ ॥ ૭॥

૨૦ આ વૃત્રહણા વૃત્રહભિઃ શુષ્મૈઃ । ઇન્દ્ર યાતં નમોભિરગ્ને અર્વાક્ ।
યુવꣳ રાધોભિરકવેભિરિન્દ્ર । અગ્ને અસ્મે ભવતમુત્તમેભિઃ । હોતા
યક્ષદિન્દ્રાગ્ની । છાગસ્ય વપાયા મેદસઃ । જુષેતાꣳહવિઃ । હોતર્યજ
। વિ હ્યખ્યન્મનસા વસ્ય ઇચ્છન્ । ઇન્દ્રાગ્ની જ્ઞાસ ઉત વા સજાતાન્ ॥ ૩। ૬। ૮। ૧॥

૨૧ નાન્યા યુવત્પ્રમતિરસ્તિ મહ્યમ્ । સ વાં ધિયં વાજયન્તીમતક્ષમ્ । હોતા
યક્ષદિન્દ્રાગ્ની । પુરોડાશસ્ય જુષેતાꣳહવિઃ । હોતર્યજ । ત્વામીડતે
અજિરં દૂત્યાય । હવિષ્મન્તઃ સદમિન્માનુષાસઃ । યસ્ય દેવૈરાસદો
બર્હિરગ્ને । અહાન્યસ્મૈ સુદિના ભવન્તુ । હોતા યક્ષદગ્નિમ્ । પુરોડાશસ્ય
જુષતાꣳહવિઃ । હોતર્યજ ॥ ૩। ૬। ૮। ૨॥ સજાતાનગ્નિં દ્વે ચ ॥ ૮॥
૨૨ ગીર્ભિર્વિપ્રઃ પ્રમતિમિચ્છમાનઃ । ઈટ્ટે રયિં યશસં પૂર્વભાજમ્
। ઇન્દ્રાગ્ની વૃત્રહણા સુવજ્રા । પ્ર ણો નવ્યેભિસ્તિરતં દેષ્ણૈઃ । મા ચ્છેદ્મ
રશ્મીꣳરિતિ નાધમાનાઃ । પિતૃણાꣳ શક્તીરનુ યચ્છમાનાઃ
। ઇન્દ્રાગ્નિભ્યાં કં વૃષણો મદન્તિ । તા હ્યદ્રી ધિષણાયા ઉપસ્થે ।
અગ્નિꣳ સુદીતિꣳ સુદૃશં ગૃણન્તઃ । નમસ્યામસ્ત્વેડ્યં જાતવેદઃ
। ત્વાં દૂતમરતિꣳ હવ્યવાહમ્ । દેવા અકૃણ્વન્નમૃતસ્ય નાભિમ્ ॥
૩। ૬। ૯। ૧॥ જાતવેદો દ્વે ચ ॥ ૯॥
૨૩ ત્વરꣳ હ્યગ્ને પ્રથમો મનોતા । અસ્યા ધિયો અભવો દસ્મ હોતા ।
ત્વꣳ સીં વૃષન્નકૃણોર્દુષ્ટરીતુ । સહો વિશ્વસ્મૈ સહસે સહધ્યૈ ।
અધા હોતા ન્યસીદો યજીયાન્ । ઇડસ્પદ ઇષયન્નીડ્યઃ સન્ । તં ત્વા નરઃ
પ્રથમં દેવયન્તઃ । મહો રાયે ચિતયન્તો અનુગ્મન્ । વૃતેવ યન્તં
બહુભિર્વસવ્યૈઃ । ત્વે રયિં જાગૃવાꣳસો અનુગ્મન્ ॥ ૩। ૬। ૧૦। ૧॥
૨૪ રુશન્તમગ્નિં દર્શતં બૃહન્તમ્ । વપાવન્તં વિશ્વહા
દીદિવાꣳસમ્ । પદં દેવસ્ય નમસા વિયન્તઃ । શ્રવસ્યવઃ શ્રવ
આપન્નમૃક્તમ્ । નામાનિ ચિદ્દધિરે યજ્ઞિયાનિ । ભદ્રાયાં તે રણયન્ત
સંદૃષ્ટૌ । ત્વાં વર્ધન્તિ ક્ષિતયઃ પૃથિવ્યામ્ । ત્વꣳ રાય ઉભયાસો
જનાનામ્ । ત્વં ત્રાતા તરણે ચેત્યો ભૂઃ । પિતા માતા સદમિન્માનુષાણામ્ ॥ ૩। ૬। ૧૦। ૨॥
૨૫ સ પર્યેણ્યઃ સ પ્રિયો વિક્ષ્વગ્નિઃ । હોતા મન્દ્રો નિષસાદા યજીયાન્ । તં
ત્વા વયં દમ આ દીદિવાꣳસમ્ । ઉપજ્ઞુ બાધો નમસા સદેમ । તં ત્વા
વયꣳ સુધિયો નવ્યમગ્ને । સુમ્નાયવ ઈમહે દેવયન્તઃ । ત્વં વિશો અનયો
દીદ્યાનઃ । દિવો અગ્ને બૃહતા રોચનેન । વિશાં કવિં વિશ્પતિꣳ

શશ્વતીનામ્ । નિતોશનં વૃષભં ચર્ષણીનામ્ ॥ ૩। ૬। ૧૦। ૩॥

૨૬ પ્રેતીષણિમિષયન્તં પાવકમ્ । રાજન્તમગ્નિં યજતꣳ રયીણામ્ । સો
અગ્ન ઈજે શશમે ચ મર્તઃ । યસ્ત આનટ્ સમિધા હવ્યદાતિમ્ । ય આહુતિં
પરિવેદા નમોભિઃ । વિશ્વેત્સ વામા દધતે ત્વોતઃ । અસ્મા ઉ તે મહિ મહે
વિધેમ । નમોભિરગ્ને સમિધોત હવ્યૈઃ । વેદી સૂનો સહસો ગીર્ભિરુક્થૈઃ ।
આ તે ભદ્રાયાꣳ સુમતૌ યતેમ ॥ ૩। ૬। ૧૦। ૪॥

૨૭ આ યસ્તતન્થ રોદસી વિ ભાસા । શ્રવોભિશ્ચ શ્રવસ્યસ્તરુત્રઃ ।
બૃહદ્ભિર્વાજૈઃ સ્થવિરેભિરસ્મે । રેવદ્ભિરગ્ને વિતરં વિભાહિ ।
નૃવદ્વસો સદમિદ્ધે હ્યસ્મે । ભૂરિ તોકાય તનયાય પશ્વઃ ।
પૂર્વીરિષો બૃહતીરારે અઘાઃ । અસ્મે ભદ્રા સૌશ્રવસાનિ સન્તુ
। પુરૂણ્યગ્ને પુરુધા ત્વાયા । વસૂનિ રાજન્વસુતાતે અશ્યામ્ । પુરૂણિ
હિ ત્વે પુરુવાર સન્તિ । અગ્ને વસુ વિધતે રાજનિ ત્વે ॥ ૩। ૬। ૧૦। ૫॥

જાગૃવાꣳ સો અનુગ્મન્માનુષાણાં ચર્ષણીનાં યતેમાશ્યાં દ્વે ચ ॥ ૧૦॥

૨૮ આભરતꣳ શિક્ષતં વજબાહૂ । અસ્માꣳ ઇન્દ્રાગ્ની અવતꣳ શચીભિઃ
। ઇમે નુ તે રશ્મયઃ સૂર્યસ્ય । યેભિઃ સપિત્વં પિતરો ન આયન્ । હોતા
યક્ષદિન્દ્રાગ્ની । છાગસ્ય હવિષ આત્તામદ્ય । મધ્યતો મેદ ઉદ્ભૃતમ્ ।
પુરા દ્વેષોભ્યઃ । પુરા પૌરુષેય્યા ગૃભઃ । ઘસ્તાન્નૂનમ્ ॥ ૩। ૬। ૧૧। ૧॥

૨૯ ઘાસે અજાણાં યવસપ્રથમાનામ્ । સુમત્ક્ષરાણાꣳ શતરુદ્રિયાણામ્
। અગ્નિષ્વાત્તાનાં પીવોપવસનાનામ્ । પાર્શ્વતઃ શ્રોણિતઃ શિતામત
ઉત્સાદતઃ । અઙ્ગાદઙ્ગાદવત્તાનામ્ । કરત એવેન્દ્રાગ્ની । જુષેતાꣳ હવિઃ
। હોતર્યજ । દેવેભ્યો વનસ્પતે હવીꣳષિ । હિરણ્યપર્ણ પ્રદિવસ્તે
અર્થમ્ ॥ ૩। ૬। ૧૧। ૨॥

૩૦ પ્રદક્ષિણિદ્રશનયા નિયૂય । ઋતસ્ય વક્ષિ પથિભી રજિષ્ઠૈઃ ।
હોતા યક્ષદ્વનસ્પતિમભિ હિ । પિષ્ટતમયા રભિષ્ઠયા રશનયાઽઽધિત
। યત્રેન્દ્રાગ્નિયોશ્છાગસ્ય હવિષઃ પ્રિયા ધામાનિ । યત્ર વનસ્પતેઃ પ્રિયા
પાથાꣳસિ । યત્ર દેવાનામાજ્યપાનાં પ્રિયા ધામાનિ । યત્રાગ્નેર્હોતુઃ પ્રિયા
ધામાનિ । તત્રૈતં પ્રસ્તુત્યેવોપસ્તુત્યેવોપાવસ્રક્ષત્ । રભીયાꣳ સમિવ

કૃત્વી ॥ ૩। ૬। ૧૧। ૩॥

૩૧ કરદેવં દેવો વનસ્પતિઃ । જુષતાઁહવિઃ । હોતર્યજ । પિપ્રીહિ
દેવાઁ ઉશતો યવિષ્ઠ । વિદ્વાઁ ઋતૂઁર્ ઋતુપતે યજેહ । યે દૈવ્યા
ઋત્વિજસ્તેભિરગ્ને । ત્વઁ હોતૃણામસ્યાયજિષ્ઠઃ । હોતા યક્ષદગ્નિરઁ
સ્વિષ્ટકૃતમ્ । અયાડગ્નિરિન્દ્રાગ્નિયોશ્છાગસ્ય હવિષઃ પ્રિયા ધામાનિ ।
અયાડ્વનસ્પતેઃ પ્રિયા પાથાઁસિ । અયાડ્દેવાનામાજ્યપાનાં પ્રિયા ધામાનિ ।
યક્ષદગ્નેર્ હોતુઃ પ્રિયા ધામાનિ । યક્ષથ્સ્વં મહિમાનમ્ । આયજતામેજ્યા
ઇષઃ । કૃણોતુ સો અધ્વરા જાતવેદાઃ । જુષતાઁહવિઃ । હોતર્યજ
॥ ૩। ૬। ૧૧। ૪॥ નૂનમર્થં કૃત્વી પાથાઁસિ સપ્ત ચ ॥ ૧૧॥

૩૨ ઉપોહ યદ્વિદથં વાજિનો ગૂઃ । ગીર્ભિર્વિપ્રાઃ પ્રમતિમિચ્છમાનાઃ ।
અર્વન્તો ન કાષ્ઠાં નક્ષમાણાઃ । ઇન્દ્રાગ્ની જોહુવતો નરસ્તે । વનસ્પતે
રશનયાડભિધાય । પિષ્ટતમયા વયુનાનિ વિદ્વાન્ । વહ દેવત્રા દિધિષો
હવીઁષિ । પ્ર ચ દાતારમમૃતેષુ વોચઃ । અગ્નિરઁ સ્વિષ્ટકૃતમ્
। અયાડગ્નિરિન્દ્રાગ્નિયોશ્છાગસ્ય હવિષઃ પ્રિયા ધામાનિ ॥ ૩। ૬। ૧૨। ૧॥

૩૩ અયાડ્વનસ્પતેઃ પ્રિયા પાથાઁસિ । અયાડ્દેવાનામાજ્યપાનાં પ્રિયા
ધામાનિ । યક્ષદગ્નેર્ હોતુઃ પ્રિયા ધામાનિ । યક્ષથ્સ્વં મહિમાનમ્ ।
આયજતામેજ્યા ઇષઃ । કૃણોતુ સો અધ્વરા જાતવેદાઃ । જુષતાઁ
હવિઃ । અગ્ને યદદ્ય વિશો અધ્વરસ્ય હોતઃ । પાવક શોચે વેષ્ટ્વઁ હિ
યજ્વા । ઋતા યજાસિ મહિના વિ યદ્ભૂઃ । હવ્યા વહ યવિષ્ઠ યા તે અદ્ય ॥
૩। ૬। ૧૨। ૨॥ ધામાનિ ભૂરેકં ચ ॥ ૧૨॥

૩૪ દેવં બર્હિઃ સુદેવં દેવૈઃ સ્યાથ્સુવીરં વીરૈર્વસ્તોર્વૃજ્યેતાક્તોઃ
પ્રભ્રિયેતાત્યન્યાન્રાયા બર્હિષ્મતો મદેમ વસુવને વસુધેયસ્ય વેતુ
યજ । દેવીર્દ્વારઃ સંઘાતે વિડ્વીર્યામઞ્છિથિરા ધ્રુવા દેવહૂતૌ
વથ્સ ઈમેનાસ્તરુણ આમિમીયાત્કુમારો વા નવજાતો મૈના અર્વા
રેણુકકાટઃ પૃણગ્વસુવને વસુધેયસ્ય વિયન્તુ યજ । દેવી
ઉષાસા નક્તાડદ્યાસ્મિન્, યજ્ઞે પ્રયત્યહ્વેતામપિ નૂનં દૈવીર્વિશઃ
પ્રાયાસિષ્ટાઁ સુપ્રીતે સુધિતે વસુવને વસુધેયસ્ય વીતાં યજ

। દેવી જોષ્ટ્રી વસુધિતી યયોરન્યાઽઘા દ્વેષાꣳસિ યૂયવદાઽન્યા
વક્ષદ્વસુ વાર્યાણિ યજમાનાય વસુવને વસુધેયસ્ય વીતાં યજ
। દેવી ઊર્જાહુતી ઇષમૂર્જમન્યા વક્ષત્સગ્ધિꣳ સપીતિમન્યા
નવેન પૂર્વં દયમાનાઃ સ્યામ પુરાણેન નવં તામૂર્જમૂર્જાહુતી
ઊર્જયમાને અધાતાં વસુવને વસુધેયસ્ય વીતાં યજ । દેવા દૈવ્યાહોતારા
નેષ્ટારા પોતારા હતાઘશꣳસાવાભરદ્વસૂ વસુવને વસુધેયસ્ય
વીતાં યજ । દેવીસ્તિસ્રસ્તિસ્રો દેવીરિડા સરસ્વતી ભારતી દ્યાં
ભારત્યાદિત્યૈરસ્પૃક્ષથ્ સરસ્વતીમꣳ રુદ્રૈર્યજ્ઞમાવીદિહૈવેડયા
વસુમત્યા સધમાદં મદેમ વસુવને વસુધેયસ્ય વિયન્તુ યજ । દેવો
નરાશꣳસસ્ત્રિ શીર્ષા ષડક્ષઃ શતમિદેનꣳ શિતિપૃષ્ઠા આદધતિ
સહસ્રમીં પ્રવહન્તિ મિત્રાવરુણેદસ્ય હોત્રમર્હતો બૃહસ્પતિઃ
સ્તોત્રમશ્વિનાઽઽધ્વર્યવં વસુવને વસુધેયસ્ય વેતુ યજ । દેવો
વનસ્પતિર્વર્ષપ્રાવા ઘૃતનિર્ણિગ્દ્યામગ્રેણાસ્પૃક્ષદાઽન્તરિક્ષં
મધ્યેનાપ્રાઃ પૃથિવીમુપરેણાદૃꣳહીદ્વસુવને વસુધેયસ્ય વેતુ યજ ।
દેવં બર્હિર્વારિતીનાં નિધે ધાસિ પ્રચ્યુતીનામપ્રચ્યુતં નિકામધરણં
પુરુસ્પાર્હં યશસ્વદેના બર્હિષાઽન્યા બર્હીગ્ષ્યભિષ્યામ વસુવને
વસુધેયસ્ય વેતુ યજ । દેવો અગ્નિઃ સ્વિષ્ટકૃથ્સુદ્રવિણા મન્દ્રઃ કવિઃ
સત્યમન્માઽઽયજી હોતા હોતુર્ હોતુરાયજીયાનગ્ને યાન્દેવાનયાડ્યાꣳ
અપિપ્રેર્યે તે હોત્રે અમથ્સત તાꣳ સસનુષીꣳ હોત્રાં દેવંગમાં
દિવિ દેવેષુ યજ્ઞમેરયેમરꣳ સ્વિષ્ટકૃચ્ચાગ્ને હોતાઽભૂર્વસુવને
વસુધેયસ્ય નમોવાકે વીહિ યજ ॥ ૩। ૬। ૧૩। ૧॥ યજૈકં ચ ॥ ૧૩॥

૩૫ દેવં બર્હિઃ । વસુવને વસુધેયસ્ય વેતુ । દેવીર્દ્વારઃ । વસુવને
વસુધેયસ્ય વિયન્તુ । દેવી ઉષાસાનક્તા । વસુવને વસુધેયસ્ય વીતામ્ ।
દેવી જોષ્ટ્રી । વસુવને વસુધેયસ્ય વીતામ્ । દેવી ઊર્જાહુતી । વસુવને
વસુધેયસ્ય વીતામ્ ॥ ૩। ૬। ૧૪। ૧॥

૩૬ દેવા દૈવ્યા હોતારા । વસુવને વસુધેયસ્ય વીતામ્ । દેવીસ્તિસ્રસ્તિસ્રો
દેવીઃ । વસુવને વસુધેયસ્ય વિયન્તુ । દેવો નરાશꣳસઃ । વસુવને

વસુધેયસ્ય વેતુ । દેવો વનસ્પતિઃ । વસુવને વસુધેયસ્ય વેતુ । દેવં બર્હિર્વારિતીનામ્ । વસુવને વસુધેયસ્ય વેતુ ॥ ૩। ૬। ૧૪। ૨॥

૩૭ દેવો અગ્નિઃ સ્વિષ્ટકૃત્ । સુદ્રવિણા મન્દ્રઃ કવિઃ । સત્યમન્માઽઽયજી હોતા । હોતુર્ હોતુરાયજીયાન્ । અગ્નેયાન્દેવાનયાટ્ । યા ँ અપિપ્રેઃ । યે તે હોત્રે અમત્સત । તા ँ સસનુષી ँ હોત્રાં દેવંગમામ્ । દિવિ દેવેષુ યજ્ઞમેરયેમમ્ । સ્વિષ્ટકૃચ્ચાગ્ને હોતાઽભૂઃ । વસુવને વસુધેયસ્ય નમોવાકે વીહિ ॥ ૩। ૬। ૧૪। ૩॥ વીતાં વેત્વભૂરેકં ચ ॥ ૧૪॥

૩૮ અગ્નિમદ્ય હોતારમવૃણીતાયં યજમાનઃ પચન્પક્તીઃ પચન્પુરોડાશં બધ્નન્નિન્દ્રાગ્નિભ્યાં છાગ ँસૂપસ્થા અદ્ય દેવો વનસ્પતિરભવદિન્દ્રાગ્નિભ્યાં છાગેનાઘસ્તાં તં મેદસ્તઃ પ્રતિ પચતાઽગ્રભીષ્ટામવીવૃધેતાં પુરોડાશેન ત્વામદ્યર્ષ આર્ષેયર્ષીણાં નપાદવૃણીતાયં યજમાનો બહુભ્ય આ સંગતેભ્ય એષ મે દેવેષુ વસુ વાર્યાયક્ષ્યત ઇતિ તા યા દેવા દેવદાનાન્યદુસ્તાન્યસ્મા આ ચ શાસ્વા ચ ગુરસ્વેષિતશ્ચ હોતરસિ ભદ્રવાચ્યાય પ્રેષિતો માનુષઃ સૂક્તવાકાય સૂક્તા બ્રૂહિ ॥ ૩। ૬। ૧૫। ૧॥ અગ્નિમદ્યૈકમ્ ॥ ૧૫॥

અઞ્જન્તિ હોતા યક્ષથ્સમિદ્ધો અદ્યાગ્નિરજૈર્દૈવ્યા જુષસ્વાવૃત્રહણા ગીર્ભિસ્ત્વર ँ હ્યાભરતમુપોહ યદ્દેવં બર્હિઃ સુદેવં દેવં બર્હિરગ્નિમદ્ય પઞ્ચદશ ॥ ૧૫॥

અઞ્જન્ત્યુપાવસૃજન્નાન્યા યુવત્કર દેવમષ્ટાત્રિ ँશત્ ॥ ૩૮॥

અઞ્જન્તિ સૂક્તાબ્રૂહિ ॥

## તૃતીયાષ્ટકે સપ્તમઃ પ્રપાઠકઃ ૭

### અચ્છિદ્રમ્

૧ સર્વાન્ વા એષોઽગ્નૌ કામાન્પ્રવેશયતિ । યોઽગ્નીનન્વાધાય વ્રતમુપૈતિ । સ યદનિષ્ટ્વા પ્રયાયાત્ । અકામપ્રીતા એનં કામા નાનુપ્રયાયુઃ

। અતેજા અવીર્યઃ સ્યાત્ । સ જુહુયાત્ । તુભ્યં તા અઙ્ગિરસ્તમ । વિશ્વાઃ
સુક્ષિતયઃ પૃથક્ । અગ્ને કામાય યેમિર ઇતિ । કામાનેવાસ્મિન્દધાતિ ॥
૩। ૭। ૧। ૧॥

૨ કામપ્રીતા એનં કામા અનુ પ્રયાન્તિ । તેજસ્વી વીર્યાવાન્ભવતિ । સંતતિર્વા
એષા યજ્ઞસ્ય । યોઽગ્નીનન્વાધાય વ્રતમુપૈતિ । સ યદુદ્વાયતિ ।
વિચ્છિત્તિરેવાસ્ય સા । તં પ્રાઞ્ચમુદ્ધૃત્ય । મનસોપતિષ્ઠેત । મનો
વૈ પ્રજાપતિઃ । પ્રાજાપત્યો યજ્ઞઃ ॥ ૩। ૭। ૧। ૨॥

૩ મનસૈવ યજ્ઞꣳ સંતનોતિ । ભૂરિત્યાહ । ભૂતો વૈ પ્રજાપતિઃ
। ભૂતિમેવોપૈતિ । વિ વા એષ ઇન્દ્રિયેણ વીર્યેણર્દ્ધ્યતે ।
યસ્યાહિતાગ્નેરગ્નિરપક્ષાયતિ । યાવચ્છમ્યયા પ્રવિધ્યેત્ । યદિ
તાવદપક્ષાયેત્ । તꣳ સંભરેત્ । ઇદં ત એકં પર ઉત એકમ્ ॥
૩। ૭। ૧। ૩॥

૪ તૃતીયેન જ્યોતિષા સંવિશસ્વ । સંવેશનસ્તનુવૈ ચારુરેધિ । પ્રિયે
દેવાનાં પરમે જનિત્ર ઇતિ । બ્રહ્મણૈવૈનꣳ સંભરતિ । સૈવ
તતઃ પ્રાયશ્ચિત્તિઃ । યદિ પરસ્તરામપક્ષાયેત્ । અનુ પ્રયાયાવસ્યેત્ ।
સો એવ તતઃ પ્રાયશ્ચિત્તિઃ । ઓષધીર્વા એતસ્ય પશૂન્પયઃ પ્રવિશતિ ।
યસ્ય હવિષે વત્સા અપાકૃતા ધયન્તિ ॥ ૩। ૭। ૧। ૪॥

૫ તાન્, યદ્દુહ્યાત્ । યાતયામ્ના હવિષા યજેત । યન્ન દુહ્યાત્ ।
યજ્ઞપરુરન્તરિયાત્ । વાયવ્યાં યવાગૂં નિર્વપેત્ । વાયુર્વૈ પયસઃ
પ્રદાપયિતા । સ એવાસ્મૈ પયઃ પ્રદાપયતિ । પયો વા ઓષધયઃ । પયઃ
પયઃ । પયસૈવાસ્મૈ પયોઽવરુન્ધે ॥ ૩। ૭। ૧। ૫॥

૬ અથોત્તરસ્મૈ હવિષે વત્સાનપાકુર્યાત્ । સૈવ તતઃ પ્રાયશ્ચિત્તિઃ ।
અન્યતરાન્, વા એષ દેવાન્ભાગધેયેન વ્યર્ધયતિ । યે યજમાનસ્ય
સાયં ગૃહમાગચ્છન્તિ । યસ્ય સાયં દુગ્ધꣳ હવિરાર્તિમાર્છતિ
। ઇન્દ્રાય વ્રીહીન્નિરુપ્યોપવસેત્ । પયો વા ઓષધયઃ । પય એવારભ્ય
ગૃહીત્વોપવસતિ । યત્પ્રાતઃ સ્યાત્ । તચ્છૃતં કુર્યાત્ ॥ ૩। ૭। ૧। ૬॥

૭ અથેતર ઐન્દ્રઃ પુરોડાશઃ સ્યાત્ । ઇન્દ્રિયે એવાસ્મૈ સમીચી દધાતિ
। પયો વા ઓષધયઃ । પયઃ પયઃ । પયસૈવાસ્મૈ પયોઽવરુન્ધે ।
અથોત્તરસ્મૈ હવિષે વથ્સાનપાકુર્યાત્ । સૈવ તતઃ પ્રાયશ્ચિત્તિઃ ।
ઉભયાન્, વા એષ દેવાન્ભાગધેયેન વ્યર્ધયતિ । યે યજમાનસ્ય સાયં
ચ પ્રાતશ્ચ ગૃહમાગચ્છન્તિ । યસ્યોભય ँ હવિરાર્તિમાર્છતિ
॥ ૩। ૭। ૧। ૭॥

૮ ઐન્દ્રં પઞ્ચશરાવમોદનં નિર્વપેત્ । અગ્નિં દેવતાનાં પ્રથમં યજેત્ ।
અગ્નિમુખા એવ દેવતાઃ પ્રીણાતિ । અગ્નિં વા અન્વન્યા દેવતાઃ । ઇન્દ્રમન્વન્યાઃ
। તા એવોભયીઃ પ્રીણાતિ । પયો વા ઓષધયઃ । પયઃ પયઃ । પયસૈવાસ્મૈ
પયોઽવરુન્ધે । અથોત્તરસ્મૈ હવિષે વથ્સાનપાકુર્યાત્ ॥ ૩। ૭। ૧। ૮॥

૯ સૈવ તતઃ પ્રાયશ્ચિત્તિઃ । અર્ધો વા એતસ્ય યજ્ઞસ્ય મીયતે । યસ્ય
વ્રત્યેઽહન્પત્ન્યનાલમ્ભુકા ભવતિ । તામપરુધ્ય યજેત । સર્વેણૈવ
યજ્ઞેન યજતે । તામિષ્ટ્વોપહ્વયેત । અમૂહમસ્મિ । સા ત્વમ્ । દ્યૌરહમ્ ।
પૃથિવી ત્વમ્ । સામાહમ્ । ઋક્ત્વમ્ । તાવેહિ સંભવાવ । સહ રેતો દધાવહૈ ।
પુ ँ સે પુત્રાય વેત્તવૈ । રાયસ્પોષાય સુપ્રજાસ્ત્વાય સુવીર્યાયેતિ ।
અર્ધ એવૈનામુપહ્વયતે । સૈવ તતઃ પ્રાયશ્ચિત્તિઃ ॥ ૩। ૭। ૧। ૯॥ દધાતિ
યજ્ઞ ઉત એકં ધયન્તિ રુન્ધે કુર્યાદાર્છત્યપાકુર્યાત્પૃથિવી ત્વમષ્ટૌ
ચ ॥ ૧॥ સર્વાન્ વિ વૈ યદિ પરસ્તરામોષધીરન્યતરાનુભયાનર્ધો વૈ ॥

૧૦ યદ્વિષ્ણેણેન જુહુયાત્ । અપ્રજા અપશુર્યજમાનઃ સ્યાત્ । યદનાયતને નિનયેત્
। અનાયતનઃ સ્યાત્ । પ્રાજાપત્યયર્ચા વલ્મીકવપાયામવનયેત્ ।
પ્રાજાપત્યો વૈ વલ્મીકઃ । યજ્ઞઃ પ્રજાપતિઃ । પ્રજાપતાવેવ યજ્ઞં
પ્રતિષ્ઠાપયતિ । ભૂરિત્યાહ । ભૂતો વૈ પ્રજાપતિઃ ॥ ૩। ૭। ૨। ૧॥

૧૧ ભૂતિમેવોપૈતિ । તત્કૃત્વા । અન્યાં દુગ્ધ્વા પુનર્હોતવ્યમ્
। સૈવ તતઃ પ્રાયશ્ચિત્તિઃ । યત્કીટાવપન્નેન જુહુયાત્ । અપ્રજા
અપશુર્યજમાનઃ સ્યાત્ । યદનાયતને નિનયેત્ । અનાયતનઃ સ્યાત્ ।
મધ્યમેન પર્ણેન દ્યાવાપૃથિવ્યયર્ચાઽન્તઃપરિધિ નિનયેત્ ।
દ્યાવાપૃથિવ્યોરેવૈનત્પ્રતિષ્ઠાપયતિ ॥ ૩। ૭। ૨। ૨॥

૧૨ તત્કૃત્વા । અન્યાં દુગ્ધ્વા પુનર્હોતવ્યમ્ । સૈવ તતઃ પ્રાયશ્ચિત્તિઃ ।
યદવ વૃષ્ટેન જુહુયાત્ । અપરૂપમસ્યાત્મઞ્જાયેત । કિલાસો વા સ્યાદર્શસો
વા । યત્પ્રત્યેયાત્ । યજ્ઞં વિચ્છિન્દ્યાત્ । સ જુહુયાત્ । મિત્રો જનાન્કલ્પયતિ
પ્રજાનન્ ॥ ૩। ૭। ૨। ૩॥

૧૩ મિત્રો દાધાર પૃથિવીમુત દ્યામ્ । મિત્રઃ કૃષ્ટીરનિમિષાઽભિચષ્ટે
। સત્યાય હવ્યં ઘૃતવજ્જુહોતેતિ । મિત્રેણૈવૈનત્કલ્પયતિ ।
તત્કૃત્વા । અન્યાં દુગ્ધ્વા પુનર્હોતવ્યમ્ । સૈવ તતઃ પ્રાયશ્ચિત્તિઃ ।
યત્પૂર્વસ્યામાહુત્યાઁ હુતાયામુત્તરાઽઽહુતિઃ સ્કન્દેત્ । દ્વિપાદ્ભિઃ
પશુભિર્યજમાનો વ્યૃદ્ધ્યેત । યદુત્તરયાઽભિજુહુયાત્ ॥ ૩। ૭। ૨। ૪॥

૧૪ ચતુષ્પાદ્ભિઃ પશુભિર્યજમાનો વ્યૃદ્ધ્યેત । યત્ર વેત્થ વનસ્પતે
દેવાનાં ગુહ્યા નામાનિ । તત્ર હવ્યાનિ ગામયેતિ વાનસ્પત્યયર્ચા
સમિધમાધાય । તૂષ્ણીમેવ પુનર્જુહુયાત્ । વનસ્પતિનૈવ યજ્ઞસ્યાર્તાં
ચાનાર્તાં ચાહુતી વિદાધાર । તત્કૃત્વા । અન્યાં દુગ્ધ્વા પુનર્હોતવ્યમ્ ।
સૈવ તતઃ પ્રાયશ્ચિત્તિઃ । યત્પુરા પ્રયાજેભ્યઃ પ્રાઽઙ્ગારઃ સ્કન્દેત્ ।
અધ્વર્યવે ચ યજમાનાય ચાકગ્ગ્ સ્યાત્ ॥ ૩। ૭। ૨। ૫॥

૧૫ યદ્દક્ષિણા । બ્રહ્મણે ચ યજમાનાય ચાકગ્ગ્ સ્યાત્ । યત્પ્રત્યક્ ।
હોત્રે ચ પત્નિયૈ ચ યજમાનાય ચાકગ્ગ્ સ્યાત્ । યદુદઙ્ઙ્ । અગ્નીધે
ચ પશુભ્યશ્ચ યજમાનાય ચાકગ્ગ્ સ્યાત્ । યદભિજુહુયાત્ । રુદ્રોઽસ્ય
પશૂન્ ઘાતુકઃ સ્યાત્ । યન્નાભિજુહુયાત્ । અશાન્તઃ પ્રહ્રિયેત ॥ ૩। ૭। ૨। ૬॥

૧૬ સ્રુવસ્ય બુધ્નેનાભિનિદધ્યાત્ । મા તમો મા યજ્ઞસ્તમન્મા યજમાનસ્તમત્
। નમસ્તે અસ્ત્વાયતે । નમો રુદ્ર પરાયતે । નમો યત્ર નિષીદસિ । અમું મા
હિઁસીરમું મા હિઁસીરિતિ યેન સ્કન્દેત્ । તં પ્રહરેત્ । સહસ્રશૃઙ્ગો
વૃષભો જાતવેદાઃ । સ્તોમપૃષ્ઠો ઘૃતવાન્ત્સુપ્રતીકઃ । મા નો
હાસીન્મેત્થિતો નેત્ત્વા જહામ । ગોપોષં નો વીરપોષં ચ યચ્છેતિ
। બ્રહ્મણૈવૈનં પ્રહરતિ । સૈવ તતઃ પ્રાયશ્ચિત્તિઃ ॥ ૩। ૭। ૨। ૭॥

વૈ પ્રજાપતિઃ સ્થાપયતિ પ્રજાનન્નભિ જુહુયાત્થ્સ્યાદ્ધ્રિયેત જહામ
ત્રીણિ ચ ॥ ૨॥ યદ્વિષ્ષણણેન પ્રાજાપત્યયા યત્કીટા મધ્યમેન

યદવવૃષ્ટેન યત્પૂર્વસ્યાં યત્પુરા પ્રયાજેભ્યઃ પ્રાઙ્ઙ્ગારો
યદ્દક્ષિણા યત્પ્રત્યગ્યદુદન્દશ ॥

૧૭ વિ વા એષ ઇન્દ્રિયેણ વીર્યેણર્દ્ધ્યતે । યસ્યાહિતાગ્નેરગ્નિર્મથ્યમાનો
ન જાયતે । યત્રાન્યં પશ્યેત્ । તત આહૃત્ય હોતવ્યમ્ । અગ્નાવેવાસ્યાગ્નિ
હોત્રꣳ હુતં ભવતિ । યદ્યન્યં ન વિન્દેત્ । અજાયાꣳ હોતવ્યમ્ ।
આગ્નેયી વા એષા । યદજા । અગ્નાવેવાસ્યાગ્નિહોત્રꣳ હુતં ભવતિ ॥ ૩। ૭। ૩। ૧॥

૧૮ અજસ્ય તુ નાશ્નીયાત્ । યદજસ્યાશ્નીયાત્ । યામેવાગ્નાવાહુતિં જુહુયાત્ ।
તામદ્યાત્ । તસ્માદજસ્ય નાશ્યમ્ । યદ્યજાં ન વિન્દેત્ । બ્રાહ્મણસ્ય
દક્ષિણે હસ્તે હોતવ્યમ્ । એષ વા અગ્નિર્વૈશ્વાનરઃ । યદ્બ્રાહ્મણઃ ।
અગ્નાવેવાસ્યાગ્નિહોત્રꣳ હુતં ભવતિ ॥ ૩। ૭। ૩। ૨॥

૧૯ બ્રાહ્મણં તુ વસત્યૈ નાપરુન્ધ્યાત્ । યદ્બ્રાહ્મણં વસત્યા અપરુન્ધ્યાત્ ।
યસ્મિન્નેવાગ્નાવાહુતિં જુહુયાત્ । તં ભાગધેયેન વ્યર્ધયેત્ । તસ્માદ્બ્રાહ્મણો
વસત્યૈ નાપરુધ્યઃ । યદિ બ્રાહ્મણં ન વિન્દેત્ । દર્ભસ્તમ્બે
હોતવ્યમ્ । અગ્નિવાન્, વૈ દર્ભસ્તમ્બઃ । અગ્નાવેવાસ્યાગ્નિહોત્રꣳ હુતં
ભવતિ । દર્ભાગ્સ્તુ નાધ્યાસીત ॥

૨૦ યદ્દર્ભાનધ્યાસીત । યામેવાગ્નાવાહુતિં જુહુયાત્ । તામધ્યાસીત । તસ્માદ્દર્ભા
નાધ્યાસિતવ્યાઃ । યદિ દર્ભાન્ન વિન્દેત્ । અપ્સુ હોતવ્યમ્ । આપો વૈ
સર્વા દેવતાઃ । દેવતાસ્વેવાસ્યાગ્નિહોત્રꣳ હુતં ભવતિ । આપસ્તુ ન
પરિચક્ષીત । યદાપઃ પરિચક્ષીત ॥ ૩। ૭। ૩। ૪॥

૨૧ યામેવાપ્સ્વાહુતિં જુહુયાત્ । તાં પરિચક્ષીત । તસ્માદાપો ન પરિચક્ષ્યાઃ
। મેધ્યા ચ વા એતસ્યામેધ્યા ચ તનુવૌ સꣳ સૃજ્યેતે ।
યસ્યાહિતાગ્નેરન્યૈરગ્નિભિરગ્નયઃ સꣳ સૃજ્યન્તે । અગ્નયે વિવિચયે
પુરોડાશમષ્ટાકપાલં નિર્વપેત્ । મેધ્યાં ચૈવાસ્યામેધ્યાં ચ તનુવૌ
વ્યાવર્તયતિ । અગ્નયે વ્રતપતયે પુરોડાશમષ્ટાકપાલં નિર્વપેત્
। અગ્નિમેવ વ્રતપતિગ્ગ્ સ્વેન ભાગધેયેનોપધાવતિ । સ એવૈનં
વ્રતમાલમ્ભયતિ ॥ ૩। ૭। ૩। ૫॥

૨૨ ગર્ભગ્ગ્ સ્રવન્તમગદમકઃ । અગ્નિરિન્દ્રસ્ત્વષ્ટા બૃહસ્પતિઃ ।

પૃથિવ્યામવચુશ્ચોતૈતત્ । નાભિપ્રાપ્નોતિ નિરૃતિં પરાચૈઃ । રેતો વા
એતદ્વાજિનમાહિતાગ્નેઃ । યદગ્નિહોત્રમ્ । તદ્યથ્સ્રવેત્ । રેતોઽસ્ય વાજિનꣳ
સ્રવેત્ । ગર્ભગ્ગ્ સ્રવન્તમગદમકરિત્યાહ । રેત એવાસ્મિન્વાજિનં દધાતિ
॥ ૩। ૭। ૩। ૬॥

૨૩ અગ્નિરિત્યાહ । અગ્નિર્વૈ રેતોધાઃ । રેત એવ તદ્દધાતિ । ઇન્દ્ર
ઇત્યાહ । ઇન્દ્રિયમેવાસ્મિન્દધાતિ । ત્વષ્ટેત્યાહ । ત્વષ્ટા વૈ પશૂનાં
મિથુનાનાꣳરૂપકૃત્ । રૂપમેવ પશુષુ દધાતિ । બૃહસ્પતિરિત્યાહ
। બ્રહ્મ વૈ દેવાનાં બૃહસ્પતિઃ । બ્રહ્મણૈવાસ્મૈ પ્રજાઃ પ્રજનયતિ
। પૃથિવ્યામવચુશ્ચોતૈતદિત્યાહ । અસ્યામેવૈનત્પ્રતિષ્ઠાપયતિ ।
નાભિ પ્રાપ્નોતિ નિરૃતિં પરાચૈરિત્યાહ । રક્ષસામપહત્યૈ ॥ ૩। ૭। ૩। ૭॥ અજાઽગ્નાવેવાસ્યાગ્નિહોત્રꣳ હુતં
ભવતિ ભવત્યાસીત પરિચક્ષીત
લમ્ભયતિ દધાતિ દેવાનાં બૃહસ્પતિઃ પઞ્ચ ચ ॥ ૩॥ વિ વૈ યદ્યન્યમજાયાં
બ્રાહ્મણસ્ય દર્ભસ્તમ્બેઽફ્સુ હોતવ્યમ્ ॥

૨૪ યાઃ પુરસ્તાત્પ્રસ્રવન્તિ । ઉપરિષ્ટાથ્સર્વતશ્ચ યાઃ । તાભી રશ્મિ
પવિત્રાભિઃ । શ્રદ્ધાં યજ્ઞમારભે । દેવા ગાતુવિદઃ । ગાતું યજ્ઞાય વિન્દત
। મનસસ્પતિના દેવેન । વાતાદ્યજ્ઞઃ પ્રયુજ્યતામ્ । તૃતીયસ્યૈ દિવઃ ।
ગાયત્રિયા સોમ આભૃતઃ ॥

૨૫ સોમપીથાય સંનયિતુમ્ । વકલમન્તરમાદદે । આપો દેવીઃ શુદ્ધાઃ
સ્થ । ઇમા પાત્રાણિ શુન્ધત । ઉપાતઙ્ક્યાય દેવાનામ્ । પર્ણવલ્કમુત
શુન્ધત । પયો ગૃહેષુ પયો અઘ્નિયાસુ । પયો વથ્સેષુ પય ઇન્દ્રાય
હવિષે ધ્રિયસ્વ । ગાયત્રી પર્ણવલ્કેન । પયઃ સોમં કરોત્વિમમ્ ॥ ૩। ૭। ૪। ૨॥

૨૬ અગ્નિં ગૃહ્ણામિ સુરથં યો મયોભૂઃ । ય ઉદ્યન્તમારોહતિ
સૂર્યમહ્ને । આદિત્યં જ્યોતિષાં જ્યોતિરુત્તમમ્ । શ્વો યજ્ઞાય રમતાં
દેવતાભ્યઃ । વસૂન્રુદ્રાનાદિત્યાન્ । ઇન્દ્રેણ સહ દેવતાઃ । તાઃ પૂર્વઃ
પરિગૃહ્ણામિ । સ્વ આયતને મનીષયા । ઇમામૂર્જં પઞ્ચદશીં યે પ્રવિષ્ટાઃ
। તાન્દેવાન્પરિગૃહ્ણામિ પૂર્વઃ ॥ ૩। ૭। ૪। ૩॥

૨૭ અગ્નિર્હવ્યવાડિહ તાનાવહતુ । પૌર્ણમાસꣳ હવિરિદમેષાં

મયિ । આમાવાસ્યꣳહવિરિદમેષાં મયિ । અન્તરાડગ્ની પશવઃ ।
દેવસꣳસદમાગમન્ । તાન્પૂર્વઃ પરિગૃહ્ણામિ । સ્વ આયતને મનીષયા
। ઇહ પ્રજા વિશ્વરૂપા રમન્તામ્ । અગ્નિં ગૃહપતિમભિસંવસાનાઃ । તાઃ
પૂર્વઃ પરિગૃહ્ણામિ ॥ ૩। ૭। ૪। ૪॥

૨૮ સ્વ આયતને મનીષયા । ઇહ પશવો વિશ્વરૂપા રમન્તામ્ । અગ્નિં
ગૃહપતિમભિ સંવસાનાઃ । તાન્પૂર્વઃ પરિગૃહ્ણામિ । સ્વ આયતને મનીષયા
। અયં પિતૃણામગ્નિઃ । અવાડ્ઢવ્યા પિતૃભ્ય આ । તં પૂર્વઃ પરિગૃહ્ણામિ ।
અવિષં નઃ પિતું કરત્ । અજસ્રં ત્વાꣳ સભાપાલાઃ ॥ ૩। ૭। ૪। ૫॥

૨૯ વિજયભાગꣳ સમિન્ધતામ્ । અગ્ને દીદાય મે સભ્ય । વિજિત્યૈ
શરદઃ શતમ્ । અન્નમાવસથીયમ્ । અભિહરાણિ શરદઃ શતમ્ ।
આવસથે શ્રિયં મન્ત્રમ્ । અહિર્બુધ્નિયો નિયચ્છતુ । ઇદમહમગ્નિ
જ્યેષ્ઠેભ્યઃ । વસુભ્યો યજ્ઞં પ્રબ્રવીમિ । ઇદમહમિન્દ્રજ્યેષ્ઠેભ્યઃ ॥ ૩। ૭। ૪। ૬॥

૩૦ રુદ્રેભ્યો યજ્ઞં પ્રબ્રવીમિ । ઇદમહં વરુણજ્યેષ્ઠેભ્યઃ । આદિત્યેભ્યો
યજ્ઞં પ્રબ્રવીમિ । પયસ્વતીરોષધયઃ । પયસ્વદ્વીરુધાં પયઃ ।
અપાં પયસો યત્પયઃ । તેન મામિન્દ્ર સꣳસૃજ । અગ્ને વ્રતપતે વ્રતં
ચરિષ્યામિ । તચ્છકેયં તન્મે રાધ્યતામ્ । વાયો વ્રતપત આદિત્ય વ્રતપતે ॥
૩। ૭। ૪। ૭॥

૩૧ વ્રતાનાં વ્રતપતે વ્રતં ચરિષ્યામિ । તચ્છકેયં તન્મે રાધ્યતામ્ । ઇમાં
પ્રાચીમુદીચીમ્ । ઇષમૂર્જમભિ સરꣳસ્કૃતામ્ । બહુપર્ણામશુષ્કાગ્રામ્ ।
હરામિ પશુપામહમ્ । યત્કૃષ્ણો રૂપં કૃત્વા । પ્રાવિશસ્ત્વં વનસ્પતીન્
। તતસ્ત્વામેકવિꣳશતિધા । સંભરામિ સુસંભૃતા ॥ ૩। ૭। ૪। ૮॥

૩૨ ત્રીન્પરિધીગ્સ્તિસ્રઃ સમિધઃ । યજ્ઞાયુરનુસંચરાન્ । ઉપવેષં
મેક્ષણં ધૃષ્ટિમ્ । સંભરામિ સુસંભૃતા । યા જાતા ઓષધયઃ ।
દેવેભ્યસ્ત્રિયુગં પુરા । તાસાં પર્વ રાધ્યાસમ્ । પરિસ્તરમાહરન્ ।
અપાં મેધ્યં યજ્ઞિયમ્ । સદેવꣳ શિવમસ્તુ મે ॥ ૩। ૭। ૪। ૯॥

૩૩ આચ્છેત્તા વો મા રિષમ્ । જીવાનિ શરદઃ શતમ્ । અપરિમિતાનાં

પરિમિતાઃ । સંનહ્યે સુકૃતાય કમ્ । એનો મા નિગાં કતમચ્ચનાહમ્ ।
પુનરુત્થાય બહુલા ભવન્તુ । સકૃદાચ્છિન્નં બર્હિરૂર્ણામૃદુ ।
સ્યોનં પિતૃભ્યસ્ત્વા ભરામ્યહમ્ । અસ્મિન્ત્સીદન્તુ મે પિતરઃ સોમ્યાઃ ।
પિતામહાઃ પ્રપિતામહાશ્ચાનુગૈઃ સહ ॥ ૩। ૭। ૪। ૧૦॥

૩૪ ત્રિવૃત્પલાશે દર્ભઃ । ઇયાન્પ્રાદેશસંમિતઃ । યજ્ઞે પવિત્રં
પોતૃતમમ્ । પયો હવ્યં કરોતુ મે । ઇમૌ પ્રાણાપાનૌ । યજ્ઞસ્યાઙ્ગાનિ
સર્વશઃ । આપ્યાયયન્તૌ સંચરતામ્ । પવિત્રે હવ્યશોધને । પવિત્રે
સ્થો વૈષ્ણવી । વાયુર્વાં મનસા પુનાતુ ॥ ૩। ૭। ૪। ૧૧॥

૩૫ અયં પ્રાણશ્ચાપાનશ્ચ । યજમાનમપિગચ્છતામ્ । યજ્ઞે હ્યભૂતાં
પોતારૌ । પવિત્રે હવ્યશોધને । ત્વયા વેદિં વિવિદુઃ પૃથિવીમ્ । ત્વયા
યજ્ઞો જાયતે વિશ્વદાનિઃ । અચ્છિદ્રં યજ્ઞમન્વેષિ વિદ્વાન્ । ત્વયા
હોતા સંતનોત્યર્ધમાસાન્ । ત્રયસ્ત્રિꣳશોઽસિ તન્તૂનામ્ । પવિત્રેણ
સહાગહિ ॥ ૩। ૭। ૪। ૧૨॥

૩૬ શિવેયꣳ રજ્જુરભિધાની । અઘ્નિયામુપસેવતામ્ । અપ્રસ્રꣳસાય
યજ્ઞસ્ય । ઉખે ઉપદધામ્યહમ્ । પશુભિઃ સંનીતં બિભૃતામ્ । ઇન્દ્રાય
શ઼ૃતં દધિ । ઉપવેષોઽસિ યજ્ઞાય । ત્વાં પરિવેષમધારયન્ ।
ઇન્દ્રાય હવિઃ કૃણ્વન્તઃ । શિવઃ શગ્મો ભવાસિ નઃ ॥ ૩। ૭। ૪। ૧૩॥

૩૭ અમૃન્મયં દેવપાત્રમ્ । યજ્ઞસ્યાયુષિ પ્રયુજ્યતામ્ । તિરઃપવિત્રમતિ
નીતાઃ । આપો ધારય માઽતિગુઃ । દેવેન સવિત્રોત્પૂતાઃ । વસોઃ સૂર્યસ્ય
રશ્મિભિઃ । ગાં દોહ પવિત્રે રજ્જુમ્ । સર્વા પાત્રાણિ શુન્ધત । એતા આચરન્તિ
મધુમદ્દુહાનાઃ । પ્રજાવતીર્યશસો વિશ્વરૂપાઃ ॥ ૩। ૭। ૪। ૧૪॥

૩૮ બહ્વીર્ભવન્તીરુપજાયમાનાઃ । ઇહ વ ઇન્દ્રો રમયતુ ગાવઃ । પૂષા સ્થ
। અયક્ષ્મા વઃ પ્રજયા સꣳસૃજામિ । રાયસ્પોષેણ બહુલા ભવન્તીઃ
। ઊર્જં પયઃ પિન્વમાના ઘૃતં ચ । જીવો જીવન્તીરુપ વઃ સદેયમ્ ।
દ્યૌશ્ચેમં યજ્ઞં પૃથિવી ચ સંદુહાતામ્ । ધાતા સોમેન સહ વાતેન
વાયુઃ । યજમાનાય દ્રવિણં દધાતુ ॥ ૩। ૭। ૪। ૧૫॥

૩૯ ઉત્સં દુહન્તિ કલશં ચતુર્બિલમ્ । ઇડાં દેવીં મધુમતીꣳ સુવર્વિદમ્

। તદિન્દ્રાગ્ની જિન્વત ँ સૂનૃતાવત્ । તદ્યજમાનમમૃતત્વે દધાતુ ।
કામધુક્ષઃ પ્ર ણો બ્રૂહિ । ઇન્દ્રાય હવિરિન્દ્રિયમ્ । અમૂં યસ્યાં દેવાનામ્ ।
મનુષ્યાણાં પયો હિતમ્ । બહુ દુગ્ધીન્દ્રાય દેવેભ્યઃ । હવ્યમાપ્યાયતાં
પુનઃ ॥ ૩। ૭। ૪। ૧૬॥

૪૦ વત્સેભ્યો મનુષ્યેભ્યઃ । પુનર્દોહાય કલ્પતામ્ । યજ્ઞસ્ય સંતતિરસિ ।
યજ્ઞસ્ય ત્વા સંતતિમનુ સંતનોમિ । અદસ્તમસિ વિષ્ણવે ત્વા । યજ્ઞાયાપિ
દધામ્યહમ્ । અદ્ભિરરિક્તેન પાત્રેણ । યાઃ પૂતાઃ પરિશેરતે । અયં પયઃ
સોમં કૃત્વા । સ્વાં યોનિમપિગચ્છતુ ॥ ૩। ૭। ૪। ૧૭॥

૪૧ પર્ણવલ્કઃ પવિત્રમ્ । સૌમ્યઃ સોમાદ્ધિ નિર્મિતઃ । ઇમૌ પર્ણં ચ
દર્ભં ચ । દેવાના ँ હવ્યશોધનૌ । પ્રાતર્વેષાય ગોપાય । વિષ્ણો
હવ્ય ँ હિ રક્ષસિ । ઉભાવગ્ની ઉપસ્તૃણતે । દેવતા ઉપવસન્તુ મે
। અહં ગ્રામ્યાનુપવસામિ । મહ્યં ગોપતયે પશૂન્ ॥ ૩। ૭। ૪। ૧૮॥ આભૃત
ઇમં ગૃહ્ણામિ પૂર્વસ્તાઃ પૂર્વઃ પરિગૃહ્ણામિ સભાપાલા ઇન્દ્રજ્યેષ્ઠેભ્ય
આદિત્ય વ્રતપતે સુસંભૃતા મે સહ પુનાતુ ગહિ નો વિશ્વરૂપા દધાતુ
પુનર્ગચ્છતુ પશૂન્ ॥ ૪॥ યાઃ પુરસ્તાદિમામૂર્જમિહ પ્રજા ઇહ પશવોઽયં
પિતૃણામગ્નિઃ ॥

૪૨ દેવા દેવેષુ પરાક્રમધ્વમ્ । પ્રથમા દ્વિતીયેષુ । દ્વિતીયાસ્તૃતીયેષુ
। ત્રિરેકાદશા ઇહ માઽવત । ઇદ ँ શકેયં યદિદં કરોમિ । આત્મા
કરોત્વાત્મને । ઇદં કરિષ્યે ભેષજમ્ । ઇદં મે વિશ્વભેષજા । અશ્વિના
પ્રાવતં યુવમ્ । ઇદમહ ँ સેનાયા અભીત્વર્યૈ ॥ ૩। ૭। ૫। ૧॥

૪૩ મુખમપોહામિ । સૂર્ય જ્યોતિર્વિભાહિ । મહત ઇન્દ્રિયાય । આપ્યાયતાં
ઘૃતયોનિઃ । અગ્નિર્હવ્યાઽનુમન્યતામ્ । ખમઙ્ક્ષ્વ ત્વચમઙ્ક્ષ્વ । સુરૂપં
ત્વા વસુવિદમ્ । પશૂનાં તેજસા । અગ્નયે જુષ્ટમભિઘારયામિ । સ્યોનં
તે સદનં કરોમિ ॥ ૩। ૭। ૫। ૨॥

૪૪ ઘૃતસ્ય ધારયા સુશેવં કલ્પયામિ । તસ્મિન્ત્સીદામૃતે પ્રતિતિષ્ઠ
। વ્રીહીણાં મેધ સુમનસ્યમાનઃ । આર્દ્રઃ પ્રથસ્નુર્ભુવનસ્ય ગોપાઃ
। શ઼ૃત ઉત્સ્નાતિ જનિતા મતીનામ્ । યસ્ત આત્મા પશુષુ પ્રવિષ્ટઃ ।

દેવાનાં વિશ્વામનુ યો વિતસ્થે । આત્મન્વાન્ત્સોમ ઘૃતવાન્ હિ ભૂત્વા ।
દેવાન્ગચ્છ સુવર્વિન્દ યજમાનાય મહ્યમ્ । ઇરા ભૂતિઃ પૃથિવ્યૈ રસો
મોત્ક્રમીત્ ॥ ૩। ૭। ૫। ૩॥
૪૫ દેવાઃ પિતરઃ પિતરો દેવાઃ । યોઽહમસ્મિ સ સન્, યજે । યસ્યાસ્મિ
ન તમન્તરેમિ । સ્વં મ ઇષ્ટꣳ સ્વં દત્તમ્ । સ્વં પૂર્તꣳ સ્વꣳ
શ્રાન્તમ્ । સ્વꣳ હુતમ્ । તસ્ય મેઽગ્નિરુપદ્રષ્ટા । વાયુરુપશ્રોતા ।
આદિત્યોઽનુખ્યાતા । દ્યૌઃ પિતા ॥ ૩। ૭। ૫। ૪॥
૪૬ પૃથિવી માતા । પ્રજાપતિર્બન્ધુઃ । ય એવાસ્મિ સ સન્,
યજે । મા ભેર્મા સંવિક્થા મા ત્વા હિꣳસિષમ્ । મા તે તેજોઽપક્રમીત્ ।
ભરતમુદ્ધરેમનુષિઞ્ચ । અવદાનાનિ તે પ્રત્યવદાસ્યામિ । નમસ્તે
અસ્તુ મા મા હિꣳસીઃ । યદવદાનાનિ તેઽવદ્યન્ । વિલોમાકાર્ષમાત્મનઃ ॥
૩। ૭। ૫। ૫॥
૪૭ આજ્યેન પ્રત્યનજ્મ્યેનત્ । તત્ત આપ્યાયતાં પુનઃ । અજ્યાયો યવમાત્રાત્
। આવ્યાધાત્કૃત્યતામિદમ્ । મા રૂરુપામ યજ્ઞસ્ય । શુદ્ધꣳ
સ્વિષ્ટમિદꣳ હવિઃ । મનુના દૃષ્ટાં ઘૃતપદીમ્ । મિત્રાવરુણસમીરિતામ્
। દક્ષિણાર્ધાદસંભિન્દન્ । અવદ્યામ્યેકતોમુખામ્ ॥ ૩। ૭। ૫। ૬॥
૪૮ ઇડે ભાગં જુષસ્વ નઃ । જિન્વ ગા જિન્વાર્વતઃ । તસ્યાસ્તે ભક્ષિવાણઃ
સ્યામ । સર્વાત્માનઃ સર્વગણાઃ । બ્રહ્મ પિન્વસ્વ । દદતો મે મા ક્ષાયિ ।
કુર્વતો મે મોપદસત્ । દિશાં ક્લૃપ્તિરસિ । દિશો મે કલ્પન્તામ્ । કલ્પન્તાં મે
દિશઃ ॥ ૩। ૭। ૫। ૭॥
૪૯ દૈવીશ્ચ માનુષીશ્ચ । અહોરાત્રે મે કલ્પેતામ્ । અર્ધમાસા મે
કલ્પન્તામ્ । માસા મે કલ્પન્તામ્ । ઋતવો મે કલ્પન્તામ્ । સંવત્સરો મે કલ્પતામ્
। ક્લૃપ્તિરસિ કલ્પતાં મે । આશાનાં ત્વાઽઽશાપાલેભ્યઃ । ચતુર્ભ્યો
અમૃતેભ્યઃ । ઇદં ભૂતસ્યાધ્યક્ષેભ્યઃ ॥ ૩। ૭। ૫। ૮॥
૫૦ વિધેમ હવિષા વયમ્ । ભજતાં ભાગી ભાગમ્ । માઽભાગોઽભક્ત ।
નિરભાગં ભજામઃ । અપસ્પિન્વ । ઓષધીર્જિન્વ । દ્વિપાત્પાહિ । ચતુષ્પાદવ ।

દિવો વૃષ્ટિમેરય । બ્રાહ્મણાનામિદꣳ હવિઃ ॥ ૩। ૭। ૫। ૯॥

૫૧ સોમ્યાનાꣳસોમપીથિનામ્ । નિર્ભક્તો બ્રાહ્મણઃ । નેહાબ્રાહ્મણસ્યાસ્તિ ।
સમઙ્ક્તાં બર્હિર્હવિષા ઘૃતેન । સમાદિત્યૈર્વસુભિઃ સં મરુદ્ભિઃ
। સમિન્દ્રેણ વિશ્વેભિર્દેવેભિરઙ્ક્તામ્ । દિવ્યં નભો ગચ્છતુ યત્સ્વાહા ।
ઇન્દ્રાણીવાવિધવા ભૂયાસમ્ । અદિતિરિવ સુપુત્રા । અસ્થૂરિ ત્વા ગાર્હપત્ય ॥
૩। ૭। ૫। ૧૦॥

૫૨ ઉપનિષદે સુપ્રજાસ્ત્વાય । સં પત્ની પત્યા સુકૃતેન ગચ્છતામ્ ।
યજ્ઞસ્ય યુક્તૌ ધુર્યાવભૂતામ્ । સંજાનાનૌ વિજહતામરાતીઃ । દિવિ
જ્યોતિરજરમારભેતામ્ । દશ તે તનુવો યજ્ઞ યજ્ઞિયાઃ । તાઃ પ્રીણાતુ
યજમાનો ઘૃતેન । નારિષ્ઠયોઃ પ્રશિષમીડમાનઃ । દેવાનાં દૈવ્યેઽપિ
યજમાનોઽમૃતોઽભૂત્ । યં વાં દેવા અકલ્પયન્ ॥ ૩। ૭। ૫। ૧૧॥

૫૩ ઊર્જો ભાગꣳ શતક્રતૂ । એતદ્વાં તેન પ્રીણાનિ । તેન તૃપ્યતમꣳહહૌ
। અહં દેવાનાꣳસુકૃતામસ્મિ લોકે । મમેદમિષ્ટં ન મિથુર્ભવાતિ ।
અહં નારિષ્ઠાવનુયજામિ વિદ્વાન્ । યદાભ્યામિન્દ્રો અદધાદ્ભાગધેયમ્ ।
અદારસૃદ્ભવત દેવ સોમ । અસ્મિન્, યજ્ઞે મરુતો મૃડતા નઃ । મા નો વિદદ્ભિ
ભામો અશસ્તિઃ ॥ ૩। ૭। ૫। ૧૨॥

૫૪ મા નો વિદદ્વૃજના દ્વેષ્યા યા । ઋષભં વાજિનં વયમ્ । પૂર્ણમાસં
યજામહે । સ નો દોહતાꣳ સુવીર્યમ્ । રાયસ્પોષꣳસહસ્રિણમ્ ।
પ્રાણાય સુરાધસે । પૂર્ણમાસાય સ્વાહા । અમાવાસ્યા સુભગા
સુશેવા । ધેનુરિવ ભૂય આપ્યાયમાના । સા નો દોહતાꣳ સુવીર્યમ્ ।
રાયસ્પોષꣳસહસ્રિણમ્ । અપાનાય સુરાધસે । અમાવાસ્યાયૈ
સ્વાહા । અભિસ્તૃણીહિ પરિધેહિ વેદિમ્ । જામિં મા હિꣳસીરમુયા શયાના ।
હોતૃષદના હરિતાઃ સુવર્ણાઃ । નિષ્કા ઇમે યજમાનસ્ય બ્રધ્ને ॥ ૩। ૭। ૫। ૧૩॥ અભીત્વર્યૈ કરોમિ
ક્ષ્મીત્પિતાઽઽત્મન એકતોમુખાં મે દિશોઽધ્યક્ષેભ્યો
હવિર્ગાર્હપત્યાકલ્પયન્નશસ્તિઃ સા નો દોહતાꣳ સુવીર્યꣳસપ્ત ચ
॥ ૫॥

૫૫ પરિસ્તૃણીત પરિધત્તાગ્નિમ્ । પરિહિતોઽગ્નિર્યજમાનં ભુનક્તુ । અપાꣳ

રસ ઓષધીનાઁ સુવર્ણઃ । નિષ્કા ઇમે યજમાનસ્ય સન્તુ કામદુઘાઃ ।
અમુત્રામુષ્મિં લ્લોકે । ભૂપતે ભુવનપતે । મહતો ભૂતસ્ય પતે ।
બ્રહ્માણં ત્વા વૃણીમહે । અહં ભૂપતિરહં ભુવનપતિઃ । અહં મહતો
ભૂતસ્ય પતિઃ ॥ ૩। ૭। ૬। ૧॥

૫૬ દેવેન સવિત્રા પ્રસૂત આર્ત્વિજ્યં કરિષ્યામિ । દેવસવિતરેતં ત્વા વૃણતે
। બૃહસ્પતિં દૈવ્યં બ્રહ્માણમ્ । તદહં મનસે પ્રબ્રવીમિ । મનો
ગાયત્રિયૈ । ગાયત્રી ત્રિષ્ટુભે । ત્રિષ્ટુબ્જગત્યૈ । જગત્યનુષ્ટુભે ।
અનુષ્ટુક્ પઙ્ક્ત્યૈ । પઙ્ક્તિઃ પ્રજાપતયે ॥ ૩। ૭। ૬। ૨॥

૫૭ પ્રજાપતિર્વિશ્વેભ્યો દેવેભ્યઃ । વિશ્વે દેવા બૃહસ્પતયે ।
બૃહસ્પતિર્બ્રહ્મણે । બ્રહ્મ ભૂર્ભુવઃ સુવઃ । બૃહસ્પતિર્દેવાનાં
બ્રહ્મા । અહં મનુષ્યાણામ્ । બૃહસ્પતે યજ્ઞં ગોપાય । ઇદં તસ્મૈ
હર્મ્યં કરોમિ । યો વો દેવાશ્ચરતિ બ્રહ્મચર્યમ્ । મેધાવી દિક્ષુ મનસા
તપસ્વી ॥ ૩। ૭। ૬। ૩॥

૫૮ અન્તર્દૂતશ્ચરતિ માનુષીષુ । ચતુઃશિખણ્ડા યુવતિઃ સુપેશાઃ ।
ઘૃતપ્રતીકા ભુવનસ્ય મધ્યે । મર્મૃજ્યમાના મહતે સૌભગાય ।
મહ્યં ધુક્ષ્વ યજમાનાય કામાન્ । ભૂમિર્ભૂત્વા મહિમાનં પુપોષ । તતો
દેવી વર્ધયતે પયાઁસિ । યજ્ઞિયા યજ્ઞં વિ ચ યન્તિ શં ચ ।
ઓષધીરાપ ઇહ શક્વરીશ્ચ । યો મા હૃદા મનસા યશ્ચ વાચા ॥ ૩। ૭। ૬। ૪॥

૫૯ યો બ્રહ્મણા કર્મણા દ્વેષ્ટિ દેવાઃ । યઃ શ્રુતેન હૃદયેનેષ્ણતા ચ
। તસ્યેન્દ્ર વજ્રેણ શિરશ્છિનદ્મિ । ઊર્ણામૃદુ પ્રથમાનરઁ સ્યોનમ્ ।
દેવેભ્યો જુષ્ટઁ સદનાય બર્હિઃ । સુવર્ગે લોકે યજમાનઁ
હિ ધેહિ । માં નાકસ્ય પૃષ્ઠે પરમે વ્યોમન્ । ચતુઃ શિખણ્ડા યુવતિઃ
સુપેશાઃ । ઘૃતપ્રતીકા વયુનાનિ વસ્તે । સા સ્તીર્યમાણા મહતે સૌભગાય
॥ ૩। ૭। ૬। ૫॥

૬૦ સા મે ધુક્ષ્વ યજમાનાય કામાન્ । શિવા ચ મે શગ્મા ચૈધિ । સ્યોના
ચ મે સુષદા ચૈધિ । ઊર્જસ્વતી ચ મે પયસ્વતી ચૈધિ । ઇષમૂર્જં
મે પિન્વસ્વ । બ્રહ્મતેજો મે પિન્વસ્વ । ક્ષત્રમોજો મે પિન્વસ્વ । વિશં પુષ્ટિં

મે પિન્વસ્વ । આયુરન્નાદ્યં મે પિન્વસ્વ । પ્રજાં પશૂન્મે પિન્વસ્વ ॥ ૩। ૭। ૬। ૬॥

૬૧ અસ્મિન્, યજ્ઞ ઉપ ભૂય ઇન્નુ મે । અવિક્ષોભાય પરિધીન્દધામિ । ધર્તા ધરુણો ધરીયાન્ । અગ્નિર્દ્વેષાꣳસિ નિરિતો નુદાતૈ । વિચ્છિનદ્મિ વિધૃતીભ્યાꣳ સપત્નાન્ । જાતાન્ ભ્રાતૃવ્યાન્ યે ચ જનિષ્યમાણાઃ । વિશો યન્ત્રાભ્યાં વિધમામ્યેનાન્ । અહરꣳ સ્વાનામુત્તમોઽસાનિ દેવાઃ । વિશો યન્ત્રે નુદમાને અરાતિમ્ । વિશ્વં પાપ્માનમમતિં દુર્મરાયુમ્ ॥ ૩। ૭। ૬। ૭॥

૬૨ સીદન્તી દેવી સુકૃતસ્ય લોકે । ધૃતી સ્થો વિધૃતી સ્વધૃતી । પ્રાણાન્મયિ ધારયતમ્ । પ્રજાં મયિ ધારયતમ્ । પશૂન્મયિ ધારયતમ્ । અયં પ્રસ્તર ઉભયસ્ય ધર્તા । ધર્તા પ્રયાજાનામુતાનૂયાજાનામ્ । સ દાધાર સમિધો વિશ્વરૂપાઃ । તસ્મિન્થ્સ્રુચો અધ્યાસાદયામિ । આરોહ પથો જુહુ દેવયાનાન્ ॥ ૩। ૭। ૬। ૮॥

૬૩ યત્રર્ષયઃ પ્રથમજા યે પુરાણાઃ । હિરણ્યપક્ષાઽજિરા સમ્ભૃતાઙ્ગા । વહાસિ મા સુકૃતાં યત્ર લોકાઃ । અવાહં બાધ ઉપભૃતા સપત્નાન્ । જાતાન્ભ્રાતૃવ્યાન્ યે ચ જનિષ્યમાણાઃ । દોહૈ યજ્ઞꣳ સુદુઘામિવ ધેનુમ્ । અહમુત્તરો ભૂયાસમ્ । અધરે મથ્સપત્નાઃ । યો મા વાચા મનસા દુર્મરાયુઃ । હૃદાઽરાતીયાદભિદાસદગ્ને ॥ ૩। ૭। ૬। ૯॥

૬૪ ઇદમસ્ય ચિત્તમધરં ધ્રુવાયાઃ । અહમુત્તરો ભૂયાસમ્ । અધરે મથ્સપત્નાઃ । ઋષભોઽસિ શાક્વરઃ । ઘૃતાચીનાꣳ સૂનુઃ । પ્રિયેણ નામ્ના પ્રિયે સદસિ સીદ । સ્યોનો મે સીદ સુષદઃ પૃથિવ્યામ્ । પ્રથયિ પ્રજયા પશુભિઃ સુવર્ગે લોકે । દિવિ સીદ પૃથિવ્યામન્તરિક્ષે । અહમુત્તરો ભૂયાસમ્ ॥ ૩। ૭। ૬। ૧૦॥

૬૫ અધરે મથ્સપત્નાઃ । ઇયરꣳ સ્થાલી ઘૃતસ્ય પૂર્ણા । અચ્છિન્નપયાઃ શતધાર ઉથ્સઃ । મારુતેન શર્મણા દૈવ્યેન । યજ્ઞોઽસિ સર્વતઃ શ્રિતઃ । સર્વતો માં ભૂતં ભવિષ્યચ્છ્રયતામ્ । શતં મે સન્ત્વાશિષઃ । સહસ્રં મે સન્તુ સૂનૃતાઃ । ઇરાવતીઃ પશુમતીઃ । પ્રજાપતિરસિ સર્વતઃ શ્રિતઃ ॥ ૩। ૭। ૬। ૧૧॥

૬૬ સર્વતો માં ભૂતં ભવિષ્યચ્છ્રયતામ્ । શતં મે સન્ત્વાશિષઃ ।

સહસ્રં મે સન્તુ સૂનૃતાઃ । ઇરાવતીઃ પશુમતીઃ । ઇદમિન્દ્રિયમમૃતં
વીર્યમ્ । અનેનેન્દ્રાય પશવોઽચિકિત્સન્ । તેન દેવા અવતોપ મામ્ ।
ઇહેષમૂર્જં યશઃ સહ ઓજઃ સનેયમ્ । શ઼ૃતં મયિ શ્રયતામ્ ।
યત્પૃથિવીમચરત્તત્પ્રવિષ્ટમ્ ॥ ૩। ૭। ૬। ૧૨॥

૬૭ યેનાસિઞ્ચદ્બલમિન્દ્રે પ્રજાપતિઃ । ઇદં તચ્છુક્રં મધુ વાજિનીવત્
। યેનોપરિષ્ટાદધિ નોન્મહેન્દ્રમ્ । દધિ માં ધિનોતુ । અયં વેદઃ
પૃથિવીમન્વવિન્દત્ । ગુહા સતીં ગહને ગહ્વરેષુ । સ વિન્દતુ યજમાનાય
લોકમ્ । અચ્છિદ્રં યજ્ઞં ભૂરિકર્મા કરોતુ । અયં યજ્ઞઃ સમસદદ્ધવિષ્માન્
। ઋચા સામ્ના યજુષા દેવતાભિઃ ॥ ૩। ૭। ૬। ૧૩॥

૬૮ તેન લોકાન્થ્સૂર્યવતો જયેમ । ઇન્દ્રસ્ય સખ્યમમૃતત્વમશ્યામ્ ।
યો નઃ કનીય ઇહ કામયાતૈ । અસ્મિન્, યજ્ઞે યજમાનાય મહ્યમ્ । અપ
તમિન્દ્રાગ્ની ભુવનાન્નુદેતામ્ । અહં પ્રજાં વીરવતીં વિદેય । અગ્ને વાજજિત્ ।
વાજં ત્વા સરિષ્યન્તમ્ । વાજં જેષ્યન્તમ્ । વાજિનં વાજજિતમ્ ॥ ૩। ૭। ૬। ૧૪॥

૬૯ વાજજિત્યાયૈ સંમાર્જ્મિ । અગ્નિમન્નાદમન્નાદ્યાય । ઉપહૂતો દ્યૌઃ
પિતા । ઉપ માં દ્યૌઃ પિતા હ્વયતામ્ । અગ્નિરાગ્નીદ્ધ્રાત્ । આયુષે વર્ચસે ।
જીવાત્વૈ પુણ્યાય । ઉપહૂતા પૃથિવી માતા । ઉપ માં માતા પૃથિવી હ્વયતામ્
। અગ્નિરાગ્નીદ્ધ્રાત્ ॥ ૩। ૭। ૬। ૧૫॥

૭૦ આયુષે વર્ચસે । જીવાત્વૈ પુણ્યાય । મનો જ્યોતિર્જુષતામાજ્યમ્ । વિચ્છિન્નં
યજ્ઞꣳ સમિમં દધાતુ । બૃહસ્પતિસ્તનુતામિમં નઃ । વિશ્વે દેવા
ઇહ માદયન્તામ્ । યં તે અગ્ન આવૃશ્ચામિ । અહં વા ક્ષિપિતશ્ચરન્ ।
પ્રજાં ચ તસ્ય મૂલં ચ । નીચૈર્દેવા નિવૃશ્ચત ॥ ૩। ૭। ૬। ૧૬॥

૭૧ અગ્ને યો નોઽભિદાસતિ । સમાનો યશ્ચ નિષ્ટ્યઃ । ઇધ્મસ્યેવ
પ્રક્ષાયતઃ । મા તસ્યોચ્છેષિ કિંચન । યો માં દ્વેષ્ટિ જાતવેદઃ । યં ચાહં
દ્વેષ્મિ યશ્ચ મામ્ । સર્વાꣳસ્તાનગ્ને સંદહ । યાꣳશ્ચાહં દ્વેષ્મિ યે ચ
મામ્ । અગ્ને વાજજિત્ । વાજં ત્વા સસૃવાꣳ સમ્ ॥ ૩। ૭। ૬। ૧૭॥

૭૨ વાજં જિગિવાꣳ સમ્ । વાજિનં વાજજિતમ્ । વાજજિત્યાયૈ સંમાર્જ્મિ
। અગ્નિમન્નાદમન્નાદ્યાય । વેદિર્બર્હિઃ શ઼ૃતꣳ હવિઃ । ઇધ્મઃ

પરિધયઃ સ્રુચઃ । આજ્યં યજ્ઞ ઋચો યજુઃ । યાજ્યાશ્ચ વષટ્કારાઃ ।
સં મે સંનતયો નમન્તામ્ । ઇધ્મસંનહને હુતે ॥ ૩। ૭। ૬। ૧૮॥
૭૩ દિવઃ ખીલોઽવતતઃ । પૃથિવ્યા અધ્યુત્થિતઃ । તેના સહસ્રકાણ્ડેન ।
દ્વિષન્તꣳશોચયામસિ । દ્વિષન્મે બહુ શોચતુ । ઓષધે મો અહꣳ
શુચમ્ । યજ્ઞ નમસ્તે યજ્ઞ । નમો નમશ્ચ તે યજ્ઞ । શિવેન મે
સંતિષ્ઠસ્વ । સ્યોનેન મે સંતિષ્ઠસ્વ ॥ ૩। ૭। ૬। ૧૯॥
૭૪ સુભૂતેન મે સંતિષ્ઠસ્વ । બ્રહ્મવર્ચસેન મે સંતિષ્ઠસ્વ ।
યજ્ઞસ્યર્દ્ધિમનુ સંતિષ્ઠસ્વ । ઉપ તે યજ્ઞ નમઃ । ઉપ તે નમઃ
। ઉપ તે નમઃ । ત્રિષ્ફલી ક્રિયમાણાનામ્ । યો ન્યઙ્ગો અવશિષ્યતે ।
રક્ષસાં ભાગધેયમ્ । આપસ્તત્પ્રવહતાદિતઃ ॥ ૩। ૭। ૬। ૨૦॥
૭૫ ઉલૂખલે મુસલે યચ્ચ શૂર્પે । આશિશ્લેષ દૃષદિ યત્કપાલે
। અવપ્રુષો વિપ્રુષઃ સંયજામિ । વિશ્વે દેવા હવિરિદં જુષન્તામ્ ।
યજ્ઞે યા વિપ્રુષઃ સન્તિ બહ્વીઃ । અગ્નૌ તાઃ સર્વાઃ સ્વિષ્ટાઃ સુહુતા જુહોમિ
। ઉદ્યન્નદ્ય મિત્રમહઃ । સપત્નાન્મે અનીનશઃ । દિવૈનાન્, વિદ્યુતા જહિ ।
નિમ્રોચન્નધરાન્કૃધિ ॥ ૩। ૭। ૬। ૨૧॥
૭૬ ઉદ્યન્નદ્ય વિ નો ભજ । પિતા પુત્રેભ્યો યથા । દીર્ઘાયુત્વસ્ય હેશિષે
। તસ્ય નો દેહિ સૂર્ય । ઉદ્યન્નદ્ય મિત્રમહઃ । આરોહન્નુત્તરાં દિવમ્ ।
હૃદ્રોગં મમ સૂર્ય । હરિમાણં ચ નાશય । શુકેષુ મે હરિમાણમ્ ।
રોપણાકાસુ દધ્મસિ ॥ ૩। ૭। ૬। ૨૨॥
૭૭ અથો હારિદ્રવેષુ મે । હરિમાણં નિદધ્મસિ । ઉદગાદયમાદિત્યઃ ।
વિશ્વેન સહસા સહ । દ્વિષન્તં મમ રન્ધયન્ । મો અહં દ્વિષતો
રધમ્ । યો નઃ શપાદશપતઃ । યશ્ચ નઃ શપતઃ શપાત્ । ઉષાશ્ચ
તસ્મૈ નિમ્રુક્ચ । સર્વં પાપꣳ સમૂહતામ્ ॥ ૩। ૭। ૬। ૨૩॥
૭૮ યો નઃ સપત્નો યો રણઃ । મર્તોઽભિદાસતિ દેવાઃ । ઇધ્મસ્યેવ
પ્રક્ષાયતઃ । મા તસ્યોચ્છેષિ કિઞ્ચન । અવસૃષ્ટઃ પરાપત । શરો
બ્રહ્મસꣳશિતઃ । ગચ્છામિત્રાન્પ્રવિશ । મૈષાં કંચનોચ્છિષઃ
॥ ૩। ૭। ૬। ૨૪॥ પતિઃ પ્રજાપતયે તપસ્વી વાચા સૌભગાય પશૂન્મે

પિન્વસ્વ દુર્મરાયું દેવયાનાનગ્રેઽન્તરિક્ષેઽહમુત્તરો ભૂયાસં
પ્રજાપતિરસિ સર્વતઃ શ્રિતઃ પ્રવિષ્ટ દેવતાભિર્વાજજિતં પૃથિવી
હ્વયતામગ્નિરાગ્નીદ્ધ્રાદ્ધૃશ્ચત સસૃવાઁ સઁહુતે સ્યોનેન મે
સંતિષ્ઠસ્વેતઃ કૃધિ દધ્મસ્યૂહતામષ્ટૌ ચ ॥ ૬॥

૭૯ સક્ષેદં પશ્ય । વિધર્તરિદં પશ્ય । નાકેદં પશ્ય । રમતિઃ
પનિષ્ઠા । ઋતં વર્ષિષ્ઠમ્ । અમૃતા યાન્યાહુઃ । સૂર્યો વરિષ્ઠો
અક્ષભિર્વિભાતિ । અનુ દ્યાવાપૃથિવી દેવપુત્રે । દીક્ષાઽસિ તપસો
યોનિઃ । તપોઽસિ બ્રહ્મણો યોનિઃ ॥ ૩। ૭। ૭। ૧॥

૮૦ બ્રહ્માસિ ક્ષત્રસ્ય યોનિઃ । ક્ષત્રમસ્યૃતસ્ય યોનિઃ । ઋતમસિ
ભૂરારભે । શ્રદ્ધાં મનસા । દીક્ષાં તપસા । વિશ્વસ્ય ભુવનસ્યાધિપત્નીમ્
। સર્વે કામા યજમાનસ્ય સન્તુ । વાતં પ્રાણં મનસાઽન્વારભામહે ।
પ્રજાપતિં યો ભુવનસ્ય ગોપાઃ । સ નો મૃત્યોસ્ત્રાયતાં પાત્વઁહસઃ ॥
૩। ૭। ૭। ૨॥

૮૧ જ્યોગ્જીવા જરામશીમહિ । ઇન્દ્ર શાક્વર ગાયત્રીં પ્રપદ્યે । તાં તે યુનજ્મિ ।
ઇન્દ્ર શાક્વર ત્રિષ્ટુભં પ્રપદ્યે । તાં તે યુનજ્મિ । ઇન્દ્ર શાક્વર જગતીં
પ્રપદ્યે । તાં તે યુનજ્મિ । ઇન્દ્ર શાક્વરાનુષ્ટુભં પ્રપદ્યે । તાં તે યુનજ્મિ ।
ઇન્દ્ર શાક્વર પઙ્ક્તિં પ્રપદ્યે ॥ ૩। ૭। ૭। ૩॥

૮૨ તાં તે યુનજ્મિ । આઽહં દીક્ષામરુહમૃતસ્ય પત્નીમ્ । ગાયત્રેણ છન્દસા
બ્રહ્મણા ચ । ઋતઁ સત્યેઽધાયિ । સત્યમૃતેઽધાયિ । ઋતં ચ મે
સત્યં ચાભૂતામ્ । જ્યોતિરભૂવઁ સુવરગમમ્ । સુવર્ગં લોકં નાકસ્ય
પૃષ્ઠમ્ । બ્રધ્નસ્ય વિષ્ટપમગમમ્ । પૃથિવી દીક્ષા ॥ ૩। ૭। ૭। ૪॥

૮૩ તયાઽગ્નિર્દીક્ષયા દીક્ષિતઃ । યયાઽગ્નિર્દીક્ષયા દીક્ષિતઃ । તયા ત્વા
દીક્ષયા દીક્ષયામિ । અન્તરિક્ષં દીક્ષા । તયા વાયુર્દીક્ષયા દીક્ષિતઃ ।
યયા વાયુર્દીક્ષયા દીક્ષિતઃ । તયા ત્વા દીક્ષયા દીક્ષયામિ । દ્યૌર્દીક્ષા ।
તયાઽઽદિત્યો દીક્ષયા દીક્ષિતઃ । યયાઽઽદિત્યો દીક્ષયા દીક્ષિતઃ ॥ ૩। ૭। ૭। ૫॥

૮૪ તયા ત્વા દીક્ષયા દીક્ષયામિ । દિશો દીક્ષા । તયા ચન્દ્રમા દીક્ષયા

દીક્ષિતઃ । યયા ચન્દ્રમા દીક્ષયા દીક્ષિતઃ । તયા ત્વા દીક્ષયા દીક્ષયામિ
। આપો દીક્ષા । તયા વરુણો રાજા દીક્ષયા દીક્ષિતઃ । યયા વરુણો રાજા
દીક્ષયા દીક્ષિતઃ । તયા ત્વા દીક્ષયા દીક્ષયામિ । ઓષધયો દીક્ષા ॥ ૩। ૭। ૭। ૬॥

૮૫ તયા સોમો રાજા દીક્ષયા દીક્ષિતઃ । યયા સોમો રાજા દીક્ષયા દીક્ષિતઃ
। તયા ત્વા દીક્ષયા દીક્ષયામિ । વાગ્દીક્ષા । તયા પ્રાણો દીક્ષયા દીક્ષિતઃ ।
યયા પ્રાણો દીક્ષયા દીક્ષિતઃ । તયા ત્વા દીક્ષયા દીક્ષયામિ । પૃથિવી
ત્વા દીક્ષમાણમનુ દીક્ષતામ્ । અન્તરિક્ષં ત્વા દીક્ષમાણમનુ દીક્ષતામ્ ।
દ્યૌસ્ત્વા દીક્ષમાણમનુ દીક્ષતામ્ ॥ ૩। ૭। ૭। ૭॥

૮૬ દિશસ્ત્વા દીક્ષમાણમનુ દીક્ષન્તામ્ । આપસ્ત્વા દીક્ષમાણમનુ દીક્ષન્તામ્ ।
ઓષધયસ્ત્વા દીક્ષમાણમનુ દીક્ષન્તામ્ । વાક્ત્વા દીક્ષમાણમનુ દીક્ષતામ્
। ઋચસ્ત્વા દીક્ષમાણમનુ દીક્ષન્તામ્ । સામાનિ ત્વા દીક્ષમાણમનુ
દીક્ષન્તામ્ । યજૂꣳષિ ત્વા દીક્ષમાણમનુ દીક્ષન્તામ્ । અહશ્ચ રાત્રિશ્ચ ।
કૃષિશ્ચ વૃષ્ટિશ્ચ । ત્વિષિશ્ચાપચિતિશ્ચ ॥ ૩। ૭। ૭। ૮॥

૮૭ આપશ્ચૌષધયશ્ચ । ઊર્ક્ચ સૂનૃતા ચ । તાસ્ત્વા દીક્ષમાણમનુ
દીક્ષન્તામ્ । સ્વે દક્ષે દક્ષપિતેહ સીદ । દેવાનાꣳ સુમ્નો મહતે રણાય ।
સ્વાસસ્થસ્તનુવા સંવિશસ્વ । પિતેવૈધિ સૂનવ આસુશેવઃ । શિવો મા
શિવમાવિશ । સત્યં મ આત્મા । શ્રદ્ધા મે ક્ષિતિઃ ॥ ૩। ૭। ૭। ૯॥

૮૮ તપો મે પ્રતિષ્ઠા । સવિતૃપ્રસૂતા મા દિશો દીક્ષયન્તુ । સત્યમસ્મિ ।
અહં ત્વદસ્મિ મદસિ ત્વમેતત્ । મમાસિ યોનિસ્તવ યોનિરસ્મિ । મમૈવ
સન્વહ હવ્યાન્યગ્ને । પુત્રઃ પિત્રે લોકકૃજ્જાતવેદઃ । આજુહ્વાનઃ
સુપ્રતીકઃ પુરસ્તાત્ । અગ્ને સ્વાં યોનિમાસીદ સાધ્યા । અસ્મિન્થ્સધસ્થે
અધ્યુત્તરસ્મિન્ ॥ ૩। ૭। ૭। ૧૦॥

૮૯ વિશ્વે દેવા યજમાનશ્ચ સીદત । એકમિષે વિષ્ણુસ્ત્વાઽન્વેતુ । દ્વે ઊર્જે
વિષ્ણુસ્ત્વાઽન્વેતુ । ત્રીણિ વ્રતાય વિષ્ણુસ્ત્વાઽન્વેતુ । ચત્વારિ માયો ભવાય
વિષ્ણુસ્ત્વાઽન્વેતુ । પઞ્ચ પશુભ્યો વિષ્ણુસ્ત્વાઽન્વેતુ । ષડ્રાયસ્પોષાય
વિષ્ણુસ્ત્વાઽન્વેતુ । સપ્ત સપ્તભ્યો હોત્રાભ્યો વિષ્ણુસ્ત્વાઽન્વેતુ । સખાયઃ
સપ્તપદા અભૂમ । સખ્યં તે ગમેયમ્ ॥ ૩। ૭। ૭। ૧૧॥

૯૦ સખ્યાત્તે મા યોષમ્ । સખ્યાન્મે મા યોષ્ઠાઃ । સાઽસિ સુબ્રહ્મણ્યે । તસ્યાસ્તે
પૃથિવી પાદઃ । સાઽસિ સુબ્રહ્મણ્યે । તસ્યાસ્તેઽન્તરિક્ષં પાદઃ । સાઽસિ
સુબ્રહ્મણ્યે । તસ્યાસ્તે દ્યૌઃ પાદઃ । સાઽસિ સુબ્રહ્મણ્યે । તસ્યાસ્તે દિશઃ પાદઃ
॥ ૩। ૭। ૭। ૧૨॥

૯૧ પરોરજાસ્તે પઞ્ચમઃ પાદઃ । સા ન ઇષમૂર્જં ધુક્ષ્વ । તેજ ઇન્દ્રિયમ્ ।
બ્રહ્મવર્ચસમન્નાદ્યમ્ । વિમિમે ત્વા પયસ્વતીમ્ । દેવાનાં ધેનુꣳ
સુદુઘામનપસ્ફુરન્તીમ્ । ઇન્દ્રઃ સોમં પિબતુ । ક્ષેમો અસ્તુ નઃ । ઇમાં નરાઃ
કૃણુત વેદિમેત્ય । વસુમતીꣳ રુદ્રવતીમાદિત્યવતીમ્ ॥ ૩। ૭। ૭। ૧૩॥

૯૨ વર્ષ્મન્દિવઃ । નાભા પૃથિવ્યાઃ । યથાઽયં યજમાનો ન રિષ્યેત્ ।
દેવસ્ય સવિતુઃ સવે । ચતુઃશિખણ્ડા યુવતિઃ સુપેશાઃ । ઘૃતપ્રતીકા
ભુવનસ્ય મધ્યે । તસ્યાꣳ સુપર્ણાવધિ યૌ નિવિષ્ટૌ । તયોર્દેવાનામધિ
ભાગધેયમ્ । અપ જન્યં ભયં નુદ । અપ ચક્રાણિ વર્તય । ગૃહꣳ
સોમસ્ય ગચ્છતમ્ । ન વા ઉવેતન્મ્રિયસે ન રિષ્યસિ । દેવાꣳ ઇદેષિ
પથિભિઃ સુગેભિઃ । યત્ર યન્તિ સુકૃતો નાપિ દુષ્કૃતઃ । તત્ર
ત્વા દેવઃ સવિતા દધાતુ ॥ ૩। ૭। ૭। ૧૪॥ બ્રહ્મણો યોનિરꣳ હસઃ
પઙ્ક્તિં પ્રપદ્યે દીક્ષા યયાઽઽદિત્યો દીક્ષયા દીક્ષિતસ્તયા ત્વા
દીક્ષયા દીક્ષયાપ્યોષધયો દીક્ષા દ્યૌસ્ત્વા દીક્ષમાણમનુ દીક્ષતામપ
ચિતિશ્ચાક્ષિતિરુત્તરસ્મિન્નગમેયં દિશઃ પાદ આદિત્યવતીં વર્તય પઞ્ચ
ચ ॥ ૭॥

૯૩ યદસ્ય પારે રજસઃ । શુક્રં જ્યોતિરજાયત । તન્નઃ પર્ષદતિ
દ્વિષઃ । અગ્ને વૈશ્વાનર સ્વાહા । યસ્માદ્ભીષાઽવાશિષ્ઠાઃ । તતો નો
અભયં કૃધિ । પ્રજાભ્યઃ સર્વાભ્યો મૃડ । નમો રુદ્રાય મીઢુષે ।
યસ્માદ્ભીષા ન્યષદઃ । તતો નો અભયં કૃધિ ॥ ૩। ૭। ૮। ૧॥

૯૪ પ્રજાભ્યઃ સર્વાભ્યો મૃડ । નમો રુદ્રાય મીઢુષે । ઉદુસ્ર તિષ્ઠ
પ્રતિતિષ્ઠ મા રિષઃ । મેમં યજ્ઞં યજમાનં ચ રીરિષઃ । સુવર્ગે
લોકે યજમાનꣳ હિ ધેહિ । શં ન એધિ દ્વિપદે શં ચતુષ્પદે ।

યસ્માદ્ભીષાઽવેપિષ્ઠાઃ પલાયિષ્ઠાઃ સમજ્ઞાસ્થાઃ । તતો નો અભયં
કૃધિ । પ્રજાભ્યઃ સર્વાભ્યો મૃડ । નમો રુદ્રાય મીઢુષે ॥ ૩। ૭। ૮। ૨॥

૯૫ ય ઇદમકઃ । તસ્મૈ નમઃ । તસ્મૈ સ્વાહા । ન વા ઉ વેતન્મ્રિયસે । આશાનાં
ત્વા વિશ્વા આશાઃ । યજ્ઞસ્ય હિ સ્થ ઋત્વિયૌ । ઇન્દ્રાગ્ની ચેતનસ્ય ચ ।
હુતાહુતસ્ય તૃપ્યતમ્ । અહુતસ્ય હુતસ્ય ચ । હુતસ્ય ચાહુતસ્ય ચ ।
અહુતસ્ય હુતસ્ય ચ । ઇન્દ્રાગ્ની અસ્ય સોમસ્ય । વીતં પિબતં જુષેથામ્ ।
મા યજમાનં તમો વિદત્ । મર્ત્વિજો મો ઇમાઃ પ્રજાઃ । મા યઃ સોમમિમં પિબાત્ ।
સꣳસૃષ્ટમુભયં કૃતમ્ ॥ ૩। ૭। ૮। ૩॥ કૃધિ મીઢુષેઽહુતસ્ય ચ
સપ્ત ચ ॥ ૮॥

૯૬ અનાગસસ્ત્વા વયમ્ । ઇંદ્રેણ પ્રેષિતા ઉપ । વાયુષ્ટે અસ્ત્વꣳશભૂઃ ।
મિત્રસ્તે અસ્ત્વꣳશભૂઃ । વરુણસ્તે અસ્ત્વꣳશભૂઃ । અપાં ક્ષયા ઋતસ્ય
ગર્ભાઃ । ભુવનસ્ય ગોપાઃ શ્યેના અતિથયઃ । પર્વતાનાં કકુભઃ પ્રયુતો નપાતારઃ
। વગ્નુનેન્દ્રગ્ગ્ં હ્વયત । ઘોષેણામીવાગ્શ્ચાતયત ॥ ૩। ૭। ૯। ૧॥

૯૭ યુક્તાઃ સ્થ વહત । દેવા ગ્રાવાણ ઇન્દુરિન્દ્ર ઇત્યવાદિષુઃ ।
એન્દ્રમચુચ્યવુઃ પરમસ્યાઃ પરાવતઃ । આઽસ્માત્સધસ્થાત્ । ઓરોરન્તરિક્ષાત્
। આ સુભૂતમસુષવુઃ । બ્રહ્મવર્ચસં મ આસુષવુઃ । સમરે
રક્ષાગ્સ્યવધિષુઃ । અપહતં બ્રહ્મજ્યસ્ય । વાક્ચ ત્વા મનશ્ચ શ્રિણીતામ્ ॥
૩। ૭। ૯। ૨॥

૯૮ પ્રાણશ્ચ ત્વાઽપાનશ્ચ શ્રીણીતામ્ । ચક્ષુશ્ચ ત્વા શ્રોત્રં ચ શ્રીણીતામ્ ।
દક્ષશ્ચ ત્વા બલં ચ શ્રીણીતામ્ । ઓજશ્ચ ત્વા સહશ્ચ શ્રીણીતામ્ । આયુશ્ચ
ત્વા જરા ચ શ્રીણીતામ્ । આત્મા ચ ત્વા તનૂશ્ચ શ્રીણીતામ્ । શૃતોઽસિ
શૃતં કૃતઃ । શૃતાય ત્વા શૃતેભ્યસ્ત્વા । યમિન્દ્રમાહુર્વરુણં
યમાહુઃ । યં મિત્રમાહુર્યમુ સત્યમાહુઃ ॥ ૩। ૭। ૯। ૩॥

૯૯ યો દેવાનાં દેવતમસ્તપોજાઃ । તસ્મૈ ત્વા તેભ્યસ્ત્વા । મયિ ત્યદિન્દ્રિયં
મહત્ । મયિ દક્ષો મયિ ક્રતુઃ । મયિ ધાયિ સુવીર્યમ્ । ત્રિશુગ્ઘર્મો
વિભાતુ મે । આકૂત્યા મનસા સહ । વિરાજા જ્યોતિષા સહ । યજ્ઞેન
પયસા સહ । તસ્ય દોહમશીમહિ ॥ ૩। ૭। ૯। ૪॥

૧૦૦ તસ્ય સુમ્નમશીમહિ । તસ્ય ભક્ષમશીમહિ । વાગ્જુષાણા સોમસ્ય તૃપ્યતુ । મિત્રો જનાન્પ્રસમિત્ર । યસ્માન્ન જાતઃ પરો અન્યો અસ્તિ । ય આવિવેશ ભુવનાનિ વિશ્વા । પ્રજાપતિઃ પ્રજયા સંવિદાનઃ । ત્રીણિ જ્યોતીँષિ સચતે સ ષોડશી । એષ બ્રહ્મા ય ઋત્વિયઃ । ઇન્દ્રો નામ શ્રુતો ગણે ॥ ૩। ૭। ૯। ૫॥

૧૦૧ પ્ર તે મહે વિદથે શँસિષँ હરી । ય ઋત્વિયઃ પ્ર તે વન્વે । વનુષો હર્યતં મદમ્ । ઇન્દ્રો નામ ઘૃતં ન યઃ । હરિભિશ્ચારુ સેચતે । શ્રુતો ગણ આ ત્વા વિશન્તુ । હરિવર્પસં ગિરઃ । ઇન્દ્રાધિપતેઽધિપતિસ્ત્વં દેવાનામસિ । અધિપતિં મામ્ । આયુષ્મન્તં વર્ચસ્વન્તં મનુષ્યેષુ કુરુ ॥

૩। ૭। ૯। ૬॥

૧૦૨ ઇન્દ્રશ્ચ સમ્રાડ્વરુણશ્ચ રાજા । તૌ તે ભક્ષં ચક્રતુરગ્ર એતમ્ । તયોરનુ ભક્ષં ભક્ષયામિ । વાગ્જુષાણા સોમસ્ય તૃપ્યતુ । પ્રજાપતિર્વિશ્વકર્મા । તસ્ય મનો દેવં યજ્ઞેન રાધ્યાસમ્ । અર્થે ગા અસ્ય જહિતઃ । અવસાનપતેઽવસાનં મે વિન્દ । નમો રુદ્રાય વાસ્તોષ્પતયે । આયને વિદ્રવણે ॥ ૩। ૭। ૯। ૭॥

૧૦૩ ઉદ્યાને યત્પરાયણે । આવર્તને વિવર્તને । યો ગોપાયતિ તँ હુવે । યાન્યપામિત્યાન્યપ્રતીત્તાન્યસ્મિ । યમસ્ય બલિના ચરામિ । ઇહૈવ સન્તઃ પ્રતિ તદ્યાતયામઃ । જીવા જીવેભ્યો નિહરામ એનત્ । અનૃણા અસ્મિન્નનૃણાઃ પરસ્મિન્ । તૃતીયે લોકે અનૃણાઃ સ્યામ । યે દેવયાના ઉત પિતૃયાણાઃ ॥ ૩। ૭। ૯। ૮॥

૧૦૪ સર્વાન્પથો અનૃણા આક્ષીયેમ । ઇદમૂનુ શ્રેયોઽવસાનમાગન્મ । શિવે નો દ્યાવાપૃથિવી ઉભે ઇમે । ગોમદ્ધનવદશ્વવદૂર્જસ્વત્ । સુવીરા વીરૈરનુ સંચરેમ । અર્કઃ પવિત્રँ રજસો વિમાનઃ । પુનાતિ દેવાનાં ભુવનાનિ વિશ્વા । દ્યાવાપૃથિવી પયસા સંવિદાને । ઘૃતં દુહાતે અમૃતં પ્રપીને । પવિત્રમર્કો રજસો વિમાનઃ । પુનાતિ દેવાનાં ભુવનાનિ વિશ્વા । સુવર્જ્યોતિર્યશો મહત્ । અશીમહિ ગાધમુત

પ્રતિષ્ઠામ્ ॥ ૩। ૭। ૯। ૯॥ ચાતયત શ્રીણીતા ૨ સત્યમાહુરશીમહિ
ગણે કુરુ વિદ્રવણે પિતૃયાણા અર્કો રજસો વિમાનસ્ત્રીણિ ચ ॥ ૯॥

૧૦૫ ઉદસ્તાંપ્સીથ્સવિતા મિત્રો અર્યમા । સર્વાનમિત્રાનવધીદ્યુગેન ।
બૃહન્તં મામકરદ્વીરવન્તમ્ । રથન્તરે શ્રયસ્વ સ્વાહા પૃથિવ્યામ્ ।
વામદેવ્યે શ્રયસ્વ સ્વાહાઽન્તરિક્ષે । બૃહતિ શ્રયસ્વ સ્વાહા દિવિ
। બૃહતા ત્વોપસ્તભ્નોમિ । આ ત્વા દદે યશસે વીર્યાય ચ । અસ્માસ્વઘ્નિયા
યૂયં દધાથેન્દ્રિયં પયઃ । યસ્તે દ્રપ્સો યસ્ત ઉદરૂષઃ ॥ ૩। ૭। ૧૦। ૧॥

૧૦૬ દૈવ્યઃ કેતુર્વિશ્વં ભુવનમાવિવેશ । સ નઃ પાહ્યરિષ્ટ્યૈ
સ્વાહા । અનુ મા સર્વો યજ્ઞોઽયમેતુ । વિશ્વે દેવા મરુતઃ સામાર્કઃ ।
આપ્રિયશ્છન્દાꣳસિ નિવિદો યજૂꣳષિ । અસ્યૈ પૃથિવ્યૈ યદ્યજ્ઞિયમ્ ।
પ્રજાપતેર્વર્તનિમનુવર્તસ્વ । અનુ વીરૈરનુરાધ્યામ ગોભિઃ । અન્વશ્વૈરનુ
સર્વૈરુ પુષ્ટૈઃ । અનુ પ્રજયાઽન્વિન્દ્રિયેણ ॥ ૩। ૭। ૧૦। ૨॥

૧૦૭ દેવા નો યજ્ઞમૃજુધા નયન્તુ । પ્રતિ ક્ષત્રે પ્રતિ તિષ્ઠામિ રાષ્ટ્રે
। પ્રત્યશ્વેષુ પ્રતિતિષ્ઠામિ ગોષુ । પ્રતિ પ્રજાયાં પ્રતિતિષ્ઠામિ
ભવ્યે । વિશ્વમન્યાઽભિવાવૃધે । તદન્યસ્યામધિશ્રિતમ્ । દિવે ચ
વિશ્વકર્મણે । પૃથિવ્યૈ ચાકરં નમઃ । અસ્કાન્દ્યૌઃ પૃથિવીમ્ ।
અસ્કાનૃષભો યુવા ગાઃ ॥ ૩। ૭। ૧૦। ૩॥

૧૦૮ સ્કન્નેમા વિશ્વા ભુવના । સ્કન્નો યજ્ઞઃ પ્રજનયતુ । અસ્કાનજનિ
પ્રાજનિ । આસ્કન્નાજ્જાયતે વૃષા । સ્કન્નાત્પ્રજનિષીમહિ । યે દેવા યેષામિદં
ભાગધેયં બભૂવ । યેષાં પ્રયાજા ઉતાનૂયાજાઃ । ઇન્દ્રજ્યેષ્ઠેભ્યો
વરુણરાજભ્યઃ । અગ્નિહોતૃભ્યો દેવેભ્યઃ સ્વાહા । ઉત ત્યા નો દિવા મતિઃ ॥
૩। ૭। ૧૦। ૪॥

૧૦૯ અદિતિરૂત્યાઽઽગમત્ । સા શન્તાચી મયસ્કરત્ । અપ સ્રિધઃ । ઉત
ત્યા દૈવ્યા ભિષજા । શં નસ્કરતો અશ્વિના । યૂયાતામસ્મદ્રપઃ ।
અપ સ્રિધઃ । શમગ્નિરગ્નિભિસ્કરત્ । શં નસ્તપતુ સૂર્યઃ । શં વાતો
વાત્વરપાઃ ॥ ૩। ૭। ૧૦। ૫॥

૧૧૦ અપ સ્રિધઃ । તદિત્પદં ન વિચિકેત વિદ્વાન્ । યન્મૃતઃ પુનરપ્યેતિ

જીવાન્ । ત્રિવૃદ્યદ્ભુવનસ્ય રથવૃત્ । જીવો ગર્ભો ન મૃતઃ સ જીવાત્ ।
પ્રત્યસ્મૈ પિપીષતે । વિશ્વાનિ વિદુષે ભર । અરંગમાય જગ્મવે ।
અપશ્ચાદ્ધ્વને નરે । ઇન્દુરિન્દ્રમવાગાત્ । ઇન્દોરિન્દ્રોઽપાત્ । તસ્ય ત
ઇન્દવિન્દ્રપીતસ્ય મધુમતઃ । ઉપહૂતસ્યોપહૂતો ભક્ષયામિ ॥ ૩। ૭। ૧૦। ૬॥
ઉદરૂષ ઇન્દ્રિયેણ ગા મતિરરપા અગાત્ત્રીણિ ચ ॥ ૧૦॥

૧૧૧ બ્રહ્મ પ્રતિષ્ઠા મનસો બ્રહ્મ વાચઃ । બ્રહ્મ યજ્ઞાનાꣳ
હવિષામાજ્યસ્ય । અતિરિક્તં કર્મણો યચ્ચ હીનમ્ । યજ્ઞઃ
પર્વાણિ પ્રતિરન્નેતિ કલ્પયન્ । સ્વાહાકૃતાઽઽહુતિરેતુ દેવાન્ ।
આશ્રાવિતમત્યાશ્રાવિતમ્ । વષટ્કૃતમત્યનૂક્તં ચ યજ્ઞે । અતિરિક્તં
કર્મણો યચ્ચ હીનમ્ । યજ્ઞઃ પર્વાણિ પ્રતિરન્નેતિ કલ્પયન્ ।
સ્વાહાકૃતાઽઽહુતિરેતુ દેવાન્ ॥ ૩। ૭। ૧૧। ૧॥

૧૧૨ યદ્વો દેવા અતિપાદયાનિ । વાચા ચિત્પ્રયતં દેવ હેડનમ્ । અરાયો
અસ્માꣳ અભિદુચ્છુનાયતે । અન્યત્રાસ્મન્ મરુતસ્તન્નિધેતન । તતં
મ આપસ્તદુ તાયતે પુનઃ । સ્વાદિષ્ઠા ધીતિરુચથાય શસ્યતે । અયꣳ
સમુદ્ર ઉત વિશ્વભેષજઃ । સ્વાહાકૃતસ્ય સમુતૃપ્ણુતર્ભુવઃ । ઉદ્વયં
તમસસ્પરિ । ઉદુ ત્યં ચિત્રમ્ ॥ ૩। ૭। ૧૧। ૨॥

૧૧૩ ઇમં મે વરુણ તત્ત્વા યામિ । ત્વં નો અગ્ને સ ત્વં નો અગ્ને । ત્વમગ્ને
અયાસિ પ્રજાપતે । ઇમં જીવેભ્યઃ પરિધિં દધામિ । મૈષાં નુ
ગાદપરો અર્થમેતમ્ । શતં જીવન્તુ શરદઃ પુરૂચીઃ । તિરો
મૃત્યું દધતાં પર્વતેન । ઇષ્ટેભ્યઃ સ્વાહા વષડનિષ્ટેભ્યઃ સ્વાહા
। ભેષજં દુરિષ્ટ્યૈ સ્વાહા નિષ્કૃત્યૈ સ્વાહા । દૌરાર્દ્ધ્યૈ સ્વાહા
દૈવીભ્યસ્તનૂભ્યઃ સ્વાહા ॥ ૩। ૭। ૧૧। ૩॥

૧૧૪ ઋદ્ધ્યૈ સ્વાહા સમૃદ્ધ્યૈ સ્વાહા । યત ઇન્દ્ર ભયામહે । તતો નો
અભયં કૃધિ । મઘવચ્છગ્ધિ તવ તન્ન ઊતયે । વિ દ્વિષો વિ મૃધો
જહિ । સ્વસ્તિદા વિશસ્પતિઃ । વૃત્રહા વિમૃધો વશી । વૃષેન્દ્રઃ પુર
એતુ નઃ । સ્વસ્તિદા અભયંકરઃ । આભિર્ગીર્ભિર્યદતો ન ઊનમ્ ॥ ૩। ૭। ૧૧। ૪॥

૧૧૫ આપ્યાયય હરિવો વર્ધમાનઃ । યદા સ્તોતૃભ્યો મહિ ગોત્રા રુજાસિ ।

ભૂયિષ્ઠભાજો અધ તે સ્યામ । અનાજ્ઞાતં યદાજ્ઞાતમ્ । યજ્ઞસ્ય ક્રિયતે
મિથુ । અગ્ને તદસ્ય કલ્પય । ત્વꣳ હિ વેત્થ યથાતથમ્ । પુરુષસંમિતો
યજ્ઞઃ । યજ્ઞઃ પુરુષસંમિતઃ । અગ્ને તદસ્ય કલ્પય । ત્વꣳ હિ વેત્થ
યથાતથમ્ । યત્પાકત્રા મનસા દીનદક્ષા ન । યજ્ઞસ્ય મન્વતે
મર્તાસઃ । અગ્નિષ્ટદ્ધોતા ક્રતુવિદ્વિજાનન્ । યજિષ્ઠો દેવાꣳ ઋતુશો
યજાતિ ॥ ૩। ૭। ૧૧। ૫॥ દેવાગ્નિશ્ચિત્રં તનૂભ્યઃ સ્વાહોનં પુરુષસંમિતોઽગ્ને
તદસ્ય કલ્પય પઞ્ચ ચ ॥ ૧૧॥

૧૧૬ યદ્દેવા દેવહેડનમ્ । દેવાસશ્ચકૃમા વયમ્ । આદિત્યાસ્તસ્માન્મા મુઞ્ચત ।
ઋતસ્યર્તેન મામુત । દેવા જીવનકામ્યા યત્ । વાચાઽનૃતમૂદિમ । અગ્નિર્મા
તસ્માદેનસઃ । ગાર્હપત્યઃ પ્રમુઞ્ચતુ । દુરિતા યાનિ ચકૃમ । કરોતુ
મામનેનસમ્ ॥ ૩। ૭। ૧૨। ૧॥

૧૧૭ ઋતેન દ્યાવાપૃથિવી । ઋતેન ત્વꣳ સરસ્વતિ । ઋતાન્મા
મુઞ્ચતાꣳહસઃ । યદન્યકૃતમારિમ । સજાતશꣳસાદુત
વા જામિશꣳસાત્ । જ્યાયસઃ શꣳસાદુત વા કનીયસઃ । અનાજ્ઞાતં
દેવકૃતં યદેનઃ । તસ્માત્ત્વમસ્માન્જાતવેદો મુમુગ્ધિ । યદ્વાચા યન્મનસા ।
બાહુભ્યામૂરુભ્યામષ્ઠીવદ્ભ્યામ્ ॥ ૩। ૭। ૧૨। ૨॥

૧૧૮ શિશ્નૈર્યદનૃતં ચકૃમા વયમ્ । અગ્નિર્મા તસ્માદેનસઃ । યદ્ધસ્તાભ્યાં
ચકર કિલ્બિષાણિ । અક્ષાણાં વગ્નુમુપ જિઘ્નમાનઃ । દૂરેપશ્યા ચ
રાષ્ટ્રભૃચ્ચ । તાન્યપ્સરસાવનુ દત્તા મૃણાનિ । અદીવ્યન્નૃણં યદહં
ચકાર । યદ્વાઽદાસ્યન્થ્સંજગારા જનેભ્યઃ । અગ્નિર્મા તસ્માદેનસઃ ।
યન્મયિ માતા ગર્ભે સતિ ॥ ૩। ૭। ૧૨। ૩॥

૧૧૯ એનશ્ચકાર યત્પિતા । અગ્નિર્મા તસ્માદેનસઃ । યદા પિપેષ માતરં
પિતરમ્ । પુત્રઃ પ્રમુદિતો ધયન્ । અહિꣳસિતૌ પિતરૌ મયા તત્ ।
તદગ્ને અનૃણો ભવામિ । યદન્તરિક્ષં પૃથિવીમુત દ્યામ્ । યન્માતરં
પિતરં વા જિહિꣳસિમ । અગ્નિર્મા તસ્માદેનસઃ । યદાશસા નિશસા
યત્પરાશસા ॥ ૩। ૭। ૧૨। ૪॥

૧૨૦ યદેનશ્ચકૃમા નૂતનં યત્પુરાણમ્ । અગ્નિર્મા તસ્માદેનસઃ ।

અતિક્રામામિ દુરિતં યદેનઃ । જહામિ રિપ્રં પરમે સધસ્થે । યત્ર
યન્તિ સુકૃતો નાપિ દુષ્કૃતઃ । તમારોહામિ સુકૃતાં નુ લોકમ્ । ત્રિતે
દેવા અમૃજતૈતદેનઃ । ત્રિત એતન્મનુષ્યેષુ મામૃજે । તતો મા યદિ
કિંચિદાનશે । અગ્નિર્મા તસ્માદેનસઃ ॥ ૩। ૭। ૧૨। ૫॥
૧૨૧ ગાર્હપત્યઃ પ્રમુઞ્ચતુ । દુરિતા યાનિ ચકૃમ । કરોતુ મામનેનસમ્
। દિવિ જાતા અપ્સુ જાતાઃ । યા જાતા ઓષધીભ્યઃ । અથો યા અગ્નિજા આપઃ ।
તા નઃ શુન્ધન્તુ શુન્ધનીઃ । યદાપો નક્તં દુરિતં ચરામ । યદ્વા દિવા
નૂતનં યત્પુરાણમ્ । હિરણ્યવર્ણાસ્તત ઉત્પુનીત નઃ । ઇમં મે વરુણ
તત્ત્વા યામિ । ત્વં નો અગ્ને સ ત્વં નો અગ્ને । ત્વમગ્ને અયાઽસિ ॥ ૩। ૭। ૧૨। ૬॥ અનેનસમષ્ટીવદ્ભ્યાઁ
સતિ પરાશસાઽઽનશેઽગ્નિર્મા
તસ્માદેનસઃ પુનીત નસ્ત્રીણિ ચ ॥ ૧૨॥ યદ્દેવા દેવા ઋતેન
સજાતશઁ સાધદ્વાચા યદ્ધસ્તાભ્યામદીવ્યં યન્મયિ માતા યદાપિપેષ
યદન્તરિક્ષં યદાશસાઽતિક્રામામિ ત્રિતે દેવા દિવિ જાતા અપ્સુ જાતા
યદાપ ઇમં મે વરુણ તત્ત્વા યામિ ત્વં નો અગ્ને સ ત્વં નો અગ્ને ત્વમગ્ને
અયાઽસિ ॥
૧૨૨ યત્તે ગ્રાવ્ણા ચિચ્છિદુઃ સોમ રાજન્ । પ્રિયાણ્યઙ્ગાનિ સ્વધિતા
પરૂઁષિ । તથ્સંધથ્સ્વાજ્યેનોત વર્ધયસ્વ । અનાગસો
અધમિથ્સંક્ષયેમ । યત્તે ગ્રાવા બાહુચ્યુતો અચુચ્યવુઃ । નરો યત્તે
દુદુહુર્દક્ષિણેન । તત્ત આપ્યાયતાં તત્તે । નિષ્ટ્યાયતાં દેવ સોમ । યત્તે
ત્વચં બિભિદુર્યચ્ચ યોનિમ્ । યદાસ્થાનાત્પ્રચ્યુતો વેનસિ ત્મના ॥ ૩। ૭। ૧૩। ૧॥
૧૨૩ ત્વયા તથ્સોમ ગુપ્તમસ્તુ નઃ । સા નઃ સંધાઽસત્પરમે વ્યોમન્
। અહાચ્છરીરં પયસા સમેત્ય । અન્યોઽન્યો ભવતિ વર્ણો અસ્ય
। તસ્મિન્વયમુપહૂતાસ્તવ સ્મઃ । આ નો ભજ સદસિ વિશ્વરૂપે ।
નૃચક્ષાઃ સોમ ઉત શુશ્રુગસ્તુ । મા નો વિહાસીદ્ગિર આવૃણાનઃ ।
અનાગાસ્તનુવો વાવૃધાનઃ । આ નો રૂપં વહતુ જાયમાનઃ ॥ ૩। ૭। ૧૩। ૨॥
૧૨૪ ઉપક્ષરન્તિ જુહ્વો ઘૃતેન । પ્રિયાણ્યઙ્ગાનિ તવ વર્ધયન્તીઃ
। તસ્મૈ તે સોમ નમ ઇદ્વષટ્ચ । ઉપ મા રાજન્થ્સુકૃતે હ્વયસ્વ ।

સંપ્રાણાપાનાભ્યાꣳ સમુ ચક્ષુષા ત્વમ્ । સરꣳ શ્રોત્રેણ ગચ્છસ્વ
સોમ રાજન્ । યત્ત આસ્થિતꣳ શમુ તત્તે અસ્તુ । જાનીતાન્નઃ સંગમને
પથીનામ્ । એતં જાનીતાત્પરમે વ્યોમન્ । વૃકાઃ સધસ્થા વિદ રૂપમસ્ય ॥
૩। ૭। ૧૩। ૩॥

૧૨૫ યદા ગચ્છાત્પથિભિર્દેવયાનૈઃ । ઇષ્ટાપૂર્તે કૃણુતાદાવિરસ્મૈ ।
અરિષ્ટો રાજન્નગદઃ પરેહિ । નમસ્તે અસ્તુ ચક્ષસે રઘૂયતે । નાકમારોહ
સહ યજમાનેન । સૂર્યં ગચ્છતાત્પરમે વ્યોમન્ । અભૂદ્દેવઃ સવિતા વન્દ્યો
નુ નઃ । ઇદાનીમહ્ન ઉપવાચ્યો નૃભિઃ । વિ યો રત્ના ભજતિ માનવેભ્યઃ
। શ્રેષ્ઠં નો અત્ર દ્રવિણં યથા દધત્ । ઉપ નો મિત્રાવરુણાવિહાવતમ્
। અન્વાદીધ્યાથામિહ નઃ સખાયા । આદિત્યાનાં પ્રસિતિર્હેતિઃ । ઉગ્રા
શતાપાષ્ઠા ઘવિષા પરિ ણો વૃણક્તુ । આપ્યાયસ્વ સં તે ॥ ૩। ૭। ૧૩। ૪॥
ત્મના જાયમાનોઽસ્ય દધત્પઞ્ચ ચ ॥ ૧૩॥

૧૨૬ યદ્દિદીક્ષે મનસા યચ્ચ વાચા । યદ્વા પ્રાણૈશ્ચક્ષુષા યચ્ચ
શ્રોત્રેણ । યદ્રેતસા મિથુનેનાપ્યાત્મના । અદ્ભ્યો લોકા દધિરે તેજ
ઇન્દ્રિયમ્ । શુક્રા દીક્ષાયૈ તપસો વિમોચનીઃ । આપો વિમોક્ત્રીર્મયિ તેજ
ઇન્દ્રિયમ્ । યદૃચા સામ્ના યજુષા । પશૂનાં ચર્મન્ હવિષા દિદીક્ષે ।
યચ્છન્દોભિરોષધીભિર્વનસ્પતૌ । અદ્ભ્યો લોકા દધિરે તેજ ઇન્દ્રિયમ્
॥ ૩। ૭। ૧૪। ૧॥

૧૨૭ શુક્રા દીક્ષાયૈ તપસો વિમોચનીઃ । આપો વિમોક્ત્રીર્મયિ તેજ ઇન્દ્રિયમ્ ।
યેન બ્રહ્મ યેન ક્ષત્રમ્ । યેનેન્દ્રાગ્ની પ્રજાપતિઃ સોમો વરુણો યેન
રાજા । વિશ્વે દેવા ઋષયો યેન પ્રાણાઃ । અદ્ભ્યો લોકા દધિરે તેજ
ઇન્દ્રિયમ્ । શુક્રા દીક્ષાયૈ તપસો વિમોચનીઃ । આપો વિમોક્ત્રીર્મયિ તેજ
ઇન્દ્રિયમ્ । અપાં પુષ્પમસ્યોષધીનાꣳ રસઃ । સોમસ્ય પ્રિયં ધામ
॥ ૩। ૭। ૧૪। ૨॥

૧૨૮ અગ્નેઃ પ્રિયતમꣳ હવિઃ સ્વાહા । અપાં પુષ્પમસ્યોષધીનાꣳ
રસઃ । સોમસ્ય પ્રિયં ધામ । ઇન્દ્રસ્ય પ્રિયતમꣳ હવિઃ સ્વાહા । અપાં
પુષ્પમસ્યોષધીનાꣳ રસઃ । સોમસ્ય પ્રિયં ધામ । વિશ્વેષાં દેવાનાં

પ્રિયતમꣳ હવિઃ સ્વાહા । વયꣳ સોમ વ્રતે તવ । મનસ્તનૂષુ
પિપ્રતઃ । પ્રજાવન્તો અશીમહિ ॥ ૩। ૭। ૧૪। ૩॥

૧૨૯ દેવેભ્યઃ પિતૃભ્યઃ સ્વાહા । સોમ્યેભ્યઃ પિતૃભ્યઃ સ્વાહા ।
કવ્યેભ્યઃ પિતૃભ્યઃ સ્વાહા । દેવાસ ઇહ માદયધ્વમ્ । સોમ્યાસ ઇહ
માદયધ્વમ્ । કવ્યાસ ઇહ માદયધ્વમ્ । અનન્તરિતાઃ પિતરઃ સોમ્યાઃ સોમપીથાત્
। અપૈતુ મૃત્યુરમૃતં ન આગન્ । વૈવસ્વતો નો અભયં કૃણોતુ ।
પર્ણં વનસ્પતેરિવ ॥ ૩। ૭। ૧૪। ૪॥

૧૩૦ અભિ નઃ શીયતાꣳ રયિઃ । સચતાં નઃ શચીપતિઃ । પરં
મૃત્યો અનુપરેહિ પન્થામ્ । યસ્તે સ્વ ઇતરો દેવયાનાત્ । ચક્ષુષ્મતે
શꣳૃણ્વતે તે બ્રવીમિ । મા નઃ પ્રજાꣳ રીરિષો મોત વીરાન્ । ઇદમૂનુ
શ્રેયોઽવસાનમાગન્મ । યદ્ગોજિદ્ધનજિદશ્વજિદ્યત્ । પર્ણં વનસ્પતેરિવ
। અભિ નઃ શીયતાꣳ રયિઃ । સચતાં નઃ શચીપતિઃ ॥ ૩। ૭। ૧૪। ૫॥

વનસ્પતાવદ્ભ્યો લોકા દધિરે તેજ ઇન્દ્રિયં ધામાશીમહીવાભિ નઃ
શીયતાꣳ રયિરેકં ચ ॥ ૧૪॥

સર્વાન્ યદ્વિષ્ષણ્ણેન વિ વૈ યાઃ પુરસ્તાદ્દેવા દેવેષુ પરિ સ્તૃણીત
સક્ષેદં યદસ્ય પારેઽનાગસ ઉદસ્તાંપ્સીદ્બ્રહ્મ પ્રતિષ્ઠા યદ્દેવા
યત્તે ગ્રાવણા યદ્દિદીક્ષે ચતુર્દશ ॥ ૧૪॥

સર્વાન્ભૂતિમેવ યામેવાપ્સ્વાહુતિં વ્રતાનાં પર્ણવલ્કઃ સોમ્યાનામસ્મિન્,
યજ્ઞેઽગ્ને યો નો જ્યોગ્જીવાઃ પરોરજાઃ પ્રતેમહે બ્રાહ્મ પ્રતિષ્ઠા
ગાર્હપત્યસ્ત્રિꣳશદુત્તરશતમ્ ॥ ૧૩૦॥

સર્વાન્નઃ શચીપતિઃ ॥

## તૃતીયાષ્ટકે અષ્ટમઃ પ્રપાઠકઃ ૮

## અશ્વમેધમ્ વૈશ્વદેવં કાંડં તત્ર પ્રથમમહઃ

૧ સાંગ્રહણ્યેષ્ટ્યા યજતે । ઇમાં જનતાꣳ સંગૃહ્ણાનીતિ

। દ્વાદશારત્ની રશના ભવતિ । દ્વાદશ માસાઃ સંવથ્સરઃ
। સંવથ્સરમેવાવરુન્ધે । મૌઞ્જી ભવતિ । ઊર્ગ્વૈ મુઞ્જાઃ ।
ઊર્જમેવાવરુન્ધે । ચિત્રા નક્ષત્રં ભવતિ । ચિત્રં વા એતત્કર્મ ॥ ૩। ૮। ૧। ૧॥
૨ યદશ્વમેધઃ સમૃદ્ધ્યૈ । પુણ્યનામ દેવયજનમધ્યવસ્યતિ ।
પુણ્યામેવ તેન કીર્તિમભિજયતિ । અપદાતીનૃત્વિજઃ સમાવહન્ત્યા
સુબ્રહ્મણ્યાયાઃ । સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ । કેશશ્મશ્રુ વપતે
। નખાનિ નિકૃન્તતે । દતો ધાવતે । સ્નાતિ । અહતં વાસઃ પરિધત્તે ।
પાપ્મનોઽપહત્યૈ । વાચં યત્વોપવસતિ । સુવર્ગસ્ય લોકસ્ય ગુપ્ત્યૈ
। રાત્રિં જાગરયન્ત આસતે । સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ ॥ ૩। ૮। ૧। ૨॥
કર્મ ધત્તે પઞ્ચ ચ ॥ ૧॥
૩ ચતુષ્ટય્ય આપો ભવન્તિ । ચતુઃશફો વા અશ્વઃ પ્રાજાપત્યઃ સમૃદ્ધ્યૈ
। તા દિગ્ભ્યઃ સમાભૃતા ભવન્તિ । દિક્ષુ વા આપઃ । અન્નં વા આપઃ । અદ્ભ્યો
વા અન્નં જાયતે । યદેવાદ્ભ્યોઽન્નં જાયતે । તદવરુન્ધે । તાસુ બ્રહ્મૌદનં
પચતિ । રેત એવ તદ્દધાતિ ॥ ૩। ૮। ૨। ૧॥
૪ ચતુઃશરાવો ભવતિ । દિક્ષ્વેવ પ્રતિતિષ્ઠતિ । ઉભયતો રુક્મૌ ભવતઃ ।
ઉભયત એવાસ્મિન્રુચં દધાતિ । ઉદ્ધરતિ શૃતત્વાય । સર્પિષ્વાન્ભવતિ
મેધ્યત્વાય । ચત્વાર આર્ષેયાઃ પ્રાશ્નન્તિ । દિશામેવ જ્યોતિષિ જુહોતિ ।
ચત્વારિ હિરણ્યાનિ દદાતિ । દિશામેવ જ્યોતીગ્ષ્યવરુન્ધે ॥ ૩। ૮। ૨। ૨॥
૫ યદાજ્યમુચ્છિષ્યતે । તસ્મિન્રશનાં ન્યુનત્તિ । પ્રજાપતિર્વા ઓદનઃ ।
રેત આજ્યમ્ । યદાજ્યે રશનાં ન્યુનત્તિ । પ્રજાપતિમેવ રેતસા સમર્ધયતિ
। દર્ભમયી રશના ભવતિ । બહુ વા એષ કુચરોઽમેધ્યમુપગચ્છતિ
। યદશ્વઃ । પવિત્રં વૈ દર્ભાઃ ॥ ૩। ૮। ૨। ૩॥
૬ યદ્દર્ભમયી રશના ભવતિ । પુનાત્યેવૈનમ્ । પૂતમેનં
મેધ્યમાલભતે । અશ્વસ્ય વા આલબ્ધસ્ય મહિમોદક્રામત્ । સ મહર્ત્વિજઃ
પ્રાવિશત્ । તન્મહર્ત્વિજાં મહર્ત્વિક્ત્વમ્ । યન્મહર્ત્વિજઃ પ્રાશ્નન્તિ ।
મહિમાનમેવાસ્મિન્તદ્દધતિ । અશ્વસ્ય વા આલબ્ધસ્ય રેત ઉદક્રામત્ ।
તથ્સુવર્ણꣳ હિરણ્યમભવત્ । યથ્સુવર્ણꣳ હિરણ્યં દદાતિ ।

રેત એવ તદ્દધાતિ । ઓદને દદાતિ । રેતો વા ઓદનઃ । રેતો હિરણ્યમ્
। રેતસૈવાસ્મિન્રેતો દધાતિ ॥ ૩। ૮। ૨। ૪॥ દધાતિ રુન્ધે દર્ભા
અભવથ્ષટ્ ચ ॥ ૨॥

૭ યો વૈ બ્રહ્મણે દેવેભ્યઃ પ્રજાપતયેઽપ્રતિપ્રોચ્યાશ્વં મેધ્યં
બધ્નાતિ । આ દેવતાભ્યો વૃશ્ચ્યતે । પાપીયાન્ભવતિ । યઃ પ્રતિપ્રોચ્ય । ન
દેવતાભ્ય આવૃશ્ચ્યતે । વસીયાન્ભવતિ । યદાહ । બ્રહ્મન્નશ્વં મેધ્યં
ભન્થ્સ્યામિ દેવેભ્યઃ પ્રજાપતયે તેન રાધ્યાસમિતિ । બ્રહ્મ વૈ બ્રહ્મા ।
બ્રહ્મણ એવ દેવેભ્યઃ પ્રજાપતયે પ્રતિપ્રોચ્યાશ્વં મેધ્યં બધ્નાતિ ॥ ૩। ૮। ૩। ૧॥

૮ ન દેવતાભ્ય આવૃશ્ચ્યતે । વસીયાન્ભવતિ । દેવસ્ય ત્વા સવિતુઃ
પ્રસવ ઇતિ રશનામાદત્તે પ્રસૂત્યૈ । અશ્વિનોર્બાહુભ્યામિત્યાહ
। અશ્વિનૌ હિ દેવાનામધ્વર્યૂ આસ્તામ્ । પૂષ્ણો હસ્તાભ્યામિત્યાહ
યત્યૈ । વ્યૃદ્ધં વા એતદ્યજ્ઞસ્ય । યદયજુષ્કેણ ક્રિયતે ।
ઇમામગૃભ્ણન્રશનામૃતસ્યેત્યધિવદતિ યજુષ્કૃત્યૈ । યજ્ઞસ્ય
સમૃદ્ધ્યૈ ॥ ૩। ૮। ૩। ૨॥

૯ તદાહુઃ । દ્વાદશારત્ની રશના કર્તવ્યા૩ ત્રયોદશારત્ની૩ રિતિ
। ઋષભો વા એષ ઋતૂનામ્ । યથ્સંવથ્સરઃ । તસ્ય ત્રયોદશો
માસો વિષ્ટપમ્ । ઋષભ એષ યજ્ઞાનામ્ । યદશ્વમેધઃ ।
યથા વા ઋષભસ્ય વિષ્ટપમ્ । એવમેતસ્ય વિષ્ટપમ્ ।
ત્રયોદશમરત્નિꣳ રશનાયામુપાદધાતિ ॥ ૩। ૮। ૩। ૩॥

૧૦ યથર્ષભસ્ય વિષ્ટપꣳસરꣳસ્કરોતિ । તાદૃગેવ
તત્ । પૂર્વ આયુષિ વિદથેષુ કવ્યેત્યાહ । આયુરેવાસ્મિન્દધાતિ
। તયા દેવાઃ સુતમાબભૂવુરિત્યાહ । ભૂતિમેવોપાવર્તતે ।
ઋતસ્ય સામન્થ્સરમારપન્તીત્યાહ । સત્યં વા ઋતમ્ ।
સત્યેનૈવૈનમૃતેનારભતે । અભિધા અસીત્યાહ ॥ ૩। ૮। ૩। ૪॥

૧૧ તસ્માદશ્વમેધયાજી સર્વાણિ ભૂતાન્યભિભવતિ । ભુવનમસીત્યાહ
। ભૂમાનમેવોપૈતિ । યન્તાઽસીત્યાહ । યન્તારમેવૈનં કરોતિ ।
ધર્તાઽસીત્યાહ । ધર્તારમેવૈનં કરોતિ । સોઽગ્નિં વૈશ્વાનરમિત્યાહ ।

અગ્નાવેવૈનં વૈશ્વાનરે જુહોતિ । સપ્રથસમિત્યાહ ॥ ૩। ૮। ૩। ૫॥

૧૨ પ્રજયૈવૈનં પશુભિઃ પ્રથયતિ । સ્વાહાકૃત ઇત્યાહ । હોમ

એવાસ્યૈષઃ । પૃથિવ્યામિત્યાહ । અસ્યામેવૈનં પ્રતિષ્ઠાપયતિ

। યન્તા રાડ્યન્તાઽસિ યમનો ધર્તાઽસિ ધરુણ ઇત્યાહ ।

રૂપમેવાસ્યૈતન્મહિમાનં વ્યાચષ્ટે । કૃષ્યૈ ત્વા ક્ષેમાય ત્વા રય્યૈ

ત્વા પોષાય ત્વેત્યાહ । આશિષમેવૈતામાશાસ્તે । સ્વગા ત્વા દેવેભ્ય

ઇત્યાહ । દેવેભ્ય એવૈનગ્ગ્ સ્વગા કરોતિ । સ્વાહા ત્વા પ્રજાપતય ઇત્યાહ ।

પ્રાજાપત્યો વા અશ્વઃ । યસ્યા એવ દેવતાયા આલભ્યતે । તયૈવૈનઁ

સમર્ધયતિ ॥ ૩। ૮। ૩। ૬॥ બધ્નાતિ સમૃદ્ધ્યા ઉપાદધાત્યસીત્યાહ

સપ્રથસમિત્યાહ દેવેભ્ય ઇત્યાહ પઞ્ચ ચ ॥ ૩॥

૧૩ યઃ પિતુરનુજાયાઃ પુત્રઃ । સ પુરસ્તાન્નયતિ । યો માતુરનુજાયાઃ પુત્રઃ

। સ પશ્ચાન્નયતિ । વિષ્વઞ્ચમેવાસ્માત્પાપ્માનં વિવૃહતઃ । યો અર્વન્તં

જિઘાઁસતિ તમભ્યમીતિ વરુણ ઇતિ શ્વાનં ચતુરક્ષં પ્રસૌતિ ।

પરો મર્તઃ પરઃ શ્વેતિ શુનશ્ચતુરક્ષસ્ય પ્રહન્તિ । શ્વેવ વૈ પાપ્મા

ભ્રાતૃવ્યઃ । પાપ્માનમેવાસ્ય ભ્રાતૃવ્યઁ હન્તિ । સૈધ્રકં મુસલં

ભવતિ ॥ ૩। ૮। ૪। ૧॥

૧૪ કર્મ કર્મૈવાસ્મૈ સાધયતિ । પૌગ્શ્ચલેયો હન્તિ ।

પુગ્ગ્શ્ચલ્વાં વૈ દેવાઃ શુચં ન્યદધુઃ । શુચૈવાસ્ય શુચઁ

હન્તિ । પાપ્મા વા એતમીપ્સતીત્યાહુઃ । યોઽશ્વમેધેન યજત ઇતિ

। અશ્વસ્યાધસ્પદમુપાસ્યતિ । વજ્રો વા અશ્વઃ પ્રાજાપત્યઃ । વજ્રેણૈવ

પાપ્માનં ભ્રાતૃવ્યમવક્રામતિ । દક્ષિણાઽપપ્લાવયતિ ॥ ૩। ૮। ૪। ૨॥

૧૫ પાપ્માનમેવાસ્માચ્છમલમપપ્લાવયતિ । ઐષીક ઉદૂહો ભવતિ

। આયુર્વા ઇષીકાઃ । આયુરેવાસ્મિન્દધતિ । અમૃતં વા ઇષીકાઃ ।

અમૃતમેવાસ્મિન્દધતિ । વેતસ શાખોપ સંબદ્ધા ભવતિ ।

અપ્સુયોનિર્વા અશ્વઃ । અપ્સુજો વેતસઃ । સ્વાદેવૈનં યોનેર્નિર્મિમીતે ।

પુરસ્તાત્પ્રત્યઞ્ચમભ્યુદૂહતિ । પુરસ્તાદેવાસ્મિન્પ્રતીચ્યમૃતં

દધાતિ । અહં ચ ત્વં ચ વૃત્રહન્નિતિ બ્રહ્મા યજમાનસ્ય

હસ્તં ગૃહ્ણાતિ । બ્રહ્મક્ષત્રે એવ સંદધાતિ । અભિ ક્રત્વેન્દ્ર
ભૂરધજ્મન્નિત્યધ્વર્યુર્યજમાનં વાચયત્યભિજિત્યૈ ॥ ૩। ૮। ૪। ૩॥ ભવતિ
પ્લાવયતિ મિમીતે પઞ્ચ ચ ॥ ૪॥

૧૬ ચત્વાર ઋત્વિજઃ સમુક્ષન્તિ । આભ્ય એવૈનં ચતસૃભ્યો
દિગ્ભ્યોઽભિસમીરયન્તિ । શતેન રાજપુત્રૈઃ સહાધ્વર્યુઃ ।
પુરસ્તાત્પ્રત્યઙ્તિષ્ઠન્પ્રોક્ષતિ । અનેનાશ્વેન મેધ્યેનેષ્ટ્વા । અયꣳ
રાજા વૃત્રં વધ્યાદિતિ । રાજ્યં વા અધ્વર્યુઃ । ક્ષત્રꣳ રાજપુત્રઃ ।
રાજ્યેનૈવાસ્મિન્ ક્ષત્રં દધાતિ । શતેનારાજભિરુગ્રૈઃ સહ બ્રહ્મા ॥
૩। ૮। ૫। ૧॥

૧૭ દક્ષિણત ઉદઙ્ તિષ્ઠન્ પ્રોક્ષતિ । અનેનાશ્વેન મેધ્યેનેષ્ટ્વા ।
અયꣳ રાજાઽપ્રતિધૃષ્યોઽસ્ત્વિતિ । બલં વૈ બ્રહ્મા । બલમરાજોગ્રઃ ।
બલેનૈવાસ્મિન્બલં દધાતિ । શતેન સૂતગ્રામણિભિઃ સહ હોતા । પશ્ચાત્
પ્રાઙ્ તિષ્ઠન્ પ્રોક્ષતિ । અનેનાશ્વેન મેધ્યેનેષ્ટ્વા । અયꣳ રાજાઽસ્યૈ
વિશઃ ॥ ૩। ૮। ૫। ૨॥

૧૮ બહુગ્વૈ બહ્વશ્વાયૈ બહ્વજાવિકાયૈ ।
બહુવ્રીહિયવાયૈ બહુમાષતિલાયૈ । બહુહિરણ્યાયૈ
બહુહસ્તિકાયૈ । બહુદાસપૂરુષાયૈ રયિમત્યૈ પુષ્ટિમત્યૈ ।
બહુરાયસ્પોષાયૈ રાજાઽસ્ત્વિતિ । ભૂમા વૈ હોતા । ભૂમા સૂતગ્રામણ્યઃ
। ભૂમ્નૈવાસ્મિન્ભૂમાનં દધાતિ । શતેન ક્ષત્તસંગ્રહીતૃભિઃ સહોદ્ગાતા
। ઉત્તરતો દક્ષિણા તિષ્ઠન્ પ્રોક્ષતિ ॥ ૩। ૮। ૫। ૩॥

૧૯ અનેનાશ્વેન મેધ્યેનેષ્ટ્વા । અયꣳ રાજા સર્વમાયુરેત્વિતિ ।
આયુર્વા ઉદ્ગાતા । આયુઃ, ક્ષત્તસંગ્રહીતારઃ । આયુષૈવાસ્મિન્નાયુર્દધાતિ ।
શતꣳ શતં ભવન્તિ । શતાયુઃ પુરુષઃ શતેન્દ્રિયઃ । આયુષ્યેવેન્દ્રિયે
પ્રતિતિષ્ઠતિ । ચતુઃશતા ભવન્તિ । ચતસ્રો દિશઃ । દિક્ષ્વેવ
પ્રતિતિષ્ઠતિ ॥ ૩। ૮। ૫। ૪॥ બ્રહ્મા વિશ ઉક્ષિતિ દિશ એકં ચ ॥ ૫॥

૨૦ યથા વૈ હવિષો ગૃહીતસ્ય સ્કન્દતિ । એવં વા એતદશ્વસ્ય
સ્કન્દતિ । યન્નિક્તમનાલબ્ધમુત્સૃજન્તિ । યથ્સ્તોક્યા અન્વાહ ।

સર્વંહુતમેવૈનં કરોત્યસ્કન્દાય । અસ્કન્ન ँ હિ તત્ । યદ્ધુતસ્ય
સ્કન્દતિ । સહસ્રમન્વાહ । સહસ્રસંમિતઃ સુવર્ગો લોકઃ । સુવર્ગસ્ય
લોકસ્યાભિજિત્યૈ ॥ ૩। ૮। ૬। ૧॥

૨૧ યત્પરિમિતા અનુબ્રૂયાત્ । પરિમિતમવરુન્ધીત । અપરિમિતા અન્વાહ । અપરિમિતઃ
સુવર્ગો લોકઃ । સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ । સ્તોક્યા જુહોતિ । યા એવ
વર્ષ્યા આપઃ । તા અવરુન્ધે । અસ્યાં જુહોતિ । ઇયં વા અગ્નિર્વૈશ્વાનરઃ ॥
૩। ૮। ૬। ૨॥

૨૨ અસ્યામેવૈનાઃ પ્રતિષ્ઠાપયતિ । ઉવાચ હ પ્રજાપતિઃ । સ્તોક્યાસુ વા
અહમશ્વમેધ ँ સર ँ સ્થાપયામિ । તેન તતઃ સર ँ સ્થિતેન ચરામીતિ
। અગ્નયે સ્વાહેત્યાહ । અગ્નય એવૈનં જુહોતિ । સોમાય સ્વાહેત્યાહ ।
સોમાયૈવૈનં જુહોતિ । સવિત્રે સ્વાહેત્યાહ । સવિત્ર એવૈનં જુહોતિ ॥ ૩। ૮। ૬। ૩॥

૨૩ સરસ્વત્યૈ સ્વાહેત્યાહ । સરસ્વત્યા એવૈનં જુહોતિ । પૂષ્ણે સ્વાહેત્યાહ ।
પૂષ્ણ એવૈનં જુહોતિ । બૃહસ્પતયે સ્વાહેત્યાહ । બૃહસ્પતય એવૈનં
જુહોતિ । અપાં મોદાય સ્વાહેત્યાહ । અદ્ભ્ય એવૈનં જુહોતિ । વાયવે સ્વાહેત્યાહ
। વાયવ એવૈનં જુહોતિ ॥ ૩। ૮। ૬। ૪॥

૨૪ મિત્રાય સ્વાહેત્યાહ । મિત્રાયૈવૈનં જુહોતિ । વરુણાય સ્વાહેત્યાહ ।
વરુણાયૈવૈનં જુહોતિ । એતાભ્ય એવૈનં દેવતાભ્યો જુહોતિ । દશ દશ
સંપાદં જુહોતિ । દશાક્ષરા વિરાટ્ । અન્નં વિરાટ્ । વિરાજૈવાન્નાદ્યમવરુન્ધે
। પ્ર વા એષોઽસ્માલ્લોકાચ્ચ્યવતે । યઃ પરાચીરાહુતીર્જુહોતિ । પુનઃ
પુનરભ્યાવર્તં જુહોતિ । અસ્મિન્નેવ લોકે પ્રતિતિષ્ઠતિ । એતા ँ હ વાવ
સોઽશ્વમેધસ્ય સર ँ સ્થિતિમુવાચાસ્કન્દાય । અસ્કન્ન ँ હિ તત્ ।
યદ્યજ્ઞસ્ય સર ँ સ્થિતસ્ય સ્કન્દતિ ॥ ૩। ૮। ૬। ૫॥ અભિજિત્યૈ વૈશ્વાનરઃ
સવિત્ર એવૈનં જુહોતિ વાયવ એવૈનં જુહોતિ ચ્યવતે ષટ્ચ ॥ ૬॥

૨૫ પ્રજાપતયે ત્વા જુષ્ટં પ્રોક્ષામીતિ પુરસ્તાત્ પ્રત્યઙ્ તિષ્ઠન્ પ્રોક્ષતિ
। પ્રજાપતિર્વૈ દેવાનામન્નાદો વીર્યાવાન્ । અન્નાદ્યમેવાસ્મિન્વીર્યં
દધાતિ । તસ્માદશ્વઃ પશૂનામન્નાદો વીર્યાવત્તમઃ । ઇન્દ્રાગ્નિભ્યાં ત્વેતિ
દક્ષિણતઃ । ઇન્દ્રાગ્ની વૈ દેવાનામોજિષ્ઠૌ બલિષ્ઠૌ । ઓજ એવાસ્મિન્બલં

દધાતિ । તસ્માદશ્વઃ પશૂનામોજિષ્ઠો બલિષ્ઠઃ । વાયવે ત્વેતિ પશ્ચાત્ ।
વાયુર્વૈ દેવાનામાશુઃ સારસારિતમઃ ॥ ૩। ૮। ૭। ૧॥

૨૬ જવમેવાસ્મિન્દધાતિ । તસ્માદશ્વઃ પશૂનામાશુઃ સારસારિતમઃ
। વિશ્વેભ્યસ્ત્વા દેવેભ્ય ઇત્યુત્તરતઃ । વિશ્વે વૈ દેવા દેવાનાં
યશસ્વિતમાઃ । યશ એવાસ્મિન્દધાતિ । તસ્માદશ્વઃ પશૂનાં
યશસ્વિતમઃ । દેવેભ્યસ્ત્વેત્યધસ્તાત્ । દેવા વૈ દેવાનામપચિતતમાઃ ।
અપચિતિમેવાસ્મિન્દધાતિ । તસ્માદશ્વઃ પશૂનામપચિતતમઃ ॥ ૩। ૮। ૭। ૨॥

૨૭ સર્વેભ્યસ્ત્વા દેવેભ્ય ઇત્યુપરિષ્ટાત્ । સર્વે વૈ દેવાસ્ત્વિષિમન્તો
હરસ્વિનઃ । ત્વિષિમેવાસ્મિન્ હરો દધાતિ । તસ્માદશ્વઃ પશૂનાં ત્વિષિમાન્
હરસ્વિતમઃ । દિવે ત્વાઽન્તરિક્ષાય ત્વા પૃથિવ્યૈ ત્વેત્યાહ । એભ્ય
એવૈનં લોકેભ્યઃ પ્રોક્ષતિ । સતે ત્વાઽસતે ત્વાઽદ્ભ્યસ્ત્વૌષધીભ્યસ્ત્વા
વિશ્વેભ્યસ્ત્વા ભૂતેભ્ય ઇત્યાહ । તસ્માદશ્વમેધયાજિન ँ સર્વાણિ
ભૂતાન્યુપજીવન્તિ । બ્રહ્મવાદિનો વદન્તિ । યત્પ્રાજાપત્યોઽશ્વઃ । અથ
કસ્માદેનમન્યાભ્યો દેવતાભ્યોઽપિ પ્રોક્ષતીતિ । અશ્વે વૈ સર્વા દેવતા
અન્વાયત્તાઃ । તં યદ્વિશ્વેભ્યસ્ત્વા ભૂતેભ્ય ઇતિ પ્રોક્ષતિ । દેવતા
એવાસ્મિન્નન્વાયાતયતિ । તસ્માદશ્વે સર્વા દેવતા અન્વાયત્તાઃ ॥ ૩। ૮। ૭। ૩॥ સારસારિતમોપચિતતમઃ
પ્રાજાપત્યોઽશ્વઃ પઞ્ચ ચ ॥ ૭॥

૨૮ યથા વૈ હવિષો ગૃહીતસ્ય સ્કન્દતિ । એવં વા એતદશ્વસ્ય સ્કન્દતિ
। યત્પ્રોક્ષિતમનાલબ્ધમુત્સૃજન્તિ । યદશ્વચરિતાનિ જુહોતિ ।
સર્વહુતમેવૈનં કરોત્યસ્કન્દાય । અસ્કન્ન ँ હિ તત્ । યદ્ધુતસ્ય
સ્કન્દતિ । ઈંકારાય સ્વાહેંકૃતાય સ્વાહેત્યાહ । એતાનિ વા અશ્વચરિતાનિ
। ચરિતૈરેવૈન ँ સમર્ધયતિ ॥ ૩। ૮। ૮। ૧॥

૨૯ તદાહુઃ । અનાહુતયો વા અશ્વચરિતાનિ । નૈતા હોતવ્યા ઇતિ ।
અથો ખલ્વાહુઃ । હોતવ્યા એવ । અત્ર વાવૈવં વિદ્વાનશ્વમેધ ँ
સર ँ સ્થાપયતિ । યદશ્વચરિતાનિ જુહોતિ । તસ્માદ્ધોતવ્યા ઇતિ ।
બહિર્ધા વા એનમેતદાયતનાદ્દધાતિ । ભ્રાતૃવ્યમસ્મૈ જનયતિ ॥ ૩। ૮। ૮। ૨॥

૩૦ યસ્યાનાયતનેઽન્યત્રાગ્નેરાહુતીર્જુહોતિ । સાવિત્રિયા ઇષ્ટ્યાઃ

પુરસ્તાથ્સ્વિષ્ટકૃતઃ । આહવનીયેઽશ્વચરિતાનિ જુહોતિ । આયતન
એવાસ્યાહુતીર્જુહોતિ । નાસ્મૈ ભ્રાતૃવ્યં જનયતિ । તદાહુઃ । યજ્ઞમુખે
યજ્ઞમુખે હોતવ્યાઃ । યજ્ઞસ્ય ક્લૃપ્ત્યૈ । સુવર્ગસ્ય લોકસ્યાનુખ્યાત્યા
ઇતિ । અથો ખલ્વાહુઃ ।

૩૧ યદ્યજ્ઞમુખે યજ્ઞમુખે જુહુયાત્ । પશુભિર્યજમાનં વ્યર્ધયેત્
। અવ સુવર્ગાલ્લોકાત્પદ્યેત । પાપીયાન્થ્સ્યાદિતિ । સકૃદેવ
હોતવ્યાઃ । ન યજમાનં પશુભિર્વ્યર્ધયતિ । અભિ સુવર્ગં લોકં
જયતિ । ન પાપીયાન્ભવતિ । અષ્ટાચત્વારિꣳ શતમશ્વરૂપાણિ જુહોતિ ।
અષ્ટાચત્વારિꣳ શદક્ષરા જગતી । જાગતોઽશ્વઃ પ્રાજાપત્યઃ સમૃદ્ધ્યૈ ।
એકમતિરિક્તં જુહોતિ । તસ્માદેકઃ પ્રજાસ્વર્ધુકઃ ॥ ૩। ૮। ૮। ૪॥ અર્ધયતિ
જનયતિ ખલ્વાહુર્જગતી ત્રીણિ ચ ॥ ૮॥

૩૨ વિભૂર્માત્રા પ્રભૂઃ પિત્રેત્યાહ । ઇયં વૈ માતા । અસૌ પિતા ।
આભ્યામેવૈનં પરિદદાતિ । અશ્વોઽસિ હયોઽસીત્યાહ । શાસ્ત્યેવૈનમેતત્
। તસ્માચ્છિષ્ટાઃ પ્રજા જાયન્તે । અત્યોઽસીત્યાહ । તસ્માદશ્વઃ
સર્વાન્પશૂનત્યેઽતિ । તસ્માદશ્વઃ સર્વેષાં પશૂનાગ્ શ્રૈષ્ઠ્યં ગચ્છતિ ॥

૩। ૮। ૯। ૧॥

૩૩ પ્ર યશઃ શ્રૈષ્ઠ્યમાપ્નોતિ । ય એવં વેદ । નરોઽસ્યર્વાઽસિ
સપ્તિરસિ વાજ્યસીત્યાહ । રૂપમેવાસ્યૈતન્મહિમાનં વ્યાચષ્ટે ।
યયુર્નામાઽસીત્યાહ । એતદ્વા અશ્વસ્ય પ્રિયં નામધેયમ્ । પ્રિયેણૈવૈનં
નામધેયેનાભિવદતિ । તસ્માદપ્યામિત્રૌ સંગત્ય । નામ્ના ચેદ્ધ્વયેતે ।
મિત્રમેવ ભવતઃ ॥ ૩। ૮। ૯। ૨॥

૩૪ આદિત્યાનાં પત્વાઽન્વિહીત્યાહ । આદિત્યાનેવૈનં ગમયતિ । અગ્નયે
સ્વાહા સ્વાહેન્દ્રાગ્નિભ્યામિતિ પૂર્વહોમાઞ્જુહોતિ । પૂર્વ એવ દ્વિષન્તં
ભ્રાતૃવ્યમતિક્રામતિ । ભૂરસિ ભુવે ત્વા ભવ્યાય ત્વા ભવિષ્યતે
ત્વેત્યુથ્સૃજતિ સર્વત્વાય । દેવા આશાપાલા એતં દેવેભ્યોઽશ્વં મેધાય
પ્રોક્ષિતં ગોપાયતેત્યાહ । શતં વૈ તલ્પ્યા રાજપુત્રા દેવા આશાપાલાઃ ।
તેભ્ય એવૈનં પરિદદાતિ । ઈશ્વરો વા અશ્વઃ પ્રમુક્તઃ પરાં પરાવતં

ગન્તોઃ । ઇહ ધૃતિઃ સ્વાહેહ વિધૃતિઃ સ્વાહેહ રન્તિઃ સ્વાહેહ રમતિઃ
સ્વાહેતિ ચતૃષુ પથ્સુ જુહોતિ ॥ ૩। ૮। ૯। ૩॥
૩૫ એતા વા અશ્વસ્ય બન્ધનમ્ । તાભિરેવૈનં બધ્નાતિ । તસ્માદશ્વઃ
પ્રમુક્તો બન્ધનમાગચ્છતિ । તસ્માદશ્વઃ પ્રમુક્તો બન્ધનં ન જહાતિ
। રાષ્ટ્રં વા અશ્વમેધઃ । રાષ્ટ્રે ખલુ વા એતે વ્યાયચ્છન્તે । યેઽશ્વં
મેધ્ય ૅ રક્ષન્તિ । તેષાં ય ઉદૃચં ગચ્છન્તિ । રાષ્ટ્રાદેવ તે
રાષ્ટ્રં ગચ્છન્તિ । અથ ય ઉદૃચં ન ગચ્છન્તિ ।
૩૬ રાષ્ટ્રાદેવ તે વ્યવચ્છિદ્યન્તે । પરા વા એષ સિચ્યતે ।
યોઽબલોઽશ્વમેધેન યજતે । યદમિત્રા અશ્વં વિન્દેરન્ । હન્યેતાસ્ય
યજ્ઞઃ । ચતુઃશતા રક્ષન્તિ । યજ્ઞસ્યાઘાતાય । અથાન્યમાનીય
પ્રોક્ષેયુઃ । સૈવ તતઃ પ્રાયશ્ચિત્તિઃ ॥ ૩। ૮। ૯। ૪॥ ગચ્છતિ ભવતઃ
પથ્સુ જુહોતિ ન ગચ્છન્તિ નવ ચ ॥ ૯॥
૩૭ પ્રજાપતિરકામયતાશ્વમેધેન યજેયેતિ । સ તપોઽતપ્યત । તસ્ય
તેપાનસ્ય । સપ્તાત્મનો દેવતા ઉદક્રામન્ । સા દીક્ષાઽભવત્ । સ
એતાનિ વૈશ્વદેવાન્યપશ્યત્ । તાન્યજુહોત્ । તૈર્વૈ સ દીક્ષામવારુન્ધ ।
યદ્વૈશ્વદેવાનિ જુહોતિ । દીક્ષામેવ તૈર્યજમાનોઽવરુન્ધે ॥ ૩। ૮। ૧૦। ૧॥
૩૮ સપ્ત જુહોતિ । સપ્ત હિ તા દેવતા ઉદક્રામન્ । અન્વહં
જુહોતિ । અન્વહમેવ દીક્ષામવરુન્ધે । ત્રીણિ વૈશ્વદેવાનિ જુહોતિ ।
ચત્વાર્યૌદ્ગ્રહણાનિ । સપ્ત સંપદ્યન્તે । સપ્ત વૈ શીર્ષણ્યાઃ પ્રાણાઃ ।
પ્રાણા દીક્ષા । પ્રાણૈરેવ પ્રાણાન્દીક્ષામવરુન્ધે ॥ ૩। ૮। ૧૦। ૨॥
૩૯ એકવિ ૅ શતિં વૈશ્વદેવાનિ જુહોતિ । એકવિ ૅ શતિર્વૈ દેવલોકાઃ
। દ્વાદશ માસાઃ પઞ્ચર્તવઃ । ત્રય ઇમે લોકાઃ । અસાવાદિત્ય
એકવિ ૅ શઃ । એષ સુવર્ગો લોકઃ । તદ્દૈવ્યં ક્ષત્ત્રમ્ । સા શ્રીઃ ।
તદ્બ્રધ્નસ્ય વિષ્ટપમ્ । તથ્સ્વારાજ્યમુચ્યતે ॥ ૩। ૮। ૧૦। ૩॥
૪૦ ત્રિ ૅ શતમૌદ્ગ્રહણાનિ જુહોતિ । ત્રિ ૅ શદક્ષરા વિરાટ્ । અન્નં
વિરાટ્ । વિરાજૈવાન્નાદ્યમવરુન્ધે । ત્રેધા વિભજ્ય દેવતાં જુહોતિ ।
ત્ર્યાવૃતો વૈ દેવાઃ । ત્ર્યાવૃત ઇમે લોકાઃ । એષાં લોકાનામાપ્ત્યૈ ।

એષાં લોકાનાં ક્લૃપ્ત્યૈ । અપ વા એતસ્માત્ પ્રાણાઃ ક્રામન્તિ ॥ ૩। ૮। ૧૦। ૪॥
૪૧ યો દીક્ષામતિ રેચયતિ । સપ્તાહં પ્રચરન્તિ । સપ્ત વૈ
શીર્ષણ્યાઃ પ્રાણાઃ । પ્રાણા દીક્ષા । પ્રાણૈરેવ પ્રાણાન્દીક્ષામવરુન્ધે ।
પૂર્ણાહુતિમુત્તમાં જુહોતિ । સર્વં વૈ પૂર્ણાહુતિઃ । સર્વમેવાપ્નોતિ ।
અથો ઇયં વૈ પૂર્ણાહુતિઃ । અસ્યામેવ પ્રતિતિષ્ઠતિ ॥ ૩। ૮। ૧૦। ૫॥ રુન્ધે
પ્રાણાન્દીક્ષામવરુન્ધ ઉચ્યતે ક્રામન્તિ તિષ્ઠતિ ॥ ૧૦॥

૪૨ પ્રજાપતિરશ્વમેધમસૃજત । તꣳ સૃષ્ટં ન કિંચનોદયચ્છત્ । તં
વૈશ્વદેવાન્યેવોદયચ્છન્ । યદ્વૈશ્વદેવાનિ જુહોતિ । યજ્ઞસ્યોધૃત્યૈ ।
સ્વાહાऽऽધિમાધીતાય સ્વાહા । સ્વાહાऽऽધીતં મનસે સ્વાહા । સ્વાહા મનઃ
પ્રજાપતયે સ્વાહા । કાય સ્વાહા કસ્મૈ સ્વાહા કતમસ્મૈ સ્વાહેતિ પ્રાજાપત્યે
મુખ્યે ભવતઃ । પ્રજાપતિમુખાભિરેવૈનં દેવતાભિરુદ્યચ્છતે ॥ ૩। ૮। ૧૧। ૧॥
૪૩ અદિત્યૈ સ્વાહાऽદિત્યૈ મહ્યૈ સ્વાહાऽદિત્યૈ સુમૃડીકાયૈ સ્વાહેત્યાહ ।
ઇયં વા અદિતિઃ । અસ્યા એવૈનં પ્રતિષ્ઠાયોદ્યચ્છતે । સરસ્વત્યૈ સ્વાહા
સરસ્વત્યૈ બૃહત્યૈ સ્વાહા સરસ્વત્યૈ પાવકાયૈ સ્વાહેત્યાહ । વાગ્વૈ સરસ્વતી
। વાચૈવૈનમુદ્યચ્છતે । પૂષ્ણે સ્વાહા પૂષ્ણે પ્રપથ્યાય સ્વાહા પૂષ્ણે
નરન્ધિષાય સ્વાહેત્યાહ । પશવો વૈ પૂષા । પશુભિરેવૈનમુદ્યચ્છતે
। ત્વષ્ટ્રે સ્વાહા ત્વષ્ટ્રે તુરીપાય સ્વાહા ત્વષ્ટ્રે પુરુરૂપાય સ્વાહેત્યાહ
। ત્વષ્ટા વૈ પશૂનાં મિથુનાનાꣳ રૂપકૃત્ । રૂપમેવ પશુષુ
દધાતિ । અથો રૂપૈરેવૈનમુદ્યચ્છતે । વિષ્ણવે સ્વાહા વિષ્ણવે
નિખુર્યપાય સ્વાહા વિષ્ણવે નિભૂયપાય સ્વાહેત્યાહ । યજ્ઞો વૈ વિષ્ણુઃ ।
યજ્ઞાયૈવૈનમુદ્યચ્છતે । પૂર્ણાહુતિમુત્તમાં જુહોતિ । પ્રત્યુત્તબ્ધ્યૈ
સયત્વાય ॥ ૩। ૮। ૧૧। ૨॥ યચ્છતે પુરુરૂપાય સ્વાહેત્યાહાષ્ટૌ ચ
॥ ૧૧॥

૪૪ સાવિત્રમષ્ટાકપાલં પ્રાતર્નિર્વપતિ । અષ્ટાક્ષરા ગાયત્રી । ગાયત્રં
પ્રાતઃસવનમ્ । પ્રાતઃસવનાદેવૈનં ગાયત્રિયાશ્છન્દસોऽધિ
નિર્મિમીતે । અથો પ્રાતઃસવનમેવ તેનાપ્નોતિ । ગાયત્રીં છન્દઃ ।
સવિત્રે પ્રસવિત્ર એકાદશકપાલં મધ્યન્દિને । એકાદશાક્ષરા ત્રિષ્ટુપ્ ।

ત્રૈષ્ટુભં માધ્યન્દિન ँ સવનમ્ । માધ્યન્દિનાદેવૈન ँ સવનાત્
ત્રિષ્ટુભશ્છન્દસોઽધિ નિર્મિમીતે ॥ ૩। ૮। ૧૨। ૧॥

૪૫ અથો માધ્યન્દિનમેવ સવનં તેનાપ્નોતિ । ત્રિષ્ટુભં છન્દઃ ।
સવિત્ર આસવિત્રે દ્વાદશકપાલમપરાહ્ણે । દ્વાદશાક્ષરા જગતી । જાગતં
તૃતીયસવનમ્ । તૃતીયસવનાદેવૈનં જગત્યાશ્છન્દસોઽધિ
નિર્મિમીતે । અથો તૃતીયસવનમેવ તેનાપ્નોતિ । જગતીં છન્દઃ । ઈશ્વરો વા
અશ્વઃ પ્રમુક્તઃ પરાં પરાવતં ગન્તોઃ । ઇહ ધૃતિઃ સ્વાહેહ વિધૃતિઃ
સ્વાહેહ રન્તિઃ સ્વાહેહ રમતિઃ સ્વાહેતિ ચતસ્ર આહુતીર્જુહોતિ ।

૪૬ ચતસ્રો દિશઃ । દિગ્ભિરેવૈનં પરિગૃહ્ણાતિ । આશ્વત્થો વ્રજો
ભવતિ । પ્રજાપતિર્દેવેભ્યો નિલાયત । અશ્વો રૂપં કૃત્વા ।
સોઽશ્વત્થે સંવથ્સરમતિષ્ઠત્ । તદશ્વત્થસ્યાશ્વત્થત્વમ્ ।
યદાશ્વત્થો વ્રજો ભવતિ । સ્વ એવૈનં યોનૌ પ્રતિષ્ઠાપયતિ ॥ ૩। ૮। ૧૨। ૨॥ ત્રિષ્ટુભશ્છન્દસોઽધિ નિર્મિમીતે
જુહોતિ નવ ચ ॥ ૧૨॥

૪૭ આ બ્રહ્મન્બ્રાહ્મણો બ્રહ્મવર્ચસી જાયતામિત્યાહ । બ્રાહ્મણ એવ
બ્રહ્મવર્ચસં દધાતિ । તસ્માત્પુરા બ્રાહ્મણો બ્રહ્મવર્ચસ્યજાયત
। આઽસ્મિન્રાષ્ટ્રે રાજન્ય ઇષવ્યઃ શૂરો મહારથો જાયતામિત્યાહ
। રાજન્ય એવ શૌર્યં મહિમાનં દધાતિ । તસ્માત્પુરા રાજન્ય
ઇષવ્યઃ શૂરો મહારથોઽજાયત । દોગ્ધ્રી ધેનુરિત્યાહ । ધેન્વામેવ પયો
દધાતિ । તસ્માત્પુરા દોગ્ધ્રી ધેનુરજાયત । વોઢાઽનડ્વાનિત્યાહ ॥ ૩। ૮। ૧૩। ૧॥

૪૮ અનડુહ્યેવ વીર્યં દધાતિ । તસ્માત્પુરા વોઢાઽનડ્વાનજાયત । આશુઃ
સપ્તિરિત્યાહ । અશ્વ એવ જવં દધાતિ । તસ્માત્ પુરાઽઽશુરશ્વોઽજાયત ।
પુરંધિર ँ યોષેત્યાહ । યોષિત્યેવ રૂપં દધાતિ । તસ્માથ્સ્ત્રી યુવતિઃ પ્રિયા
ભાવુકા । જિષ્ણૂ રથેષ્ઠા ઇત્યાહ । આ હ વૈ તત્ર જિષ્ણૂ રથેષ્ઠા
જાયતે ॥ ૩। ૮। ૧૩। ૨॥

૪૯ યત્રૈતેન યજ્ઞેન યજન્તે । સભેયો યુવેત્યાહ । યો વૈ પૂર્વવયસી
। સ સભેયો યુવા । તસ્માદ્યુવા પુમાન્પ્રિયો ભાવુકઃ । આઽસ્ય યજમાનસ્ય
વીરો જાયતામિત્યાહ । આ હ વૈ તત્ર યજમાનસ્ય વીરો જાયતે । યત્રૈતેન

યજ્ઞેન યજન્તે । નિકામે નિકામે નઃ પર્જન્યો વર્ષત્વિત્યાહ । નિકામે
નિકામે હ વૈ તત્ર પર્જન્યો વર્ષતિ । યત્રૈતેન યજ્ઞેન યજન્તે ।
ફલિન્યો ન ઓષધયઃ પચ્યન્તામિત્યાહ । ફલિન્યો હ વૈ તત્રૌષધયઃ
પચ્યન્તે । યત્રૈતેન યજ્ઞેન યજન્તે । યોગક્ષેમો નઃ કલ્પતામિત્યાહ ।
કલ્પતે હ વૈ તત્ર પ્રજાભ્યો યોગક્ષેમઃ । યત્રૈતેન યજ્ઞેન યજન્તે
॥ ૩। ૮। ૧૩। ૩॥ અનડ્વાનિત્યાહ જાયતે વર્ષતિ સપ્ત ચ ॥ ૧૩॥

૫૦ પ્રજાપતિર્દેવેભ્યો યજ્ઞાન્વ્યાદિશત્ । સ આત્મન્નશ્વમેધમધત્ત ।
તં દેવા અબ્રુવન્ । એષ વાવ યજ્ઞઃ । યદશ્વમેધઃ । અપ્યેવ નોઽત્રાસ્ત્વિતિ
। તેભ્ય એતાનન્નહોમાન્ પ્રાયચ્છત્ । તાનજુહોત્ । તૈર્વૈ સ દેવાનપ્રીણાત્ ।
યદન્નહોમાઞ્જુહોતિ ॥ ૩। ૮। ૧૪। ૧॥

૫૧ દેવાનેવ તૈર્યજમાનઃ પ્રીણાતિ । આજ્યેન જુહોતિ । અગ્નેર્વા એતદ્રૂપમ્ । યદાજ્યમ્
। યદાજ્યેન જુહોતિ । અગ્નિમેવ તત્પ્રીણાતિ । મધુના જુહોતિ । મહત્યૈ વા
એતદ્દેવતાયૈ રૂપમ્ । યન્મધુ । યન્મધુના જુહોતિ ॥ ૩। ૮। ૧૪। ૨॥

૫૨ મહતીમેવ તદ્દેવતાં પ્રીણાતિ । તણ્ડુલૈર્જુહોતિ । વસૂનાં વા એતદ્રૂપમ્
। યત્તણ્ડુલાઃ । યત્તણ્ડુલૈર્જુહોતિ । વસૂનેવ તત્પ્રીણાતિ । પૃથુકૈર્જુહોતિ
। રુદ્રાણાં વા એતદ્રૂપમ્ । યત્પૃથુકાઃ । યત્પૃથુકૈર્જુહોતિ ॥ ૩। ૮। ૧૪। ૩॥

૫૩ રુદ્રાનેવ તત્પ્રીણાતિ । લાજૈર્જુહોતિ । આદિત્યાનાં વા એતદ્રૂપમ્ । યલ્લાજાઃ
। યલ્લાજૈર્જુહોતિ । આદિત્યાનેવ તત્પ્રીણાતિ । કરમ્ભૈર્જુહોતિ । વિશ્વેષાં
વા એતદ્દેવાનાꣳ રૂપમ્ । યત્કરમ્ભાઃ । યત્કરમ્ભૈર્જુહોતિ ॥ ૩। ૮। ૧૪। ૪॥

૫૪ વિશ્વાનેવ તદ્દેવાન્પ્રીણાતિ । ધાનાભિર્જુહોતિ । નક્ષત્રાણાં વા એતદ્રૂપમ્ ।
યદ્ધાનાઃ । યદ્ધાનાભિર્જુહોતિ । નક્ષત્રાણ્યેવ તત્પ્રીણાતિ । સક્તુભિર્જુહોતિ ।
પ્રજાપતેર્વા એતદ્રૂપમ્ । યથ્સક્તવઃ । યથ્સક્તુભિર્જુહોતિ ॥ ૩। ૮। ૧૪। ૫॥

૫૫ પ્રજાપતિમેવ તત્પ્રીણાતિ । મસૂસ્યૈર્જુહોતિ । સર્વાસાં વા
એતદ્દેવતાનાꣳ રૂપમ્ । યન્મસૂસ્યાનિ । યન્મસૂસ્યૈર્જુહોતિ । સર્વા એવ
તદ્દેવતાઃ પ્રીણાતિ । પ્રિયઙ્ગુતણ્ડુલૈર્જુહોતિ । પ્રિયાઙ્ગા હ વૈ નામૈતે
। એતૈર્વૈ દેવા અશ્વસ્યાઙ્ગાનિ સમદધુઃ । યત્પ્રિયઙ્ગુતણ્ડુલૈર્જુહોતિ
। અશ્વસ્યૈવાઙ્ગાનિ સંદધાતિ । દશાન્નાનિ જુહોતિ । દશાક્ષરા

વિરાટ્ । વિરાટ્કૃત્સ્નસ્યાન્નાદ્યસ્યાવરુદ્ધ્યૈ ॥ ૩। ૮। ૧૪। ૬॥ જુહોતિ
મધુના જુહોતિ પૃથુકૈર્જુહોતિ કરમ્ભૈર્જુહોતિ સક્તુભિર્જુહોતિ
પ્રિયઙ્ગુતણ્ડુલૈર્જુહોતિ ચત્વારિ ચ ॥ ૧૪॥ અન્નહોમાનાજ્યેનાગ્નેર્મધુના
તણ્ડુલૈઃ પૃથુકૈર્લાજૈઃ કરમ્બૈર્ધાનાભિઃ સક્તુભિર્મસૂસ્યૈઃ
પ્રિયઙ્ગુતણ્ડુલૈર્દશાન્નાનિ વિરાડ્ દ્વાદશ ॥

૫૬ પ્રજાપતિરશ્વમેધમસૃજત । તꣳ સૃષ્ટꣳ રક્ષાગ્ંસ્યજિઘાꣳસન્
। સ એતાન્પ્રજાપતિર્નક્તꣳ હોમાનપશ્યત્ । તાનજુહોત્ । તૈર્વૈ સ
યજ્ઞાદ્રક્ષાગ્ંસ્યપાહન્ । યન્નક્તꣳ હોમાઞ્જુહોતિ । યજ્ઞાદેવ
તૈર્યજમાનો રક્ષાગ્ંસ્યપહન્તિ । આજ્યેન જુહોતિ । વજ્રો વા આજ્યમ્ । વજ્રેણૈવ
યજ્ઞાદ્રક્ષાગ્ંસ્યપહન્તિ ॥ ૩। ૮। ૧૫। ૧॥

૫૭ આજ્યસ્ય પ્રતિપદં કરોતિ । પ્રાણો વા આજ્યમ્ । મુખત એવાસ્ય પ્રાણં
દધાતિ । અન્નહોમાઞ્જુહોતિ । શરીરવદેવાવરુન્ધે । વ્યત્યાસં જુહોતિ ।
ઉભયસ્યાવરુધ્યૈ । નક્તં જુહોતિ । રક્ષસામપહત્યૈ । આજ્યેનાન્તતો જુહોતિ
॥ ૩। ૮। ૧૫। ૨॥

૫૮ પ્રાણો વા આજ્યમ્ । ઉભયત એવાસ્ય પ્રાણં દધાતિ ।
પુરસ્તાચ્ચોપરિષ્ટાચ્ચ । એકસ્મૈ સ્વાહેત્યાહ । અસ્મિન્નેવ લોકે
પ્રતિતિષ્ઠતિ । દ્વાભ્યાગ્ં સ્વાહેત્યાહ । અમુષ્મિન્નેવ લોકે પ્રતિતિષ્ઠતિ ।
ઉભયોરેવ લોકયોઃ પ્રતિતિષ્ઠતિ । અસ્મિꣳશ્ચામુષ્મિગ્ંશ્ચ । શતાય
સ્વાહેત્યાહ । શતાયુર્વૈ પુરુષઃ શતવીર્યઃ । આયુરેવ વીર્યમવરુન્ધે
। સહસ્રાય સ્વાહેત્યાહ । આયુર્વૈ સહસ્રમ્ । આયુરેવાવરુન્ધે ।
સર્વસ્મૈ સ્વાહેત્યાહ । અપરિમિતમેવાવરુન્ધે ॥ ૩। ૮। ૧૫। ૩॥ એવ
યજ્ઞાદ્રક્ષાગ્ંસ્યપહન્ત્યન્તતો જુહોતિ શતાય સ્વાહેત્યાહ સપ્ત ચ ॥ ૧૫॥

૫૯ પ્રજાપતિં વા એષ ઈપ્સતીત્યાહુઃ । યોઽશ્વમેધેન યજત ઇતિ ।
અથો આહુઃ । સર્વાણિ ભૂતાનીતિ । એકસ્મૈ સ્વાહેત્યાહ । પ્રજાપતિર્વા એકઃ
। તમેવાપ્નોતિ । એકસ્મૈ સ્વાહા દ્વાભ્યાગ્ં સ્વાહેત્યભિ પૂર્વમાહુતીર્જુહોતિ ।
અભિપૂર્વમેવ સુવર્ગં લોકમેતિ । એકોત્તરં જુહોતિ ॥ ૩। ૮। ૧૬। ૧॥

૬૦ એકવદેવ સુવર્ગં લોકમેતિ । સન્તતં જુહોતિ । સુવર્ગસ્ય લોકસ્ય

સંતત્યૈ । શતાય સ્વાહેત્યાહ । શતાયુર્વૈ પુરુષઃ શતવીર્યઃ ।
આયુરેવ વીર્યમવરુન્ધે । સહસ્રાય સ્વાહેત્યાહ । આયુર્વૈ સહસ્રમ્ ।
આયુરેવાવરુન્ધે । અયુતાય સ્વાહા નિયુતાય સ્વાહા પ્રયુતાય સ્વાહેત્યાહ
॥ ૩। ૮। ૧૬। ૨॥

૬૧ ત્રય ઇમે લોકાઃ । ઇમાનેવ લોકાનવરુન્ધે । અર્બુદાય સ્વાહેત્યાહ । વાગ્વા
અર્બુદમ્ । વાચમેવાવરુન્ધે । ન્યર્બુદાય સ્વાહેત્યાહ । યો વૈ વાચો ભૂમા ।
તન્ન્યર્બુદમ્ । વાચ એવ ભૂમાનમવરુન્ધે । સમુદ્રાય સ્વાહેત્યાહ ॥ ૩। ૮। ૧૬। ૩॥

૬૨ સમુદ્રમેવાપ્નોતિ । મધ્યાય સ્વાહેત્યાહ । મધ્યમેવાપ્નોતિ । અન્તાય
સ્વાહેત્યાહ । અન્તમેવાપ્નોતિ । પરાર્ધાય સ્વાહેત્યાહ । પરાર્ધમેવાપ્નોતિ
। ઉષસે સ્વાહા વ્યુષ્ટ્યૈ સ્વાહેત્યાહ । રાત્રિર્વા ઉષાઃ । અહર્વ્યુષ્ટિઃ
। અહોરાત્રે એવાવરુન્ધે । અથો અહોરાત્રયોરેવ પ્રતિતિષ્ઠતિ । તા
યદુભયીર્દિવા વા નક્તં વા જુહુયાત્ । અહોરાત્રે મોહયેત્ । ઉષસે સ્વાહા
વ્યુષ્ટ્યૈ સ્વાહોદેષ્યતે સ્વાહોદ્યતે સ્વાહેત્યનુદિતે જુહોતિ । ઉદિતાય સ્વાહા
સુવર્ગાય સ્વાહા લોકાય સ્વાહેત્યુદિતે જુહોતિ । અહોરાત્રયોરવ્યતિમોહાય
॥ ૩। ૮। ૧૬। ૪॥ એકોત્તરં જુહોતિ પ્રયુતાય સ્વાહેત્યાહ સમુદ્રાય
સ્વાહેત્યાહાહર્વ્યુષ્ટિઃ સપ્ત ચ ॥ ૧૬॥

૬૩ વિભૂર્માત્રા પ્રભૂઃ પિત્રેત્યશ્વનામાનિ જુહોતિ । ઉભયોરેવૈનં
લોકયોર્નામધેયં ગમયતિ । આયનાય સ્વાહા પ્રાયણાય
સ્વાહેત્યુદ્દ્રાવાઞ્જુહોતિ । સર્વમેવૈનમસ્કન્ન ँ સુવર્ગં લોકં ગમયતિ
। અગ્નયે સ્વાહા સોમાય સ્વાહેતિ પૂર્વહોમાઞ્જુહોતિ । પૂર્વ એવ દ્વિષન્તં
ભ્રાતૃવ્યમતિક્રામતિ । પૃથિવ્યૈ સ્વાહાઽન્તરિક્ષાય સ્વાહેત્યાહ । યથા
યજુરેવૈતત્ । અગ્નયે સ્વાહા સોમાય સ્વાહેતિ પૂર્વદીક્ષા જુહોતિ । પૂર્વ
એવ દ્વિષન્તં ભ્રાતૃવ્યમતિક્રામતિ ॥ ૩। ૮। ૧૭। ૧॥

૬૪ પૃથિવ્યૈ સ્વાહાઽન્તરિક્ષાય સ્વાહેત્યેકવિ ँ શિનીં દીક્ષાં
જુહોતિ । એકવિ ँ શતિર્વૈ દેવલોકાઃ । દ્વાદશ માસાઃ પઞ્ચર્તવઃ ।
ત્રય ઇમે લોકાઃ । અસાવાદિત્ય એકવિ ँ શઃ । એષ સુવર્ગો લોકઃ ।
સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ । ભુવો દેવાનાં કર્મણેત્યૃતુદીક્ષા

જુહોતિ । ઋતૂનેવાસ્મૈ કલ્પયતિ । અગ્નયે સ્વાહા વાયવે સ્વાહેતિ
જુહોત્યનન્તરિત્યૈ ॥ ૩। ૮। ૧૭। ૨॥

૬૫ અર્વાઙ્યજ્ઞઃ સંક્રામત્વિત્યાપ્તીર્જુહોતિ । સુવર્ગસ્ય લોકસ્યાપ્ત્યૈ । ભૂતં
ભવ્યં ભવિષ્યદિતિ પર્યાપ્તીર્જુહોતિ । સુવર્ગસ્ય લોકસ્ય પર્યાપ્ત્યૈ
। આ મે ગૃહા ભવન્ત્વિત્યાભૂર્જુહોતિ । સુવર્ગસ્ય લોકસ્યાભૂત્યૈ ।
અગ્નિના તપોઽન્વભવદિત્યનુભૂર્જુહોતિ । સુવર્ગસ્ય લોકસ્યાનુભૂત્યૈ ।
સ્વાહાઽઽધિમાધીતાય સ્વાહેતિ સમસ્તાનિ વૈશ્વદેવાનિ જુહોતિ । સમસ્તમેવ
દ્વિષન્તં ભ્રાતૃવ્યમતિક્રામતિ ॥ ૩। ૮। ૧૭। ૩॥

૬૬ દદ્ભ્યઃ સ્વાહા હનૂભ્યાગ્ં સ્વાહેત્યઙ્ગહોમાઞ્જુહોતિ । અઙ્ગે અઙ્ગે વૈ
પુરુષસ્ય પાપ્મોપશ્લિષ્ટઃ । અઙ્ગાદઙ્ગાદેવૈનં પાપ્મનસ્તેન મુઞ્ચતિ
। અઞ્જ્યેતાય સ્વાહા કૃષ્ણાય સ્વાહા શ્વેતાય સ્વાહેત્યશ્વરૂપાણિ
જુહોતિ । રૂપૈરેવૈનꣳ સમર્ધયતિ । ઓષધીભ્યઃ સ્વાહા મૂલેભ્યઃ
સ્વાહેત્યોષધિ હોમાઞ્જુહોતિ । દ્વય્યો વા ઓષધયઃ । પુષ્પેભ્યોઽન્યાઃ ફલં
ગૃહ્ણન્તિ । મૂલેભ્યોઽન્યાઃ । તા એવોભયીરવરુન્ધે ॥ ૩। ૮। ૧૭। ૪॥

૬૭ વનસ્પતિભ્યઃ સ્વાહેતિ વનસ્પતિહોમાઞ્જુહોતિ ।
આરણ્યસ્યાન્નાદ્યસ્યાવરુધ્યૈ । મેષસ્ત્વા પચતૈરવત્વિત્યપાવ્યાનિ જુહોતિ
। પ્રાણા વૈ દેવા અપાવ્યાઃ । પ્રાણાનેવાવરુન્ધે । કૂપ્યાભ્યઃ સ્વાહાઽદ્ભ્યઃ
સ્વાહેત્યપાꣳ હોમાઞ્જુહોતિ । અપ્સુ વા આપઃ । અન્નં વા આપઃ । અદ્ભ્યો વા અન્નં
જાયતે । યદેવાદ્ભ્યોઽન્નં જાયતે । તદવરુન્ધે ॥ ૩। ૮। ૧૭। ૫॥ પૂર્વદીક્ષા
જુહોતિ પૂર્વ એવ દ્વિષન્તં ભ્રાતૃવ્યમતિક્રામત્યનન્તરિત્યૈ ક્રામતિ
રુન્ધે જાયત એકં ચ ॥ ૧૭॥

૬૮ અમ્ભાꣳસિ જુહોતિ । અયં વૈ લોકોઽમ્ભાꣳસિ । તસ્ય વસવોઽધિપતયઃ
। અગ્નિર્જ્યોતિઃ । યદમ્ભાꣳસિ જુહોતિ । ઇમમેવ લોકમવરુન્ધે ।
વસૂનાꣳ સાયુજ્યં ગચ્છતિ । અગ્નિં જ્યોતિરવરુન્ધે । નભાꣳસિ જુહોતિ ।
અન્તરિક્ષં વૈ નભાꣳસિ ॥ ૩। ૮। ૧૮। ૧॥

૬૯ તસ્ય રુદ્રા અધિપતયઃ । વાયુર્જ્યોતિઃ । યન્નભાꣳસિ જુહોતિ
। અન્તરિક્ષમેવાવરુન્ધે । રુદ્રાણાꣳ સાયુજ્યં ગચ્છતિ । વાયું

જ્યોતિરવરુન્ધે । મહા ँसि જુહોતિ । અસૌ વૈ લોકો મહા ँसि । તસ્યાદિત્યા
અધિપતયઃ । સૂર્ ्યો જ્યોતિઃ ॥ ૩। ૮। ૧૮। ૨॥

૭૦ યન્મહા ँसि જુહોતિ । અમુમેવ લોકમવરુન્ધે । આદિત્યાના ँ
સાયુજ્યં ગચ્છતિ । સૂર્યં જ્યોતિરવરુન્ધે । નમો રાજ્ઞે નમો વરુણાયેતિ
યવ્યાનિ જુહોતિ । અન્નાદ્યસ્યાવરુધ્યૈ । મયોભૂર્વાતો અભિ વાતૂસ્રા ઇતિ
ગવ્યાનિ જુહોતિ । પશૂનામવરુધ્યૈ । પ્રાણાય સ્વાહા વ્યાનાય સ્વાહેતિ
સંતતિહોમાઞ્જુહોતિ । સુવર્ગસ્ય લોકસ્ય સંતત્યૈ ॥ ૩। ૮। ૧૮। ૩॥

૭૧ ઇતાય સ્વાહાઽસિતાય સ્વાહેતિ પ્રમુક્તીર્જુહોતિ । સુવર્ગસ્ય લોકસ્ય
પ્રમુક્ત્યૈ । પૃથિવ્યૈ સ્વાહાઽન્તરિક્ષાય સ્વાહેત્યાહ । યથા યજુરેવૈતત્
। દત્વતે સ્વાહાઽદન્તકાય સ્વાહેતિ શરીરહોમાઞ્જુહોતિ । પિતૃલોકમેવ
તૈર્યજમાનોઽવરુન્ધે । કસ્ત્વા યુનક્તિ સ ત્વા યુનક્ત્વિતિ પરિધીન્, યુનક્તિ
। ઇમે વૈ લોકાઃ પરિધયઃ । ઇમાનેવાસ્મૈ લોકાન્, યુનક્તિ । સુવર્ગસ્ય
લોકસ્ય સમષ્ટ્યૈ ॥ ૩। ૮। ૧૮। ૪॥

૭૨ યઃ પ્રાણતો ય આત્મદા ઇતિ મહિમાનૌ જુહોતિ । સુવર્ગો વૈ
લોકો મહઃ । સુવર્ગમેવ તાભ્યાં લોકં યજમાનોઽવરુન્ધે । આ
બ્રહ્મન્બ્રાહ્મણો બ્રહ્મવર્ચસી જાયતામિતિ સમસ્તાનિ બ્રહ્મવર્ચસાનિ
જુહોતિ । બ્રહ્મવર્ચસમેવ તૈર્યજમાનોઽવરુન્ધે । જજ્ઞિ બીજમિતિ
જુહોત્યનન્તરિત્યૈ । અગ્નયે સમનમત્પૃથિવ્યૈ સમનમદિતિ સન્નતિ
હોમાઞ્જુહોતિ । સુવર્ગસ્ય લોકસ્ય સંનત્યૈ । ભૂતાય સ્વાહા ભવિષ્યતે
સ્વાહેતિ ભૂતાભવ્યૌ હોમૌ જુહોતિ । અયં વૈ લોકો ભૂતમ્ ॥ ૩। ૮। ૧૮। ૫॥

૭૩ અસૌ ભવિષ્યત્ । અનયોરેવ લોકયોઃ પ્રતિતિષ્ઠતિ । સર્વસ્યાપ્ત્યૈ ।
સર્વસ્યાવરુદ્ધ્યૈ । યદક્રન્દઃ પ્રથમં જાયમાન ઇત્યશ્વસ્તોમીયં જુહોતિ
। સર્વસ્યાપ્ત્યૈ । સર્વસ્ય જિત્યૈ । સર્વમેવ તેનાપ્નોતિ । સર્વં જયતિ ।
યોઽશ્વમેધેન યજતે ॥ ૩। ૮। ૧૮। ૬॥

૭૪ ય ઉ ચૈનમેવં વેદ । યજ્ઞ ँ રક્ષાગ્સ્યજિઘા ँ સન્ ।
સ એતાન્પ્રજાપતિર્નક્ત ँ હોમાનપશ્યત્ । તાનજુહોત્ । તૈર્વૈ સ
યજ્ઞાદ્રક્ષાગ્સ્યપાહન્ । યન્નક્ત ँ હોમાઞ્જુહોતિ । યજ્ઞાદેવ

તૈર્યજમાનો રક્ષાગ્ંસ્યપહન્તિ । ઉષસે સ્વાહા વ્યુષ્ટ્યૈ સ્વાહેત્યન્તતો
જુહોતિ । સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ ॥ ૩। ૮। ૧૮। ૭॥ વૈ નભાઁસિ
સૂર્યો જ્યોતિઃ સંતત્યૈ સમષ્ટ્યૈ ભૂતં યજતે નવ ચ ॥ ૧૮॥

૭૫ એકયૂપો વૈકાદશિની વા । અન્યેષાં યજ્ઞાનાં યૂપા ભવન્તિ ।
એકવિઁશિન્યશ્વમેધસ્ય । સુવર્ગસ્ય લોકસ્યાભિજિત્યૈ ।
બૈલ્વો વા ખાદિરો વા પાલાશો વા । અન્યેષાં યજ્ઞક્રતૂનાં યૂપા ભવન્તિ
। રાજ્જુદાલ એકવિઁશત્યરત્નિરશ્વમેધસ્ય । સુવર્ગસ્ય લોકસ્ય
સમષ્ટ્યૈ । નાન્યેષાં પશૂનાં તેજન્યા અવદ્યન્તિ । અવદ્યન્ત્યશ્વસ્ય ॥
૩। ૮। ૧૯। ૧॥

૭૬ પાપ્મા વૈ તેજની । પાપ્મનોઽપહત્યૈ । પ્લક્ષશાખાયામન્યેષાં
પશૂનામવદ્યન્તિ । વેતસશાખાયામશ્વસ્ય । અપ્સુયોનિર્વા
અશ્વઃ । અપ્સુજો વેતસઃ । સ્વ એવાસ્ય યોનાવવદ્યતિ । યૂપેષુ
ગ્રામ્યાન્પશૂન્નિયુઞ્જન્તિ । આરોકેષ્વારણ્યાન્ધારયન્તિ । પશૂનાં
વ્યાવૃત્ત્યૈ । આ ગ્રામ્યાન્ પશૂન્લભન્તે । પ્રારણ્યાન્થ્સૃજન્તિ । પાપ્મનોઽપહત્યૈ
॥ ૩। ૮। ૧૯। ૨॥ અશ્વસ્ય વ્યાવૃત્ત્યૈ ત્રીણિ ચ ॥ ૧૯॥

૭૭ રાજ્જુદાલમગ્નિષ્ઠે મિનોતિ । ભ્રૂણહત્યાયા અપહત્યૈ । પૌતુદ્રવાવભિતો
ભવતઃ । પુણ્યસ્ય ગન્ધસ્યાવરુધ્યૈ । ભ્રૂણહત્યામેવાસ્માદપહત્ય
। પુણ્યેન ગન્ધેનોભયતઃ પરિગૃહ્ણાતિ । ષડ્બૈલ્વા ભવન્તિ ।
બ્રહ્મવર્ચસસ્યાવરુદ્ધ્યૈ । ષટ્ખાદિરાઃ । તેજસોઽવરુધ્યૈ ॥ ૩। ૮। ૨૦। ૧॥

૭૮ ષટ્પાલાશાઃ । સોમપીથસ્યાવરુધ્યૈ । એકવિઁશતિઃ સંપદ્યન્તે ।
એકવિઁશતિર્વૈ દેવલોકાઃ । દ્વાદશ માસાઃ પઞ્ચર્તવઃ । ત્રય ઇમે
લોકાઃ । અસાવાદિત્ય એકવિઁશઃ । એષ સુવર્ગો લોકઃ । સુવર્ગસ્ય
લોકસ્ય સમષ્ટ્યૈ । શતં પશવો ભવન્તિ ॥ ૩। ૮। ૨૦। ૨॥

૭૯ શતાયુઃ પુરુષઃ શતેન્દ્રિયઃ । આયુષ્યેવેન્દ્રિયે પ્રતિતિષ્ઠતિ ।
સર્વં વા અશ્વમેધ્યાપ્નોતિ । અપરિમિતા ભવન્તિ । અપરિમિતસ્યાવરુદ્ધ્યૈ
। બ્રહ્મવાદિનો વદન્તિ । કસ્માથ્સત્યાત્ । દક્ષિણતોઽન્યેષાં
પશૂનામવદ્યન્તિ । ઉત્તરતોઽશ્વસ્યેતિ । વારુણો વા અશ્વઃ ॥ ૩। ૮। ૨૦। ૩॥

૮૦ એષા વૈ વરુણસ્ય દિક્ । સ્વાયામેવાસ્ય દિશ્યવદ્યતિ । યદિતરેષાં પશૂનામવદ્યતિ । શતદેવત્યં તેનાવરુન્ધે । ચિતેઽગ્નાવધિવૈતસે કટેઽશ્વં ચિનોતિ । અપ્સુયોનિર્વા અશ્વઃ । અપ્સુજો વેતસઃ । સ્વ એવૈનં યોનૌ પ્રતિષ્ઠાપયતિ । પુરસ્તાત્પ્રત્યઞ્ચં તૂપરં ચિનોતિ । પશ્ચાત્પ્રાચીનં ગોમૃગમ્ ॥ ૩। ૮। ૨૦। ૪॥

૮૧ પ્રાણાપાનાવેવાસ્મિન્થ્સમ્યઞ્ચૌ દધાતિ । અશ્વં તૂપરં ગોમૃગમિતિ સર્વહુત એતાઞ્જુહોતિ । એષાં લોકાનામભિજિત્યૈ । આત્મનાઽભિજુહોતિ । સાત્માનમેવૈન ँ સતનું કરોતિ । સાત્માઽમુષ્મિં લ્લોકે ભવતિ । ય એવં વેદ । અથો વસોરેવ ધારાં તેનાવરુન્ધે । ઇલુવર્દાય સ્વાહા બલિવર્દાય સ્વાહેત્યાહ । સંવથ્સરો વા ઇલુવર્દઃ । પરિવથ્સરો બલિવર્દઃ । સંવથ્સરાદેવ પરિવથ્સરાદાયુરવરુન્ધે । આયુરેવાસ્મિન્દધાતિ । તસ્માદશ્વમેધયાજી જરસા વિસ્રસાઽમું લોકમેતિ ॥ ૩। ૮। ૨૦। ૫॥ તેજસોઽવરુધ્યૈ ભવન્ત્યશ્વો ગોમૃગમિલુવર્દશ્ચત્વારિ ચ ॥ ૨૦॥

૮૨ એકવિ ँ શોઽગ્નિર્ભવતિ । એકવિ ँ શઃ સ્તોમઃ । એકવિ ँ શતિર્યૂપાઃ । યથા વા અશ્વા વર્ષભા વા વૃષાણઃ સર ँ સ્ફુરેરન્ । એવમેતથ્સ્તોમાઃ સર ँ સ્ફુરન્તે । યદેકવિ ँ શાઃ । તે યથ્સમૃચ્છેરન્ । હન્યેતાસ્ય યજ્ઞઃ । દ્વાદશ એવાગ્નિઃ સ્યાદિત્યાહુઃ । દ્વાદશઃ સ્તોમઃ ।

૮૩ એકાદશ યૂપાઃ । યદ્વાદશોઽગ્નિર્ભવતિ । દ્વાદશ માસાઃ સંવથ્સરઃ । સંવથ્સરેણૈવાસ્મા અન્નમવરુન્ધે । યદ્દશ યૂપા ભવન્તિ । દશાક્ષરા વિરાટ્ । અન્નં વિરાટ્ । વિરાજૈવાન્નાદ્યમવરુન્ધે । ય એકાદશઃ । સ્તન એવાસ્યૈ સઃ ।

૮૪ દુહ એવૈનાં તેન । તદાહુઃ । યદ્વાદશોઽગ્નિઃ સ્યાદ્વાદશઃ સ્તોમ એકાદશ યૂપાઃ । યથા સ્થૂરિણા યાયાત્ । તાદૃક્તત્ । એકવિ ँ શ એવાગ્નિઃ સ્યાદિત્યાહુઃ । એકવિ ँ શઃ સ્તોમઃ । એકવિ ँ શતિર્યૂપાઃ ।

યથા પ્રષ્ટિભિર્યાતિ । તાદૃગેવ તત્ ॥ ૩। ૮। ૨૧। ૩॥

૮૫ યો વા અશ્વમેધે તિસ્રઃ કકુભો વેદ । કકુદ્ધ રાજ્ઞાં ભવતિ । એકવિꣳશોઽગ્નિર્ભવતિ । એકવિꣳશઃ સ્તોમઃ । એકવિꣳશતિર્યૂપાઃ । એતા વા અશ્વમેધે તિસ્રઃ કકુભઃ । ય એવં વેદ । કકુદ્ધ રાજ્ઞાં ભવતિ । યો વા અશ્વમેધે ત્રીણિ શીર્ષાણિ વેદ । શિરો હ રાજ્ઞાં ભવતિ । એકવિꣳશોઽગ્નિર્ભવતિ । એકવિꣳશઃ સ્તોમઃ । એકવિꣳશતિર્યૂપાઃ । એતાનિ વા અશ્વમેધે ત્રીણિ શીર્ષાણિ । ય એવં વેદ । શિરો હ રાજ્ઞાં ભવતિ ॥ ૩। ૮। ૨૧। ૪॥ દ્વાદશઃ સ્તોમઃ સ એવ તચ્છિરો હ રાજ્ઞાં ભવતિ ષટ્ચ ॥ ૨૧॥

૮૬ દેવા વા અશ્વમેધે પવમાને । સુવર્ગં લોકં ન પ્રાજાનન્ । તમશ્વઃ પ્રાજાનાત્ । યદશ્વમેધેઽશ્વેન મેધ્યેનોદઞ્ચો બહિષ્પવમાનꣳ સર્પન્તિ । સુવર્ગસ્ય લોકસ્ય પ્રજ્ઞાત્યૈ । ન વૈ મનુષ્યઃ સુવર્ગં લોકમઞ્જસા વેદ । અશ્વો વૈ સુવર્ગં લોકમઞ્જસા વેદ । યદુદ્ગાતોદ્ગાયેત્ । યથાઽક્ષેત્રજ્ઞોઽન્યેન પથા પ્રતિપાદયેત્ । તાદૃક્તત્ ॥ ૩। ૮। ૨૨। ૧॥

૮૭ ઉદ્ગાતારમપરુધ્ય । અશ્વમુદ્ગીથાય વૃણીતે । યથા ક્ષેત્રજ્ઞોઽઞ્જસા નયતિ । એવમેવૈનમશ્વઃ સુવર્ગં લોકમઞ્જસા નયતિ । પુચ્છમન્વારભન્તે । સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ । હિં કરોતિ । સામૈવાકઃ । હિં કરોતિ । ઉદ્ગીથ એવાસ્ય સઃ ॥ ૩। ૮। ૨૨। ૨॥

૮૮ વડબા ઉપરુન્ધન્તિ । મિથુનત્વાય પ્રજાત્યૈ । અથો યથોપગાતાર ઉપગાયન્તિ । તાદૃગેવ તત્ । ઉદગાસીદશ્વો મેધ્ય ઇત્યાહ । પ્રાજાપત્યો વા અશ્વઃ । પ્રજાપતિરુદ્ગીથઃ । ઉદ્ગીથમેવાવરુન્ધે । અથો ઋખ્સામયોરેવ પ્રતિતિષ્ઠતિ । હિરણ્યેનોપાકરોતિ । જ્યોતિર્વૈ હિરણ્યમ્ । જ્યોતિરેવ મુખતો દધાતિ । યજમાને ચ પ્રજાસુ ચ । અથો હિરણ્યજ્યોતિરેવ યજમાનઃ સુવર્ગં લોકમેતિ ॥ ૩। ૮। ૨૨। ૩॥ તથ્સ ઉપાકરોતિ ચત્વારિ ચ ॥ ૨૨॥

૮૯ પુરુષો વૈ યજ્ઞઃ । યજ્ઞઃ પ્રજાપતિઃ । યદશ્વે પશૂન્નિયુઞ્જન્તિ । યજ્ઞાદેવ તદ્યજ્ઞં પ્રયુઙ્ક્તે । અશ્વં તૂપરં ગોમૃગમ્ । તાનગ્નિષ્ઠ આલભતે । સેનામુખમેવ તથ્સરꣳશ્યતિ । તસ્માદ્રાજમુખં ભીષ્મં

ભાવુકમ્ । આગ્નેયં કૃષ્ણગ્રીવં પુરસ્તાલ્લલાટે । પૂર્વાગ્નિમેવ તં
કુરુતે ॥ ૩। ૮। ૨૩। ૧॥

૯૦ તસ્માત્પૂર્વાગ્નિં પુરસ્તાથ્સ્થાપયન્તિ । પૌષ્ણમન્વઞ્ચમ્ । અન્નં વૈ પૂષા
। તસ્માત્પૂર્વાગ્નાવાહાર્યમાહરન્તિ । ઐન્દ્રાપૌષ્ણમુપરિષ્ટાત્ । ઐન્દ્રો
વૈ રાજન્યોઽન્નં પૂષા । અન્નાદ્યેનૈવૈનમુભયતઃ પરિગૃહ્ણાતિ
। તસ્માદ્રાજન્યોઽન્નાદો ભાવુકઃ । આગ્નેયૌ કૃષ્ણગ્રીવૌ બાહુવોઃ ।
બાહુવોરેવ વીર્યં ધત્તે ॥ ૩। ૮। ૨૩। ૨॥

૯૧ તસ્માદ્રાજન્યો બાહુબલી ભાવુકઃ । ત્વાષ્ટ્રૌ લોમશસક્થૌ
સક્થ્યોઃ । સક્થ્યોરેવ વીર્યં ધત્તે । તસ્માદ્રાજન્ય ઊરુબલી ભાવુકઃ ।
શિતિપૃષ્ઠૌ બાર્હસ્પત્યૌ પૃષ્ઠે । બ્રહ્મવર્ચસમેવોપરિષ્ટાદ્ધત્તે
। અથો કવચે એવૈતે અભિતઃ પર્યૂહતે । તસ્માદ્રાજન્યઃ સંનદ્ધો
વીર્યં કરોતિ । ધાત્રે પૃષોદરમધસ્તાત્ । પ્રતિષ્ઠામેવૈતાં કુરુતે ।
અથો ઇયં વૈ ધાતા । અસ્યામેવ પ્રતિતિષ્ઠતિ । સૌર્યં બલક્ષં પુચ્છે ।
ઉથ્સેધમેવ તં કુરુતે । તસ્માદુથ્સેધં ભયે પ્રજા અભિસર ઁ શ્રયન્તિ
॥ ૩। ૮। ૨૩। ૩॥ કુરુતે ધત્તે કુરુતે પઞ્ચ ચ ॥ ૨૩॥

સાઙ્ગ્રહણ્યા ચતુષ્ટય્યો યો વૈ યઃ પિતુશ્ચત્વારો યથા નિક્તં
પ્રજાપતયે ત્વા યથા પ્રોક્ષિતં વિભૂરાહ પ્રજાપતિરકામયતાશ્વમેધેન
પ્રજાપતિર્ન કિઞ્ચ ન સાવિત્રમા બ્રહ્મન્ પ્રજાપતિર્દેવેભ્યઃ
પ્રજાપતી રક્ષા ઁસિ પ્રજાપતિમીપ્સતિ વિભૂરશ્વનામાન્યમ્ભાગ્સ્યેકયૂપો
રાજ્જુદાલમેકવિ ઁ શો દેવાઃ પુરુષસ્ત્રયોવિ ઁ શતિઃ ॥ ૨૩॥

સાઙ્ગ્રહણ્યા તસ્માદશ્વમેધયાજી યત્પરિમિતા યદ્ઘ્નામુખે યો દીક્ષાં
દેવાનેવ ત્રય ઇમે સિતાય પ્રાણાપાનાવેવાસ્મિન્ તસ્માદ્રાજન્ય એકનવતિઃ
॥ ૯૧॥

સાઙ્ગ્રહણ્યા સર ઁ શ્રયન્તિ ॥

## તૃતીયાષ્ટકે નવમઃ પ્રપાઠકઃ ૯

## અશ્વમેધસ્ય દ્વિતીય તૃતીયાહર્વિધાનમ્

૧ પ્રજાપતિરશ્વમેધમસૃજત । સોઽસ્માથ્સૃષ્ટોઽપાક્રામત્
। તમષ્ટાદશિભિરનુ પ્રાયુઙ્ક્ત । તમાપ્નોત્ ।
તમાપ્ત્વાઽષ્ટાદશિભિરવારુન્ધ । યદષ્ટાદશિન આલભ્યન્તે ।
યજ્ઞમેવ તૈરાપ્ત્વા યજમાનોઽવરુન્ધે । સંવથ્સરસ્ય વા એષા
પ્રતિમા । યદષ્ટાદશિનઃ । દ્વાદશ માસાઃ પઞ્ચર્તવઃ ॥ ૩। ૯। ૧। ૧॥
૨ સંવથ્સરોઽષ્ટાદશઃ । યદષ્ટાદશિન આલભ્યન્તે
। સંવથ્સરમેવ તૈરાપ્ત્વા યજમાનોઽવરુન્ધે ।
અગ્નિષ્ઠેઽન્યાન્પશૂનુપાકરોતિ । ઇતરેષુ યૂપેષ્વષ્ટાદશિનોઽજામિત્વાય
। નવ નવાલભ્યન્તે સવીર્યત્વાય । યદારણ્યૈઃ સગ્ગ્સ્થાપયેત્ ।
વ્યવસ્યેતાં પિતાપુત્રૌ । વ્યધ્વાનઃ ક્રામેયુઃ । વિદૂરં ગ્રામયોર્ગ્રામાન્તૌ
સ્યાતામ્ ॥ ૩। ૯। ૧। ૨॥
૩ ઋક્ષીકાઃ પુરુષવ્યાઘ્રાઃ પરિમોષિણ આવ્યાધિનીસ્તસ્કરા
અરણ્યેષ્વાજાયેરન્ । તદાહુઃ । અપશવો વા એતે । યદારણ્યાઃ ।
યદારણ્યૈઃ સગ્ગ્સ્થાપયેત્ । ક્ષિપ્રે યજમાનમરણ્યં મૃતઁ
હરેયુઃ । અરણ્યાયતના હ્યારણ્યાઃ પશવ ઇતિ । યત્પશૂન્નાલભેત ।
અનવરુદ્ધા અસ્ય પશવઃ સ્યુઃ । યત્પર્યગ્નિકૃતાનુથ્સૃજેત્ ॥ ૩। ૯। ૧। ૩॥
૪ યજ્ઞવેશસં કુર્યાત્ । યત્પશૂનાલભતે । તેનૈવ પશૂનવરુન્ધે ।
યત્ પર્યગ્નિ કૃતાનુથ્સૃજત્યયજ્ઞ વેશસાય । અવરુદ્ધા અસ્ય પશવો ભવન્તિ ।
ન યજ્ઞવેશસં ભવતિ । ન યજમાનમરણ્યં મૃતઁ હરન્તિ । ગ્રામ્યૈઃ
સરઁ સ્થાપયતિ । એતે વૈ પશવઃ, ક્ષેમો નામ । સં પિતાપુત્રાવવસ્યતઃ
। સમધ્વાનઃ ક્રામન્તિ । સમન્તિકં ગ્રામયોર્ગ્રામાન્તૌ ભવતઃ । નર્ક્ષીકાઃ
પુરુષવ્યાઘ્રાઃ પરિમોષિણ આવ્યાધિનીસ્તસ્કરા અરણ્યેષ્વાજાયન્તે ॥ ૩। ૯। ૧। ૪॥ ઋતવઃ
સ્યાતામુથ્સૃજેથ્સ્યતસ્ત્રીણિ ચ ॥ ૧॥
૫ પ્રજાપતિરકામયતોભૌ લોકાવવરુન્ધીયેતિ । સ
એતાનુભયાન્પશૂનપશ્યત્ । ગ્રામ્યાગ્શ્ચારણ્યાગ્શ્ચ । તાનાલભત ।
તૈર્વૈ સ ઉભૌ લોકાવવારુન્ધ । ગ્રામ્યૈરેવ પશુભિરિમં લોકમવારુન્ધ

। આરણ્યૈરમુમ્ । યદ્ગ્રામ્યાન્પશૂનાલભતે । ઇમમેવ તૈર્લોકમવરુન્ધે । યદારણ્યાન્ ॥ ૩। ૯। ૨। ૧॥

૬ અમું તૈઃ । અનવરુદ્ધો વા એતસ્ય સંવથ્સર ઇત્યાહુઃ । ય ઇત ઇતશ્ચાતુર્માસ્યાનિ સંવથ્સરં પ્રયુઙ્ક્ત ઇતિ । એતાવાન્ વૈ સંવથ્સરઃ । યચ્ચાતુર્માસ્યાનિ । યદેતે ચાતુર્માસ્યાઃ પશવ આલભ્યન્તે । પ્રત્યક્ષમેવ તૈઃ સંવથ્સરં યજમાનોઽવરુન્ધે । વિ વા એષ પ્રજયા પશુભિરૃદ્ધ્યતે । યઃ સંવથ્સરં પ્રયુઙ્ક્તે । સંવથ્સરઃ સુવર્ગો લોકઃ ॥ ૩। ૯। ૨। ૨॥

૭ સુવર્ગં તુ લોકં નાપરાધ્નોતિ । પ્રજા વૈ પશવ એકાદશિની । યદેત ઐકાદશિનાઃ પશવ આલભ્યન્તે । સાક્ષાદેવ પ્રજાં પશૂન્, યજમાનોઽવરુન્ધે । પ્રજાપતિર્વિરાજમસૃજત । સા સૃષ્ટાઽશ્વમેધં પ્રાવિશત્ । તાં દશિભિરનુ પ્રાયુઙ્ક્ત । તામાપ્નોત્ । તામાપ્ત્વા દશિભિરવારુન્ધ । યદ્દશિન આલભ્યન્તે ॥ ૩। ૯। ૨। ૩॥

૮ વિરાજમેવ તૈરાપ્ત્વા યજમાનોઽવરુન્ધે । એકાદશ દશત આલભ્યન્તે । એકાદશાક્ષરા ત્રિષ્ટુપ્ । ત્રૈષ્ટુભાઃ પશવઃ । પશૂનેવાવરુન્ધે । વૈશ્વદેવો વા અશ્વઃ । નાનાદેવત્યાઃ પશવો ભવન્તિ । અશ્વસ્ય સર્વત્વાય । નાનારૂપા ભવન્તિ । તસ્માન્નાનારૂપાઃ પશવઃ । બહુરૂપા ભવન્તિ । તસ્માદ્બહુરૂપાઃ પશવઃ સમૃદ્ધ્યૈ ॥ ૩। ૯। ૨। ૪॥ આરણ્યાન્લોકો દશિન આલભ્યન્તે નાનારૂપાઃ પશવો દ્વે ચ ॥ ૨॥

૯ અસ્મૈ વૈ લોકાય ગ્રામ્યાઃ પશવ આલભ્યન્તે । અમુષ્મા આરણ્યાઃ । યદ્ગ્રામ્યાન્પશૂનાલભતે । ઇમમેવ તૈર્લોકમવરુન્ધે । યદારણ્યાન્ । અમું તૈઃ । ઉભયાન્પશૂનાલભતે । ગ્રામ્યાગ્શ્ચારણ્યાગ્શ્ચ । ઉભયોર્લોકયોરવરુદ્ધ્યૈ । ઉભયાન્ પશૂનાલભતે ॥ ૩। ૯। ૩। ૧॥

૧૦ ગ્રામ્યાગ્શ્ચારણ્યાગ્શ્ચ । ઉભયસ્યાન્નાદ્યસ્યાવરુદ્ધ્યૈ । ઉભયાન્પશૂનાલભતે । ગ્રામ્યાગ્શ્ચારણ્યાગ્શ્ચ । ઉભયેષાં પશૂનામવરુદ્ધ્યૈ । ત્રયસ્ત્રયો ભવન્તિ । ત્રય ઇમે લોકાઃ । એષાં લોકાનામાપ્ત્યૈ । બ્રહ્મવાદિનો વદન્તિ । કસ્માથ્સત્યાત્ ॥ ૩। ૯। ૩। ૨॥

૧૧ અસ્મિં લ્લોકે બહવઃ કામા ઇતિ । યથ્સમાનીભ્યો દેવતાભ્યોઽન્યેઽન્યે
પશવ આલભ્યન્તે । અસ્મિન્નેવ તં લ્લોકે કામાન્દધાતિ । તસ્માદસ્મિં લ્લોકે
બહવઃ કામાઃ । ત્રયાણાં ત્રયાણાꣳ સહ વપા જુહોતિ । ત્ર્યાવૃતો
વૈ દેવાઃ । ત્ર્યાવૃત ઇમે લોકાઃ । એષાં લોકાનામાપ્ત્યૈ । એષાં લોકાનાં
ક્લૃપ્ત્યૈ । પર્યગ્નિકૃતાનારણ્યાનુથ્સૃજન્ત્યહિꣳસાયૈ ॥ ૩। ૯। ૩। ૩॥
અવરુદ્ધ્યા ઉભયાન્પશૂનાલભતે સત્યાદહિꣳસાયૈ ॥ ૩॥
૧૨ યુઞ્જન્તિ બ્રધ્નમિત્યાહ । અસૌ વા આદિત્યો બ્રધ્નઃ । આદિત્યમેવાસ્મૈ
યુનક્તિ । અરુષમિત્યાહ । અગ્નિર્વા અરુષઃ । અગ્નિમેવાસ્મૈ યુનક્તિ ।
ચરન્તમિત્યાહ । વાયુર્વૈ ચરન્ । વાયુમેવાસ્મૈ યુનક્તિ । પરિતસ્થુષ
ઇત્યાહ ॥ ૩। ૯। ૪। ૧॥
૧૩ ઇમે વૈ લોકાઃ પરિતસ્થુષઃ । ઇમાનેવાસ્મૈ લોકાન્, યુનક્તિ । રોચન્તે
રોચના દિવીત્યાહ । નક્ષત્રાણિ વૈ રોચના દિવિ । નક્ષત્રાણ્યેવાસ્મૈ
રોચયતિ । યુઞ્જન્ત્યસ્ય કામ્યેત્યાહ । કામાનેવાસ્મૈ યુનક્તિ । હરી
વિપક્ષસેત્યાહ । ઇમે વૈ હરી વિપક્ષસા । ઇમે એવાસ્મૈ યુનક્તિ ॥ ૩। ૯। ૪। ૨॥
૧૪ શોણા ધૃષ્ણૂ નૃવાહસેત્યાહ । અહોરાત્રે વૈ નૃવાહસા । અહોરાત્રે
એવાસ્મૈ યુનક્તિ । એતા એવાસ્મૈ દેવતા યુનક્તિ । સુવર્ગસ્ય લોકસ્ય
સમષ્ટ્યૈ । કેતું કૃણ્વન્નકેતવ ઇતિ ધ્વજં પ્રતિમુઞ્ચતિ । યશ
એવૈનꣳ રાજ્ઞાં ગમયતિ । જીમૂતસ્યેવ ભવતિ પ્રતીકમિત્યાહ ।
યથા યજુરેવૈતત્ । યે તે પન્થાનઃ સવિતઃ પૂર્વ્યાસ ઇત્યધ્વર્યુર્યજમાનં
વાચયત્યભિજિત્યૈ ॥ ૩। ૯। ૪। ૩॥
૧૫ પરા વા એતસ્ય યજ્ઞ એતિ । યસ્ય પશુરુપાકૃતોઽન્યત્ર વેદ્યા
એતિ । એતરꣳ સ્તોતરેતેન પથા પુનરશ્વમાવર્તયાસિ ન ઇત્યાહ ।
વાયુર્વૈ સ્તોતા । વાયુમેવાસ્ય પરસ્તાદ્દધાત્યાવૃત્ત્યૈ । યથા વૈ હવિષો
ગૃહીતસ્ય સ્કન્દતિ । એવં વા એતદશ્વસ્ય સ્કન્દતિ । યદસ્યોપાકૃતસ્ય
લોમાનિ શીયન્તે । યદ્વાલેષુ કાચાનાવયન્તિ । લોમાન્યેવાસ્ય તથ્સંભરન્તિ
॥ ૩। ૯। ૪। ૪॥
૧૬ ભૂર્ભુવઃ સુવરિતિ પ્રાજાપત્યાભિરાવયન્તિ । પ્રાજાપત્યો વા અશ્વઃ ।

સ્વયૈવૈનં દેવતયા સમર્ધયન્તિ । ભૂરિતિ મહિષી । ભુવ ઇતિ વાવાતા
। સુવરિતિ પરિવૃક્તી । એષાં લોકાનામભિજિત્યૈ । હિરણ્યયાઃ કાચા
ભવન્તિ । જ્યોતિર્વૈ હિરણ્યમ્ । રાષ્ટ્રમશ્વમેધઃ ॥ ૩। ૯। ૪। ૫॥
૧૭ જ્યોતિશ્ચૈવાસ્મૈ રાષ્ટ્રં ચ સમીચી દધાતિ । સહસ્રં ભવન્તિ ।
સહસ્રસંમિતઃ સુવર્ગો લોકઃ । સુવર્ગસ્ય લોકસ્યાભિજિત્યૈ । અપ વા
એતસ્માત્તેજ ઇન્દ્રિયં પશવઃ શ્રીઃ ક્રામન્તિ । યોઽશ્વમેધેન યજતે ।
વસવસ્ત્વાઽઞ્જન્તુ ગાયત્રેણ છન્દસેતિ મહિષ્યભ્યનક્તિ । તેજો વા આજ્યમ્ ।
તેજો ગાયત્રી । તેજસૈવાસ્મૈ તેજોઽવરુન્ધે ॥ ૩। ૯। ૪। ૬॥
૧૮ રુદ્રાસ્ત્વાઽઞ્જન્તુ ત્રૈષ્ટુભેન છન્દસેતિ વાવાતા । તેજો વા આજ્યમ્ ।
ઇન્દ્રિયં ત્રિષ્ટુપ્ । તેજસૈવાસ્મા ઇન્દ્રિયમવરુન્ધે । આદિત્યાસ્ત્વાઽઞ્જન્તુ
જાગતેન છન્દસેતિ પરિવૃક્તી । તેજો વા આજ્યમ્ । પશવો જગતી ।
તેજસૈવાસ્મૈ પશૂનવરુન્ધે । પત્નયોઽભ્યઞ્જન્તિ । શ્રિયા વા એતદ્રૂપમ્
॥ ૩। ૯। ૪। ૭॥
૧૯ યત્પત્નયઃ । શ્રિયમેવાસ્મિન્તદ્ધતિ । નાસ્માત્તેજ
ઇન્દ્રિયં પશવઃ શ્રીરપક્રામન્તિ । લાજી ૩ ઞ્છાચી ૩ ન્, યશોમમા ૪
ઁ ઇત્યતિરિક્તમન્નમશ્વાયોપાહરન્તિ । પ્રજામેવાન્નાદીં કુર્વતે ।
એતદ્દેવા અન્નમત્તૈતદન્નમદ્ધિ પ્રજાપત ઇત્યાહ । પ્રજાયામેવાન્નાદ્યં
દધતે । યદિ નાવજિઘ્રેત્ । અગ્નિઃ પશુરાસીદિત્યવઘ્રાપયેત્ । અવ હૈવ
જિઘ્રતિ । આક્રાન્ વાજી ક્રમૈરત્યક્રમીદ્વાજી દ્યૌસ્તે પૃષ્ઠં પૃથિવી
સધસ્થમિત્યશ્વમનુમન્ત્રયતે । એષાં લોકાનામભિજિત્યૈ । સમિદ્ધો
અઞ્જન્કૃદરં મતીનામિત્યશ્વસ્યાપ્રિયો ભવન્તિ સરૂપત્વાય ॥ ૩। ૯। ૪। ૮॥ પરિતસ્થુષ ઇત્યાહેમે એવાસ્મૈ
યુનક્ત્યભિજિત્યૈ ભરન્ત્યશ્વમેધો
રુન્ધે રૂપં જિઘ્રતિ ત્રીણિ ચ ॥ ૪॥
૨૦ તેજસા વા એષ બ્રહ્મવર્ચસેન વ્યૃદ્ધ્યતે । યોઽશ્વમેધેન યજતે ।
હોતા ચ બ્રહ્મા ચ બ્રહ્મોદ્યં વદતઃ । તેજસા ચૈવૈનં બ્રહ્મવર્ચસેન
ચ સમર્ધયતઃ । દક્ષિણતો બ્રહ્મા ભવતિ । દક્ષિણત આયતનો વૈ
બ્રહ્મા । બાર્હસ્પત્યો વૈ બ્રહ્મા । બ્રહ્મવર્ચસમેવાસ્ય દક્ષિણતો

દધાતિ । તસ્માદ્દક્ષિણોઽર્ધો બ્રહ્મવર્ચસિતરઃ । ઉત્તરતો હોતા ભવતિ
॥ ૩। ૯। ૫। ૧॥

૨૧ ઉત્તરત આયતનો વૈ હોતા । આગ્નેયો વૈ હોતા । તેજો વા અગ્નિઃ । તેજ
એવાસ્યોત્તરતો દધાતિ । તસ્માદુત્તરોઽર્ધસ્તેજસ્વિતરઃ । યૂપમભિતો
વદતઃ । યજમાનદેવત્યો વૈ યૂપઃ । યજમાનમેવ તેજસા ચ
બ્રહ્મવર્ચસેન ચ સમર્ધયતઃ । કિꣳ સ્વિદાસીત્પૂર્વચિત્તિરિત્યાહ ।
દ્યૌર્વૈ વૃષ્ટિઃ પૂર્વચિત્તિઃ ॥ ૩। ૯। ૫। ૨॥

૨૨ દિવમેવ વૃષ્ટિમવરુન્ધે । કિꣳ સ્વિદાસીદ્બૃહદ્વય ઇત્યાહ । અશ્વો
વૈ બૃહદ્વયઃ । અશ્વમેવાવરુન્ધે । કિꣳ સ્વિદાસીત્પિશંગિલેત્યાહ ।
રાત્રિર્વૈ પિશંગિલા । રાત્રિમેવાવરુન્ધે । કિꣳ સ્વિદાસીત્પિલિપ્પિલેત્યાહ ।
શ્રીર્વૈ પિલિપ્પિલા । અન્નાદ્યમેવાવરુન્ધે ॥ ૩। ૯। ૫। ૩॥

૨૩ કઃ સ્વિદેકાકી ચરતીત્યાહ । અસૌ વા આદિત્ય એકાકી ચરતિ । તેજ
એવાવરુન્ધે । ક ઉ સ્વિજ્જાયતે પુનરિત્યાહ । ચન્દ્રમા વૈ જાયતે પુનઃ ।
આયુરેવાવરુન્ધે । કિꣳ સ્વિદ્ધિમસ્ય ભેષજમિત્યાહ । અગ્નિર્વૈ હિમસ્ય
ભેષજમ્ । બ્રહ્મવર્ચસમેવાવરુન્ધે । કિꣳ સ્વિદાવપનં મહદિત્યાહ
॥ ૩। ૯। ૫। ૪॥

૨૪ અયં વૈ લોક આવપનં મહત્ । અસ્મિન્નેવ લોકે પ્રતિતિષ્ઠતિ ।
પૃચ્છામિ ત્વા પરમં તં પૃથિવ્યા ઇત્યાહ । વેદિર્વૈ પરોઽન્તઃ
પૃથિવ્યાઃ । વેદિમેવાવરુન્ધે । પૃચ્છામિ ત્વા ભુવનસ્ય નાભિમિત્યાહ
। યજ્ઞો વૈ ભુવનસ્ય નાભિઃ । યજ્ઞમેવાવરુન્ધે । પૃચ્છામિ ત્વા
વૃષ્ણો અશ્વસ્ય રેત ઇત્યાહ । સોમો વૈ વૃષ્ણો અશ્વસ્ય રેતઃ ।
સોમપીથમેવાવરુન્ધે । પૃચ્છામિ વાચઃ પરમં વ્યોમેત્યાહ । બ્રહ્મ
વૈ વાચઃ પરમં વ્યોમ । બ્રહ્મવર્ચસમેવાવરુન્ધે ॥ ૩। ૯। ૫। ૫॥ હોતા
ભવતિ વૈ વૃષ્ટિઃ પૂર્વચિત્તિરન્નાદ્યમેવાવ રુન્ધે મહદિત્યાહ સોમો
વૈ વૃષ્ણો અશ્વસ્ય રેતશ્ચત્વારિ ચ ॥ ૫॥

૨૫ અપ વા એતસ્માત્પ્રાણાઃ ક્રામન્તિ । યોઽશ્વમેધેન યજતે । પ્રાણાય
સ્વાહા વ્યાનાય સ્વાહેતિ સંજ્ઞાપ્યમાન આહુતીર્જુહોતિ । પ્રાણાનેવાસ્મિન્દધાતિ ।

નાસ્માત્પ્રાણા અપક્રામન્તિ । અવન્તી સ્થાવન્તીસ્ત્વાઽવન્તુ । પ્રિયં ત્વા પ્રિયાણામ્ ।
વર્ષિષ્ઠમાપ્યાનામ્ । નિધીનાં ત્વા નિધિપતિꣳ હવામહે વસો મમેત્યાહ ।
અપૈવાસ્મૈ તદ્ધ્નુવતે ॥ ૩। ૯। ૬। ૧॥

૨૬ અથો ધુવન્ત્યેવૈનમ્ । અથો ન્યેવાસ્મૈ હ્નુવતે । ત્રિઃ પરિયન્તિ । ત્રય
ઇમે લોકાઃ । એભ્ય એવૈનં લોકેભ્યો ધુવતે । ત્રિઃ પુનઃ પરિયન્તિ ।
ષટ્થ્સંપદ્યન્તે । ષડ્વા ઋતવઃ । ઋતુભિરેવૈનં ધુવતે । અપ વા
એતેભ્યઃ પ્રાણાઃ ક્રામન્તિ ॥ ૩। ૯। ૬। ૨॥

૨૭ યે યજ્ઞે ધુવનં તન્વતે । નવકૃત્વઃ પરિયન્તિ । નવ વૈ
પુરુષે પ્રાણાઃ । પ્રાણાનેવાત્મન્દધતે । નૈભ્યઃ પ્રાણા અપક્રામન્તિ
। અમ્બે અમ્બાલ્યમ્બિક ઇતિ પત્નીમુદાનયતિ । અહ્વતૈવૈનામ્ ।
સુભગે કામ્પીલવાસિનીત્યાહ । તપ એવૈનામુપનયતિ । સુવર્ગે લોકે
સંપ્રોર્ણ્વાથામિત્યાહ ॥ ૩। ૯। ૬। ૩॥

૨૮ સુવર્ગમેવૈનાં લોકં ગમયતિ । આઽહમજાનિ ગર્ભધમા ત્વમજાસિ
ગર્ભધમિત્યાહ । પ્રજા વૈ પશવો ગર્ભઃ । પ્રજામેવ પશૂનાત્મન્ધત્તે ।
દેવા વા અશ્વમેધે પવમાને । સુવર્ગં લોકં ન પ્રાજાનન્ । તમશ્વઃ પ્રાજાનાત્
। યથ્સૂચીભિરસિ પથાન્કલ્પયન્તિ । સુવર્ગસ્ય લોકસ્ય પ્રજ્ઞાત્યૈ ।
ગાયત્રી ત્રિષ્ટુબ્જગતીત્યાહ ॥ ૩। ૯। ૬। ૪॥

૨૯ યથા યજુરેવૈતત્ । ત્રય્યઃ સૂચ્યો ભવન્તિ । અયસ્મય્યો
રજતા હરિણ્યઃ । અસ્ય વૈ લોકસ્ય રૂપમયસ્મય્યઃ । અન્તરિક્ષસ્ય
રજતાઃ । દિવો હરિણ્યઃ । દિશો વા અયસ્મય્યઃ । અવાન્તરદિશા
રજતાઃ । ઊર્ધ્વા હરિણ્યઃ । દિશ એવાસ્મૈ કલ્પયતિ । કસ્ત્વા
છ્યતિ કસ્ત્વા વિશાસ્તીત્યાહાહિꣳ સાયૈ ॥ ૩। ૯। ૬। ૫॥ હ્નુવતે
ક્રામન્ત્યૂર્ણ્વાથામિત્યાહ જગતીત્યાહ કલ્પયત્યેકં ચ ॥ ૬॥

૩૦ અપ વા એતસ્માચ્છ્રી રાષ્ટ્રં ક્રામતિ । યોઽશ્વમેધેન યજતે
। ઊર્ધ્વામેનામુચ્છ્રયતાદિત્યાહ । શ્રીર્વૈ રાષ્ટ્રમશ્વમેધઃ ।
શ્રિયમેવાસ્મૈ રાષ્ટ્રમૂર્ધ્વમુચ્છ્રયતિ । વેણુભારં ગિરાવિવેત્યાહ
। રાષ્ટ્રં વૈ ભારઃ । રાષ્ટ્રમેવાસ્મૈ પર્યૂહતિ । અથાસ્યા

મધ્યમેધતામિત્યાહ । શ્રીર્વૈ રાષ્ટ્રસ્ય મધ્યમ્ ॥ ૩। ૯। ૭। ૧॥

૩૧ શ્રિયમેવાવરુન્ધે । શીતે વાતે પુનન્નિવેત્યાહ । ક્ષેમો વૈ રાષ્ટ્રસ્ય
શીતો વાતઃ । ક્ષેમમેવાવરુન્ધે । યદ્ધરિણી યવમત્તીત્યાહ । વિડ્વૈ
હરિણી । રાષ્ટ્રં યવઃ । વિશં ચૈવાસ્મૈ રાષ્ટ્રં ચ સમીચી દધાતિ ।
ન પુષ્ટં પશુમન્યત ઇત્યાહ । તસ્માદ્રાજા પશૂન્ન પુષ્યતિ ॥ ૩। ૯। ૭। ૨॥

૩૨ શૂદ્રા યદર્યજારા ન પોષાય ધનાયતીત્યાહ । તસ્માદ્વૈશીપુત્રં
નાભિષિઞ્ચન્તે । ઇયં યકા શકુન્તિકેત્યાહ । વિડ્વૈ શકુન્તિકા ।
રાષ્ટ્રમશ્વમેધઃ । વિશં ચૈવાસ્મૈ રાષ્ટ્રં ચ સમીચી દધાતિ ।
આહલમિતિ સર્પતીત્યાહ । તસ્માદ્રાષ્ટ્રાય વિશઃ સર્પન્તિ । આહતં ગભે
પસ ઇત્યાહ । વિડ્વૈ ગભઃ ॥ ૩। ૯। ૭। ૩॥

૩૩ રાષ્ટ્રં પસઃ । રાષ્ટ્રમેવ વિશ્યાહન્તિ । તસ્માદ્રાષ્ટ્રં વિશં
ઘાતુકમ્ । માતા ચ તે પિતા ચ ત ઇત્યાહ । ઇયં વૈ માતા । અસૌ પિતા
। આભ્યામેવૈનં પરિદદાતિ । અગ્રં વૃક્ષસ્ય રોહત ઇત્યાહ । શ્રીર્વૈ
વૃક્ષસ્યાગ્રમ્ । શ્રિયમેવાવરુન્ધે ॥ ૩। ૯। ૭। ૪॥

૩૪ પ્રસુલામીતિ તે પિતા ગભે મુષ્ટિમતꣳ સયદિત્યાહ । વિડ્વૈ
ગભઃ । રાષ્ટ્રં મુષ્ટિઃ । રાષ્ટ્રમેવ વિશ્યાહન્તિ । તસ્માદ્રાષ્ટ્રં
વિશં ઘાતુકમ્ । અપ વા એતેભ્યઃ પ્રાણાઃ ક્રામન્તિ । યે યજ્ઞેઽપૂતં
વદન્તિ । દધિક્રાવ્ણ્ણો અકારિષમિતિ સુરભિમતીમૃચં વદન્તિ । પ્રાણા
વૈ સુરભયઃ । પ્રાણાનેવાત્મન્દધતે । નૈભ્યઃ પ્રાણા અપક્રામન્તિ ।
આપો હિ ષ્ઠા મયોભુવ ઇત્યદ્ભિર્માર્જયન્તે । આપો વૈ સર્વા દેવતાઃ ।
દેવતાભિરેવાત્માનં પવયન્તે ॥ ૩। ૯। ૭। ૫॥ રાષ્ટ્રસ્ય મધ્યં પુષ્યતિ
ગભો રુન્ધે દધતે ચત્વારિ ચ ॥ ૭॥

૩૫ પ્રજાપતિઃ પ્રજાઃ સૃષ્ટ્વા પ્રેણાઽનુ પ્રાવિશત્ । તાભ્યઃ પુનઃ
સંભવિતું નાશક્નોત્ । સોઽબ્રવીત્ । ઋધ્નવદિત્સઃ । યો મેતઃ પુનઃ
સંભરદિતિ । તં દેવા અશ્વમેધેનૈવ સમભરન્ । તતો વૈ ત
આર્ધ્નુવન્ । યોઽશ્વમેધેન યજતે । પ્રજાપતિમેવ સંભરત્યૃધ્નોતિ
। પુરુષમાલભતે ॥ ૩। ૯। ૮। ૧॥

૩૬ વૈરાજો વૈ પુરુષઃ । વિરાજમેવાલભતે । અથો અન્નં વૈ
વિરાટ્ । અન્નમેવાવરુન્ધે । અશ્વમાલભતે । પ્રાજાપત્યો વા અશ્વઃ ।
પ્રજાપતિમેવાલભતે । અથો શ્રીર્વા એકશફમ્ । શ્રિયમેવાવરુન્ધે ।
ગામાલભતે ॥ ૩। ૯। ૮। ૨॥

૩૭ યજ્ઞો વૈ ગૌઃ । યજ્ઞમેવાલભતે । અથો અન્નં વૈ ગૌઃ । અન્નમેવાવરુન્ધે
। અજાવી આલભતે ભૂમ્ને । અથો પુષ્ટિર્વૈ ભૂમા । પુષ્ટિમેવાવરુન્ધે ।
પર્યગ્નિકૃતં પુરુષં ચારણ્યાગ્શ્ચોત્સૃજન્ત્યહિꣳસાયૈ । ઉભૌ વા
એતૌ પશૂ આલભ્યેતે । યશ્ચાવમો યશ્ચ પરમઃ । તેઽસ્યોભયે યજ્ઞે
બદ્ધાઃ । અભીષ્ટા અભિપ્રીતાઃ । અભિજિતા અભિહુતા ભવન્તિ । નૈનં
દંક્ષ્ણવઃ પશવો યજ્ઞે બદ્ધાઃ । અભીષ્ટા અભિપ્રીતાઃ । અભિજિતા
અભિહુતા હિꣳસન્તિ । યોઽશ્વમેધેન યજતે । ય ઉ ચૈનમેવં વેદ ॥
૩। ૯। ૮। ૩॥ લભતે ગામાલભતે પરમોઽષ્ટૌ ચ ॥ ૮॥

૩૮ પ્રથમેન વા એષ સ્તોમેન રાધ્વા । ચતુષ્ટોમેન
કૃતેનાયાનામુત્તરેઽહન્ । એકવિꣳશે પ્રતિષ્ઠાયાં પ્રતિતિષ્ઠતિ ।
એકવિꣳશાત્પ્રતિષ્ઠાયા ઋતૂનન્વારોહતિ । ઋતવો વૈ પૃષ્ઠાનિ
। ઋતવઃ સંવથ્સરઃ । ઋતુષ્વેવ સંવથ્સરે પ્રતિષ્ઠાય ।
દેવતા અભ્યારોહતિ । શક્વરયઃ પૃષ્ઠં ભવન્ત્યન્યદન્યચ્છન્દઃ
। અન્યેઽન્યે વા એતે પશવ આલભ્યન્તે ॥ ૩। ૯। ૯। ૧॥

૩૯ ઉતેવ ગ્રામ્યાઃ । ઉતેવારણ્યાઃ । અહરેવ રૂપેણ સમર્ધયતિ
। અથો અહ્ન એવૈષ બલિર્હ્રિયતે । તદાહુઃ । અપશવો વા એતે ।
યદજાવયશ્ચારણ્યાશ્ચ । એતે વૈ સર્વે પશવઃ । યદ્ગવ્યા ઇતિ ।
ગવ્યાન્પશૂનુત્તમેઽહન્નાલભતે ॥ ૩। ૯। ૯। ૨॥

૪૦ તેનૈવોભયાન્પશૂનવરુન્ધે । પ્રાજાપત્યા ભવન્તિ ।
અનભિજિતસ્યાભિજિત્યૈ । સૌરીર્નવ શ્વેતા વશા અનૂબન્ધ્યા
ભવન્તિ । અન્તત એવ બ્રહ્મવર્ચસમવરુન્ધે । સોમાય
સ્વરાજ્ઞેઽનોવાહાવનડ્વાહાવિતિ દ્વન્દ્વિનઃ પશૂનાલભતે

। અહોરાત્રાણામભિજિત્યૈ । પશુભિર્વા એષ વ્યૃદ્ધ્યતે
। યોઽશ્વમેધેન યજતે । છગલં કલ્માષં કિકિદીવિં
વિદીગયમિતિ ત્વાષ્ટ્રાન્પશૂનાલભતે । પશુભિરેવાત્માનꣳ
સમર્ધયતિ । ઋતુભિર્વા એષ વ્યૃદ્ધ્યતે । યોઽશ્વમેધેન યજતે ।
પિશઙ્ગાસ્ત્રયો વાસન્તા ઇત્યૃતુપશૂનાલભતે । ઋતુભિરેવાત્માનꣳ
સમર્ધયતિ । આ વા એષ પશુભ્યો વૃશ્ચતે । યોઽશ્વમેધેન યજતે ।
પર્યગ્નિકૃતા ઉત્સૃજન્ત્યનાવ્રસ્કાય ॥ ૩। ૯। ૯। ૩॥ લભ્યન્તે લભતે
ત્વાષ્ટ્રાન્પશૂનાલભતેઽષ્ટૌ ચ ॥ ૯॥

૪૧ પ્રજાપતિરકામયત મહાનન્નાદઃ સ્યામિતિ । સ એતાવશ્વમેધે
મહિમાનાવપશ્યત્ । તાવગૃહ્ણીત । તતો વૈ સ મહાનન્નાદોઽભવત્ । યઃ
કામયેત મહાનન્નાદઃ સ્યામિતિ । સ એતાવશ્વમેધે મહિમાનૌ ગૃહ્ણીત
। મહાનેવાન્નાદો ભવતિ । યજમાનદેવત્યા વૈ વપા । રાજા મહિમા ।
યદ્વપાં મહિમ્નોભયતઃ પરિયજતિ । યજમાનમેવ રાજ્યેનોભયતઃ
પરિગૃહ્ણાતિ । પુરસ્તાથ્સ્વાહાકારા વા અન્યે દેવાઃ । ઉપરિષ્ટાથ્સ્વાહાકારા અન્યે ।
તે વા એતેઽશ્વ એવ મેધ્ય ઉભયેઽવરુધ્યન્તે । યદ્વપાં મહિમ્નોભયતઃ
પરિયજતિ । તાનેવોભયાન્પ્રીણાતિ ॥ ૩। ૯। ૧૦। ૧॥ પરિયજતિ ષટ્ચ ॥ ૧૦॥

૪૨ વૈશ્વદેવો વા અશ્વઃ । તં યત્પ્રાજાપત્યં કુર્યાત્ । યા દેવતા
અપિભાગાઃ । તા ભાગધેયેન વ્યર્ધયેત્ । દેવતાભ્યઃ સમદં દધ્યાત્ ।
સ્તેગાન્દꣳષ્ટ્રાભ્યાં મણ્ડૂકાઞ્જમ્ભ્યેભિરિતિ । આજ્યમવદાનં કૃત્વા
પ્રતિસંખ્યાયમાહુતીર્જુહોતિ । યા એવ દેવતા અપિભાગાઃ । તા ભાગધેયેન
સમર્ધયતિ । ન દેવતાભ્યઃ સમદં દધાતિ ॥ ૩। ૯। ૧૧। ૧॥

૪૩ ચતુર્દશૈતાનનુવાકાઞ્જુહોત્યનન્તરિત્યૈ । પ્રયાસાય સ્વાહેતિ
પઞ્ચદશમ્ । પઞ્ચદશ વા અર્ધમાસસ્ય રાત્રયઃ । અર્ધમાસશઃ
સંવથ્સર આપ્યતે । દેવાસુરાઃ સંયત્તા આસન્ । તેઽબ્રુવન્નગ્નયઃ
સ્વિષ્ટકૃતઃ । અશ્વસ્ય મેધ્યસ્ય વયમુદ્ધારમુદ્ધરામહૈ ।
અથૈતાનભિભવામેતિ । તે લોહિતમુદહરન્ત । તતો દેવા અભવન્ ॥ ૩। ૯। ૧૧। ૨॥

૪૪ પરાઽસુરાઃ । યથ્સ્વિષ્ટકૃદ્ભ્યો લોહિતં જુહોતિ ભ્રાતૃવ્યાભિભૂત્યૈ

। ભવત્યાત્મના । પરાઽસ્ય ભ્રાતૃવ્યો ભવતિ । ગોમૃગકણ્ઠેન
પ્રથમામાહુતિં જુહોતિ । પશવો વૈ ગોમૃગઃ । રુદ્રોઽગ્નિઃ સ્વિષ્ટકૃત્ ।
રુદ્રાદેવ પશૂનન્તર્દધાતિ । અથો યત્રૈષાઽઽહુતિર્હૂયતે । ન તત્ર
રુદ્રઃ પશૂનભિમન્યતે ॥ ૩। ૯। ૧૧। ૩॥

૪૫ અશ્વશફેન દ્વિતીયામાહુતિં જુહોતિ । પશવો વા એકશફમ્ ।
રુદ્રોઽગ્નિઃ સ્વિષ્ટકૃત્ । રુદ્રાદેવ પશૂનન્તર્દધાતિ । અથો
યત્રૈષાઽઽહુતિર્ હૂયતે । ન તત્ર રુદ્રઃ પશૂનભિમન્યતે ।
અયસ્મયેન કમણ્ડલુના તૃતીયામ્ । આહુતિં જુહોત્યાયાસ્યો વૈ પ્રજાઃ
। રુદ્રોઽગ્નિઃ સ્વિષ્ટકૃત્ । રુદ્રાદેવ પ્રજા અન્તર્દધાતિ । અથો
યત્રૈષાઽઽહુતિર્હૂયતે । ન તત્ર રુદ્રઃ પ્રજા અભિમન્યતે ॥ ૩। ૯। ૧૧। ૪॥ દધાત્યભવન્મન્યતે પ્રજા અન્તર્દધાતિ
દ્વે ચ ॥ ૧૧॥

૪૬ અશ્વસ્ય વા આલબ્ધસ્ય મેધ ઉદક્રામત્ । તદશ્વસ્તોમીયમભવત્ ।
યદશ્વસ્તોમીયં જુહોતિ । સ મેધમેવૈનમાલભતે । આજ્યેન જુહોતિ ।
મેધો વા આજ્યમ્ । મેધોઽશ્વસ્તોમીયમ્ । મેધેનૈવાસ્મિન્મેધં દધાતિ ।
ષટ્ત્રિꣳશતં જુહોતિ । ષટ્ત્રિꣳશદક્ષરા બૃહતી ॥ ૩। ૯। ૧૨। ૧॥

૪૭ બાર્હતાઃ પશવઃ । સા પશૂનાં માત્રા । પશૂનેવ માત્રયા સમર્ધયતિ
। તા યદ્ભૂયસીર્વા કનીયસીર્વા જુહુયાત્ । પશૂન્માત્રયા વ્યર્ધયેત્ ।
ષટ્ત્રિꣳશતં જુહોતિ । ષટ્ત્રિꣳશદક્ષરા બૃહતી । બાર્હતાઃ પશવઃ
। સા પશૂનાં માત્રા । પશૂનેવ માત્રયા સમર્ધયતિ ॥ ૩। ૯। ૧૨। ૨॥

૪૮ અશ્વસ્તોમીયꣳહુત્વા દ્વિપદા જુહોતિ । દ્વિપાદ્વૈ પુરુષો દ્વિપ્રતિષ્ઠઃ
। તદેનં પ્રતિષ્ઠયા સમર્ધયતિ । તદાહુઃ । અશ્વસ્તોમીયં પૂર્વꣳ
હોતવ્યા ૩ ં દ્વિપદા ૩ ઇતિ । અશ્વો વા અશ્વસ્તોમીયમ્ । પુરુષો દ્વિપદાઃ ।
અશ્વસ્તોમીયꣳહુત્વા દ્વિપદા જુહોતિ । તસ્માદ્દ્વિપાચ્ચતુષ્પાદમત્તિ
। અથો દ્વિપદ્યેવ ચતુષ્પદઃ પ્રતિષ્ઠાપયતિ । દ્વિપદા હુત્વા
। નાન્યામુત્તરામાહુતિં જુહુયાત્ । યદન્યામુત્તરામાહુતિં જુહુયાત્ । પ્ર
પ્રતિષ્ઠાયાશ્ચ્યવેત । દ્વિપદા અન્તતો જુહોતિ પ્રતિષ્ઠિત્યૈ ॥ ૩। ૯। ૧૨। ૩॥ બૃહત્યર્ધયતિ સ્થાપયતિ પઞ્ચ
ચ ॥ ૧૨॥

૪૯ પ્રજાપતિરશ્વમેધમસૃજત । સોઽસ્માથ્સૃષ્ટોઽપાક્રામત્ ।
તં યજ્ઞક્રતુભિરન્વૈચ્છત્ । તં યજ્ઞક્રતુભિર્નાન્વવિન્દત્ ।
તમિષ્ટિભિરન્વૈચ્છત્ । તમિષ્ટિભિરન્વવિન્દત્ । તદિષ્ટીનામિષ્ટિત્વમ્ ।
યથ્સંવથ્સરમિષ્ટિભિર્યજતે । અશ્વમેવ તદન્વિચ્છતિ । સાવિત્રિયો
ભવન્તિ ॥ ૩। ૯। ૧૩। ૧॥

૫૦ ઇયં વૈ સવિતા । યો વા અસ્યાં નશ્યતિ યો નિલયતે । અસ્યાં વાવ તં
વિન્દન્તિ । ન વા ઇમાં કશ્ચનેત્યાહુઃ । તિર્યઙ્નોર્ધ્વોઽત્યેતુમર્હતીતિ ।
યથ્સાવિત્રિયો ભવન્તિ । સવિતૃપ્રસૂત એવૈનમિચ્છતિ । ઈશ્વરો વા
અશ્વઃ પ્રમુક્તઃ પરાં પરાવતં ગન્તોઃ । યથ્સાયં ધૃતીર્જુહોતિ ।
અશ્વસ્ય યત્યૈ ધૃત્યૈ ॥ ૩। ૯। ૧૩। ૨॥

૫૧ યત્પ્રાતરિષ્ટિભિર્યજતે । અશ્વમેવ તદન્વિચ્છતિ । યથ્સાયં
ધૃતીર્જુહોતિ । અશ્વસ્યૈવ યત્યૈ ધૃત્યૈ । તસ્માથ્સાયં પ્રજાઃ,
ક્ષેમ્યા ભવન્તિ । યત્પ્રાતરિષ્ટિભિર્યજતે । અશ્વમેવ તદન્વિચ્છતિ ।
તસ્માદ્દિવા નષ્ટૈષ એતિ । યત્પ્રાતરિષ્ટિભિર્યજતે સાયં ધૃતીર્જુહોતિ
। અહોરાત્રાભ્યામેવૈનમન્વિચ્છતિ । અથો અહોરાત્રાભ્યામેવાસ્મૈ
યોગક્ષેમં કલ્પયતિ ॥ ૩। ૯। ૧૩। ૩॥ ભવન્તિ ધૃત્યા એનમન્વિચ્છત્યેકં
ચ ॥ ૧૩॥

૫૨ અપ વા એતસ્માચ્છ્રી રાષ્ટ્રં ક્રામતિ । યોઽશ્વમેધેન યજતે ।
બ્રાહ્મણૌ વીણાગાથિનૌ ગાયતઃ । શ્રિયા વા એતદ્રૂપમ્ । યદ્વીણા ।
શ્રિયમેવાસ્મિન્તદ્ધત્તઃ । યદા ખલુ વૈ પુરુષઃ શ્રિયમશ્નુતે ।
વીણાઽસ્મૈ વાદ્યતે । તદાહુઃ । યદુભૌ બ્રાહ્મણૌ ગાયેતામ્ ॥ ૩। ૯। ૧૪। ૧॥

૫૩ પ્રભ્રꣳશુકાઽસ્માચ્છ્રીઃ સ્યાત્ । ન વૈ બ્રાહ્મણે શ્રી રમત
ઇતિ । બ્રાહ્મણોઽન્યો ગાયેત્ । રાજન્યોઽન્યઃ । બ્રહ્મ વૈ બ્રાહ્મણઃ ।
ક્ષત્રꣳ રાજન્યઃ । તથા હાસ્ય બ્રહ્મણા ચ ક્ષત્રેણ ચોભયતઃ
શ્રીઃ પરિગૃહીતા ભવતિ । તદાહુઃ । યદુભૌ દિવા ગાયેતામ્ । અપાસ્માદ્રાષ્ટ્રં
ક્રામેત્ ॥ ૩। ૯। ૧૪। ૨॥

૫૪ ન વૈ બ્રાહ્મણે રાષ્ટ્રꣳ રમત ઇતિ । યદા ખલુ વૈ રાજા કામયતે ।

અથ બ્રાહ્મણં જિનાતિ । દિવા બ્રાહ્મણો ગાયેત્ । નક્તꣳરાજન્યઃ । બ્રહ્મણો
વૈ રૂપમહઃ । ક્ષત્રસ્ય રાત્રિઃ । તથા હાસ્ય બ્રહ્મણા ચ ક્ષત્રેણ
ચોભયતો રાષ્ટ્રં પરિગૃહીતં ભવતિ । ઇત્યદદા ઇત્યયજથા ઇત્યપચ
ઇતિ બ્રાહ્મણો ગાયેત્ । ઇષ્ટાપૂર્તં વૈ બ્રાહ્મણસ્ય ॥ ૩। ૯। ૧૪। ૩॥

૫૫ ઇષ્ટાપૂર્તેનૈવૈનꣳ સ સમર્ધયતિ । ઇત્યજિના ઇત્યયુધ્યથા
ઇત્યમુꣳ સંગ્રામમહન્નિતિ રાજન્યઃ । યુદ્ધં વૈ રાજન્યસ્ય ।
યુદ્ધેનૈવૈનꣳ સ સમર્ધયતિ । અક્લૃપ્ના વા એતસ્યર્તવ ઇત્યાહુઃ
। યોઽશ્વમેધેન યજત ઇતિ । તિસ્રોઽન્યો ગાયતિ તિસ્રોઽન્યઃ ।
ષટ્થ્સંપદ્યન્તે । ષડ્વા ઋતવઃ । ઋતૂનેવાસ્મૈ કલ્પયતઃ । તાભ્યાꣳ
સગ્ગ્સ્થાયામ્ । અનોયુક્તે ચ શતે ચ દદાતિ । શતાયુઃ પુરુષઃ
શતેન્દ્રિયઃ । આયુષ્યેવેન્દ્રિયે પ્રતિતિષ્ઠતિ ॥ ૩। ૯। ૧૪। ૪॥ ગાયેતાં
ક્ષામેદ્બ્રાહ્મણસ્ય કલ્પયતશ્ચત્વારિ ચ ॥ ૧૪॥

૫૬ સર્વેષુ વા એષુ લોકેષુ મૃત્યવોઽન્વાયત્તાઃ । તેભ્યો યદાહુતીર્ન
જુહુયાત્ । લોકે લોક એનં મૃત્યુર્વિન્દેત્ । મૃત્યવે સ્વાહા મૃત્યવે
સ્વાહેત્યભિ પૂર્વમાહુતીર્જુહોતિ । લોકાલ્લોકાદેવ મૃત્યુમવયજતે ।
નૈનં લોકે લોકે મૃત્યુર્વિન્દતિ । યદમુષ્મૈ સ્વાહાઽમુષ્મૈ સ્વાહેતિ
જુહ્વથ્સંચક્ષીત । બહું મૃત્યુમમિત્રં કુર્વીત । મૃત્યવે સ્વાહેત્યેકસ્મા
એવૈકાં જુહુયાત્ । એકો વા અમુષ્મિં લ્લોકે મૃત્યુઃ ॥ ૩। ૯। ૧૫। ૧॥

૫૭ અશનયા મૃત્યુરેવ । તમેવામુષ્મિં લ્લોકેઽવયજતે ।
ભ્રૂણહત્યાયૈ સ્વાહેત્યવભૃથ આહુતિં જુહોતિ । ભ્રૂણહત્યામેવાવયજતે
। તદાહુઃ । યદ્ભ્રૂણહત્યાઽપાત્ર્યાઽથ । કસ્માદ્યજ્ઞેઽપિ ક્રિયત ઇતિ ।
અમૃત્યુર્વા અન્યો ભ્રૂણહત્યાયા ઇત્યાહુઃ । ભ્રૂણહત્યા વાવ મૃત્યુરિતિ
। યદ્ભ્રૂણહત્યાયૈ સ્વાહેત્યવભૃથ આહુતિં જુહોતિ ॥ ૩। ૯। ૧૫। ૨॥

૫૮ મૃત્યુમેવાહુત્યા તર્પયિત્વા પરિપાણં કૃત્વા । ભ્રૂણઘ્ને ભેષજં
કરોતિ । એતાꣳ હ વૈ મુણ્ડિભ ઔદન્યવઃ । ભ્રૂણહત્યાયૈ
પ્રાયશ્ચિત્તિં વિદાઞ્ચકાર । યો હાસ્યાપિ પ્રજાયાં બ્રાહ્મણꣳ હન્તિ
। સર્વસ્મૈ તસ્મૈ ભેષજં કરોતિ । જુમ્બકાય સ્વાહેત્યવભૃથ

ઉત્તમામાહુતિં જુહોતિ । વરુણો વૈ જુમ્બકઃ । અન્તત એવ વરુણમવયજતે
। ખલતેર્વિક્લિધસ્ય શુક્લસ્ય પિઙ્ગાક્ષસ્ય મૂર્ધઞ્જુહોતિ ।
એતદ્વૈ વરુણસ્ય રૂપમ્ । રૂપેણૈવ વરુણમવયજતે ॥ ૩। ૯। ૧૫। ૩॥ લોકે
મૃત્યુર્જુહોતિ મૂર્ધઞ્જુહોતિ દ્વે ચ ॥ ૧૫॥

૫૯ વારુણો વા અશ્વઃ । તં દેવતયા વ્યર્ધયતિ । યત્પ્રાજાપત્યં કરોતિ
। નમો રાજ્ઞે નમો વરુણાયેત્યાહ । વારુણો વા અશ્વઃ । સ્વયૈવૈનં
દેવતયા સમર્ધયતિ । નમોઽશ્વાય નમઃ પ્રજાપતય ઇત્યાહ
। પ્રાજાપત્યો વા અશ્વઃ । સ્વયૈવૈનં દેવતયા સમર્ધયતિ ।
નમોઽધિપતય ઇત્યાહ ॥ ૩। ૯। ૧૬। ૧॥

૬૦ ધર્મો વા અધિપતિઃ । ધર્મમેવાવરુન્ધે । અધિપતિરસ્યધિપતિં
મા કુર્વધિપતિરહં પ્રજાનાં ભૂયાસમિત્યાહ । અધિપતિમેવૈનꣳ
સમાનાનાં કરોતિ । માં ધેહિ મયિ ધેહીત્યાહ । આશિષમેવૈતામાશાસ્તે ।
ઉપાકૃતાય સ્વાહેત્યુપાકૃતે જુહોતિ । આલબ્ધાય સ્વાહેતિ નિયુક્તે જુહોતિ ।
હુતાય સ્વાહેતિ હુતે જુહોતિ । એષાં લોકાનામભિજિત્યૈ ॥ ૩। ૯। ૧૬। ૨॥

૬૧ પ્ર વા એષ એભ્યો લોકેભ્યશ્ચ્યવતે । યોઽશ્વમેધેન યજતે ।
આગ્નેયમૈન્દ્રાગ્નમાશ્વિનમ્ । તાન્પશૂનાલભતે પ્રતિષ્ઠિત્યૈ । યદાગ્નેયો
ભવતિ । અગ્નિઃ સર્વા દેવતાઃ । દેવતા એવાવરુન્ધે । બ્રહ્મ વા અગ્નિઃ ।
ક્ષત્ત્રમિન્દ્રઃ । યદૈન્દ્રાગ્નો ભવતિ ॥ ૩। ૯। ૧૬। ૩॥

૬૨ બ્રહ્મક્ષત્ત્રે એવાવરુન્ધે । યદાશ્વિનો ભવતિ । આશિષામવરુદ્ધ્યૈ
। ત્રયો ભવન્તિ । ત્રય ઇમે લોકાઃ । એષ્વેવ લોકેષુ પ્રતિતિષ્ઠતિ ।
અગ્નયેઽꣳહોમુચેઽષ્ટાકપાલ ઇતિ દશહવિષમિષ્ટિં નિર્વપતિ ।
દશાક્ષરા વિરાટ્ । અન્નં વિરાટ્ । વિરાજૈવાન્નાદ્યમવરુન્ધે । અગ્નેર્મન્વે
પ્રથમસ્ય પ્રચેતસ ઇતિ યાજ્યાનુવાક્યા ભવન્તિ સર્વત્વાય ॥ ૩। ૯। ૧૬। ૪॥ અધિપતય ઇત્યાહાભિજિત્યા
ઐન્દ્રાગ્નો ભવતિ રુન્ધ એકં ચ ॥ ૧૬॥

૬૩ યદ્યશ્વમુપતપદ્વિન્દેત્ । આગ્નેયમષ્ટાકપાલં નિર્વપેત્ । સૌમ્યં
ચરુમ્ । સાવિત્રમષ્ટાકપાલમ્ । યદાગ્નેયો ભવતિ । અગ્નિઃ સર્વા દેવતાઃ ।
દેવતાભિરેવૈનં ભિષજ્યતિ । યત્સૌમ્યો ભવતિ । સોમો વા ઓષધીનાꣳ

રાજા । યાભ્ય એવૈનં વિન્દતિ ॥ ૩। ૯। ૧૭। ૧॥

૬૪ તાભિરેવૈનં ભિષજ્યતિ । યથ્સાવિત્રો ભવતિ । સવિતૃપ્રસૂત એવૈનં
ભિષજ્યતિ । એતાભિરેવૈનં દેવતાભિર્ભિષજ્યતિ । અગદો હૈવ ભવતિ ।
પૌષ્ણં ચરું નિર્વપેત્ । યદિ શ્લોણઃ સ્યાત્ । પૂષા વૈ શ્લૌણ્યસ્ય ભિષક્ ।
સ એવૈનં ભિષજ્યતિ । અશ્લોણો હૈવ ભવતિ ॥ ૩। ૯। ૧૭। ૨॥

૬૫ રૌદ્રં ચરું નિર્વપેત્ । યદિ મહતી દેવતાઽભિમન્યેત ।
એતદ્દેવત્યો વા અશ્વઃ । સ્વયૈવૈનં દેવતયા ભિષજ્યતિ । અગદો હૈવ
ભવતિ । વૈશ્વાનરં દ્વાદશકપાલં નિર્વપેન્મૃગાખરે યદિ નાગચ્છેત્ ।
ઇયં વા અગ્નિર્વૈશ્વાનરઃ । ઇયમેવૈનમર્ચિભ્યાં પરિરોધમાનયતિ ।
આ હૈવ સુત્યમહર્ગચ્છતિ । યદ્યધીયાત્ ॥ ૩। ૯। ૧૭। ૩॥

૬૬ અગ્નયેઽꣳહોમુચેઽષ્ટાકપાલઃ । સૌર્યં પયઃ । વાયવ્ય આજ્યભાગઃ
। યજમાનો વા અશ્વઃ । અꣳહસા વા એષ ગૃહીતઃ । યસ્યાશ્વો મેધાય
પ્રોક્ષિતોઽધ્યેતિ । યદꣳહોમુચે નિર્વપતિ । અꣳહસ એવ તેન
મુચ્યતે । યજમાનો વા અશ્વઃ । રેતસા વા એષ વ્યૃધ્યતે ॥ ૩। ૯। ૧૭। ૪॥

૬૭ યસ્યાશ્વો મેધાય પ્રોક્ષિતોઽધ્યેતિ । સૌર્યꣳ રેતઃ । યથ્સૌર્યં
પયો ભવતિ । રેતસૈવૈનꣳ સ સમર્ધયતિ । યજમાનો વા અશ્વઃ
। ગર્ભૈર્વા એષ વ્યૃધ્યતે । યસ્યાશ્વો મેધાય પ્રોક્ષિતોઽધ્યેતિ ।
વાયવ્યા ગર્ભાઃ । યદ્વાયવ્ય આજ્યભાગો ભવતિ । ગર્ભૈરેવૈનꣳ
સ સમર્ધયતિ । અથો યસ્યૈષાઽશ્વમેધે પ્રાયશ્ચિત્તિઃ ક્રિયતે । ઇષ્ટ્વા
વસીયાન્ભવતિ ॥ ૩। ૯। ૧૭। ૫॥ વિન્દત્યશ્લોણો હૈવ ભવત્યધીયાદૃધ્યતે
ગર્ભૈરેવૈનꣳ સમર્ધયતિ દ્વે ચ ॥ ૧૭॥

૬૮ તદાહુઃ । દ્વાદશ બ્રહ્મૌદનાન્થ્સꣳસ્થિતે નિર્વપેત્ ।
દ્વાદશભિર્વેષ્ટિભિર્યજેતેતિ । યદિષ્ટિભિર્યજેત । ઉપનામુક એનં
યજ્ઞઃ સ્યાત્ । પાપીયાગ્સ્તુ સ્યાત્ । આપ્નાનિ વા એતસ્ય છન્દાꣳસિ । ય
ઈજાનઃ । તાનિ ક એતાવદાશુ પુનઃ પ્રયુંજીતેતિ । સર્વા વૈ સꣳસ્થિતે
યજ્ઞે વાગાપ્યતે ॥ ૩। ૯। ૧૮। ૧॥

૬૯ સાઽઽપ્તા ભવતિ યાતયામ્ની । ક્રૂરીકૃતેવ હિ ભવત્યરુષ્કૃતા । સા ન

પુનઃ પ્રયુજ્યેત્યાહુઃ । દ્વાદશૈવ બ્રહ્મૌદનાન્થ્સર૱ સ્થિતે નિર્વપેત્
। પ્રજાપતિર્વા ઓદનઃ । યજ્ઞઃ પ્રજાપતિઃ । ઉપનામુક એનં યજ્ઞો
ભવતિ । ન પાપીયાન્ભવતિ । દ્વાદશ ભવન્તિ । દ્વાદશ માસાઃ સંવથ્સરઃ ।
સંવથ્સર એવ પ્રતિતિષ્ઠતિ ॥ ૩। ૯। ૧૮। ૨॥ આપ્યતે સંવથ્સર એકં
ચ ॥ ૧૮॥

૭૦ એષ વૈ વિભૂર્નામ યજ્ઞઃ । સર્વ૱હ વૈ તત્ર વિભુ ભવતિ ।
યત્રૈતેન યજ્ઞેન યજન્તે । એષ વૈ પ્રભૂર્નામ યજ્ઞઃ । સર્વ૱
હ વૈ તત્ર પ્રભુ ભવતિ । યત્રૈતેન યજ્ઞેન યજન્તે । એષ વા
ઊર્જસ્વાન્નામ યજ્ઞઃ । સર્વ૱હ વૈ તત્રોર્જસ્વદ્ભવતિ । યત્રૈતેન
યજ્ઞેન યજન્તે । એષ વૈ પયસ્વાન્નામ યજ્ઞઃ ॥ ૩। ૯। ૧૯। ૧॥

૭૧ સર્વ૱હ વૈ તત્ર પયસ્વદ્ભવતિ । યત્રૈતેન યજ્ઞેન યજન્તે ।
એષ વૈ વિધૃતો નામ યજ્ઞઃ । સર્વ૱હ વૈ તત્ર વિધૃતં ભવતિ ।
યત્રૈતેન યજ્ઞેન યજન્તે । એષ વૈ વ્યાવૃત્તો નામ યજ્ઞઃ । સર્વ૱
હ વૈ તત્ર વ્યાવૃત્તં ભવતિ । યત્રૈતેન યજ્ઞેન યજન્તે । એષ વૈ
પ્રતિષ્ઠિતો નામ યજ્ઞઃ । સર્વ૱હ વૈ તત્ર પ્રતિષ્ઠિતં ભવતિ ॥

૩। ૯। ૧૯। ૨॥

૭૨ યત્રૈતેન યજ્ઞેન યજન્તે । એષ વૈ તેજસ્વી નામ યજ્ઞઃ ।
સર્વ૱હ વૈ તત્ર તેજસ્વિ ભવતિ । યત્રૈતેન યજ્ઞેન યજન્તે ।
એષ વૈ બ્રહ્મવર્ચસી નામ યજ્ઞઃ । આ હ વૈ તત્ર બ્રાહ્મણો બ્રહ્મવર્ચસી
જાયતે । યત્રૈતેન યજ્ઞેન યજન્તે । એષ વા અતિવ્યાધી નામ યજ્ઞઃ ।
આ હ વૈ તત્ર રાજન્યોઽતિવ્યાધી જાયતે । યત્રૈતેન યજ્ઞેન યજન્તે ।
એષ વૈ દીર્ઘો નામ યજ્ઞઃ । દીર્ઘાયુષો હ વૈ તત્ર મનુષ્યા ભવન્તિ ।
યત્રૈતેન યજ્ઞેન યજન્તે । એષ વૈ ક્લૃપ્તો નામ યજ્ઞઃ । કલ્પતે હ
વૈ તત્ર પ્રજાભ્યો યોગક્ષેમઃ । યત્રૈતેન યજ્ઞેન યજન્તે ॥ ૩। ૯। ૧૯। ૩॥
પયસ્વાન્નામ યજ્ઞઃ પ્રતિષ્ઠિતં ભવતિ યત્રૈતેન યજ્ઞેન યજન્તે
ષટ્ચ ॥ ૧૯॥ એષ વૈ વિભૂઃ પ્રભૂરૂર્જસ્વાન્ પયસ્વાન્ વિધૃતો
વ્યાવૃત્તઃ પ્રતિષ્ઠિતસ્તેજસ્વી બ્રહ્મવર્ચસ્યતિ વ્યાધી દીર્ઘઃ ક્લૃપ્તો

દ્વાદશ ॥

૭૩ તાર્પ્યેણાશ્વ ꣳ સંજ્ઞપયન્તિ । યજ્ઞો વૈ તાર્પ્યમ્ । યજ્ઞેનૈવૈન ꣳ
સમર્ધયન્તિ । યામેન સામ્ના પ્રસ્તોતાઽનૂપતિષ્ઠતે । યમલોકમેવૈનં
ગમયતિ । તાર્પ્યે ચ કૃત્યધીવાસે ચાશ્વ ꣳ સંજ્ઞપયન્તિ । એતદ્વૈ
પશૂના ꣳ રૂપમ્ । રૂપેણૈવ પશૂનવરુન્ધે । હિરણ્યકશિપુ
ભવતિ । તેજસોઽવરુદ્ધ્યૈ ॥ ૩। ૯। ૨૦। ૧॥

૭૪ રુક્મો ભવતિ । સુવર્ગસ્ય લોકસ્યાનુખ્યાત્યૈ । અશ્વો ભવતિ ।
પ્રજાપતેરાપ્ત્યૈ । અસ્ય વૈ લોકસ્ય રૂપં તાર્પ્યમ્ । અન્તરિક્ષસ્ય
કૃત્યધીવાસઃ । દિવો હિરણ્યકશિપુ । આદિત્યસ્ય રુક્મઃ ।
પ્રજાપતેરશ્વઃ । ઇમમેવ લોકં તાર્પ્યેણાપ્નોતિ ॥

૭૫ અન્તરિક્ષં કૃત્યધીવાસેન । દિવ ꣳ હિરણ્યકશિપુના । આદિત્ય ꣳ
રુક્મેણ । અશ્વેનૈવ મેધ્યેન પ્રજાપતેઃ સાયુજ્ય ꣳ સલોકતામાપ્નોતિ ।
એતાસામેવ દેવતાના ꣳ સાયુજ્યમ્ । સાર્ષ્ટિતા ꣳ સમાનલોકતામાપ્નોતિ
। યોઽશ્વમેધેન યજતે । ય ઉ ચૈનમેવં વેદ ॥ ૩। ૯। ૨૦। ૩॥ અવરુદ્ધ્યા
આપ્નોત્યષ્ટૌ ચ ॥ ૨૦॥

૭૬ આદિત્યાશ્ચાંગિરસશ્ચ સુવર્ગે લોકેઽસ્પર્ધન્ત । તેઽંગિરસ આદિત્યેભ્યઃ ।
અમુમાદિત્યમશ્વગ્ં શ્વેતં ભૂતં દક્ષિણામનયન્ । તેઽબ્રુવન્ । યં નોઽનેષ્ટ
। સ વર્ઽયોઽભૂદિતિ । તસ્માદશ્વ ꣳ સવર્યેત્યાહ્વયન્તિ । તસ્માદ્યજ્ઞે
વરો દીયતે । યત્પ્રજાપતિરાલબ્ધોઽશ્વોઽભવત્ । તસ્માદશ્વો નામ ॥ ૩। ૯। ૨૧। ૧॥

૭૭ યચ્છ્વયદરુરાસીત્ । તસ્માદર્વા નામ । યત્સદ્યો વાજાન્ત્સમજયત્
। તસ્માદ્વાજી નામ । યદસુરાણાં લોકાનાદત્ત । તસ્માદાદિત્યો નામ ।
અગ્નિર્વા અશ્વમેધસ્ય યોનિરાયતનમ્ । સૂર્ઽયોઽગ્નેર્ઽયોનિરાયતનમ્
। યદશ્વમેધેઽગ્નૌ ચિત્ય ઉત્તરવેદિમુપવપતિ ।
યોનિમન્તમેવૈનમાયતનવન્તં કરોતિ ॥ ૩। ૯। ૨૧। ૨॥

૭૮ યોનિમાનાયતનવાન્ભવતિ । ય એવં વેદ । પ્રાણાપાનૌ વા એતૌ દેવાનામ્ ।
યદર્કાશ્વમેધૌ । પ્રાણાપાનાવેવાવરુન્ધે । ઓજો બલં વા એતૌ દેવાનામ્
। યદર્કાશ્વમેધૌ । ઓજો બલમેવાવરુન્ધે । અગ્નિર્વા અશ્વમેધસ્ય

યોનિરાયતનમ્ । સૂર્ય઼્યોઽગ્નેર્ય઼્યોનિરાયતનમ્ । યદશ્વમેધેઽગ્નૌ ચિત્ય
ઉત્તરવેદિં ચિનોતિ । તાવર્કાશ્વમેધૌ । અર્કાશ્વમેધાવેવાવરુન્ધે
। અથો અર્કાશ્વમેધયોરેવ પ્રતિતિષ્ઠતિ ॥ ૩। ૯। ૨૧। ૩॥ નામ કરોતિ
સૂર્ય઼્યોઽગ્નેર્ય઼્યોનિરાયતનં ચત્વારિ ચ ॥ ૨૧॥

૭૯ પ્રજાપતિં વૈ દેવાઃ પિતરમ્ । પશું ભૂતં મેધાયાલભન્ત ।
તમાલભ્યોપાવસન્ । પ્રાતર્યષ્ટાસ્મહ ઇતિ । એકં વા એતદ્દેવાનામહઃ
। યથ્સંવથ્સરઃ । તસ્માદશ્વઃ પુરસ્તાથ્સંવથ્સર આલભ્યતે ।
યત્પ્રજાપતિરાલબ્ધોઽશ્વોઽભવત્ । તસ્માદશ્વઃ । યથ્સદ્યો મેધોઽભવત્ ॥
૩। ૯। ૨૨। ૧॥

૮૦ તસ્માદશ્વમેધઃ । વેદુકોઽશ્વમાશું ભવતિ । ય એવં વેદ ।
યદ્વૈ તત્પ્રજાપતિરાલબ્ધોઽશ્વોઽભવત્ । તસ્માદશ્વઃ પ્રજાપતેઃ
પશૂનામનુરૂપતમઃ । આઽસ્ય પુત્રઃ પ્રતિરૂપો જાયતે । ય એવં વેદ । સર્વાણિ
ભૂતાનિ સંભૃત્યાલભતે । સમેનં દેવાસ્તેજસે બ્રહ્મવર્ચસાય ભરન્તિ ।
યોઽશ્વમેધેન યજતે ॥ ૩। ૯। ૨૨। ૨॥

૮૧ ય ઉ ચૈનમેવં વેદ । એતદ્વૈ તદ્દેવા એતાં દેવતામ્ । પશું ભૂતં
મેધાયાલભન્ત । યજ્ઞમેવ । યજ્ઞેન યજ્ઞમયજન્ત દેવાઃ । કામપ્રં
યજ્ઞમકુર્વત । તેઽમૃતત્વમકામયન્ત । તેઽમૃતત્વમગચ્છન્ ।
યોઽશ્વમેધેન યજતે । દેવાનામેવાયનેનૈતિ ॥ ૩। ૯। ૨૨। ૩॥

૮૨ પ્રાજાપત્યેનૈવ યજ્ઞેન યજતે કામપ્રેણ । અપુનર્મારમેવ ગચ્છતિ
। એતસ્ય વૈ રૂપેણ પુરસ્તાત્પ્રાજાપત્યમૃષભં તૂપરં બહુરૂપમા
લભતે । સર્વેભ્યઃ કામેભ્યઃ । સર્વસ્યાપ્ત્યૈ । સર્વસ્ય જિત્યૈ । સર્વમેવ
તેનાપ્નોતિ । સર્વં જયતિ । યોઽશ્વમેધેન યજતે । ય ઉ ચૈનમેવં વેદ
॥ ૩। ૯। ૨૨। ૪॥ મેધોઽભવદ્યજત એતિ વેદ ॥ ૨૨॥

૮૩ યો વા અશ્વસ્ય મેધ્યસ્ય લોમની વેદ । અશ્વસ્યૈવ મેધ્યસ્ય
લોમં લ્લોમઞ્જુહોતિ । અહોરાત્રે વા અશ્વસ્ય મેધ્યસ્ય લોમની ।
યથ્સાયં પ્રાતર્જુહોતિ । અશ્વસ્યૈવ મેધ્યસ્ય લોમં લ્લોમઞ્જુહોતિ ।
એતદનુકૃતિ હ સ્મ વૈ પુરા । અશ્વસ્ય મેધ્યસ્ય લોમં લ્લોમઞ્જુહ્વતિ । યો

વા અશ્વસ્ય  મેધ્યસ્ય પદે વેદ  । અશ્વસ્યૈવ મેધ્યસ્ય પદે પદે જુહોતિ ।
દર્શપૂર્ણમાસૌ વા અશ્વસ્ય  મેધ્યસ્ય પદે ॥ ૩। ૯। ૨૩। ૧॥

૮૪ યદ્દર્શપૂર્ણમાસૌ યજતે । અશ્વસ્યૈવ મેધ્યસ્ય પદે પદે જુહોતિ ।
એતદનુકૃતિ હ સ્મ  વૈ પુરા । અશ્વસ્ય  મેધ્યસ્ય પદે પદે જુહ્વતિ । યો વા
અશ્વસ્ય  મેધ્યસ્ય વિવર્તનં  વેદ  । અશ્વસ્યૈવ મેધ્યસ્ય વિવર્તને
વિવર્તને જુહોતિ । અસૌ વા આદિત્યોઽશ્વઃ  । સ આહવનીયમાગચ્છતિ ।
તદ્વિવર્તતે । યદગ્નિહોત્રં જુહોતિ  । અશ્વસ્યૈવ મેધ્યસ્ય વિવર્તને
વિવર્તને જુહોતિ । એતદનુકૃતિ હ સ્મ  વૈ પુરા । અશ્વસ્ય  મેધ્યસ્ય વિવર્તને
વિવર્તને જુહ્વતિ ॥ ૩। ૯। ૨૩। ૨॥

પદે અગ્નિહોત્રં જુહોતિ  ત્રીણિ  ચ ॥ ૨૩॥

પ્રજાપતિસ્તમષ્ટાદશિભિઃ  પ્રજાપતિરકામયતો  ભાવસ્મૈ યુઞ્જન્તિ
તેજસાઽપ  પ્રાણા અપ  શ્રીરૂર્ધ્વાં પ્રજાપતિઃ પ્રેણાઽનુ  પ્રથમેન
પ્રજાપતિરકામયત મહાન્, વૈશ્વદેવો વા અશ્વોઽશ્વસ્ય પ્રજાપતિસ્તં
યજ્ઞક્રતુભિરપ  શ્રીર્બ્રાહ્મણૌ સર્વેષુ વારુણો યદશ્વં  તદાહુરેષ
વૈ વિભૂસ્તાર્પ્યેણાદિત્યાઃ પ્રજાપતિં  વૈ દેવાઃ પિતરં  યો વા અશ્વસ્ય
મેધ્યસ્ય  લોમની  ત્રયોવિँશતિઃ ॥ ૨૩॥

પ્રજાપતિરસ્મિં લ્લોક ઉત્તરતઃ શ્રિયમેવ પ્રજાપતિરકામયત મહાન્,
યત્પ્રાતઃ પ્ર વા એષ એભ્યો લોકેભ્યઃ  સર્વँહ  વૈ તત્ર  પયસ્વદ્ય ઉ
ચૈનમેવં વેદ  ચત્વાર્યશીતિઃ ॥ ૮૪॥

પ્રજાપતિરશ્વમેધં જુહ્વતિ ॥

ઇતિ તૃતીયં અષ્ટકં સંપૂર્ણમ્ ॥

॥ તૈત્તિરીય-બ્રાહ્મણમ્ ॥

# તૈત્તિરીય-બ્રાહ્મણમ્

## ॥ કાઠકમ્ ॥

॥ શ્રી ગુરુભ્યો નમઃ ॥ હરિઃ ઓ(૪)મ્ ॥

### કાઠકે પ્રથમઃ પ્રપાઠકઃ ૧

### સાવિત્ર ચયનમ્

૧ સંજ્ઞાનં વિજ્ઞાનં પ્રજ્ઞાનં જાનદભિજાનત્ । સંકલ્પમાનં
પ્રકલ્પમાનમુપકલ્પમાનમુપક્લૃપ્તં ક્લૃપ્તમ્ । શ્રેયો વસીય
આયત્સંભૂતં ભૂતમ્ । ચિત્રઃ કેતુઃ પ્રભાનાભાન્ત્સંભાન્ । જ્યોતિષ્માગ્ં
સ્તેજસ્વાનાતપગ્ં સ્તપન્નભિતપન્ । રોચનો રોચમાનઃ શોભનઃ
શોભમાનઃ કલ્યાણઃ । દર્શા દૃષ્ટા દર્શતા વિશ્વરૂપા સુદર્શના
। આપ્યાયમાના પ્યાયમાના પ્યાયા સૂનૃતેરા । આપૂર્યમાણા પૂર્યમાણા
પૂરયન્તી પૂર્ણા પૌર્ણમાસી । દાતા પ્રદાતાઽઽનન્દો મોદઃ પ્રમોદઃ ॥
૩। ૧૦। ૧। ૧॥

૨ આવેશયન્નિવેશયન્ત્સંવેશનઃ સँ શાન્તઃ શાન્તઃ
। આભવન્પ્રભવન્ત્સંભવન્ત્સંભૂતો ભૂતઃ । પ્રસ્તુતં
વિષ્ટુત ँ સર ँ સ્તુતં કલ્યાણં વિશ્વરૂપમ્ । શુક્રમમૃતં
તેજસ્વિ તેજઃ સમિદ્ધમ્ । અરુણં ભાનુમન્મરીચિમદભિતપત્તપસ્વત્
। સવિતા પ્રસવિતા દીપ્તો દીપયન્દીપ્યમાનઃ । જ્વલઞ્જ્વલિતા
તપન્વિતપન્ત્સંતપન્ । રોચનો રોચમાનઃ શુમ્ભૂઃ શુમ્ભમાનો વામઃ
। સુતા સુન્વતી પ્રસુતા સૂયમાનાઽભિષૂયમાણા । પીતી પ્રપા સંપા

તૃપ્તિસ્તર્પયન્તી ॥ ૩। ૧૦। ૧। ૨॥

૩ કાન્તા કામ્યા કામજાતાઽઽયુષ્મતી કામદુઘા ।
અભિશાસ્તાઽનુમન્તાઽઽનન્દો મોદઃ પ્રમોદઃ ।
આસાદયન્નિષાદયન્થ્સ ँ સાદનઃ સ ँ સન્નઃ સન્નઃ ।
આભૂર્વિભૂઃ પ્રભૂઃ શંભૂર્ભુવઃ । પવિત્રં પવિયિષ્યન્પૂતો મેધ્યઃ
। યશો યશસ્વાનાયુરમૃતઃ । જીવો જીવિષ્યન્થ્સ્વર્ગો લોકઃ ।
સહસ્વાન્થ્સહીયાનોજસ્વાન્થ્સહમાનઃ । જયન્નભિજયન્થ્સુદ્રવિણો
દ્રવિણોદાઃ । આર્દ્રપવિત્રો હરિકેશો મોદઃ પ્રમોદઃ ॥ ૩। ૧૦। ૧। ૩॥

૪ અરુણોઽરુણરજાઃ પુણ્ડરીકો વિશ્વજિદભિજિત્ । આર્દ્રઃ
પિન્વમાનોઽન્નવાન્રસવાનિરાવાન્ । સર્વૌષધઃ સમ્ભરો મહસ્વાન્
। એજત્કા જોવત્કાઃ । ક્ષુલ્લકાઃ શિપિવિષ્ટકાઃ । સરિસ્રરાઃ
સુશેરવઃ । અજિરાસો ગમિષ્ણવઃ । ઇદાનીં તદાનીમેતર્હિ
ક્ષિપ્રમજિરમ્ । આશુર્નિમેષઃ ફણો દ્રવન્નતિદ્રવન્ ।
ત્વરગ્ગ્સ્ત્વરમાણ આશુરાશીયાઞ્જવઃ । અગ્નિષ્ટોમ ઉક્થ્યોઽતિરાત્રો
દ્વિરાત્રસ્ત્રિરાત્રશ્ચતૂરાત્રઃ । અગ્નિરૃતુઃ સૂર્ય ઋતુશ્ચન્દ્રમા
ઋતુઃ । પ્રજાપતિઃ સંવથ્સરો મહાન્કઃ ॥ ૩। ૧૦। ૧। ૪॥ પ્રમોદસ્તર્પયન્તી
પ્રમોદો જવસ્ત્રીણિ ચ ॥ ૧॥

૫ ભૂરગ્નિં ચ પૃથિવીં ચ માં ચ । ત્રીગ્શ્ચ લોકાન્થ્સંવથ્સરં
ચ । પ્રજાપતિસ્ત્વા સાદયતુ । તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ।
ભુવો વાયું ચાન્તરિક્ષં ચ માં ચ । ત્રીગ્શ્ચ લોકાન્થ્સંવથ્સરં
ચ । પ્રજાપતિસ્ત્વા સાદયતુ । તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ।
સ્વરાદિત્યં ચ દિવં ચ માં ચ । ત્રીગ્શ્ચ લોકાન્થ્સંવથ્સરં ચ ।
પ્રજાપતિસ્ત્વા સાદયતુ । તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ । ભૂર્ભુવઃ
સ્વશ્ચન્દ્રમસં ચ દિશશ્ચ માં ચ । ત્રીગ્શ્ચ લોકાન્થ્સંવથ્સરં
ચ । પ્રજાપતિસ્ત્વા સાદયતુ । તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૦। ૨। ૧॥ સંવથ્સરં ચ ષટ્ચ
॥ ૨॥

૬ ત્વમેવ ત્વાં વેત્થ યોઽસિ સોઽસિ । ત્વમેવ ત્વામચૈષીઃ । ચિતશ્ચાસિ

સંચિતશ્ચાસ્યગ્ને । એતાવાગ્શ્ચાસિ ભૂયાગ્શ્ચાસ્યગ્ને । યત્તે અગ્ને
ન્યૂનં યદુ તેઽતિરિક્તમ્ । આદિત્યાસ્તદંગિરસશ્ચિન્વન્તુ । વિશ્વે તે
દેવાશ્ચિતિમાપૂરયન્તુ । ચિતશ્ચાસિ સંચિતશ્ચાસ્યગ્ને । એતાવાગ્શ્ચાસિ
ભૂયાગ્શ્ચાસ્યગ્ને । મા તે અગ્ને ચયેન માઽતિ ચ યેનાયુરાવૃક્ષિ । સર્વેષાં
જ્યોતિષાં જ્યોતિર્યદદાવુદેતિ । તપસો જાતમનિભૃષ્ટમોજઃ । તત્તે
જ્યોતિરિષ્ટકે । તેન મે તપ । તેન મે જ્વલ । તેન મે દીદિહિ । યાવદ્દેવાઃ ।
યાવદસાતિ સૂર્યઃ । યાવદુતાપિ બ્રહ્મ ॥ ૩। ૧૦। ૩। ૧॥ આ વૃક્ષિ નવ
ચ ॥ ૩॥

૭ સંવથ્સરોઽસિ પરિવથ્સરોઽસિ । ઇદાવથ્સરોઽસીદુ વથ્સરોઽસિ ।
ઇદ્વથ્સરોઽસિ વથ્સરોઽસિ । તસ્ય તે વસન્તઃ શિરઃ । ગ્રીષ્મો દક્ષિણઃ
પક્ષઃ । વર્ષાઃ પુચ્છમ્ । શરદુત્તરઃ પક્ષઃ । હેમન્તો મધ્યમ્ ।
પૂર્વપક્ષાશ્ચિતયઃ । અપરપક્ષાઃ પુરીષમ્ ॥ ૩। ૧૦। ૪। ૧॥

૮ અહોરાત્રાણીષ્ટકાઃ । ઋષભોઽસિ સ્વર્ગો લોકઃ । યસ્યાં દિશિ
મહીયસે । તતો નો મહ આવહ । વાયુર્ભૂત્વા સર્વા દિશ આવાહિ । સર્વા
દિશોઽનુ વિવાહિ । સર્વા દિશોઽનુ સંવાહિ । ચિત્યા ચિતિમાપૃણ । અચિત્યા
ચિતિમાપૃણ । ચિદસિ સમુદ્રયોનિઃ ॥ ૩। ૧૦। ૪। ૨॥

૯ ઇન્દુર્દક્ષઃ શ્યેન ઋતાવા । હિરણ્યપક્ષઃ શકુનો ભુરણ્યુઃ ।
મહાન્થ્સધસ્થે ધ્રુવ આનિષત્તઃ । નમસ્તે અસ્તુ મા મા હિꣳસીઃ । એતિ
પ્રેતિ વીતિ સમિત્યુદિતિ । દિવં મે યચ્છ । અન્તરિક્ષં મે યચ્છ । પૃથિવીં
મે યચ્છ । પૃથિવીં મે યચ્છ । અન્તરિક્ષં મે યચ્છ । દિવં મે યચ્છ ।
અહ્ના પ્રસારય । રાત્ર્યા સમચ । રાત્ર્યા પ્રસારય । અહ્ના સમચ । કામં
પ્રસારય । કામꣳ સમચ ॥ ૩। ૧૦। ૪। ૩॥ પુરીષꣳ સમુદ્રયોનિઃ
પૃથિવીં મે યચ્છાન્તરિક્ષં મે યચ્છ સપ્ત ચ ॥ ૪॥

૧૦ ભૂર્ભુવઃ સ્વઃ । ઓજો બલમ્ । બ્રહ્મ ક્ષત્ત્રમ્ । યશો મહત્ । સત્યં
તપો નામ । રૂપમમૃતમ્ । ચક્ષુઃ શ્રોત્રમ્ । મન આયુઃ । વિશ્વં
યશો મહઃ । સમં તપો હરો ભાઃ । જાતવેદા યદિ વા પાવકોઽસિ ।
વૈશ્વાનરો યદિ વા વૈદ્યુતોઽસિ । શં પ્રજાભ્યો યજમાનાય લોકમ્ ।

ઊર્જં પુષ્ટિં દદદભ્યાવવૃત્સ્વ ॥ ૩। ૧૦। ૫। ૧॥ ભાશ્ચત્વારિ ચ ॥ ૫॥

૧૧ રાજ્ઞી વિરાજ્ઞી । સમ્રાજ્ઞી સ્વરાજ્ઞી । અર્ચિઃ શોચિઃ । તપો હરો
ભાઃ । અગ્નિરિન્દ્રો બૃહસ્પતિઃ । વિશ્વે દેવા ભુવનસ્ય ગોપાઃ । તે મા સર્વે
યશસા સꣳ સૃજન્તુ ॥ ૩। ૧૦। ૬। ૧॥ રાજ્ઞીન્દ્રો મા સપ્ત ॥ ૬॥

૧૨ અસવે સ્વાહા વસવે સ્વાહા । વિભુવે સ્વાહા વિવસ્વતે સ્વાહા ।
અભિભુવે સ્વાહાઽધિપતયે સ્વાહા । દિવાં પતયે સ્વાહાઽꣳહસ્પત્યાય
સ્વાહા । ચાક્ષુષ્મત્યાય સ્વાહા જ્યોતિષ્મત્યાય સ્વાહા । રાજ્ઞે સ્વાહા
વિરાજ્ઞે સ્વાહા । સંરાજ્ઞે સ્વાહા સ્વરાજ્ઞે સ્વાહા । શૂષાય સ્વાહા
સૂર્યાય સ્વાહા । ચન્દ્રમસે સ્વાહા જ્યોતિષે સ્વાહા । સꣳસર્પાય
સ્વાહા કલ્યાણાય સ્વાહા । અર્જુનાય સ્વાહા ॥ ૩। ૧૦। ૭। ૧॥ કલ્યાણાય
સ્વાહૈકં ચ ॥ ૭॥

૧૩ વિપશ્ચિતે પવમાનાય ગાયત । મહી ન ધારાઽત્યન્ધો અર્ષતિ ।
અહિર્ન જૂર્ણામતિસર્પતિ ત્વચમ્ । અત્યો ન ક્રીડન્નસરદ્વૃષા હરિઃ
। ઉપયામગૃહીતોઽસિ મૃત્યવે ત્વા જુષ્ટં ગૃહ્ણામિ । એષ તે
યોનિર્મૃત્યવે ત્વા । અપ મૃત્યુમપ ક્ષુધમ્ । અપેતઃ શપથં જહિ ।
અધા નો અગ્ન આવહ । રાયસ્પોષꣳસહસ્રિણમ્ ॥ ૩। ૧૦। ૮। ૧॥

૧૪ યે તે સહસ્રમયુતં પાશાઃ । મૃત્યો મર્ત્યાય હન્તવે । તાન્,
યજ્ઞસ્ય માયયા । સર્વાનવયજામહે । ભક્ષોઽસ્યમૃતભક્ષઃ । તસ્ય
તે મૃત્યુપીતસ્યામૃતવતઃ । સ્વગાકૃતસ્ય મધુમતઃ । ઉપહૂતસ્યોપહૂતો
ભક્ષયામિ । મન્દ્રાઽભિભૂતિઃ કેતુર્યજ્ઞાનાં વાક્ । અસાવેહિ ॥ ૩। ૧૦। ૮। ૨॥

૧૫ અન્ધો જાગૃવિઃ પ્રાણ । અસાવેહિ । બધિર આક્રન્દયિતરપાન । અસાવેહિ ।
અહસ્તોઽસ્ત્વા ચક્ષુઃ । અસાવેહિ । અપાદાશો મનઃ । અસાવેહિ । કવે
વિપ્રચિત્તે શ્રોત્ર । અસાવેહિ ।

૧૬ સુહસ્તઃ સુવાસાઃ । શૂષો નામાસ્યમૃતો મર્ત્યેષુ । તં ત્વાઽહં તથા
વેદ । અસાવેહિ । અગ્નિર્મે વાચિ શ્રિતઃ । વાગ્ઘૃદયે । હૃદયં મયિ
। અહમમૃતે । અમૃતં બ્રહ્મણિ । વાયુર્મે પ્રાણે શ્રિતઃ ॥ ૩। ૧૦। ૮। ૪॥

૧૭ પ્રાણો હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ
। સૂર્યો મે ચક્ષુષિ શ્રિતઃ । ચક્ષુર્હૃદયે । હૃદયં મયિ ।
અહમમૃતે । અમૃતં બ્રહ્મણિ । ચન્દ્રમા મે મનસિ શ્રિતઃ ॥ ૩। ૧૦। ૮। ૫॥

૧૮ મનો હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ
। દિશો મે શ્રોત્રે શ્રિતાઃ । શ્રોત્રꣳ હૃદયે । હૃદયં મયિ ।
અહમમૃતે । અમૃતં બ્રહ્મણિ । આપો મે રેતસિ શ્રિતાઃ ॥ ૩। ૧૦। ૮। ૬॥

૧૯ રેતો હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ ।
પૃથિવી મે શરીરે શ્રિતા । શરીરꣳ હૃદયે । હૃદયં મયિ
। અહમમૃતે । અમૃતં બ્રહ્મણિ । ઓષધિવનસ્પતયો મે લોમસુ
શ્રિતાઃ ॥ ૩। ૧૦। ૮। ૭॥

૨૦ લોમાનિ હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ
। ઇન્દ્રો મે બલે શ્રિતઃ । બલꣳ હૃદયે । હૃદયં મયિ ।
અહમમૃતે । અમૃતં બ્રહ્મણિ । પર્જન્યો મે મૂર્ધ્નિ શ્રિતઃ ॥ ૩। ૧૦। ૮। ૮॥

૨૧ મૂર્ધા હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ ।
ઈશાનો મે મન્યૌ શ્રિતઃ । મન્યુર્હૃદયે । હૃદયં મયિ । અહમમૃતે
। અમૃતં બ્રહ્મણિ । આત્મા મ આત્મનિ શ્રિતઃ ॥ ૩। ૧૦। ૮। ૯॥

૨૨ આત્મા હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ
। પુનર્મ આત્મા પુનરાયુરાગાત્ । પુનઃ પ્રાણઃ પુનરાકૂતમાગાત્ ।
વૈશ્વાનરો રશ્મિભિર્વાવૃધાનઃ । અન્તસ્તિષ્ઠત્વમૃતસ્ય ગોપાઃ
॥ ૩। ૧૦। ૮। ૯॥ સહસ્રિણમિહિ શ્રોત્રાસાવેહિ પ્રાણે શ્રિતો મનસિ શ્રિતો
રેતસિ શ્રિતા લોમસુ શ્રિતા મૂર્ધ્નિ શ્રિત આત્મનિ શ્રિતોઽષ્ટૌ ચ ॥
૮॥ અગ્નિર્વાયુઃ સૂર્યશ્ચન્દ્રમા દિશ આપઃ પૃથિવ્યોષધિવનસ્પતય
ઇન્દ્રઃ પર્જન્ય ઈશાન આત્મા પુનર્મે ત્રયોદશ ॥

૨૩ પ્રજાપતિર્દેવાનસૃજત । તે પાપ્મના સંદિતા અજાયન્ત । તાન્વ્યદ્યત્ ।
યદ્વ્યદ્યત્ । તસ્માદ્વિદ્યુત્ । તમવૃશ્ચત્ । યદવૃશ્ચત્ । તસ્માદ્વૃષ્ટિઃ ।
તસ્માદ્યત્રૈતે દેવતે અભિપ્રાપ્નુતઃ । વિ ચ હૈવાસ્ય તત્ર પાપ્માનં
દ્યતઃ ॥ ૩। ૧૦। ૯। ૧॥

૨૪ વૃશ્ચતશ્ચ । સૈષા મીમા ઁ સાઽગ્નિહોત્ર એવ સંપન્ના । અથો
આહુઃ । સર્વેષુ યજ્ઞક્રતુષ્વિતિ । હોષ્યન્નપ ઉપસ્પૃશેત્ । વિદ્યુદસિ
વિદ્ય મે પાપ્માનમિતિ । અથ હુત્વોપસ્પૃશેત્ । વૃષ્ટિરસિ વૃશ્ચ
મે પાપ્માનમિતિ । યક્ષ્યમાણો વેષ્ટ્વા વા । વિ ચ હૈવાસ્યૈતે દેવતે
પાપ્માનં ઘ્નતઃ ॥ ૩। ૧૦। ૯। ૨॥
૨૫ વૃશ્ચતશ્ચ । અત્ય ઁ હો હારુણિઃ । બ્રહ્મચારિણે પ્રશ્નાન્પ્રોચ્ય
પ્રજિઘાય । પરેહિ । પ્લક્ષં દૈયામ્પાતિં પૃચ્છ । વેત્થ સાવિત્રા ૩ ન્ન વેત્થા
૩ ઇતિ । તમાગત્ય પપ્રચ્છ । આચાર્યો મા પ્રાહૈષીત્ । વેત્થ સાવિત્રા ૩ ન્ન
વેત્થા ૩ ઇતિ । સ હોવાચ વેદેતિ ॥ ૩। ૧૦। ૯। ૩॥
૨૬ સ કસ્મિન્પ્રતિષ્ઠિત ઇતિ । પરોરજસીતિ । કસ્તદ્યત્પરોરજા ઇતિ ।
એષ વાવ સ પરોરજા ઇતિ હોવાચ । ય એષ તપતિ । એષોઽર્વાગ્રજા ઇતિ ।
સ કસ્મિન્ત્વેષ ઇતિ । સત્ય ઇતિ । કિં તથ્સત્યમિતિ । તપ ઇતિ ॥ ૩। ૧૦। ૯। ૪॥
૨૭ કસ્મિન્નુ તપ ઇતિ । બલ ઇતિ । કિં તદ્બલમિતિ । પ્રાણ ઇતિ । મા સ્મ
પ્રાણમતિ પૃચ્છ ઇતિ માઽઽચાર્યોઽબ્રવીદિતિ હોવાચ બ્રહ્મચારી । સ
હોવાચ પ્લક્ષો દય્યામ્પાતિઃ । યદ્વૈ બ્રહ્મચારિન્પ્રાણમત્યપ્રક્ષ્યઃ । મૂર્ધા
તે વ્યપતિષ્યત્ । અહમુત આચાર્યાચ્છ્રેયાન્ભવિષ્યામિ । યો મા સાવિત્રે
સમવાદિષ્ટેતિ ॥ ૩। ૧૦। ૯। ૫॥
૨૮ તસ્માથ્સાવિત્રે ન સંવદેત । સ યો હ વૈ સાવિત્રં વિદુષા સાવિત્રે
સંવદતે । સહાસ્મિઞ્છ્રિયં દધાતિ । અનુ હ વા અસ્મા અસૌ તપઞ્છ્રિયં
મન્યતે । અન્વસ્મૈ શ્રીસ્તપો મન્યતે । અન્વસ્મૈ તપો બલં મન્યતે । અન્વસ્મૈ
બલં પ્રાણં મન્યતે । સ યદાહ । સંજ્ઞાનં વિજ્ઞાનં દર્શા દૃષ્ટેતિ
। એષ એવ તત્ ॥ ૩। ૧૦। ૯। ૬॥
૨૯ અથ યદાહ । પ્રસ્તુતં વિષ્ટુત ઁ સુતા સુન્વતીતિ । એષ એવ તત્ ।
એષ હ્યેવ તાન્યહાનિ । એષ રાત્રયઃ । અથ યદાહ । ચિત્રઃ કેતુર્દાતા
પ્રદાતા સવિતા પ્રસવિતાઽભિશાસ્તાઽનુમન્તેતિ । એષ એવ તત્ ।
એષ હ્યેવ તેઽહ્નો મુહૂર્તાઃ । એષ રાત્રેઃ ॥ ૩। ૧૦। ૯। ૭॥

૩૦ અથ યદાહ । પવિત્રં પવયિષ્યન્થ્સહસ્વાન્ થ્સહીયાનરુણોઽરુણરજા
ઇતિ । એષ એવ તત્ । એષ હ્યેવ તેઽર્ધમાસાઃ । એષ માસાઃ । અથ યદાહ
। અગ્નિષ્ટોમ ઉક્થ્યોઽગ્નિરૃતુઃ પ્રજાપતિઃ સંવથ્સર ઇતિ । એષ એવ
તત્ । એષ હ્યેવ તે યજ્ઞક્રતવઃ । એષ ઋતવઃ ।
૩૧ એષ સંવથ્સરઃ । અથ યદાહ । ઇદાનીં તદાનીમિતિ । એષ એવ તત્ ।
એષ હ્યેવ તે મુહૂર્તાનાં મુહૂર્તાઃ । જનકો હ વૈદેહઃ । અહોરાત્રૈઃ
સમાજગામ । તꣳ હોચુઃ । યો વા અસ્માન્, વેદ । વિજહત્પાપ્માનમેતિ ॥ ૩। ૧૦। ૯। ૯॥
૩૨ સર્વમાયુરેતિ । અભિ સ્વર્ગં લોકં જયતિ । નાસ્યામુષ્મિં લ્લોકેઽન્નં
ક્ષીયત ઇતિ । વિજહદ્ધ વૈ પાપ્માનમેતિ । સર્વમાયુરેતિ । અભિ સ્વર્ગં
લોકં જયતિ । નાસ્યામુષ્મિં લ્લોકેઽન્નં ક્ષીયતે । ય એવં વેદ । અહીના
હાશ્વથ્યઃ । સાવિત્રં વિદાંચકાર ॥ ૩। ૧૦। ૯। ૧૦॥
૩૩ સ હ હꣳસો હિરણ્મયો ભૂત્વા । સ્વર્ગં લોકમિયાય । આદિત્યસ્ય
સાયુજ્યમ્ । હꣳસો હ વૈ હિરણ્મયો ભૂત્વા । સ્વર્ગં લોકમેતિ ।
આદિત્યસ્ય સાયુજ્યમ્ । ય એવં વેદ । દેવભાગો હ શ્રૌતર્ષઃ ।
સાવિત્રં વિદાંચકાર । તꣳ હ વાગદૃશ્યમાનાઽભ્યુવાચ ॥ ૩। ૧૦। ૯। ૧૧॥
૩૪ સર્વં બત ગૌતમો વેદ । યઃ સાવિત્રં વેદેતિ । સ હોવાચ । કૈષા વાગસીતિ
। અયમહꣳ સાવિત્રઃ । દેવાનામુત્તમો લોકઃ । ગુહ્યં મહો બિભ્રદિતિ
। એતાવતિ હ ગૌતમઃ । યજ્ઞોપવીતં કૃત્વાઽધો નિપપાત । નમો નમ
ઇતિ ॥ ૩। ૧૦। ૯। ૧૨॥
૩૫ સ હોવાચ । મા ભૈષીર્ગૌતમ । જિતો વૈ તે લોક ઇતિ । તસ્માદ્યે કે ચ
સાવિત્રં વિદુઃ । સર્વે તે જિતલોકાઃ । સ યો હ વૈ સાવિત્રસ્યાષ્ટાક્ષરં
પદꣳ શ્રિયાઽભિષિક્તં વેદ । શ્રિયા હૈવાભિષિચ્યતે । ઘૃણિરિતિ
દ્વે અક્ષરે । સૂર્ય ઇતિ ત્રીણિ । આદિત્ય ઇતિ ત્રીણિ ॥ ૩। ૧૦। ૯। ૧૩॥
૩૬ એતદ્વૈ સાવિત્રસ્યાષ્ટાક્ષરં પદꣳ શ્રિયાઽભિષિક્તમ્ । ય એવં
વેદ । શ્રિયા હૈવાભિષિચ્યતે । તદેતદૃચાઽભ્યુક્તમ્ । ઋચો અક્ષરે
પરમે વ્યોમન્ । યસ્મિન્દેવા અધિ વિશ્વે નિષેદુઃ । યસ્તં ન વેદ કિમૃચા
કરિષ્યતિ । ય ઇત્તદ્વિદુસ્ત ઇમે સમાસત ઇતિ । ન હ વા એતસ્યર્ચા ન

યજુષા  ન સામ્નાઽર્થોઽસ્તિ । યઃ સાવિત્રં વેદ  ॥ ૩। ૧૦। ૯। ૧૪॥

૩૭ તદેતત્પરિ  યદ્દેવચક્રમ્ । આર્દ્રં પિન્વમાનરઁ સ્વર્ગે લોક એતિ ।
વિજહદ્વિશ્વા  ભૂતાનિ  સંપશ્યત્ । આર્દ્રો હ  વૈ પિન્વમાનઃ સ્વર્ગે લોક
એતિ । વિજહન્વિશ્વા  ભૂતાનિ  સંપશ્યન્  । ય એવં વેદ  । શૂષો હ
વૈ વાર્ષ્ણેયઃ । આદિત્યેન  સમાજગામ । તરઁ હોવાચ । એહિ  સાવિત્ર
વિદ્ધિ । અયં વૈ સ્વર્ગ્યોઽગ્નિઃ પારયિષ્ણુરમૃતાથ્સંભૂત  ઇતિ  ।
એષ વાવ સ સાવિત્રઃ । ય એષ તપતિ । એહિ  માં વિદ્ધિ । ઇતિ  હૈવૈનં
તદુવાચ ॥ ૩। ૧૦। ૯। ૧૫॥ ઘતો  ઘતો  વેદેતિ  તપ  ઇતિ  સમવાદિષ્ટેતિ
તદ્રાત્રેર્  ઋતવ  એતિ ચકારોવાચ  નમ  ઇત્યાદિત્ય ઇતિ  ત્રીણિ  સાવિત્ર
વેદ  વિદ્ધિ  પઞ્ચ  ચ ॥ ૯॥ પ્રજાપતિર્દેવાન્થ્સંજ્ઞાનં  પ્રસ્તુતં
તાન્યહાન્યેષ રાત્રયશ્ચિત્રઃ કેતુસ્તેઽહ્નો  મુહૂર્તા રાત્રેઃ  પવિત્રં
તેઽર્ધમાસા અગ્નિષ્ટોમા યજ્ઞક્રતવ  ઇદાનીં  મુહૂર્તાનાં  જનકોઽહીના
દેવભાગઃ કૈષા વાઙ્માશૂષો હ  વૈ ષોડશ ॥

૩૮ ઇયં વાવ સરઘા  । તસ્યા  અગ્નિરેવ સારઘં મધુ  । યા એતાઃ
પૂર્વપક્ષાપરપક્ષયો  રાત્રયઃ । તા મધુકૃતઃ  । યાન્યહાનિ । તે
મધુવૃષાઃ । સ યો હ  વા એતા મધુકૃતશ્ચ મધુવૃષાગ્શ્ચ  વેદ  ।
કુર્વન્તિ  હાસ્યૈતા અગ્નૌ મધુ  । નાસ્યેષ્ટાપૂર્તં ધયન્તિ । અથ  યો ન વેદ
॥ ૩। ૧૦। ૧૦। ૧॥

૩૯ ન હાસ્યૈતા અગ્નૌ મધુ  કુર્વન્તિ । ધયન્ત્યસ્યેષ્ટાપૂર્તમ્ । યો હ
વા અહોરાત્રાણાં  નામધેયાનિ  વેદ  । નાહોરાત્રેષ્વાર્તિમાર્ચ્છતિ
। સંજ્ઞાનં  વિજ્ઞાનં  દર્શા  દૃષ્ટેતિ  । એતાવનુવાકૌ
પૂર્વપક્ષસ્યાહોરાત્રાણાં  નામધેયાનિ । પ્રસ્તુતં  વિષ્ટુતઁ સુતા
સુન્વતીતિ  । એતાવનુવાકાવપરપક્ષસ્યાહોરાત્રાણાં  નામધેયાનિ ।
નાહોરાત્રેષ્વાર્તિમાર્ચ્છતિ । ય એવં વેદ  ॥ ૩। ૧૦। ૧૦। ૨॥

૪૦ યો હ  વૈ મુહૂર્તાનાં  નામધેયાનિ  વેદ  । ન મુહૂર્તેષ્વાર્તિમાર્ચ્છતિ ।
ચિત્રઃ કેતુર્દાતા પ્રદાતા સવિતા પ્રસવિતાઽભિશાસ્તાઽનુમન્તેતિ
। એતેઽનુવાકા મુહૂર્તાનાં  નામધેયાનિ । ન મુહૂર્તેષ્વાર્તિમાર્ચ્છતિ ।

ચ એવં વેદ । યો હ વા અર્ધમાસાનાં ચ માસાનાં ચ નામધેયાનિ
વેદ । નાર્ધમાસેષુ ન માસેષ્વાર્તિમાર્ચ્છતિ । પવિત્રં
પવિયિષ્યન્ત્સહસ્વાન્ત્સહીયાનરુણોઽરુણરજા ઇતિ । એતેઽનુવાકા
અર્ધમાસાનાં ચ માસાનાં ચ નામધેયાનિ ॥ ૩। ૧૦। ૧૦। ૩॥

૪૧ નાર્ધમાસેષુ ન માસેષ્વાર્તિમાર્ચ્છતિ । ય એવં વેદ । યો હ વૈ
યજ્ઞક્રતૂનાં ચર્તૂનાં ચ સંવત્સરસ્ય ચ નામધેયાનિ વેદ । ન
યજ્ઞક્રતુષુ નર્તુષુ ન સંવત્સર આર્તિમાર્ચ્છતિ । અગ્નિષ્ટોમ
ઉક્થ્યોઽગ્નિર્ ઋતુઃ પ્રજાપતિઃ સંવત્સર ઇતિ । એતેઽનુવાકા
યજ્ઞક્રતૂનાં ચર્તૂનાં ચ સંવત્સરસ્ય ચ નામધેયાનિ । ન
યજ્ઞક્રતુષુ નર્તુષુ ન સંવત્સર આર્તિમાર્ચ્છતિ । ય એવં વેદ । યો હ
વૈ મુહૂર્તાનાં મુહૂર્તાન્, વેદ । ન મુહૂર્તાનાં મુહૂર્તેષ્વાર્તિમાર્ચ્છતિ ।

૪૨ ઇદાનીં તદાનીમિતિ । એતે વૈ મુહૂર્તાનાં મુહૂર્તાઃ । ન મુહૂર્તાનાં
મુહૂર્તેષ્વાર્તિમાર્ચ્છતિ । ય એવં વેદ । અથો યથા ક્ષેત્રજ્ઞો ભૂત્વાઽનુ
પ્રવિશ્યાન્નમત્તિ । એવમેવૈતાન્ ક્ષેત્રજ્ઞો ભૂત્વાઽનુ પ્રવિશ્યાન્નમત્તિ ।
સ એતેષામેવ સલોકતા ꣳ સાયુજ્યમશ્નુતે । અપ પુનર્મૃત્યું જયતિ
। ય એવં વેદ ॥ ૩। ૧૦। ૧૦। ૪॥ ન વેદૈવં વેદાનુવાકા અર્ધમાસાનાં
ચ માસાનાં ચ નામધેયાનિ મુહૂર્તેષ્વાર્તિમાર્ચ્છતિ નવ ચ ॥ ૧૦॥

ઇયમહોરાત્રાણા ꣳ સંજ્ઞાનં પૂર્વપક્ષસ્ય પ્રસ્તુતમપરપક્ષસ્ય
મુહૂર્તાનાં ચિત્રઃ કેતુરર્ધમાસાનાં પવિત્રં યજ્ઞક્રતૂનામગ્નિષ્ટોમો
યજ્ઞક્રતૂનામિદાનીં મુહૂર્તાનાં મુહૂર્તાન્, વેદેદાનીમથો દ્વાદશ ॥

૪૩ કશ્ચિદ્ધ વા અસ્માલ્લોકાત્પ્રેત્ય । આત્માનં વેદ । અયમહમસ્મીતિ ।
કશ્ચિત્સ્વં લોકં ન પ્રતિ પ્રજાનાતિ । અગ્નિમુગ્ધો હૈવ ધૂમતાન્તઃ ।
સ્વં લોકં ન પ્રતિ પ્રજાનાતિ । અથ યો હૈવૈતમગ્નિ ꣳ સાવિત્રં વેદ ।
સ એવાસ્માલ્લોકાત્પ્રેત્ય । આત્માનં વેદ । અયમહમસ્મીતિ ॥ ૩। ૧૦। ૧૧। ૧॥

૪૪ સ સ્વં લોકં પ્રતિપ્રજાનાતિ । એષ ઉ વેવૈનં તત્સાવિત્રઃ ।
સ્વર્ગં લોકમભિવહતિ । અહોરાત્રૈર્વા ઇદ ꣳ સયુગ્ભિઃ ક્રિયતે ।
ઇતિરાત્રાયાદીક્ષિષત । ઇતિરાત્રાય વ્રતમુપાગુરિતિ । તાનિહાનેવં

વિદુષઃ । અમુષ્મિં લ્લોકે શેવધિં ધયન્તિ । ધીતઁ હૈવ સ
શેવધિમનુ પરૈતિ । અથ યો હૈવૈતમગ્નિઁ સાવિત્રં વેદ ॥ ૩। ૧૦। ૧૧। ૧॥

૪૫ તસ્ય હૈવાહોરાત્રાણિ । અમુષ્મિં લ્લોકે શેવધિં ન ધયન્તિ
। અધીતઁ હૈવ સ શેવધિમનુ પરૈતિ । ભરદ્વાજો હ
ત્રિભિરાયુર્ભિર્બ્રહ્મચર્યમુવાસ । તઁ હ જીર્ણિગ્ગ્ં સ્થવિરઁ
શયાનમ્ । ઇન્દ્ર ઉપ વ્રજ્યોવાચ । ભરદ્વાજ । યત્તે ચતુર્થમાયુર્દદ્યામ્ ।
કિમેનેન કુર્યા ઇતિ । બ્રહ્મચર્યમેવૈનેન ચરેયમિતિ હોવાચ ॥ ૩। ૧૦। ૧૧। ૩॥

૪૬ તઁ હ ત્રીન્ગિરિરૂપાનવિજ્ઞાતાનિવ દર્શયાંચકાર । તેષાઁ
હૈકૈકસ્માન્મુષ્ટિનાઽઽદદે । સ હોવાચ । ભરદ્વાજેત્યામન્ત્ર્ય । વેદા
વા એતે । અનન્તા વૈ વેદાઃ । એતદ્વા એતૈસ્ત્રિભિરાયુર્ભિરન્વવોચથાઃ ।
અથ ત ઇતરદનનૂક્તમેવ । એહીમં વિદ્ધિ । અયં વૈ સર્વવિદ્યેતિ ॥

૩। ૧૦। ૧૧। ૪॥

૪૭ તસ્મૈ હૈતમગ્નિઁ સાવિત્રમુવાચ । તઁ સ વિદિત્વા । અમૃતો
ભૂત્વા । સ્વર્ગં લોકમિયાય । આદિત્યસ્ય સાયુજ્યમ્ । અમૃતો હૈવ ભૂત્વા
। સ્વર્ગં લોકમેતિ । આદિત્યસ્ય સાયુજ્યમ્ । ય એવં વેદ । એષો એવ ત્રયી
વિદ્યા ॥ ૩। ૧૦। ૧૧। ૫॥

૪૮ યાવન્તઁ હ વૈ ત્રય્યા વિદ્યયા લોકં જયતિ । તાવન્તં લોકં જયતિ
। ય એવં વેદ । અગ્નેર્વા એતાનિ નામધેયાનિ । અગ્નેરેવ સાયુજ્યઁ
સલોકતામાપ્નોતિ । ય એવં વેદ । વાયોર્વા એતાનિ નામધેયાનિ । વાયોરેવ
સાયુજ્યઁ સલોકતામાપ્નોતિ । ય એવં વેદ । ઇન્દ્રસ્ય વા એતાનિ નામધેયાનિ
॥ ૩। ૧૦। ૧૧। ૬॥

૪૯ ઇન્દ્રસ્યૈવ સાયુજ્યઁ સલોકતામાપ્નોતિ । ય એવં વેદ । બૃહસ્પતેર્વા
એતાનિ નામધેયાનિ । બૃહસ્પતેરેવ સાયુજ્યઁ સલોકતામાપ્નોતિ ।
ય એવં વેદ । પ્રજાપતેર્વા એતાનિ નામધેયાનિ । પ્રજાપતેરેવ
સાયુજ્યઁ સલોકતામાપ્નોતિ । ય એવં વેદ । બ્રહ્મણો વા એતાનિ
નામધેયાનિ । બ્રહ્મણ એવ સાયુજ્યઁ સલોકતામાપ્નોતિ । ય એવં વેદ ।
સ વા એષોઽગ્નિરપક્ષપુચ્છો વાયુરેવ । તસ્યાગ્નિર્મુખમ્ । અસાવાદિત્યઃ

શિરઃ । સ યદેતે દેવતે અન્તરેણ । તથ્સર્વꣳસીવ્યતિ । તસ્માથ્સાવિત્રઃ ॥

૩। ૧૦। ૧૧। ૭॥

અયમહમસ્મીતિ વેદ હોવાચ સર્વવિદ્યેતિ વિદ્યેન્દ્રસ્ય વા એતાનિ
નામધેયાનિ બ્રહ્મણ એવ સાયુજ્યꣳ સલોકતામાપ્નોતિ સપ્ત ચ ॥ ૧૧॥

અગ્નેર્વાયોરિન્દ્રસ્ય બૃહસ્પતેઃ પ્રજાપતેર્બ્રહ્મણઃ સ વૈ સપ્ત ॥

સંજ્ઞાનં ભૂસ્ત્વમેવ સંવથ્સરોસિ ભૂ રાઙ્યસવે વિપશ્ચિતે
પ્રજાપતિર્દેવાનિયં વાવ સરઘા કશ્ચિદ્ધૈકાદશ ॥ ૧૧॥

સંજ્ઞાન ꣳ રાજ્ઞી મૂર્ધા હૃદય એષ સંવથ્સરો નાર્ધમાસેષુ
નવ ચત્વારિꣳશત્ ॥ ૪૯॥

સંજ્ઞાનꣳસાવિત્રઃ ॥

## કાઠકે દ્વિતીયઃ પ્રપાઠકઃ ૨

### નાચિકેત ચયનમ્

૧ લોકોઽસિ સ્વર્ગોઽસિ । અનન્તોઽસ્યપારોઽસિ । અક્ષિતોઽસ્યક્ષય્યોઽસિ
। તપસઃ પ્રતિષ્ઠા । ત્વયીદમન્તઃ । વિશ્વં યક્ષં વિશ્વં
ભૂતં વિશ્વꣳસુભૂતમ્ । વિશ્વસ્ય ભર્તા વિશ્વસ્ય જનયિતા ।
તં ત્વોપદધે કામદુઘમક્ષિતમ્ । પ્રજાપતિસ્ત્વા સાદયતુ । તયા
દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૧॥

૨ તપોઽસિ લોકે શ્રિતમ્ । તેજસઃ પ્રતિષ્ઠા । ત્વયીદમન્તઃ । વિશ્વં
યક્ષં વિશ્વં ભૂતં વિશ્વꣳસુભૂતમ્ । વિશ્વસ્ય ભર્તૃ વિશ્વસ્ય
જનયિતૃ । તત્ત્વોપદધે કામદુઘમક્ષિતમ્ । પ્રજાપતિસ્ત્વા સાદયતુ । તયા
દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૨॥

૩ તેજોઽસિ તપસિ શ્રિતમ્ । સમુદ્રસ્ય પ્રતિષ્ઠા । ત્વયીદમન્તઃ । વિશ્વં
યક્ષં વિશ્વં ભૂતં વિશ્વꣳસુભૂતમ્ । વિશ્વસ્ય ભર્તૃ વિશ્વસ્ય
જનયિતૃ । તત્ત્વોપદધે કામદુઘમક્ષિતમ્ । પ્રજાપતિસ્ત્વા સાદયતુ । તયા

દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૩॥

૪ સમુદ્રોઽસિ  તેજસિ શ્રિતઃ । અપાં પ્રતિષ્ઠા । ત્વયીદમન્તઃ । વિશ્વં
યક્ષં વિશ્વં  ભૂતં વિશ્વ સુભૂતમ્ । વિશ્વસ્ય ભર્તા વિશ્વસ્ય
જનયિતા । તં ત્વોપદધે કામદુઘમક્ષિતમ્ । પ્રજાપતિસ્ત્વા સાદયતુ । તયા
દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૪॥

૫ આપઃ  સ્થ સમુદ્રે શ્રિતાઃ । પૃથિવ્યાઃ પ્રતિષ્ઠા યુષ્માસુ  । ઇદમન્તઃ
। વિશ્વં  યક્ષં વિશ્વં  ભૂતં વિશ્વ સુભૂતમ્ । વિશ્વસ્ય ભર્તૢર્યો
વિશ્વસ્ય જનયિત્ર્યઃ  । તા વ  ઉપદધે કામદુઘા  અક્ષિતાઃ । પ્રજાપતિસ્ત્વા
સાદયતુ । તયા  દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૫॥

૬ પૃથિવ્યસ્યપ્સુ શ્રિતા । અગ્નેઃ પ્રતિષ્ઠા । ત્વયીદમન્તઃ । વિશ્વં
યક્ષં વિશ્વં  ભૂતં વિશ્વ સુભૂતમ્ । વિશ્વસ્ય ભર્ત્રી વિશ્વસ્ય
જનયિત્રી । તાં ત્વોપદધે કામદુઘામક્ષિતામ્ । પ્રજાપતિસ્ત્વા સાદયતુ । તયા
દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૬॥

૭ અગ્નિરસિ પૃથિવ્યાગ્ શ્રિતઃ । અન્તરિક્ષસ્ય પ્રતિષ્ઠા । ત્વયીદમન્તઃ
। વિશ્વં  યક્ષં વિશ્વં  ભૂતં વિશ્વ સુભૂતમ્ । વિશ્વસ્ય ભર્તા
વિશ્વસ્ય જનયિતા । તં ત્વોપદધે કામદુઘમક્ષિતમ્ । પ્રજાપતિસ્ત્વા
સાદયતુ । તયા  દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૭॥

૮ અન્તરિક્ષમસ્યગ્નૌ શ્રિતમ્ । વાયોઃ પ્રતિષ્ઠા । ત્વયીદમન્તઃ । વિશ્વં
યક્ષં વિશ્વં  ભૂતં વિશ્વ સુભૂતમ્ । વિશ્વસ્ય ભર્તૃ વિશ્વસ્ય
જનયિતૃ । તત્ત્વોપદધે કામદુઘમક્ષિતમ્ । પ્રજાપતિસ્ત્વા સાદયતુ । તયા
દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૮॥

૯ વાયુરસ્યન્તરિક્ષે શ્રિતઃ । દિવઃ પ્રતિષ્ઠા । ત્વયીદમન્તઃ । વિશ્વં
યક્ષં વિશ્વં  ભૂતં વિશ્વ સુભૂતમ્ । વિશ્વસ્ય ભર્તા વિશ્વસ્ય
જનયિતા । તં ત્વોપદધે કામદુઘમક્ષિતમ્ । પ્રજાપતિસ્ત્વા સાદયતુ । તયા
દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૯॥

૧૦ દ્યૌરસિ વાયૌ શ્રિતા । આદિત્યસ્ય  પ્રતિષ્ઠા । ત્વયીદમન્તઃ । વિશ્વં

યક્ષં વિશ્વં ભૂતં વિશ્વꣳસુભૂતમ્ । વિશ્વસ્ય ભર્ત્રી વિશ્વસ્ય
જનયિત્રી । તાં ત્વોપદધે કામદુઘામક્ષિતામ્ । પ્રજાપતિસ્ત્વા સાદયતુ । તયા
દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૧૦॥
૧૧ આદિત્યોઽસિ દિવિ શ્રિતઃ । ચન્દ્રમસઃ પ્રતિષ્ઠા । ત્વયીદમન્તઃ ।
વિશ્વં યક્ષં વિશ્વં ભૂતં વિશ્વꣳસુભૂતમ્ । વિશ્વસ્ય ભર્તા
વિશ્વસ્ય જનયિતા । તં ત્વોપદધે કામદુઘમક્ષિતમ્ । પ્રજાપતિસ્ત્વા
સાદયતુ । તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૧૧॥
૧૨ ચન્દ્રમા અસ્યાદિત્યે શ્રિતઃ । નક્ષત્રાણાં પ્રતિષ્ઠા । ત્વયીદમન્તઃ ।
વિશ્વં યક્ષં વિશ્વં ભૂતં વિશ્વꣳસુભૂતમ્ । વિશ્વસ્ય ભર્તા
વિશ્વસ્ય જનયિતા । તં ત્વોપદધે કામદુઘમક્ષિતમ્ । પ્રજાપતિસ્ત્વા
સાદયતુ । તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૧૨॥
૧૩ નક્ષત્રાણિ સ્થ ચન્દ્રમસિ શ્રિતાનિ । સંવથ્સરસ્ય પ્રતિષ્ઠા
યુષ્માસુ । ઇદમન્તઃ । વિશ્વં યક્ષં વિશ્વં ભૂતં વિશ્વꣳ
સુભૂતમ્ । વિશ્વસ્ય ભર્તૄણિ વિશ્વસ્ય જનયિતૄણિ । તાનિ
વ ઉપદધે કામદુઘાન્યક્ષિતાનિ । પ્રજાપતિસ્ત્વા સાદયતુ । તયા
દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૧૩॥
૧૪ સંવથ્સરોઽસિ નક્ષત્રેષુ શ્રિતઃ । ઋતૂનાં પ્રતિષ્ઠા ।
ત્વયીદમન્તઃ । વિશ્વં યક્ષં વિશ્વં ભૂતં વિશ્વꣳસુભૂતમ્ ।
વિશ્વસ્ય ભર્તા વિશ્વસ્ય જનયિતા । તં ત્વોપદધે કામદુઘમક્ષિતમ્ ।
પ્રજાપતિસ્ત્વા સાદયતુ । તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૧૪॥
૧૫ ઋતવઃ સ્થ સંવથ્સરે શ્રિતાઃ । માસાનાં પ્રતિષ્ઠા યુષ્માસુ । ઇદમન્તઃ
। વિશ્વં યક્ષં વિશ્વં ભૂતં વિશ્વꣳસુભૂતમ્ । વિશ્વસ્ય ભર્તારો
વિશ્વસ્ય જનયિતારઃ । તાન્, વ ઉપદધે કામદુઘાનક્ષિતાન્ । પ્રજાપતિસ્ત્વા
સાદયતુ । તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૧૫॥
૧૬ માસાઃ સ્થર્તુષુ શ્રિતાઃ । અર્ધમાસાનાં પ્રતિષ્ઠા યુષ્માસુ ।
ઇદમન્તઃ । વિશ્વં યક્ષં વિશ્વં ભૂતં વિશ્વꣳસુભૂતમ્ । વિશ્વસ્ય
ભર્તારો વિશ્વસ્ય જનયિતારઃ । તાન્, વ ઉપદધે કામદુઘાનક્ષિતાન્ ।

પ્રજાપતિસ્ત્વા સાદયતુ । તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૧૬॥

૧૭ અર્ધમાસાઃ સ્થ માસુ શ્રિતાઃ । અહોરાત્રયોઃ પ્રતિષ્ઠા યુષ્માસુ ।
ઇદમન્તઃ । વિશ્વં યક્ષં વિશ્વં ભૂતં વિશ્વꣳસુભૂતમ્ । વિશ્વસ્ય
ભર્તારો વિશ્વસ્ય જનયિતારઃ । તાન્, વ ઉપદધે કામદુઘાનક્ષિતાન્ ।
પ્રજાપતિસ્ત્વા સાદયતુ । તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૧૭॥

૧૮ અહોરાત્રે સ્થોઽર્ધમાસેષુ શ્રિતે । ભૂતસ્ય પ્રતિષ્ઠે ભવ્યસ્ય
પ્રતિષ્ઠે । યુવયોરિદમન્તઃ । વિશ્વં યક્ષં વિશ્વં ભૂતં વિશ્વꣳ
સુભૂતમ્ । વિશ્વસ્ય ભર્ત્રૌ વિશ્વસ્ય જનયિત્રૌ । તે વામુપદધે
કામદુઘે અક્ષિતે । પ્રજાપતિસ્ત્વા સાદયતુ । તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા
સીદ ॥ ૩। ૧૧। ૧। ૧૮॥

૧૯ પૌર્ણમાસ્યષ્ટકાઽમાવાસ્યા । અન્નાદાઃ સ્થાન્નદુઘો યુષ્માસુ ।
ઇદમન્તઃ । વિશ્વં યક્ષં વિશ્વં ભૂતં વિશ્વꣳસુભૂતમ્ । વિશ્વસ્ય
ભર્તૄ̱ર્યો વિશ્વસ્ય જનયિત્ર્યઃ । તા વ ઉપદધે કામદુઘા અક્ષિતાઃ ।
પ્રજાપતિસ્ત્વા સાદયતુ । તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૧૯॥

૨૦ રાઽસિ બૃહતી શ્રીરસીન્દ્રપત્ની ધર્મપત્ની । વિશ્વં ભૂતમનુપ્રભૂતા
। ત્વયીદમન્તઃ । વિશ્વં યક્ષં વિશ્વં ભૂતં વિશ્વꣳસુભૂતમ્ ।
વિશ્વસ્ય ભર્ત્રી વિશ્વસ્ય જનયિત્રી । તાં ત્વોપદધે કામદુઘામક્ષિતામ્ ।
પ્રજાપતિસ્ત્વા સાદયતુ । તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૧। ૧। ૨૦॥

૨૧ ઓજોઽસિ સહોઽસિ । બલમસિ ભ્રાજોઽસિ । દેવાનાં ધામામૃતમ્
। અમર્ત્યસ્તપોજાઃ । ત્વયીદમન્તઃ । વિશ્વં યક્ષં વિશ્વં ભૂતં
વિશ્વꣳસુભૂતમ્ । વિશ્વસ્ય ભર્તા વિશ્વસ્ય જનયિતા । તં ત્વોપદધે
કામદુઘમક્ષિતમ્ । પ્રજાપતિસ્ત્વા સાદયતુ । તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા
સીદ ॥ ૩। ૧૧। ૧। ૨૧॥ લોકસ્તપસ્તેજઃ સમુદ્ર આપઃ પૃથિવ્યગ્નિરન્તરિક્ષં
વાયુર્દ્યૌરાદિત્યશ્ચન્દ્રમા નક્ષત્રાણિ સંવત્સર ઋતવો માસા અર્ધમાસા
અહોરાત્રે પૌર્ણમાસી રાઽસ્યોજોસ્યેકવિꣳશતિઃ ॥ ૧॥ લોકોઽસિ ભર્તા તમ્ ।
તપસ્તેજોઽસિ ભર્તૃ તત્ । સમુદ્રોઽસિ ભર્તા તમ્ । આપઃ સ્થ ભર્ત્ર્યસ્તા
વઃ । પૃથિવી ભર્ત્રી તામ્ । અગ્નિરસિ ભર્તા તમ્ । અન્તરિક્ષં ભર્તૃ તત્

। વાયુરસિ ભર્તા તમ્ । દ્યૌરસિ ભર્ત્રી તામ્ । આદિત્યશ્ચન્દ્રમા ભર્તા તમ્ । નક્ષત્રાણિ સ્થ ભર્તૃણિ તાનિ વઃ । સંવથ્સરોસિ ભર્તા તમ્ । ઋતવો માસા અર્ધમાસા ભર્તારસ્તાન્, વઃ । અહોરાત્રે ભર્ત્ર્યૌ તે વામ્ । પૌર્ણમાસી ભર્ત્ર્યસ્તા વઃ । રાડસિ ભર્ત્રી તામ્ । ઓજોઽસિ ભર્તા તમેકવિꣳશતિઃ ॥

૨૨ ત્વમગ્ને રુદ્રો અસુરો મહો દિવઃ । ત્વꣳ શર્ધો મારુતં પૃક્ષ ઈશિષે । ત્વં વાતૈરરુણૈર્યાસિ શઙ્ગયઃ । ત્વં પૂષા વિધતઃ પાસિ નુ ત્મના । દેવા દેવેષુ શ્રયધ્વમ્ । પ્રથમા દ્વિતીયેષુ શ્રયધ્વમ્ । દ્વિતીયાસ્તૃતીયેષુ શ્રયધ્વમ્ । તૃતીયાશ્ચતુર્થેષુ શ્રયધ્વમ્ । ચતુર્થાઃ પઞ્ચમેષુ શ્રયધ્વમ્ । પઞ્ચમાઃ ષષ્ઠેષુ શ્રયધ્વમ્ ॥ ૩। ૧૧। ૨। ૧॥

૨૩ ષષ્ઠાઃ સપ્તમેષુ શ્રયધ્વમ્ । સપ્તમા અષ્ટમેષુ શ્રયધ્વમ્ । અષ્ટમા નવમેષુ શ્રયધ્વમ્ । નવમા દશમેષુ શ્રયધ્વમ્ । દશમા એકાદશેષુ શ્રયધ્વમ્ । એકાદશા દ્વાદશેષુ શ્રયધ્વમ્ । દ્વાદશાસ્ત્રયોદશેષુ શ્રયધ્વમ્ । ત્રયોદશાશ્ચતુર્દશેષુ શ્રયધ્વમ્ । ચતુર્દશાઃ પઞ્ચદશેષુ શ્રયધ્વમ્ । પઞ્ચદશાઃ ષોડશેષુ શ્રયધ્વમ્ ॥ ૩। ૧૧। ૨। ૨॥

૨૪ ષોડશાઃ સપ્તદશેષુ શ્રયધ્વમ્ । સપ્તદશા અષ્ટાદશેષુ શ્રયધ્વમ્ । અષ્ટાદશા એકાન્નવિꣳશેષુ શ્રયધ્વમ્ । એકાન્નવિꣳશા વિꣳશેષુ શ્રયધ્વમ્ । વિꣳશા એકવિꣳશેષુ શ્રયધ્વમ્ । એકવિꣳશા દ્વાવિꣳશેષુ શ્રયધ્વમ્ । દ્વાવિꣳશાસ્ત્રયોવિꣳશેષુ શ્રયધ્વમ્ । ત્રયોવિꣳશાશ્ચતુર્વિꣳશેષુ શ્રયધ્વમ્ । ચતુર્વિꣳશાઃ પઞ્ચવિꣳશેષુ શ્રયધ્વમ્ । પઞ્ચવિꣳશાઃ ષડ્વિꣳશેષુ શ્રયધ્વમ્ ॥ ૩। ૧૧। ૨। ૩॥

૨૫ ષડ્વિꣳશાઃ સપ્તવિꣳશેષુ શ્રયધ્વમ્ । સપ્તવિꣳશા અષ્ટાવિꣳશેષુ શ્રયધ્વમ્ । અષ્ટાવિꣳશા એકાન્નત્રિꣳશેષુ શ્રયધ્વમ્ । એકાન્નત્રિꣳશાસ્ત્રિꣳશેષુ શ્રયધ્વમ્ । ત્રિꣳશા

એકત્રિꣳ શેષુ શ્રયધ્વમ્ । એકત્રિꣳ શા દ્વાત્રિꣳ શેષુ
શ્રયધ્વમ્ । દ્વાત્રિꣳ શાસ્ત્રયસ્ત્રિꣳ શેષુ શ્રયધ્વમ્ ।
દેવાસ્ત્રિરેકાદશાસ્ત્રિસ્ત્રયસ્ત્રિꣳ શાઃ । ઉત્તરે ભવત । ઉત્તરવર્ત્માન
ઉત્તરસત્વાનઃ । યત્કામ ઇદં જુહોમિ । તન્મે સમૃદ્ધ્યતામ્ । વયꣳ
સ્યામ પતયો રયીણામ્ । ભૂર્ભુવઃ સ્વઃ સ્વાહા ॥ ૩। ૧૧। ૨। ૪॥ ષટ્સુ
શ્રયધ્વꣳ ષોડશેષુ શ્રયધ્વꣳ ષડ્વિꣳ શેષુ શ્રયધ્વમુત્તરે
ભવતોત્તર વર્ત્માન ઉત્તરસત્વાનશ્ચત્વારિ ચ ॥ ૨॥

૨૬ અગ્નાવિષ્ણૂ સજોષસા । ઇમા વર્ધન્તુ વાં ગિરઃ । દ્યુમ્નૈર્વાજેભિરાગતમ્
। રાજ્ઞી વિરાજ્ઞી । સમ્રાજ્ઞી સ્વરાજ્ઞી । અર્ચિઃ શોચિઃ । તપો હરો
ભાઃ । અગ્નિઃ સોમો બૃહસ્પતિઃ । વિશ્વે દેવા ભુવનસ્ય ગોપાઃ । તે સર્વે
સંગત્ય । ઇદં મે પ્રાવતા વચઃ । વયꣳ સ્યામ પતયો રયીણામ્ ।
ભૂર્ભુવઃ સ્વઃ સ્વાહા ॥ ૩। ૧૧। ૩। ૧॥ સંગત્ય ત્રીણિ ચ ॥ ૩॥

૨૭ અન્નપતેઽન્નસ્ય નો દેહિ । અનમીવસ્ય શુષ્મિણઃ । પ્ર પ્રદાતારં
તારિષઃ । ઊર્જં નો ધેહિ દ્વિપદે ચતુષ્પદે । અગ્ને પૃથિવીપતે । સોમ વીરુધાં
પતે । ત્વષ્ટઃ સમિધાં પતે । વિષ્ણવાશાનાં પતે । મિત્ર સત્યાનાં પતે । વરુણ
ધર્મણાં પતે ॥ ૩। ૧૧। ૪। ૧॥

૨૮ મરુતો ગણાનાં પતયઃ । રુદ્ર પશૂનાં પતે । ઇન્દ્રૌજસાં પતે । બૃહસ્પતે
બ્રહ્મણસ્પતે । આ રુચા રોચેઽહꣳ સ્વયમ્ । રુચા રુરુચે રોચમાનઃ ।
અતીત્યાદઃ સ્વરા ભરેહ । તસ્મિન્ યોનૌ પ્રજનૌ પ્રજાયેય । વયꣳ
સ્યામ પતયો રયીણામ્ । ભૂર્ભુવઃ સ્વઃ સ્વાહા ॥ ૩। ૧૧। ૪। ૨॥ વરુણ ધર્મણાં
પતે સ્વઃ સ્વાહા ॥ ૪॥

૨૯ સપ્ત તે અગ્ને સમિધઃ સપ્ત જિહ્વાઃ । સપ્તર્ષયઃ સપ્ત ધામ પ્રિયાણિ
। સપ્ત હોત્રા અનુવિદ્વાન્ । સપ્ત યોનીરા પૃણસ્વા ઘૃતેન । પ્રાચી દિક્ ।
અગ્નિર્દેવતા । અગ્નિꣳ સ દિશાં દેવં દેવતાનામૃચ્છતુ । યો મૈતસ્યૈ
દિશોઽભિદાસતિ । દક્ષિણા દિક્ । ઇન્દ્રો દેવતા ॥ ૩। ૧૧। ૫। ૧॥

૩૦ ઇન્દ્રꣳ સ દિશાં દેવં દેવતાનામૃચ્છતુ । યો મૈતસ્યૈ
દિશોઽભિદાસતિ । પ્રતીચી દિક્ । સોમો દેવતા । સોમꣳ સ દિશાં

દેવં દેવતાનામૃચ્છતુ । યો મૈતસ્યૈ દિશોઽભિદાસતિ । ઉદીચી દિક્ ।
મિત્રાવરુણૌ દેવતા । મિત્રાવરુણૌ સ દિશાં દેવૌ દેવતાનામૃચ્છતુ ।
યો મૈતસ્યૈ દિશોઽભિદાસતિ ॥ ૩। ૧૧। ૫। ૨॥

૩૧ ઊર્ધ્વા દિક્ । બૃહસ્પતિર્દેવતા । બૃહસ્પતિ ँ સ દિશાં
દેવં દેવતાનામૃચ્છતુ । યો મૈતસ્યૈ દિશોઽભિદાસતિ । ઇયં દિક્
। અદિતિર્દેવતા । અદિતિ ँ સ દિશાં દેવીં દેવતાનામૃચ્છતુ । યો
મૈતસ્યૈ દિશોઽભિદાસતિ । પુરુષો દિક્ । પુરુષો મે કામાન્થ્સમર્ધયતુ
॥ ૩। ૧૧। ૫। ૩॥

૩૨ અન્ધો જાગૃવિઃ પ્રાણ । અસાવેહિ । બધિર આક્રન્દયિતરપાન । અસાવેહિ ।
ઉષસમુષસમશીય । અહમસો જ્યોતિરશીય । અહમસોઽપોઽશીય । વયર ँ
સ્યામ પતયો રયીણામ્ । ભૂર્ભુવઃ સ્વઃ સ્વાહા ॥ ૩। ૧૧। ૫। ૩॥ દક્ષિણા
દિગિન્દ્રો દેવતા મિત્રાવરુણૌ સ દિશાં દેવૌ દેવતાનામૃચ્છતુ યો
મૈતસ્યૈ દિશોઽભિદાસત્યર્ધયતુ નવ ચ ॥ ૫॥

૩૩ યત્તેઽચિતં યદુ ચિતં તે અગ્ને । યત્ત ઊનં યદુ તેઽતિરિક્તમ્
। આદિત્યાસ્તદંગિરસશ્ચિન્વન્તુ । વિશ્વે તે દેવાશ્ચિતિમા પૂરયન્તુ ।
ચિતશ્ચાસિ સંચિતશ્ચાસ્યગ્ને । એતાવાગ્શ્ચાસિ ભૂયાગ્શ્ચાસ્યગ્ને । લોકં
પૃણ ચ્છિદ્રં પૃણ । અથો સીદ શિવા ત્વમ્ । ઇન્દ્રાગ્ની ત્વા બૃહસ્પતિઃ
। અસ્મિન્, યોનાવસીષદન્ ॥ ૩। ૧૧। ૬। ૧॥

૩૪ તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ । તા અસ્ય સૂદદોહસઃ । સોમગ્ગ્
શ્રીણન્તિ પૃશ્નયઃ । જન્મન્દેવાનાં વિશઃ । ત્રિષ્વારોચને દિવઃ । તયા
દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ । અગ્ને દેવા ँ ઇહાવહ । જજ્ઞાનો
વૃક્તબર્હિષે । અસિ હોતા ન ઈડ્યઃ । અગન્મ મહા મનસા યવિષ્ઠમ્ ॥
૩। ૧૧। ૬। ૨॥

૩૫ યો દીદાય સમિદ્ધ સ્વે દુરોણે । ચિત્રભાનૂ રોદસી અન્તરુર્વી ।
સ્વાહુતં વિશ્વતઃ પ્રત્યઞ્ચમ્ । મેધાકારં વિદથસ્ય પ્રસાધનમ્ ।
અગ્નિ ँ હોતારં પરિભૂતમં મતિમ્ । ત્વામર્ભસ્ય હવિષઃ સમાનમિત્
। ત્વાં મહો વૃણતે નરો નાન્યં ત્વત્ । મનુષ્વત્ત્વા નિધીમહિ ।

મનુષ્વથ્સમિધીમહિ । અગ્ને મનુષ્વદઙ્ગિરઃ ॥ ૩। ૧૧। ૬। ૩॥

૩૬ દેવાન્દેવાયતે યજ । અગ્નિર્હિ વાજિનં વિશે । દદાતિ વિશ્વચર્ષણિઃ ।
અગ્ની રાયે સ્વાભુવમ્ । સ પ્રીતો યાતિ વાર્યમ્ । ઇષગ્ગ્ં સ્તોતૃભ્ય આભર ।
પૃષ્ટો દિવિ પૃષ્ટો અગ્નિઃ પૃથિવ્યામ્ । પૃષ્ટો વિશ્વા ઓષધીરાવિવેશ
। વૈશ્વાનરઃ સહસા પૃષ્ટો અગ્નિઃ । સ નો દિવા સ રિષઃ પાતુ નક્તમ્
॥ ૩। ૧૧। ૬। ૪॥ અસીષદન્ યવિષ્ઠમઙ્ગિરો નક્તમ્ ॥ ૬॥

૩૭ અયં વાવ યઃ પવતે । સોઽગ્નિર્નાચિકેતઃ । સ યત્પ્રાઙ્પવતે । તદસ્ય
શિરઃ । અથ યદ્દક્ષિણા । સ દક્ષિણઃ પક્ષઃ । અથ યત્પ્રત્યક્ । તત્પુચ્છમ્
। યદુદઙ્ । સ ઉત્તરઃ પક્ષઃ ॥ ૩। ૧૧। ૭। ૧॥

૩૮ અથ યથ્સંવાતિ । તદસ્ય સમઞ્ચનં ચ પ્રસારણં ચ । અથો
સમ્પદેવાસ્ય સા । સ ँ હ વા અસ્મૈ સ કામઃ પદ્યતે । યત્કામો
યજતે । યોઽગ્નિં નાચિકેતં ચિનુતે । ય ઉ ચૈનમેવં વેદ । યો હ વા
અગ્નેર્નાચિકેતસ્યાયતનં પ્રતિષ્ઠાં વેદ । આયતનવાન્ભવતિ । ગચ્છતિ
પ્રતિષ્ઠામ્ ॥ ૩। ૧૧। ૭। ૨॥

૩૯ હિરણ્યં વા અગ્નેર્નાચિકેતસ્યાયતનં પ્રતિષ્ઠા । ય એવં વેદ ।
આયતનવાન્ભવતિ । ગચ્છતિ પ્રતિષ્ઠામ્ । યો હ વા અગ્નેર્નાચિકેતસ્ય
શરીરં વેદ । સશરીર એવ સ્વર્ગં લોકમેતિ । હિરણ્યં
વા અગ્નેર્નાચિકેતસ્ય શરીરમ્ । ય એવં વેદ । સશરીર એવ સ્વર્ગં
લોકમેતિ । અથો યથા રુક્મ ઉત્તમો ભાય્યાત્ ॥ ૩। ૧૧। ૭। ૩॥

૪૦ એવમેવ સ તેજસા યશસા । અસ્મિ ँ શ્ચ લોકેઽમુષ્મિગ્ગ્શ્ચ ભાતિ ।
ઉરવો હ વૈ નામૈતે લોકાઃ । યેઽવરેણાદિત્યમ્ । અથ હૈતે વરીયા ँ સો
લોકાઃ । યે પરેણાદિત્યમ્ । અન્તવન્ત ँ હ વા એષ ક્ષય્યં લોકં જયતિ ।
યોઽવરેણાદિત્યમ્ । અથ હૈષોઽનન્તમપારમક્ષય્યં લોકં જયતિ ।
યઃ પરેણાદિત્યમ્ ॥ ૩। ૧૧। ૭। ૪॥

૪૧ અનન્ત ँ હ વા અપારમક્ષય્યં લોકં જયતિ । યોઽગ્નિં નાચિકેતં
ચિનુતે । ય ઉ ચૈનમેવં વેદ । અથો યથા રથે તિષ્ઠન્પક્ષસી
પર્યાવર્તમાને પ્રત્યપેક્ષતે । એવમહોરાત્રે પ્રત્યપેક્ષતે । નાસ્યાહોરાત્રે

લોકમાપ્નુતઃ । યોઽગ્નિં નાચિકેતં ચિનુતે । ય ઉ ચૈનમેવં વેદ ॥ ૩। ૧૧। ૭। ૫॥ ઉત્તરઃ પક્ષો ગચ્છતિ પ્રતિષ્ઠાં ભાચ્યાધઃ પરેણાદિત્યમષ્ટૌ
ચ ॥ ૭॥

૪૨ ઉશન્ હ વૈ વાજશ્રવસઃ સર્વવેદસં દદૌ । તસ્ય હ નચિકેતા નામ પુત્ર આસ । તઁ હ કુમારઁ સન્તમ્ । દક્ષિણાસુ નીયમાનાસુ શ્રદ્ધાઽઽવિવેશ । સ હોવાચ । તત કસ્મૈ માં દાસ્યસીતિ । દ્વિતીયં તૃતીયમ્ । તઁ હ પરીત ઉવાચ । મૃત્યવે ત્વા દદામીતિ । તઁ હ સ્મોત્થિતં વાગભિવદતિ ॥ ૩। ૧૧। ૮। ૧॥

૪૩ ગૌતમ કુમારમિતિ । સ હોવાચ । પરેહિ મૃત્યોર્ગૃહાન્ । મૃત્યવે વૈ ત્વાઽદામિતિ । તં વૈ પ્રવસન્તં ગન્તાસીતિ હોવાચ । તસ્ય સ્મ તિસ્રો રાત્રીરનાશ્વાન્ગૃહે વસતાત્ । સ યદિ ત્વા પૃચ્છેત્ । કુમાર કતિ રાત્રીરવાત્સીરિતિ । તિસ્ર ઇતિ પ્રતિ બ્રૂતાત્ । કિં પ્રથમાઁ રાત્રિમાશ્ના ઇતિ ॥ ૩। ૧૧। ૮। ૨॥

૪૪ પ્રજાં ત ઇતિ । કિં દ્વિતીયામિતિ । પશૂગ્સ્ત ઇતિ । કિં તૃતીયામિતિ । સાધુકૃત્યાં ત ઇતિ । તં વૈ પ્રવસન્તં જગામ । તસ્ય હ તિસ્રો રાત્રીરનાશ્વાન્ગૃહ ઉવાસ । તમાગત્ય પપ્રચ્છ । કુમાર કતિ રાત્રીરવાત્સીરિતિ । તિસ્ર ઇતિ પ્રત્યુવાચ ॥ ૩। ૧૧। ૮। ૩॥

૪૫ કિં પ્રથમાઁ રાત્રિમાશ્ના ઇતિ । પ્રજાં ત ઇતિ । કિં દ્વિતીયામિતિ । પશૂગ્સ્ત ઇતિ । કિં તૃતીયામિતિ । સાધુકૃત્યાં ત ઇતિ । નમસ્તે અસ્તુ ભગવ ઇતિ હોવાચ । વરં વૃણીષ્વેતિ । પિતરમેવ જીવન્નયાનીતિ । દ્વિતીયં વૃણીષ્વેતિ ॥ ૩। ૧૧। ૮। ૪॥

૪૬ ઇષ્ટાપૂર્તયોર્મેઽક્ષિતિં બ્રૂહીતિ હોવાચ । તસ્મૈ હૈતમગ્નિં નાચિકેતમુવાચ । તતો વૈ તસ્યેષ્ટાપૂર્તે ના ક્ષીયેતે । નાસ્યેષ્ટાપૂર્તે ક્ષીયેતે । યોઽગ્નિં નાચિકેતં ચિનુતે । ય ઉ ચૈનમેવં વેદ । તૃતીયં વૃણીષ્વેતિ । પુનર્મૃત્યોર્મેઽપજિતિં બ્રૂહીતિ હોવાચ । તસ્મૈ હૈતમગ્નિં નાચિકેતમુવાચ । તતો વૈ સોઽપ પુનર્મૃત્યુમજયત્ ॥ ૩। ૧૧। ૮। ૫॥

૪૭ અપ પુનર્મૃત્યું જયતિ । યોઽગ્નિં નાચિકેતં ચિનુતે । ય ઉ ચૈનમેવં

વેદ । પ્રજાપતિર્વૈ પ્રજાકામસ્તપોઽતપ્યત । સ હિરણ્યમુદાસ્યત્ ।
તદગ્નૌ પ્રાસ્યત્ । તદસ્મૈ નાચ્છદયત્ । તદ્દ્વિતીયં પ્રાસ્યત્ । તદસ્મૈ
નૈવાચ્છદયત્ । તત્તૃતીયં પ્રાસ્યત્ ॥ ૩। ૧૧। ૮। ૬॥

૪૮ તદસ્મૈ નૈવાચ્છદયત્ । તદાત્મન્નેવ હૃદય્યેઽગ્નૌ વૈશ્વાનરે
પ્રાસ્યત્ । તદસ્મા અચ્છદયત્ । તસ્માદ્ધિરણ્યં કનિષ્ઠં ધનાનામ્ ।
ભુઞ્જત્પ્રિયતમમ્ । હૃદયજꣳ હિ । સ વૈ તમેવ નાવિન્દત્ । યસ્મૈ તાં
દક્ષિણામનેષ્યત્ । તાગ્ સ્વાયૈવ હસ્તાય દક્ષિણાયાનયત્ । તાં પ્રત્યગૃહ્ણાત્ ॥
૩। ૧૧। ૮। ૭॥

૪૯ દક્ષાય ત્વા દક્ષિણાં પ્રતિગૃહ્ણામીતિ । સોઽદક્ષત દક્ષિણાં
પ્રતિગૃહ્ય । દક્ષતે હ વૈ દક્ષિણાં પ્રતિગૃહ્ય । ય એવં વેદ ।
એતદ્ધ સ્મ વૈ તદ્વિદ્વાꣳસો વાજશ્રવસા ગોતમાઃ । અપ્યનૂદેશ્યાં
દક્ષિણાં પ્રતિગૃહ્ણન્તિ । ઉભયેન વયં દક્ષિષ્યામહ એવ દક્ષિણાં
પ્રતિગૃહ્યેતિ । તેઽદક્ષન્ત દક્ષિણાં પ્રતિગૃહ્ય । દક્ષતે હ
વૈ દક્ષિણાં પ્રતિગૃહ્ય । ય એવં વેદ । પ્રહાન્યં વ્લીનાતિ ॥ ૩। ૧૧। ૮। ૮॥ વદત્યાશ્ના ઇત્યુવાચ દ્વિતીયં
વૃણીષ્વેત્યજયત્તૃતીયં
પ્રાસ્યદગૃહ્ણાદ્ય એવં વેદૈકં ચ ॥ ૮॥

૫૦ તꣳ હૈતમેકે પશુબન્ધ એવોત્તરવેદ્યાં ચિન્વતે ।
ઉત્તરવેદિસમ્મિત એષોઽગ્નિરિતિ વદન્તઃ । તન્ન તથા કુર્યાત્ ।
એતમગ્નિં કામેન વ્યર્દ્ધયેત્ । સ એનં કામેન વ્યૃદ્ધઃ । કામેન
વ્યર્દ્ધયેત્ । સૌમ્યે વાવૈનમધ્વરે ચિન્વીત । યત્ર વા ભૂયિષ્ઠા
આહુતયો હૂયેરન્ । એતમગ્નિં કામેન સમર્દ્ધયતિ । સ એનં કામેન
સમૃદ્ધઃ ॥ ૩। ૧૧। ૯। ૧॥

૫૧ કામેન સમર્દ્ધયતિ । અથ હૈનં પુરર્ષયઃ । ઉત્તરવેદ્યામેવ
સત્રિયમચિન્વત । તતો વૈ તેઽવિન્દન્ત પ્રજામ્ । અભિ સ્વર્ગં લોકમજયન્
। વિન્દત એવ પ્રજામ્ । અભિ સ્વર્ગં લોકં જયતિ । યોઽગ્નિં નાચિકેતં
ચિનુતે । ય ઉ ચૈનમેવં વેદ । અથ હૈનં વાયુરૃદ્ધિકામઃ ॥ ૩। ૧૧। ૯। ૨॥

૫૨ યથાન્યુપ્તમેવોપદધે । તતો વૈ સ એતામૃદ્ધિમાર્ધ્નોત્ । યામિદં

વાયુર્ ઋદ્ધઃ । એતામૃદ્ધિમૃધ્નોતિ । યામિદં વાયુર્ ઋદ્ધઃ । યોઽગ્નિં
નાચિકેતં ચિનુતે । ય ઉ ચૈનમેવં વેદ । અથ હૈનં ગોબલો વાર્ષ્ણઃ
પશુકામઃ । પાઙ્ક્તમેવ ચિક્યે । પઞ્ચ પુરસ્તાત્ ॥ ૩। ૧૧। ૯। ૩॥
પ૩ પઞ્ચ દક્ષિણતઃ । પઞ્ચ પશ્ચાત્ । પઞ્ચોત્તરતઃ । એકાં મધ્યે
। તતો વૈ સ સહસ્રં પશૂન્પ્રાપ્નોત્ । પ્ર સહસ્રં પશૂનાપ્નોતિ ।
યોઽગ્નિં નાચિકેતં ચિનુતે । ય ઉ ચૈનમેવં વેદ । અથ હૈનં
પ્રજાપતિર્જ્યૈષ્ઠ્યકામો યશસ્કામઃ પ્રજનનકામઃ । ત્રિવૃતમેવ
ચિક્યે ॥ ૩। ૧૧। ૯। ૪॥
પ૪ સપ્ત પુરસ્તાત્ । તિસ્રો દક્ષિણતઃ । સપ્ત પશ્ચાત્ । તિસ્ર ઉત્તરતઃ ।
એકાં મધ્યે । તતો વૈ સ પ્ર યશો જ્યૈષ્ઠ્યમાપ્નોત્ । એતાં પ્રજાતિં પ્રાજાયત
। યામિદં પ્રજાઃ પ્રજાયન્તે । ત્રિવૃદ્વૈ જ્યૈષ્ઠ્યમ્ । માતા પિતા પુત્રઃ ॥
૩। ૧૧। ૯। ૫॥
પપ ત્રિવૃત્પ્રજનનમ્ । ઉપસ્થો યોનિર્મધ્યમા । પ્ર યશો જ્યૈષ્ઠ્યમાપ્નોતિ ।
એતાં પ્રજાતિં પ્રજાયતે । યામિદં પ્રજાઃ પ્રજાયન્તે । યોઽગ્નિં નાચિકેતં
ચિનુતે । ય ઉ ચૈનમેવં વેદ । અથ હૈનમિન્દ્રો જ્યૈષ્ઠ્યકામઃ । ઊર્ધ્વા
એવોપદધે । તતો વૈ સ જ્યૈષ્ઠ્યમગચ્છત્ ॥ ૩। ૧૧। ૯। ૬॥
પ૬ જ્યૈષ્ઠ્યં ગચ્છતિ । યોઽગ્નિં નાચિકેતં ચિનુતે । ય ઉ ચૈનમેવં
વેદ । અથ હૈનમસાવાદિત્યઃ સ્વર્ગકામઃ । પ્રાચીરેવોપદધે । તતો
વૈ સોઽભિ સ્વર્ગં લોકમજયત્ । અભિ સ્વર્ગં લોકં જયતિ । યોઽગ્નિં
નાચિકેતં ચિનુતે । ય ઉ ચૈનમેવં વેદ । સ યદીચ્છેત્ ॥ ૩। ૧૧। ૯। ૭॥
પ૭ તેજસ્વી યશસ્વી બ્રહ્મવર્ચસી સ્યામિતિ । પ્રાઙાહોતુર્ધિષ્ણ્યાદુથ્સર્પેત્ ।
યેયં પ્રાગાદ્યશસ્વતી । સા મા પ્રોર્ણોતુ । તેજસા યશસા બ્રહ્મવર્ચસેનેતિ ।
તેજસ્વ્યેવ યશસ્વી બ્રહ્મવર્ચસી ભવતિ । અથ યદીચ્છેત્ । ભૂયિષ્ઠં
મે શ્રદ્દધીરન્ । ભૂયિષ્ઠા દક્ષિણા નયેયુરિતિ । દક્ષિણાસુ નીયમાનાસુ
પ્રાચ્યેહિ પ્રાચ્યેહીતિ પ્રાચી જુષાણા વેત્વાજ્યસ્ય સ્વાહેતિ સ્રુવેણોપ
હત્યાહવનીયે જુહુયાત્ ॥ ૩। ૧૧। ૯। ૮॥

૫૮ ભૂયિષ્ઠમેવાસ્મૈ શ્રદ્ધતે । ભૂયિષ્ઠા દક્ષિણા નયન્તિ
। પુરીષમુપધાય । ચિતિક્લૃપ્તિભિરભિમૃશ્ય । અગ્નિં
પ્રણીયોપસમાધાય । ચતસ્ર એતા આહુતીર્જુહોતિ । ત્વમગ્ને રુદ્ર
ઇતિ શતરુદ્રીયસ્ય રૂપમ્ । અગ્નાવિષ્ણૂ ઇતિ વસોર્ધારાયાઃ ।
અન્નપત ઇત્યન્ન હોમઃ । સપ્ત તે અગ્ને સમિધઃ સપ્ત જિહ્વા
ઇતિ વિશ્વપ્રીઃ ॥ ૩। ૧૧। ૯। ૯॥ સમૃદ્ધ ઋદ્ધિકામઃ પુરસ્તાચ્ચિક્યે
પુત્રોઽગચ્છદિચ્છેજ્જુહુયાદ્વિશ્વપ્રીઃ ॥ ૯॥ પુરર્ષયો વાયુર્ગોબલઃ
સહસ્રં પ્રજાપતિસ્ત્રિવૃદિન્દ્રોસાવાદિત્યઃ સ યદીચ્છેત્ ॥

૫૯ યાં પ્રથમામિષ્ટકામુપદધાતિ । ઇમં તયા લોકમભિજયતિ । અથો
યા અસ્મિઉઁ લ્લોકે દેવતાઃ । તાસાઁ સાયુજ્યઁ સલોકતામાપ્નોતિ ।
યાં દ્વિતીયામુપદધાતિ । અન્તરિક્ષલોકં તયાઽભિજયતિ । અથો
યા અન્તરિક્ષલોકે દેવતાઃ । તાસાઁ સાયુજ્યઁ સલોકતામાપ્નોતિ । યાં
તૃતીયામુપદધાતિ । અમું તયા લોકમભિજયતિ ॥ ૩। ૧૧। ૧૦। ૧॥

૬૦ અથો યા અમુષ્મિં લ્લોકે દેવતાઃ । તાસાઁ સાયુજ્યઁ સલોકતામાપ્નોતિ ।
અથો યા અમૂરિતરા અષ્ટાદશ । ય એવામી ઉરવશ્ચ વરીયાઁ સશ્ચ લોકાઃ
। તાનેવ તાભિરભિજયતિ । કામચારો હ વા અસ્યોરુષુ ચ વરીયઃસુ
ચ લોકેષુ ભવતિ । યોઽગ્નિં નાચિકેતં ચિનુતે । ય ઉ ચૈનમેવં વેદ
। સંવથ્સરો વા અગ્નિર્નાચિકેતઃ । તસ્ય વસન્તઃ શિરઃ ॥ ૩। ૧૧। ૧૦। ૨॥

૬૧ ગ્રીષ્મો દક્ષિણઃ પક્ષઃ । વર્ષા ઉત્તરઃ । શરત્પુચ્છમ્ । માસાઃ
કર્મકારાઃ । અહોરાત્રે શતરુદ્રીયમ્ । પર્જન્યો વસોર્ધારા । યથા વૈ
પર્જન્યઃ સુવૃષ્ટં વૃષ્ટ્વા । પ્રજાભ્યઃ સર્વાન્કામાન્થ્સંપૂરયતિ ।
એવમેવ સ તસ્ય સર્વાન્કામાન્થ્સંપૂરયતિ । યોઽગ્નિં નાચિકેતં ચિનુતે ॥
૩। ૧૧। ૧૦। ૩॥

૬૨ ય ઉ ચૈનમેવં વેદ । સંવથ્સરો વા અગ્નિર્નાચિકેતઃ । તસ્ય વસન્તઃ
શિરઃ । ગ્રીષ્મો દક્ષિણઃ પક્ષઃ । વર્ષાઃ પુચ્છમ્ । શરદુત્તરઃ
પક્ષઃ । હેમન્તો મધ્યમ્ । પૂર્વપક્ષાશ્ચિતયઃ । અપરપક્ષાઃ
પુરીષમ્ । અહોરાત્રાણીષ્ટકાઃ । એષ વાવ સોઽગ્નિરગ્નિમયઃ પુનર્ણવઃ

। અગ્નિમયો હ વૈ પુનર્ણવો ભૂત્વા । સ્વર્ગં લોકમેતિ । આદિત્યસ્ય
સાયુજ્યમ્ । યોઽગ્નિં નાચિકેતં ચિનુતે । ય ઉ ચૈનમેવં વેદ ॥ ૩। ૧૧। ૧૦। ૪॥ અમું તયા લોકમભિ જયતિ
શિરશ્ચિનુત ઇષ્ટકાષ્ટૂચ ॥ ૧૦॥
લોકસ્ત્વમગ્નેઽગ્નાવિષ્ણૂ અન્નપતે સમ તે અગ્ને યત્તે ચિતમયમુશન્,
હ વૈ તઁ હૈતં યાં પ્રથમામિષ્ટકાં દશ ॥ ૧૦॥ લોક આદિત્ય
ઓજોસ્યૂર્ધ્વા દિગનન્તઁ હ વૈ કામેન ગ્રીષ્મો દ્વિષષ્ટિઃ ॥ ૬૨॥ લોકોસિ
ય ઉચૈનમેવં વેદ ॥

## કાઠકે તૃતીયઃ પ્રપાઠકઃ ૩

## ચાતુર્હોત્ર ચયનં વૈશ્વસૃજ ચયનં ચ

૧ તુભ્યં તા અઙ્ગિરસ્તમાઽશ્યામ તં કામમગ્ને । આશાનાં ત્વા વિશ્વા આશાઃ
। અનુ નોઽદ્યાનુમતિરન્વિદનુમતે ત્વમ્ । કામો ભૂતસ્ય કામસ્તદગ્રે ।
બ્રહ્મ જજ્ઞાનં પિતા વિરાજામ્ । યજ્ઞો રાયોઽયં યજ્ઞઃ । આપો ભદ્રા
આદિત્પશ્યામિ । તુભ્યં ભરન્તિ યો દેહ્યઃ । પૂર્વં દેવા અપરેણ પ્રાણાપાનૌ ।
હવ્યવાહગ્ગ્ સ્વિષ્ટમ્ ॥ ૩। ૧૨। ૧। ૧॥ તુભ્યં દશ ॥ ૧॥
૨ દેવેભ્યો વૈ સ્વર્ગો લોકસ્તિરોઽભવત્ । તે પ્રજાપતિમબ્રુવન્
। પ્રજાપતે સ્વર્ગો વૈ નો લોકસ્તિરોઽભૂત્ । તમન્વિચ્છેતિ ।
તં યજ્ઞક્રતુભિરન્વૈચ્છત્ । તં યજ્ઞક્રતુભિર્નાન્વવિન્દત્ ।
તમિષ્ટિભિરન્વૈચ્છત્ । તમિષ્ટિભિરન્વવિન્દત્ । તદિષ્ટીનામિષ્ટિત્વમ્ ।
એષ્ટયો હ વૈ નામ । તા ઇષ્ટય ઇત્યાચક્ષતે પરોક્ષેણ । પરોક્ષપ્રિયા
ઇવ હિ દેવાઃ ॥ ૩। ૧૨। ૨। ૧॥
૩ તમાશાઽબ્રવીત્ । પ્રજાપત આશયા વૈ શ્રામ્યસિ । અહમુ વા આશાઽસ્મિ । માં નુ
યજસ્વ । અથ તે સત્યાઽઽશા ભવિષ્યતિ । અનુ સ્વર્ગં લોકં વેત્સ્યસીતિ
। સ એતમગ્નયે કામાય પુરોડાશમષ્ટાકપાલં નિરવપત્ । આશાયૈ
ચરુમ્ । અનુમત્યૈ ચરુમ્ । તતો વૈ તસ્ય સત્યાઽઽશાઽભવત્ । અનુ સ્વર્ગં

લોકમવિન્દત્ । સત્યા હ વા અસ્યાશા ભવતિ । અનુ સ્વર્ગં લોકં વિન્દતિ ।
ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । અગ્નયે
કામાય સ્વાહાઽઽશાયૈ સ્વાહા । અનુમત્યૈ સ્વાહા પ્રજાપતયે સ્વાહા ।
સ્વર્ગાય લોકાય સ્વાહાઽગ્નયે સ્વિષ્ટકૃતે સ્વાહેતિ ॥ ૩। ૧૨। ૨। ૨॥

૪ તં કામોઽબ્રવીત્ । પ્રજાપતે કામેન વૈ શ્રામ્યસિ । અહમુ વૈ કામોઽસ્મિ
। માં નુ યજસ્વ । અથ તે સત્યઃ કામો ભવિષ્યતિ । અનુ સ્વર્ગં લોકં
વેથ્સ્યસીતિ । સ એતમગ્નયે કામાય પુરોડાશમષ્ટાકપાલં નિરવપત્ ।
કામાય ચરુમ્ । અનુમત્યૈ ચરુમ્ । તતો વૈ તસ્ય સત્યઃ કામોઽભવત્ । અનુ
સ્વર્ગં લોકમવિન્દત્ । સત્યો હ વા અસ્ય કામો ભવતિ । અનુ સ્વર્ગં લોકં
વિન્દતિ । ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ
। અગ્નયે કામાય સ્વાહા કામાય સ્વાહા । અનુમત્યૈ સ્વાહા પ્રજાપતયે
સ્વાહા । સ્વર્ગાય લોકાય સ્વાહાઽગ્નયે સ્વિષ્ટકૃતે સ્વાહેતિ ॥ ૩। ૧૨। ૨। ૩॥

૫ તં બ્રહ્માબ્રવીત્ । પ્રજાપતે બ્રહ્મણા વૈ શ્રામ્યસિ । અહમુ વૈ બ્રહ્માસ્મિ
। માં નુ યજસ્વ । અથ તે બ્રહ્મણ્વાન્, યજ્ઞો ભવિષ્યતિ । અનુ સ્વર્ગં લોકં
વેથ્સ્યસીતિ । સ એતમગ્નયે કામાય પુરોડાશમષ્ટાકપાલં નિરવપત્ ।
બ્રહ્મણે ચરુમ્ । અનુમત્યૈ ચરુમ્ । તતો વૈ તસ્ય બ્રહ્મણ્વાન્, યજ્ઞોઽભવત્
। અનુ સ્વર્ગં લોકમવિન્દત્ । બ્રહ્મણ્વાન્, હ વા અસ્ય યજ્ઞો ભવતિ । અનુ
સ્વર્ગં લોકં વિન્દતિ । ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ
। સોઽત્ર જુહોતિ । અગ્નયે કામાય સ્વાહા બ્રહ્મણે સ્વાહા । અનુમત્યૈ સ્વાહા
પ્રજાપતયે સ્વાહા । સ્વર્ગાય લોકાય સ્વાહાઽગ્નયે સ્વિષ્ટકૃતે સ્વાહેતિ
॥ ૩। ૧૨। ૨। ૪॥

૬ તં યજ્ઞોઽબ્રવીત્ । પ્રજાપતે યજ્ઞેન વૈ શ્રામ્યસિ । અહમુ વૈ
યજ્ઞોઽસ્મિ । માં નુ યજસ્વ । અથ તે સત્યો યજ્ઞો ભવિષ્યતિ । અનુ સ્વર્ગં
લોકં વેથ્સ્યસીતિ । સ એતમગ્નયે કામાય પુરોડાશમષ્ટાકપાલં
નિરવપત્ । યજ્ઞાય ચરુમ્ । અનુમત્યૈ ચરુમ્ । તતો વૈ તસ્ય સત્યો
યજ્ઞોઽભવત્ । અનુ સ્વર્ગં લોકમવિન્દત્ । સત્યો હ વા અસ્ય યજ્ઞો
ભવતિ । અનુ સ્વર્ગં લોકં વિન્દતિ । ય એતેન હવિષા યજતે । ય ઉ

ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । અગ્નયે કામાય સ્વાહા યજ્ઞાય સ્વાહા
। અનુમત્યૈ સ્વાહા પ્રજાપતયે સ્વાહા । સ્વર્ગાય લોકાય સ્વાહાઽગ્નયે
સ્વિષ્ટકૃતે સ્વાહેતિ ॥ ૩। ૧૨। ૨। ૫॥

૭ તમાપોઽબ્રુવન્ । પ્રજાપતેઽપ્સુ વૈ સર્વે કામાઃ શ્રિતાઃ । વયમુ વા આપઃ સ્મઃ
। અસ્માન્નુ યજસ્વ । અથ ત્વયિ સર્વે કામાઃ શ્રયિષ્યન્તે । અનુ સ્વર્ગં લોકં
વેથ્સ્યસીતિ । સ એતમગ્નયે કામાય પુરોડાશમષ્ટાકપાલં નિરવપત્ ।
અદ્ભ્યશ્ચરુમ્ । અનુમત્યૈ ચરુમ્ । તતો વૈ તસ્મિન્થ્સર્વે કામા અશ્રયન્ત ।
અનુ સ્વર્ગં લોકમવિન્દત્ । સર્વે હ વા અસ્મિન્ કામાઃ શ્રયન્તે । અનુ સ્વર્ગં
લોકં વિન્દતિ । ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર
જુહોતિ । અગ્નયે કામાય સ્વાહાઽદ્ભ્યઃ સ્વાહા । અનુમત્યૈ સ્વાહા પ્રજાપતયે
સ્વાહા । સ્વર્ગાય લોકાય સ્વાહાઽગ્નયે સ્વિષ્ટકૃતે સ્વાહેતિ ॥ ૩। ૧૨। ૨। ૬॥

૮ તમગ્નિર્બલિમાનબ્રવીત્ । પ્રજાપતેઽગ્નયે વૈ બલિમતે સર્વાણિ ભૂતાનિ
બલિꣳ હરન્તિ । અહમુ વા અગ્નિર્બલિમાનસ્મિ । માં નુ યજસ્વ । અથ તે
સર્વાણિ ભૂતાનિ બલિꣳ હરિષ્યન્તિ । અનુ સ્વર્ગં લોકં વેથ્સ્યસીતિ । સ
એતમગ્નયે કામાય પુરોડાશમષ્ટાકપાલં નિરવપત્ । અગ્નયે બલિમતે
ચરુમ્ । અનુમત્યૈ ચરુમ્ । તતો વૈ તસ્મૈ સર્વાણિ ભૂતાનિ બલિમહરન્ ।
અનુ સ્વર્ગં લોકમવિન્દત્ । સર્વાણિ હ વા અસ્મૈ ભૂતાનિ બલિꣳ હરન્તિ ।
અનુ સ્વર્ગં લોકં વિન્દતિ । ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં
વેદ । સોઽત્ર જુહોતિ । અગ્નયે કામાય સ્વાહાઽગ્નયે બલિમતે સ્વાહા ।
અનુમત્યૈ સ્વાહા પ્રજાપતયે સ્વાહા । સ્વર્ગાય લોકાય સ્વાહાઽગ્નયે
સ્વિષ્ટકૃતે સ્વાહેતિ ॥ ૩। ૧૨। ૨। ૭॥

૯ તમનુવિત્તિરબ્રવીત્ । પ્રજાપતે સ્વર્ગં વૈ લોકમનુ વિવિથ્સસિ । અહમુ વા
અનુવિત્તિરસ્મિ । માં નુ યજસ્વ । અથ તે સત્યાઽનુવિત્તિર્ભવિષ્યતિ । અનુ સ્વર્ગં
લોકં વેથ્સ્યસીતિ । સ એતમગ્નયે કામાય પુરોડાશમષ્ટાકપાલં
નિરવપત્ । અનુવિત્ત્યૈ ચરુમ્ । અનુમત્યૈ ચરુમ્ । તતો વૈ તસ્ય
સત્યાઽનુવિત્તિરભવત્ । અનુ સ્વર્ગં લોકમવિન્દત્ । સત્યા હ વા
અસ્યાનુવિત્તિર્ભવતિ । અનુ સ્વર્ગં લોકં વિન્દતિ । ય એતેન હવિષા યજતે ।

ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । અગ્નયે કામાય સ્વાહાઽનુવિત્ત્યૈ
સ્વાહા । અનુમત્યૈ સ્વાહા પ્રજાપતયે સ્વાહા । સ્વર્ગાય લોકાય
સ્વાહાઽગ્નયે સ્વિષ્ટકૃતે સ્વાહેતિ ॥ ૩। ૧૨। ૨। ૮॥

૧૦ તા વા એતાઃ સપ્ત સ્વર્ગસ્ય લોકસ્ય દ્વારઃ । દિવઃશ્યેનયોઽનુવિત્તયો
નામ । આશા પ્રથમાꣳ રક્ષતિ । કામો દ્વિતીયામ્ । બ્રહ્મ તૃતીયામ્ ।
યજ્ઞશ્ચતુર્થીમ્ । આપઃ પઞ્ચમીમ્ । અગ્નિર્બલિમાન્ત્ષષ્ઠીમ્ । અનુવિત્તિઃ
સપ્તમીમ્ । અનુ હ વૈ સ્વર્ગં લોકં વિન્દતિ । કામચારોઽસ્ય સ્વર્ગે લોકે
ભવતિ । ય એતાભિરિષ્ટિભિર્યજતે । ય ઉ ચૈના એવં વેદ । તાસ્વન્વિષ્ટિ ।
પષ્ઠૌહીવરાં દદ્યાત્કꣳસં ચ । સ્ત્રિયૈ ચાભારꣳ સમૃદ્ધ્યૈ
॥ ૩। ૧૨। ૨। ૯॥

૧૧ તપસા દેવા દેવતામગ્ર આયન્ । તપસર્ષયઃ સ્વરન્વવિન્દન્ ।
તપસા સપત્નાન્ પ્રણુદામારાતીઃ । યેનેદં વિશ્વં પરિભૂતં યદસ્તિ ।
પ્રથમજં દેવꣳ હવિષા વિધેમ । સ્વયંભુ બ્રહ્મ પરમં તપો યત્
। સ એવ પુત્રઃ સ પિતા સ માતા । તપો હ યક્ષં પ્રથમꣳ સંબભૂવ ।
શ્રદ્ધયા દેવો દેવત્વમશ્નુતે । શ્રદ્ધા પ્રતિષ્ઠા લોકસ્ય દેવી ॥ ૩। ૧૨। ૩। ૧॥

૧૨ સા નો જુષાણોપ યજ્ઞમાગાત્ । કામવત્સાઽમૃતં દુહાના । શ્રદ્ધા
દેવી પ્રથમજા ઋતસ્ય । વિશ્વસ્ય ભર્ત્રી જગતઃ પ્રતિષ્ઠા । તાગ્
શ્રદ્ધાꣳ હવિષા યજામહે । સા નો લોકમમૃતં દધાતુ । ઈશાના દેવી
ભુવનસ્યાધિપત્ની । આગાત્સત્યꣳ હવિરિદં જુષાણમ્ । યસ્માદ્દેવા
જજ્ઞિરે ભુવનં ચ વિશ્વે । તસ્મૈ વિધેમ હવિષા ઘૃતેન ॥ ૩। ૧૨। ૩। ૨॥

૧૩ યથા દેવૈઃ સધમાદં મદેમ । યસ્ય પ્રતિષ્ઠોર્વન્તરિક્ષમ્ ।
યસ્માદ્દેવા જજ્ઞિરે ભુવનં ચ સર્વે । તથ્સત્યમર્ચદુપ યજ્ઞં
ન આગાત્ । બ્રહ્માહુતીરુપમોદમાનમ્ । મનસો વશે સર્વમિદં બભૂવ ।
નાન્યસ્ય મનો વશમન્વિયાય । ભીષ્મો હિ દેવઃ સહસઃ સહીયાન્ । સ નો
જુષાણ ઉપ યજ્ઞમાગાત્ । આકૂતીનામધિપતિં ચેતસાં ચ ॥ ૩। ૧૨। ૩। ૩॥

૧૪ સંકલ્પજૂતિં દેવં વિપશ્ચિમ્ । મનો રાજાનમિહ વર્ધયન્તઃ ।
ઉપહવેઽસ્ય સુમતૌ સ્યામ । ચરણં પવિત્રં વિતતં પુરાણમ્ ।

યેન પૂતસ્તરતિ દુષ્કૃતાનિ । તેન પવિત્રેણ શુદ્ધેન પૂતાઃ
। અતિ પાપ્માનમરાતિં તરેમ । લોકસ્ય દ્વારમર્ચિમત્પવિત્રમ્
। જ્યોતિષ્મદ્ભ્રાજમાનં મહસ્વત્ । અમૃતસ્ય ધારા બહુધા
દોહમાનમ્ । ચરણં નો લોકે સુધિતાં દધાતુ । અગ્નિર્મૂર્ધા ભુવઃ । અનુ
નોઽધાનુમતિરન્વિદનુમતે ત્વમ્ । હવ્યવાહગ્ગ્ સ્વિષ્ટમ્ ॥ ૩। ૧૨। ૩। ૪॥
દેવી ઘૃતેન ચેતસાં ચ દોહમાનં ચત્વારિ ચ ॥ ૩॥

૧૫ દેવેભ્યો વૈ સ્વર્ગો લોકસ્તિરોઽભવત્ । તે પ્રજાપતિમબ્રુવન્
। પ્રજાપતે સ્વર્ગો વૈ નો લોકસ્તિરોઽભૂત્ । તમન્વિચ્છેતિ ।
તં યજ્ઞક્રતુભિરન્વૈચ્છત્ । તં યજ્ઞક્રતુભિર્નાન્વવિન્દત્ ।
તમિષ્ટિભિરન્વૈચ્છત્ । તમિષ્ટિભિરન્વવિન્દત્ । તદિષ્ટીનામિષ્ટિત્વમ્ ।
એષ્ટયો હ વૈ નામ । તા ઇષ્ટય ઇત્યાચક્ષતે પરોક્ષેણ । પરોક્ષપ્રિયા
ઇવ હિ દેવાઃ ॥ ૩। ૧૨। ૪। ૧॥

૧૬ તં તપોઽબ્રવીત્ । પ્રજાપતે તપસા વૈ શ્રામ્યસિ । અહમુ વૈ તપોઽસ્મિ ।
માં નુ યજસ્વ । અથ તે સત્યં તપો ભવિષ્યતિ । અનુ સ્વર્ગં લોકં વેથ્સ્યસીતિ
। સ એતમાગ્નેયમષ્ટાકપાલં નિરવપત્ । તપસે ચરુમ્ । અનુમત્યૈ ચરુમ્
। તતો વૈ તસ્ય સત્યં તપોઽભવત્ । અનુ સ્વર્ગં લોકમવિન્દત્ । સત્યꣳ
હ વા અસ્ય તપો ભવતિ । અનુ સ્વર્ગં લોકં વિન્દતિ । ય એતેન હવિષા
યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । અગ્નયે સ્વાહા તપસે સ્વાહા
। અનુમત્યૈ સ્વાહા પ્રજાપતયે સ્વાહા । સ્વર્ગાય લોકાય સ્વાહાઽગ્નયે
સ્વિષ્ટકૃતે સ્વાહેતિ ॥ ૩। ૧૨। ૪। ૨॥

૧૭ તરꣳ શ્રદ્ધાઽબ્રવીત્ । પ્રજાપતે શ્રદ્ધયા વૈ શ્રામ્યસિ । અહમુ
વૈ શ્રદ્ધાઽસ્મિ । માં નુ યજસ્વ । અથ તે સત્યા શ્રદ્ધા ભવિષ્યતિ ।
અનુ સ્વર્ગં લોકં વેથ્સ્યસીતિ । સ એતમાગ્નેયમષ્ટાકપાલં નિરવપત્ ।
શ્રદ્ધાયૈ ચરુમ્ । અનુમત્યૈ ચરુમ્ । તતો વૈ તસ્ય સત્યા શ્રદ્ધાઽભવત્
। અનુ સ્વર્ગં લોકમવિન્દત્ । સત્યા હ વા અસ્ય શ્રદ્ધા ભવતિ । અનુ સ્વર્ગં
લોકં વિન્દતિ । ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર
જુહોતિ । અગ્નયે સ્વાહા શ્રદ્ધાયૈ સ્વાહા । અનુમત્યૈ સ્વાહા પ્રજાપતયે

સ્વાહા । સ્વર્ગાય લોકાય સ્વાહાઽગ્નયે સ્વિષ્ટકૃતે સ્વાહેતિ ॥ ૩। ૧૨। ૪। ૩॥

૧૮ તꣳ સત્યમબ્રવીત્ । પ્રજાપતે સત્યેન વૈ શ્રામ્યસિ । અહમુ વૈ સત્યમસ્મિ । માં નુ યજસ્વ । અથ તે સત્યꣳ સત્યં ભવિષ્યતિ । અનુ સ્વર્ગં લોકં વેથ્સ્યસીતિ । સ એતમાગ્નેયમષ્ટાકપાલં નિરવપત્ । સત્યાય ચરુમ્ । અનુમત્યૈ ચરુમ્ । તતો વૈ તસ્ય સત્યꣳ સત્યમભવત્ । અનુ સ્વર્ગં લોકમવિન્દત્ । સત્યꣳ હ વા અસ્ય સત્યં ભવતિ । અનુ સ્વર્ગં લોકં વિન્દતિ । ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । અગ્નયે સ્વાહા સત્યાય સ્વાહા । અનુમત્યૈ સ્વાહા પ્રજાપતયે સ્વાહા । સ્વર્ગાય લોકાય સ્વાહાઽગ્નયે સ્વિષ્ટકૃતે સ્વાહેતિ ॥ ૩। ૧૨। ૪। ૪॥

૧૯ તં મનોઽબ્રવીત્ । પ્રજાપતે મનસા વૈ શ્રામ્યસિ । અહમુ વૈ મનોઽસ્મિ । માં નુ યજસ્વ । અથ તે સત્યં મનો ભવિષ્યતિ । અનુ સ્વર્ગં લોકં વેથ્સ્યસીતિ । સ એતમાગ્નેયમષ્ટાકપાલં નિરવપત્ । મનસે ચરુમ્ । અનુમત્યૈ ચરુમ્ । તતો વૈ તસ્ય સત્યં મનોઽભવત્ । અનુ સ્વર્ગં લોકમવિન્દત્ । સત્યꣳ હ વા અસ્ય મનો ભવતિ । અનુ સ્વર્ગં લોકં વિન્દતિ । ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । અગ્નયે સ્વાહા મનસે સ્વાહા । અનુમત્યૈ સ્વાહા પ્રજાપતયે સ્વાહા । સ્વર્ગાય લોકાય સ્વાહાઽગ્નયે સ્વિષ્ટકૃતે સ્વાહેતિ ॥ ૩। ૧૨। ૪। ૫॥

૨૦ તં ચરણમબ્રવીત્ । પ્રજાપતે ચરણેન વૈ શ્રામ્યસિ । અહમુ વૈ ચરણમસ્મિ । માં નુ યજસ્વ । અથ તે સત્યં ચરણં ભવિષ્યતિ । અનુ સ્વર્ગં લોકં વેથ્સ્યસીતિ । સ એતમાગ્નેયમષ્ટાકપાલં નિરવપત્ । ચરણાય ચરુમ્ । અનુમત્યૈ ચરુમ્ । તતો વૈ તસ્ય સત્યં ચરણમભવત્ । અનુ સ્વર્ગં લોકમવિન્દત્ । સત્યꣳ હ વા અસ્ય ચરણં ભવતિ । અનુ સ્વર્ગં લોકં વિન્દતિ । ય એતેન હવિષા યજતે । ય ઉ ચૈનદેવં વેદ । સોઽત્ર જુહોતિ । અગ્નયે સ્વાહા ચરણાય સ્વાહા । અનુમત્યૈ સ્વાહા પ્રજાપતયે સ્વાહા । સ્વર્ગાય લોકાય સ્વાહાઽગ્નયે સ્વિષ્ટકૃતે સ્વાહેતિ ॥ ૩। ૧૨। ૪। ૬॥

૨૧ તા વા એતાઃ પઞ્ચ સ્વર્ગસ્ય લોકસ્ય દ્વારઃ । અપાદ્યા અનુવિત્તયો નામ

। તપઃ પ્રથમાꣳ રક્ષતિ । શ્રદ્ધા દ્વિતીયામ્ । સત્યં તૃતીયામ્ ।
મનશ્ચતુર્થીમ્ । ચરણં પઞ્ચમીમ્ । અનુ હ વૈ સ્વર્ગં લોકં વિન્દતિ ।
કામચારોઽસ્ય સ્વર્ગે લોકે ભવતિ । ય એતાભિરિષ્ટિભિર્યજતે । ય ઉ
ચૈના એવં વેદ । તાસ્વન્વિષ્ટિ । પષ્ઠૌહીવરાં દદ્યાત્ક્ꣳ સં ચ
। સ્ત્રિયૈ ચાભારꣳ સમૃદ્ધ્યૈ ॥ ૩। ૧૨। ૪। ૭॥

૨૨ બ્રહ્મ વૈ ચતુર્હોતારઃ । ચતુર્હોતૃભ્યોઽધિ યજ્ઞો નિર્મિતઃ । નૈનꣳ
શપ્તમ્ । નાભિચરિતમાગચ્છતિ । ય એવં વેદ । યો હ વૈ ચતુર્હોતૃણાં
ચતુર્હોતૃત્વં વેદ । અથો પઞ્ચહોતૃત્વમ્ । સર્વા હાસ્મૈ દિશઃ કલ્પન્તે ।
વાચસ્પતિર્ હોતા દશહોતૃણામ્ । પૃથિવી હોતા ચતુર્હોતૃણામ્ ॥ ૩। ૧૨। ૫। ૧॥

૨૩ અગ્નિર્હોતા પઞ્ચહોતૃણામ્ । વાગ્ઘોતા ષડ્ઢોતૃણામ્ । મહાહવિર્ હોતા
સપ્તહોતૃણામ્ । એતદ્વૈ ચતુર્હોતૃણાં ચતુર્હોતૃત્વમ્ । અથો પઞ્ચહોતૃત્વમ્
। સર્વા હાસ્મૈ દિશઃ કલ્પન્તે । ય એવં વેદ । એષા વૈ સર્વવિદ્યા ।
એતદ્ભેષજમ્ । એષા પઙ્ક્તિઃ સ્વર્ગસ્ય લોકસ્યાઞ્જસાઽયનિઃ સ્રુતિઃ ॥
૩। ૧૨। ૫। ૨॥

૨૪ એતાન્, યોઽધ્યૈત્યછદિર્દર્શે યાવત્તરસમ્ । સ્વરેતિ । અનપબ્રવઃ
સર્વમાયુરેતિ । વિન્દતે પ્રજામ્ । રાયસ્પોષં ગૌપત્યમ્ । બ્રહ્મવર્ચસી
ભવતિ । એતાન્, યોઽધ્યૈતિ । સ્પૃણોત્યાત્માનમ્ । પ્રજાં પિતૄન્ । એતાન્,
વા અરુણ ઔપવેશિર્વિદાઞ્ચકાર ॥ ૩। ૧૨। ૫। ૩॥

૨૫ એતૈરધિવાદમપાજયત્ । અથો વિશ્વં પાપ્માનમ્ । સ્વર્યયૌ । એતાન્,
યોઽધ્યૈતિ । અધિવાદં જયતિ । અથો વિશ્વં પાપ્માનમ્ । સ્વરેતિ ।
એતૈરગ્નિં ચિન્વીત સ્વર્ગકામઃ । એતૈરાયુષ્કામઃ । પ્રજા પશુકામો વા ॥
૩। ૧૨। ૫। ૪॥

૨૬ પુરસ્તાદ્દશહોતારમુદઞ્ચમુપદધાતિ યાવત્પદમ્ । હૃદયં
યજુષી પત્ન્યૌ ચ । દક્ષિણતઃ પ્રાઞ્ચં ચતુર્હોતારમ્ ।
પશ્ચાદુદઞ્ચં પઞ્ચહોતારમ્ । ઉત્તરતઃ પ્રાઞ્ચꣳ ષડ્ઢોતારમ્ ।
ઉપરિષ્ટાત્પ્રાઞ્ચꣳસપ્તહોતારમ્ । હૃદયં યજૂꣳષિ પત્ન્યશ્ચ ।

યથાવકાશં ગ્રહાન્ । યથાવકાશં પ્રતિગ્રહાં લ્લોકંપૃણાશ્ચ
। સર્વા હાસ્યૈતા દેવતાઃ પ્રીતા અભીષ્ટા ભવન્તિ ॥ ૩। ૧૨। ૫। ૫॥

૨૭ સદેવમગ્નિં ચિનુતે । રથસંમિતશ્ચેતવ્યઃ । વજ્રો વૈ રથઃ ।
વજ્રેણૈવ પાપ્માનં ભ્રાતૃવ્યરઁ સ્તૃણુતે । પક્ષઃ સંમિતશ્ચેતવ્યઃ
। એતાવાન્ વૈ રથઃ । યાવત્પક્ષઃ । રથસંમિતમેવ ચિનુતે । ઇમમેવ
લોકં પશુબન્ધેનાભિજયતિ । અથો અગ્નિષ્ટોમેન ॥ ૩। ૧૨। ૫। ૬॥

૨૮ અન્તરિક્ષમુક્થ્યેન । સ્વરતિરાત્રેણ । સર્વાન્ લોકાનહીનેન । અથો
સત્રેણ । વરો દક્ષિણા । વરેણૈવ વરઞ્ સ્પૃણોતિ । આત્મા હિ વરઃ ।
એકવિરઁ શતિર્દક્ષિણા દદાતિ । એકવિરઁ શો વા ઇતઃ સ્વર્ગો લોકઃ ।
પ્ર સ્વર્ગં લોકમાપ્નોતિ ॥ ૩। ૧૨। ૫। ૭॥

૨૯ અસાવાદિત્ય એકવિરઁ શઃ । અમુમેવાદિત્યમાપ્નોતિ । શતં દદાતિ ।
શતાયુઃ પુરુષઃ શતેન્દ્રિયઃ । આયુષ્યેવેન્દ્રિયે પ્રતિતિષ્ઠતિ । સહસ્રં
દદાતિ । સહસ્રસંમિતઃ સ્વર્ગો લોકઃ । સ્વર્ગસ્ય લોકસ્યાભિજિત્યૈ ।
અન્વિષ્ટકં દક્ષિણા દદાતિ । સર્વાણિ વયાઁસિ ॥ ૩। ૧૨। ૫। ૮॥

૩૦ સર્વસ્યાપ્ત્યૈ । સર્વસ્યાવરુદ્ધ્યૈ । યદિ ન વિન્દેત । મન્થાનેતાવતો
દદ્યાદોદનાન્, વા । અશ્નુતે તં કામમ્ । યસ્મૈ કામાયાગ્નિશ્ચીયતે ।
પષ્ઠૌહીં ત્વન્તર્વતીં દદ્યાત્ । સા હિ સર્વાણિ વયાઁસિ । સર્વસ્યાપ્ત્યૈ
। સર્વસ્યાવરુદ્ધ્યૈ ॥ ૩। ૧૨। ૫। ૯॥

૩૧ હિરણ્યં દદાતિ । હિરણ્યજ્યોતિરેવ સ્વર્ગં લોકમેતિ । વાસો દદાતિ । તેનાયુઃ
પ્રતિરતે । વેદિતૃતીયે યજેત । ત્રિષત્યા હિ દેવાઃ । સ સત્યમગ્નિં
ચિનુતે । તદેતત્પશુબન્ધે બ્રાહ્મણં બ્રૂયાત્ । નેતરેષુ યજ્ઞેષુ । યો હ
વૈ ચતુર્હોતૃનનુસવનં તર્પયિતવ્યાન્ વેદ ॥ ૩। ૧૨। ૫। ૧૦॥

૩૨ તૃપ્યતિ પ્રજયા પશુભિઃ । ઉપૈનરઁ સોમપીથો નમતિ । એતે વૈ
ચતુર્હોતારોઽનુસવનં તર્પયિતવ્યાઃ । યે બ્રાહ્મણા બહુવિદઃ । તેભ્યો
યદ્દક્ષિણા ન નયેત્ । દુરિષ્ટરઁ સ્યાત્ । અગ્નિમસ્ય વૃઞ્જીરન્ । તેભ્યો
યથાશ્રદ્ધં દદ્યાત્ । સ્વિષ્ટમેવૈતત્ક્રિયતે । નાસ્યાગ્નિં વૃઞ્જતે ॥ ૩। ૧૨। ૫। ૧૧॥

૩૩ હિરણ્યેષ્ટકો ભવતિ । યાવદુત્તમમઙ્ગુલિકાણ્ડં યજ્ઞપરુષા
સંમિતમ્ । તેજો હિરણ્યમ્ । યદિ હિરણ્યં ન વિન્દેત્ । શર્કરા અક્તા ઉપદધ્યાત્
। તેજો ઘૃતમ્ । સતેજસમેવાગ્નિં ચિનુતે । અગ્નિં ચિત્વા સૌત્રામણ્યા યજેત
મૈત્રાવરુણ્યા વા । વીર્યેણ વા એષ વ્યૃદ્ધ્યતે । યોઽગ્નિં ચિનુતે ।

૩૪ યાવદેવ વીર્યમ્ । તદસ્મિન્દધાતિ । બ્રહ્મણઃ સાયુજ્યꣳ સલોકતામાપ્નોતિ
। એતાસામેવ દેવતાનાꣳ સાયુજ્યમ્ । સાર્ષ્ટિતાꣳસમાન લોકતામાપ્નોતિ
। ય એતમગ્નિં ચિનુતે । ય ઉ ચૈનમેવં વેદ । એતદેવ સાવિત્રે
બ્રાહ્મણમ્ । અથો નાચિકેતે ॥ ૩। ૧૨। ૫। ૧૨॥ હોતા ચતુર્હોતૃણાગ્ સ્રુતિશ્ચકાર
વા ભવન્ત્યગ્નિષ્ટોમેનાપ્નોતિ વયાꣳસિ વયાꣳસિ સર્વસ્યાપ્ત્યૈ
સર્વસ્યાવરુધ્યૈ વેદ વૃઞ્જતે ચિનુતે નવ ચ ॥ ૫॥

૩૫ યચ્ચામૃતં યચ્ચ મર્ત્યમ્ । યચ્ચ પ્રાણિતિ યચ્ચ ન । સર્વાસ્તા
ઇષ્ટકાઃ કૃત્વા । ઉપ કામદુઘા દધે । તેનર્ષિણા તેન બ્રહ્મણા । તયા
દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ । સર્વાઃ સ્ત્રિયઃ સર્વાન્ પુꣳસઃ । સર્વં
ન સ્ત્રીપુમં ચ યત્ । સર્વાસ્તાઃ । યાવન્તઃ પાꣳસવો ભૂમેઃ ॥ ૩। ૧૨। ૬। ૧॥

૩૬ સંખ્યાતા દેવમાયયા । સર્વાસ્તાઃ । યાવન્ત ઊષાઃ પશૂનામ્ । પૃથિવ્યાં
પુષ્ટિર્હિતાઃ । સર્વાસ્તાઃ । યાવતીઃ સિકતાઃ સર્વાઃ । અપ્સ્વન્તશ્ચ યાઃ
શ્રિતાઃ । સર્વાસ્તાઃ । યાવતીઃ શર્કરા ધૃત્યૈ । અસ્યાં પૃથિવ્યામધિ
॥ ૩। ૧૨। ૬। ૨॥

૩૭ સર્વાસ્તાઃ । યાવન્તોઽશ્માનોઽસ્યાં પૃથિવ્યામ્ । પ્રતિષ્ઠાસુ પ્રતિષ્ઠિતાઃ
। સર્વાસ્તાઃ । યાવતીર્વીરુધઃ સર્વાઃ । વિષ્ઠિતાઃ પૃથિવીમનુ । સર્વાસ્તાઃ ।
યાવતીરોષધીઃ સર્વાઃ । વિષ્ઠિતાઃ પૃથિવીમનુ । સર્વાસ્તાઃ ॥ ૩। ૧૨। ૬। ૩॥

૩૮ યાવન્તો વનસ્પતયઃ । અસ્યાં પૃથિવ્યામધિ । સર્વાસ્તાઃ ।
યાવન્તો ગ્રામ્યાઃ પશવઃ સર્વે । આરણ્યાશ્ચ યે । સર્વાસ્તાઃ ।
યે દ્વિપાદશ્ચતુષ્પાદઃ । અપાદ ઉદરસર્પિણઃ । સર્વાસ્તાઃ ।
યાવદાઞ્જનમુચ્યતે ॥ ૩। ૧૨। ૬। ૪॥

૩૯ દેવત્રા યચ્ચ માનુષમ્ । સર્વાસ્તાઃ । યાવત્કૃષ્ણાયસꣳ સર્વમ્
। દેવત્રા યચ્ચ માનુષમ્ । સર્વાસ્તાઃ । યાવલ્લોહાયસꣳ સર્વમ્ ।

દેવત્રા યચ્ચ માનુષમ્ । સર્વાસ્તાઃ । સર્વꣳ સીસꣳ સર્વં ત્રપુ
। દેવત્રા યચ્ચ માનુષમ્ ॥ ૩। ૧૨। ૬। ૫॥

૪૦ સર્વાસ્તાઃ । સર્વꣳ હિરણ્યꣳ રજતમ્ । દેવત્રા યચ્ચ માનુષમ્
। સર્વાસ્તાઃ । સર્વꣳ સુવર્ણꣳ હરિતમ્ । દેવત્રા યચ્ચ
માનુષમ્ । સર્વાસ્તા ઇષ્ટકાઃ કૃત્વા । ઉપ કામદુઘા દધે । તેનર્ષિણા
તેન બ્રહ્મણા । તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૨। ૬। ૬॥

ભૂમેરધિ વિષ્ઠિતાઃ પૃથિવીમનુ સર્વાસ્તા ઉચ્યતે માનુષꣳ સીદ ॥
૬॥ યચ્ચ સ્ત્રિયઃ પાꣳસવ ઊષાઃ સિકતાઃ શર્કરા અશ્માનો વીરુધ
ઓષધીર્વનસ્પતયો ગ્રામ્યા યે દ્વિપાદો યાવદાઞ્જનં યાવત્કૃષ્ણાયસં
લોહાયસꣳ સીસꣳ હિરણ્યꣳ સુવર્ણꣳ હરિતમષ્ટાદશ
॥

૪૧ સર્વા દિશો દિક્ષુ । યચ્ચાન્તર્ભૂતં પ્રતિષ્ઠિતમ્ । સર્વાસ્તા
ઇષ્ટકાઃ કૃત્વા । ઉપ કામદુઘા દધે । તેનર્ષિણા તેન બ્રહ્મણા ।
તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ । અન્તરિક્ષં ચ કેવલમ્ ।
યચ્ચાસ્મિન્નન્તરાહિતમ્ । સર્વાસ્તાઃ । આન્તરિક્ષ્યશ્ચ યાઃ પ્રજાઃ ॥ ૩। ૧૨। ૭। ૧॥

૪૨ ગન્ધર્વાપ્સરસશ્ચ યે । સર્વાસ્તાઃ । સર્વાનુદારાન્થ્સલિલાન્ ।
અન્તરિક્ષે પ્રતિષ્ઠિતાન્ । સર્વાસ્તાઃ । સર્વાનુદારાન્થ્સલિલાન્ । સ્થાવરાઃ
પ્રોષ્યાશ્ચ યે । સર્વાસ્તાઃ । સર્વાં ધુનિꣳ સર્વાન્ધ્વꣳસાન્ ।
હિમો યચ્ચ શીયતે ॥ ૩। ૧૨। ૭। ૨॥

૪૩ સર્વાસ્તાઃ । સર્વાન્મરીચીન્ વિતતાન્ । નીહારો યચ્ચ શીયતે । સર્વાસ્તાઃ
। સર્વા વિદ્યુતઃ સર્વાન્થ્સ્તનયિત્નૂન્ । હ્રાદુનીર્યચ્ચ શીયતે । સર્વાસ્તાઃ
। સર્વાઃ સ્રવન્તીઃ સરિતઃ । સર્વમપ્સુચરં ચ યત્ । સર્વાસ્તાઃ ॥ ૩। ૧૨। ૭। ૩॥

૪૪ યાશ્ચ કૂપ્યા યાશ્ચ નાદ્યાઃ સમુદ્રિયાઃ । યાશ્ચ વૈશન્તીરુત
પ્રાસચીર્યાઃ । સર્વાસ્તાઃ । યે ચોત્તિષ્ઠન્તિ જીમૂતાઃ । યાશ્ચ વર્ષન્તિ
વૃષ્ટયઃ । સર્વાસ્તાઃ । તપસ્તેજ આકાશમ્ । યચ્ચાકાશે પ્રતિષ્ઠિતમ્ ।
સર્વાસ્તાઃ । વાયું વયાꣳસિ સર્વાણિ ॥ ૩। ૧૨। ૭। ૪॥

૪૫ અન્તરિક્ષચરં ચ યત્ । સર્વાસ્તાઃ । અગ્નિઁ સૂર્યં ચન્દ્રમ્ ।
મિત્રં વરુણં ભગમ્ । સર્વાસ્તાઃ । સત્યરઁ શ્રદ્ધાં તપો દમમ્ । નામ
રૂપં ચ ભૂતાનામ્ । સર્વાસ્તા ઇષ્ટકાઃ કૃત્વા । ઉપ કામદુઘા દધે ।
તેનર્ષિણા તેન બ્રહ્મણા । તયા દેવતયાઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૨। ૭। ૫॥ પ્રજા હિમો યચ્ચ શીયતે
સર્વાસ્તાઃ સર્વાણિ બ્રહ્મણૈકં ચ ॥
૭॥ દિશોઽન્તરિક્ષમાન્તરિક્ષ્ય ઉદારાનુદારાન્ધુનિં મરીચીન્, વિદ્યુતઃ
સ્રવન્તીર્યાશ્ચ યે ચ તપો વાયુમગ્નિઁ સત્યં પઞ્ચદશ ॥

૪૬ સર્વાન્દિવઁ સર્વાન્દેવાન્દિવિ । યચ્ચાન્તર્ભૂતં પ્રતિષ્ઠિતમ્ ।
સર્વાસ્તા ઇષ્ટકાઃ કૃત્વા । ઉપ કામદુઘા દધે । તેનર્ષિણા તેન બ્રહ્મણા ।
તયા દેવતયાઙ્ગિરસ્વદ્ધ્રુવા સીદ । યાવતીસ્તારકાઃ સર્વાઃ । વિતતા
રોચને દિવિ । સર્વાસ્તાઃ । ઋચો યજૂઁષિ સામાનિ ॥ ૩। ૧૨। ૮। ૧॥

૪૭ અથર્વાઙ્ગિરસશ્ચ યે । સર્વાસ્તાઃ । ઇતિહાસપુરાણં ચ
। સર્પદેવજનાશ્ચ યે । સર્વાસ્તાઃ । યે ચ લોકા યે ચાલોકાઃ ।
અન્તર્ભૂતં પ્રતિષ્ઠિતમ્ । સર્વાસ્તાઃ । યચ્ચ બ્રહ્મ યચ્ચાબ્રહ્મ ।
અન્તર્બ્રહ્મન્પ્રતિષ્ઠિતમ્ ॥ ૩। ૧૨। ૮। ૨॥

૪૮ સર્વાસ્તાઃ । અહોરાત્રાણિ સર્વાણિ । અર્ધમાસાઙ્શ્ચ કેવલાન્ । સર્વાસ્તાઃ
। સર્વાનૃતૂન્થ્સર્વાન્માસાન્ । સંવથ્સરં ચ કેવલમ્ । સર્વાસ્તાઃ ।
સર્વં ભૂતઁ સર્વં ભવ્યમ્ । યચ્ચાતોઽધિ ભવિષ્યતિ । સર્વાસ્તા
ઇષ્ટકાઃ કૃત્વા । ઉપ કામદુઘા દધે । તેનર્ષિણા તેન બ્રહ્મણા । તયા
દેવતયાઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ ૩। ૧૨। ૮। ૩॥ સામાનિ બ્રહ્મન્પ્રતિષ્ઠિતં
કૃત્વા ત્રીણિ ચ ॥ ૮॥ દિવં તારકા ઋચ ઇતિહાસપુરાણં ચ યે ચ
યચ્ચાહોરાત્રાણ્યૃતૂન્ભૂતં નવ ॥

૪૯ ઋચાં પ્રાચી મહતી દિગુચ્યતે । દક્ષિણામાહુર્યજુષામપારામ્ ।
અથર્વણામંગિરસાં પ્રતીચી । સામ્નામુદીચી મહતી દિગુચ્યતે । ઋગ્ભિઃ
પૂર્વાહ્ણે દિવિ દેવ ઈયતે । યજુર્વેદે તિષ્ઠતિ મધ્યે અહ્નઃ
। સામવેદેનાસ્તમયે મહીયતે । વેદૈરશૂન્યસ્ત્રિભિરેતિ સૂર્યઃ ।
ઋગ્ભ્યો જાતાઁ સર્વશો મૂર્તિમાહુઃ । સર્વા ગતિર્યાજુષી હૈવ શશ્વત્

॥ ૩। ૧૨। ૯। ૧॥

૫૦ સર્વં તેજઃ સામરૂપ્યꣳ હ શશ્વત્ । સર્વꣳહેદં બ્રહ્મણા
હૈવ સૃષ્ટમ્ । ઋગ્ભ્યો જાતં વૈશ્યં વર્ણમાહુઃ । યજુર્વેદં
ક્ષત્રિયસ્યાહુર્યોનિમ્ । સામવેદો બ્રાહ્મણાનાં પ્રસૂતિઃ । પૂર્વે
પૂર્વેભ્યો વચ એતદૂચુઃ । આદર્શમગ્નિં ચિન્વાનાઃ । પૂર્વે
વિશ્વસૃજોઽમૃતાઃ । શતં વર્ષ સહસ્રાણિ । દીક્ષિતાઃ સત્રમાસત
॥ ૩। ૧૨। ૯। ૨॥

૫૧ તપ આસીદ્ગૃહપતિઃ । બ્રહ્મ બ્રહ્માઽભવથ્સ્વયમ્ । સત્યꣳ હ
હોતૈષામાસીત્ । યદ્વિશ્વસૃજ આસત । અમૃતમેભ્ય ઉદગાયત્ ।
સહસ્રં પરિવથ્સરાન્ । ભૂતꣳ હ પ્રસ્તોતૈષામાસીત્ । ભવિષ્યત્પ્રતિ
ચાહરત્ । પ્રાણો અધ્વર્યુરભવત્ । ઇદꣳ સર્વꣳ સિષાસતામ્ ॥ ૩। ૧૨। ૯। ૩॥

૫૨ અપાનો વિદ્વાનાવૃતઃ । પ્રતિ પ્રાતિષ્ઠદધ્વરે । આર્તવા
ઉપગાતારઃ । સદસ્યા ઋતવોઽભવન્ । અર્ધમાસાશ્ચ માસાશ્ચ
। ચમસાધ્વર્યવોઽભવન્ । અશꣳસદ્બ્રહ્મણસ્તેજઃ
। અચ્છાવાકોઽભવદ્યશઃ । ઋતમેષાં પ્રશાસ્તાઽઽસીત્ ।
યદ્વિશ્વસૃજ આસત ॥ ૩। ૧૨। ૯। ૪॥

૫૩ ઊર્ગ્રાજાનમુદવહત્ । ધ્રુવગોપઃ સહોઽભવત્ । ઓજોઽભ્યષ્ટૌદ્ગ્રાવ્ણઃ ।
યદ્વિશ્વસૃજ આસત । અપચિતિઃ પોત્રીયામયજત્ । નેષ્ટ્રીયામયજત્ત્વિષિઃ
। આગ્નીદ્ધ્રાદ્વિદુષી સત્યમ્ । શ્રદ્ધા હૈવાયજથ્સ્વયમ્ । ઇરા પત્ની
વિશ્વસૃજામ્ । આકૂતિરપિનડ્ઢવિઃ ॥ ૩। ૧૨। ૯। ૫॥

૫૪ ઇધ્મꣳ હ ક્ષુચ્ચૈભ્ય ઉગ્રે । તૃષ્ણા ચાવહતામુભે । વાગેષાꣳ
સુબ્રહ્મણ્યાઽઽસીત્ । છન્દોયોગાન્, વિજાનતી । કલ્પતન્ત્રાણિ તન્વાનાઽહઃ
। સગ્ગ્સ્થાશ્ચ સર્વશઃ । અહોરાત્રે પશુપાલ્યૌ । મુહૂર્તાઃ પ્રેષ્યા
અભવન્ । મૃત્યુસ્તદભવદ્ધાતા । શમિતોગ્રો વિશાં પતિઃ ॥ ૩। ૧૨। ૯। ૬॥

૫૫ વિશ્વસૃજઃ પ્રથમાઃ સત્રમાસત । સહસ્રસમં પ્રસુતેન યન્તઃ
। તતો હ જજ્ઞે ભુવનસ્ય ગોપાઃ । હિરણ્મયઃ શકુનિર્બ્રહ્મ નામ ।
યેન સૂર્યસ્તપતિ તેજસેદ્ધઃ । પિતા પુત્રેણ પિતૃમાન્, યોનિ યોનૌ ।

નાવેદવિન્મનુતે તં બૃહન્તમ્ । સર્વાનુભુમાત્માનꣳસંપરાયે । એષ
નિત્યો મહિમા બ્રાહ્મણસ્ય । ન કર્મણા વર્ધતે નો કનીયાન્ ॥ ૩। ૧૨। ૯। ૭॥
૫૬ તસ્યૈવાત્મા પદવિત્તં વિદિત્વા । ન કર્મણા લિપ્યતે પાપકેન ।
પઞ્ચપઞ્ચાશતસ્ત્રિવૃતઃ સંવથ્સરાઃ । પઞ્ચપઞ્ચાશતઃ
પઞ્ચદશાઃ । પઞ્ચપઞ્ચાશતઃ સપ્તદશાઃ । પઞ્ચ પઞ્ચાશત
એકવિꣳશાઃ । વિશ્વસૃજાꣳસહસ્રસંવથ્સરમ્ । એતેન
વૈ વિશ્વસૃજ ઇદં વિશ્વમસૃજન્ત । યદ્વિશ્વમસૃજન્ત ।
તસ્માદ્વિશ્વસૃજઃ । વિશ્વમેનાનનુ પ્રજાયતે । બ્રહ્મણઃ સાયુજ્યꣳ
સલોકતાં યન્તિ । એતાસામેવ દેવતાનાꣳ સાયુજ્યમ્ । સાર્ષ્ટિતાꣳસમાન
લોકતાં યન્તિ । ય એતદુપયન્તિ । યે ચૈનત્પ્રાહુઃ । યેભ્યશ્ચૈનત્પ્રાહુઃ
। (ઓમ્) (સંપ્રદાયદલ્લિ હેળુવુદિલ્લ) ॥ ૩। ૧૨। ૯। ૮॥

શશ્વદાસત સિષાસતામાસત હવિષ્પતિઃ કનીયાન્તસ્માદ્વિશ્વસૃજોઽષ્ટૌ
ચ ॥ ૯॥

તુભ્યં દેવેભ્યસ્તપસા દેવેભ્યો બ્રહ્મ વૈ ચતુર્ હોતારો
યચ્ચામૃતꣳ સર્વા દિશો દિક્ષુ સર્વાં દિવમૃચાં પ્રાચી નવ ॥ ૯॥

તુભ્યં તપસા તા વા એતાઃ પઞ્ચ હિરણ્યં દદાતિ સર્વા દિશસ્તપ
આસીદ્ગૃહપતિઃ ષટ્પઞ્ચાશત્ ॥ ૫૬॥

તુભ્યં યેભ્યશ્ચૈનત્પ્રાહુઃ ॥

(તુભ્યમોમ્) ॥ (સંપ્રદાયદલ્લિ હેળુવુદિલ્લ)

ઇતિ કાઠકં સંપૂર્ણમ્ ॥

ઇતિ તૈત્તિરીય-બ્રાહ્મણમ્ ॥

આભિર્ગીર્ભિર્યદતો ન ઊનમાપ્યાયય હરિવો વર્ધમાનઃ ।
યદા સ્તોતૃભ્યો મહિ ગોત્રા રુજાસિ ભૂયિષ્ઠભાજો અધ તે સ્યામ ॥
બ્રહ્મ પ્રાવાદિષ્મ તન્નો મા હાસીત્ ॥
ઓં શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥
॥ હરિઃ ઓ(૩)મ્ ॥

॥ શ્રી કૃષ્ણાર્પણમસ્તુ ॥

Encoded and proofread by Muralidhara B A muraliba at gmail.com
Shri muralidhar has studied kRRiShNayajurveda
from his father Anathakrishna, Proffessor in Chamarajendra
Sanskrit College, Chamarajpet, Bangalore. Muralidhar received
MA from Karnataka Samskrit University.

---

*Taittiriya Brahmanam*
pdf was typeset on July 7, 2023

Please send corrections to *sanskrit@cheerful.com*